Vindhya Paper mills Ltd. 783.

[काव्येतिहास-संग्रहांतर्गतम्]

८.

पंतविठ्ठलविरचितं

सुश्लोकलाघवम्

सटीकम्

इदं

बी. ए. उपपदधारिणा साने इत्युपनामधेयेन

नारायणसूनुना काशिनाथेन

सुसंस्कृत्य प्रकाशितम्.

तच्च पुण्यपत्तनस्थितज्ञानप्रकाशनाम्नि मुद्रणयंत्रालये

शीसकीलमुद्राक्षरैः

मुद्रितम्.

शालिवहानशकाब्दाः १८०७.

पंतविठ्ठलकृतं

सुश्लोकलाघवम्.

अलंकृतिपरिष्कृतः सुरसभावने पंडितः ।
प्रनष्टखरदूषणः प्रथितचारुवृत्तान्वितः ॥
प्रमोदयति यः सतः सुगुणकः स्वकश्लोकतः ।
प्रभू रविकुलाग्रणीः कविरिव प्रभ्राजते ॥ १ ॥
पद्मोल्लासकरं द्विजेश्वरभृतं गोपालकं सद्गुणैः ।
संसेव्यं हरिसादरं मधुपरोत्कंठं गिरीशाश्रितम् ॥
भक्त्या नौमि निरंतरं मुरहरं लंबोदरं शंकरं ।
देवं तिग्मकरं हरप्रियतरं तेजो जगत्सुंदरम् ॥ २ ॥

श्रीगणेशाय नमः ॥ श्रीरामचंद्रचरणाभ्यां नमः ॥ श्रीगुरुभ्यो नमः ॥ पूर्णकामं गुणग्रामं विश्रामं कामविद्विषः ॥ कामाभिरामं श्रीरामं मेघश्यामं नमाम्यहं ॥१॥ अलंकृतीति । अलंकारभूषितोऽलंकारशास्त्रे निष्णातश्च । देवसमाजरक्षणे सुष्ठु शृंगारादिरसविभावने च । खरदूषणं प्रखरदूषणं रलयोः सावर्ण्यात्खलकृतदूषणं वा तन्नामानौ राक्षसौ च । वृत्तं चरित्रं शार्दूलविक्रीडितादि च । गुणो दयादाक्षिण्यादिः कांत्यादिश्च कामलक्षणे प्रसिद्धः प्रसादादिश्च । श्लोकः कीर्तिः पद्यं च ॥ १ ॥

नमस्क्रियारूपमाह द्वाभ्याम् । पद्मोति । (वि०) लक्ष्मीविनोदकरं । (ग०) बिंदुजालकाविर्भावश्रुद्धं । पद्मकं बिंदुजालकमित्यमरः । पद्मोऽस्त्री पद्मके व्यूह इति मेदिनी । (शं०) पद्माख्यासनसंश्लेषकरं । (सू०) कमलविकासिकिरणम् । (दे०) कमलवच्छोभमानहस्तं । द्विजेति । (वि०) गरुडपोषकम् । (ग०) महादन्तधारिणम् । (शं०) चंद्रचूडं । (सू०) चंद्रपोषकम् । स हि सूर्यप्रकाशेन वर्धते ! ब्राह्मणरक्षकं वा । (दे०) सुरथसमाधिनामकक्षत्रवैश्यरक्षकम् । (वि०) गौर्धेनुः । (ग०) सरस्वती । (शं) नंदी । (सू०) किरणश्च तत्पालकम् । (दे०) गोपः कृष्णस्तल्लक्षितः । कृष्णवर्णस्तादृशो यद्वा गा जलं पाति स मेघस्तद्वद्वा अलका यस्य । सद्गुणैरिति । (वि०) सात्वतगणाः । (ग०) प्रमोदादयश्च । गणानांत्वेति मंत्रलिंगात् । (शं०) प्रमथादयश्च । (सू०) वेदगणाश्च त्रयीमयत्वादुषित्वादिश्य सन्मार्गमित्यादौ सच्छब्दस्य वेदपरत्वदर्शनात् । (दे०) देवतागणाश्च ब्रह्मादिभिः स्त्रीरूपाणि कृत्वा सेवितत्वात् । ब्राह्मी हंससमारूढेत्यादि चंडीस्तवे प्रसिद्धं । हरीति (वि०) हली बलभद्रस्तत्र सादरं । रलयोरैक्यात् । (ग०) हरयः हरिद्वर्णा ये शादास्तृणानि दूर्वा इति

महेशार्धेंदुलसित बिंदुभूतामराणग ॥
शक्त्याश्लिष्टतनो शांत जगद्बीजाय ते नमः ॥ ३ ॥
अवनप्रवणो नित्यं कृतकुंजररंजनः ॥
करोतु कुशलं कोऽपि हरिर्वः खलदुःसहः ॥ ४ ॥
सुविचित्रबाणरचनं सुजनाः सुश्लोकलाघवं श्रयत ॥
स्पष्टं नृणां प्रतिष्ठा दृष्टा नूनं यतो जनस्थाने ॥ ५ ॥
न त्याज्यं सहजं सदोषमपि हे कौंतेय कर्म स्वकं ।
प्रारंभः सकलः सदोष इ[illegible] हि श्रीवासुदेवो जगौ ॥
तत्काव्यप्रतिभा यतश्च [illegible]जा नो कृत्रिमातो बुधा-
स्त्यक्त्वा दोषभयं सुदूरतरतो युक्तोऽभवद्विठ्ठलः ॥ ६ ॥

यावत्ता लाति गृह्णाति तं । शादो जंबालशष्पयोरित्यमरः । सशयो रलयोश्चैक्यं । (शं०) हरौ विष्णौ सादरं । (सू०) हरिभिरश्वैर्यः सादो गतिः षड्ल्गत्यादीतां लाति । (दे०) हरिणा सिंहेन यः सादो गतिस्तां लाति तत् । मध्विति (वि०) मधुनामा यः परः शत्रुस्तमुद्गतकंठं करोति तं । (ग०) मधुनि ये परा भृंगास्तेषामुत्कंठा यस्मिन् मदोदकसंभृतत्वात् । (शं०)मधुपा भृंगा रा मेघाश्च तद्वदुत्कृष्टः कंठो यस्य तं नीलकठंमित्यर्थः । रा स्वर्णे जलदे धन इति हैमः । (दे०) मधु मद्यं पलं मांसं च तयोरुत्कंठा यस्य तत् । गिरीति (वि०) गिरिशो गोवर्धनः । (ग०) शिवः । (शं०) कैलासः । (सू०) उदयाचलः । (दे०) हिमाचलः शिवो वा । तेजो देव्याख्यं ॥ २ ॥

महेशेति । अर्धेंदुरर्धचंद्रो नादश्च । बिंदुः पृषदनुस्वारश्च । शक्तिर्गौरी कला च । बीजाक्षरस्य बिंदुनादकलाशांताख्या अवयवास्तंत्रे प्रसिद्धाः । शांतत्वं तु महेशेति पदं दर्शयति । अर्थतस्तु नित्यसमाधिनिष्ठतयास्त्येव ॥ ३ ॥

आशीरूपं तृतीयमाह । अवनेति । वनप्रवणाद्गजघातकान्नखरदुर्धरात् प्रसिद्धासिंहादस्य वैलक्षण्यं ज्ञेयं ॥ ४ ॥

ग्रंथस्य प्रयोजनमाह । सुविचित्रेति । बाणरचना शरप्रयोगः शब्दविन्यासश्च । सुश्लोकलाघवं पुण्यश्लोकं रामभद्रमेतन्नामानं ग्रंथं च । प्रतिष्ठाऽवस्थानं सम्मानश्च जनस्थानं खरालयं नासिकेति प्रसिद्धं सभा च । राघवयोगेन जनस्थाने नृणां प्रतिष्ठा दृष्टाऽतस्तदपेक्षकैस्तदाश्रयणं कार्यमितिभावः ॥ ५ ॥

ननु काव्यस्य सर्वथा निर्दोषत्वेन रचयितुमशक्यत्वात् सदोषस्य च कुत्सावदत्वात्तत्र कथं प्रवृत्तिरित्यत आह । न त्याज्यमिति । प्रतिभा स्वाभाविकीया शक्तिः । कृत्रिमाक्रियानिर्वृत्ता । यतो हि सहजं कर्म कौंतेय सदोषमपि न त्यजेत् ॥ सर्वारंभा हि दोषेण धूमेनाग्निरिवावृता इति गीतायां ॥ ६ ॥

अज्ञानादथवा प्रमादवशतः काव्यं सदोषं भवे-
त्तच्छिद्रास्पदमित्युपक्रममिमं कुर्यां न वै नर्ह्यहम् ॥
कर्तुं हैहयराजपुंगवमिवाप्येतत्सदोषं पुन-
र्निर्दोषं न धृतव्रताः कविकुलोत्तंसा भवंतो यदि ॥ ७ ॥
पंतो यद्यहमेष माधवमिलन्मूर्धन्यमध्यास्थितो ।
दोषस्तर्हि न चाश्रयिष्यदणुरप्येतं प्रबंधं नवम् ॥
तस्माद्वेदपुराणशास्त्रनिपुणाः सभ्या भवंतः स्वयं ।
प्रायश्चित्तमिह प्रयच्छत ततो दोषः कुतः स्थास्यति ॥ ८ ॥
नूनं निसर्गतः कविरूढमलप्र[illegible] हि सरसानाम् ॥
प्रतिकूलतापि न भवेदनर्थकृत्क[illegible]वत्कदाचिदपि ॥ ९ ॥

किंच दोषोत्सारकाभावे तत्प्रवृत्तौ बाधकं नान्यथेत्याह । अज्ञानादिति । सदोषं दोषसहितं भुजसहितं च । निर्दोषं दोषरहितं भुजरहितं च । कविभिर्भार्गवः कवयिता च । सदोषं कार्तवीर्यं निर्दोषं कर्तुं भार्गव इव भवंतः कविकुलश्रेष्ठा यद्यत्र तत्काव्यं तथा कर्तुं न स्युश्चेदप्रवृत्तिः स्यादिति भावः ॥ ७ ॥

दोषोत्सारणमार्गं दर्शयति । पंत इति । यद्यहं पंतो भगवन्निश्रवरेण्यजनमध्ये गणनीयोऽभविष्यं तर्हीमं प्रबंधं दोषोऽणुरपि नाश्रयिष्यद्भगवन्निष्ठानां हि कार्तिं न केऽपि दूषयंति तत्पुण्यप्रभावात् । नह्ययं तादृशः । अथवा 'इंमाधवाय पुण्ड्रे नमः' इति केशवादिन्यासे दर्शनान्माधवस्य इकारवाचकत्वं तंत्रे प्रसिद्धं । तं मिलन् यो मूर्धन्यमध्यो डकारः । ऋटुरषाणां मूर्धेति टवर्गस्य मूर्धन्यत्वात् । तथा च डकारे कारसंयोगे डिरिति जातं तमास्थितोऽधिष्ठितः पंतः पंडितो भवति । पंडितकृतिषु दोषदर्शनेऽपि तेषां विद्वत्तया न केऽपि तं पश्यंति। ते तु महांतः कदाप्यन्यथा न करिष्यंतीति विश्वस्ताः । अहं सोऽपि न एवं च मय्युभयविधत्वाभावान्मत्कृतप्रबंधे दोषः संभवेदेव । परं त्वयं संभावितदोषः श्रीमत्पर्षदमागतस्तदत्र सर्वज्ञैः प्रायश्चित्तं नियोज्यं । दत्ते च तस्मिन्संभावितोऽपि दोषो नावतिष्ठेतेति भावः । यथात्रैवभव च्छब्दयोगे प्रयच्छेतेति मध्यमपुरुषप्रयोगोऽनुपपन्न इति दोषः । तत्र श्रीमद्भिर्भवंतीति भवंतः समर्था इति व्युत्पत्त्या प्रायश्चित्तं दत्तं चेच्छुद्धमिदं पद्यं भवति ॥ ८ ॥

ननु प्रायश्चित्तदानमानुकूल्य एव संभवेदिति चेत्तत्राह नूनमिति । कवौ रूढो मलो दोषः के जले विरूढो मलः कलुषता च । सरसानां सोत्साहानां सशक्तिविशेषाणां च । स्वभावतः कवितादोषमपहर्तुं सरसस्य जनस्य जलकलुषतामपहर्तुं शक्तस्य कतकस्य च प्रतिकूलतापि स्वेष्टहान्यै न भवति यत्सारसकतकशब्दौ प्रतिलोमतः पठितावपि तमेवार्थमभिदधात इति ॥ ९ ॥

किं काव्याद्विरमेयमत्र हि कथंचिद्दोषसंभावना-
त्र ह्येतत्तु निरूपणीयमबुधस्याग्रे विविच्य क्वचित् ॥
किंत्वेतस्य सतोऽसतोऽपि च पुनः पात्रं स्मृताः सूरयो ।
दोषावस्थितये तु किं कथय रे कल्पेत सूर्यागमः ॥ १० ॥
विविधार्थवशा कविता वेश्येव विभात्यतश्च तां प्रति यः ॥
भूषाकरणसमर्थो दोषासंगं स एव विदधातु ॥ ११ ॥
इतिहासपुराणागमविचक्षणा दूषणस्य बलिनोऽपि ॥
सुश्लोकलाघवस्य श्लोके ऽस्मिन्नामशेषतैव स्यात् ॥ १२ ॥
मूर्ध्न्यंजलिं विरचयन्मुहुर ... ऽहं ।
सुश्लोकलाघवमहो शृणुत ... मूयम् ॥
जायेत चेतसि ततः सुमहाप्रसादः ।
स्यादेव वागविषयः सहजप्रमोदः ॥ १३ ॥
सुश्लोकलाघवश्लोकं विचित्रानंददायकम् ॥
सकलाः स्पृहयंत्येव हरिदासा विशेषतः ॥ १४ ॥

किं च महतां समागम एव दोषनिर्बर्हणायेत्याह । किं काव्यादिति । दोषावस्थिति-र्दोषस्यावस्थानं रात्रेश्चावस्थानं । सूरीणां पंडितानामागमः समागमः सूर्योदयश्च । सद्वाऽसद्वा काव्यं सूरिभ्य एव दर्शनीयं न मूर्खेभ्यः । तत्र सूर्यागमो दोषावस्थितये कदापि न दृश्यत इति भावः । सूर्यागमश्चेद्दोषाभावो दोषावस्थानं चेत्सूर्यागम एव नेति मन्यामह इति ॥ १० ॥

किंच दोषासंजनमपि भूषाकरणसमर्थेनैव कार्यं नान्येनेत्याह । विविधेति । विवि-धार्थो नानाद्रव्याणि विविधार्थोद्भावनं च । भूषाकरणमंगप्रत्यंगेषु भूषणार्पणं सम्यगु-ल्लासनं च । दोषासंगं रात्रौ रत्युत्सवं दोषासंजनं च । एवं च भूषाकर्तुर्दोषोद्भावनं भूषणपर्यवसाय्येवेति भावः ॥ ११ ॥

दोषाभासेऽपि श्रीमद्भिर्विचारितेऽत्र दोषसद्भावो नस्यादेवेति सदृष्टांतमाह । इति-हासेति । दूषणस्य दोषस्य राक्षसविशेषस्य च । यथा रामचरिते पूर्वं दूषणस्य भास-मानत्वेऽप्यंते नामशेषतैवास्ते तथात्रेति भावः । अस्य ग्रंथस्य भगवद्गुणवर्णन-प्रधानतया 'तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि । नामान्य-नन्तस्य यशोऽकितानी' त्यादि भागवतोक्तेर्दृश्यमानस्यापि दोषस्यागणनीयत्वात् ॥ १२ ॥

यद्यप्येवं तथापि विद्वत्प्रणतिरेव सर्वार्थसाधनीत्याह मूर्ध्नीति । सत्कीर्ति राममेनं ग्रंथं च । । प्रसादः नैर्मल्यं चमत्कारश्च निर्वचनीयानंदः प्रमोदो मोक्षश्च ॥ १३ ॥

यत्सुश्लोकलाघवश्लोको निर्दोषोऽतः फलितमाह । सुश्लोकेति । सकलाः कलासहिताः सर्वे च । हरिदासा गोस्वामिनः भगवद्भिक्ताश्च ॥ १४ ॥

सुश्लोकलाघवश्लोकः प्रस्तुतो जनसंसदि ॥
न कस्मै रोचतां नूनमेकां खरद्यमूं विना ॥ १५ ॥
यदेवानिभृतं सत्यं तन्नित्यं वस्तु कीर्त्यते ॥
नास्त्येव या विचारेण सा मायेत्यभिधीयते ॥ १६ ॥
श्रीगुरोः करुणापांगपीयूषपिठरो हि यः ॥
न तमःसंभवा बाधा तस्य स्यादतिदुस्सहा ॥ १७ ॥
परमपदविजित्यै नैव सद्वंशभूति-
र्मतिरपि न वयो वा सद्गुरुः किंत्विहैकः ॥
इति कथयितुमीशः संसदस्तंभमध्या-
द्गुरु गुरु गुरु शब्दं व्याहरन्नाविरासीत् ॥ १८ ॥
नगघटितं चलघटितं जडोपरचितं च तत्कलोपचितम् ॥
मिथ्या सकल जगदिदं सत्यं किं तु प्रतिष्ठितं ब्रह्म ॥ १९ ॥

सुश्लोकेति । खरो राक्षसविशेषः रलयोः सावर्ण्यात् खलश्च गर्दभप्रायश्च ॥ १५ ॥

वेदांताधिकारिणां साधनचतुष्टयसम्पन्नत्वाच्चतुष्टये च नित्यानित्यवस्तुविवेकस्य मुख्यत्वात्तमेव दर्शयति । यदेवेति । यन्निभृतमत्यंतं देशतः कालतश्चेति यावत् सत्यं सतान्वयि तन्नित्यं ब्रह्मविकारेण भूतं युक्तं त्यकारेण सहितं सत्यं च नित्यमित्येव प्रतीयमानापि विचारेण या नास्ति सा माया तदनित्यं । मा शब्दो निषेधवाची मा नास्ति या सा माया विचारो विवेकः यद्वा विचारो विष्णुस्तदुपासनया ॥ १६ ॥

जगदाकारेण प्रतीयमानाज्ञानाभावस्य विचाराधीनत्वात्तस्य च गुरुकृपासाध्यत्वात्तमेव स्तौति । श्रीगुरोरिति । श्रीगुरोर्देशिकस्य बृहस्पतेश्च । तमोऽज्ञानं राहुश्च । गुरोरानुकूल्ये यथा राहुर्बाधितुं नेष्टे तथा देशिककृपायां सत्यामज्ञानं ॥ १७ ॥

इदं च साक्षाद्धरिरेवाहेत्याह । परमेति । गुरुगुरुगुरु इति सिंहस्य मंद्रशब्दानुकरणं न हि प्रन्हादस्याभिजनता न च मतिर्न च वयस्तथापि गर्भे नारदेनानुगृहीत इति तदर्थे ममैतादृग्रूपभाक्त्वं संप्रतिपन्नं तस्माद्गुरोरन्यन्मत्प्राप्तये साधनं नास्तीति हर्षव्याकुल तया तादृशशब्दं व्याहरन् नृसिंह आविरभूदिति ॥ १८ ॥

सद्गुरुरुपदिशति अध्यारोपापवादन्यायेनेत्याह । नगघटितमिति । हे सौम्य इदं दृश्यमानं सकलजगत् किंचिन्नगैः स्थावरैर्घटितं किंचिच्चलैर्जंगमैर्घटितं स्थावरजंगमात्मकमस्ति । एतत्सर्वं जडोपरचितं विद्धि । जडेनाज्ञानेनोपरचितं ननु जडेन केवलेनोपरचनं कथं स्यादिति चेत् तत्कलोपचितं तस्य ब्रह्मणो या कला ईक्षणरूपा शक्तिस्तयोपचितं समृद्धं एवमध्यारोपमुक्त्वापवादमाह । इदं सकलजगत् मिथ्यासत्यत्वेन ब्रह्मैवावशिष्यते रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववत् । शब्दतोऽपीदं निरूपयितुं शक्यते । यथा सकलजगत् नगघटितं गकारेण च घटितं न भवति गकारो गतः । अवशिष्टं

मायाब्रह्मसमागमादुदितवानेष प्रपंचो मृषे-
त्येवं सत्यपि सत्यतामुपदिशंत्येकेऽस्यतान् (तत्) किं ब्रुवे ॥
आदौ ब्रह्म नपुंसकं सुविदितं जायास्य माया वशा ।
किं ताभ्यामुदितस्य तस्य जगतः सत्यत्वगंधोऽप्यहो ॥ २० ॥
वंध्यायास्तनयः सुगंधिसिकतातैलैः समभ्यज्य च ।
स्नात्वा मांगलिकैः कुरंगसलिलैर्धृत्वा खपुष्पस्रजम् ॥
कर्तुं वांछति गार्दभेन विधिना षंढस्य पुत्र्या सहो-
द्वाहं तत्र च दक्षिणा चल सखे पारेपरार्धं मिलेत् ॥ २१ ॥
शैलाधीशधरः कुमारस्तुषितः सत्याऽन्वितोऽब्जांकितो ।
गंगाभूतियुतो विनायकहितश्चक्षुःश्रवो भूषितः ॥
इत्थं नाम मनागपि प्रथयते नोमाधवो माधवा-
द्भेदं यश्च विभाति सोऽतिमगुणस्थानोत्थितो नान्यथा ॥ २२ ॥

सकलजत् पुनश्च लघटितं चकारान्नेत्यनुकृष्यते लकारघटितं न भवति । लकारो गतः । अवशिष्टं सकजत् पुनर्नैडोपरचितं जकारस्य लोपस्तेन रचितं यस्मिन् डलयोरैक्यात्जकारो गतः । अवशिष्टं सकत् पुनस्तत्कलोपचितं यदवशिष्टं तत् कस्य लोपस्तेन चितं युक्तं ककारो गतः । अवशिष्टं सत् ब्रह्म जगत आद्यावंते च तदेवावशिष्यते । एतदेतस्य स्वरूपचर्ययैव ज्ञायत इति ध्येयं ॥ १९ ॥

एवं मिथ्यारूपस्यास्य प्रपंचस्य सत्यतामुपदिशतः कांश्चिद्विदुष उपालभते । मायेति । सुविदितं सर्वैः सर्वत्रज्ञातं तत्प्रति जगदुत्पादने तस्य माया स्त्री वशा। वंध्या वशीभूता च नपुंसकाद्वंध्यायाबहून्यपत्यानि जातानीत्युक्ते यो नाम प्रमाता दृढं विश्वसेत् सोऽत्र विश्वसेदिति ॥ २० ॥

एतत्प्रपंचार्थमेव तज्जातीयं पद्यं निबध्नाति । वंध्यायास्तनय इति । कस्यचिद्दक्षिणार्थिनो याचकस्यान्यं तादृशं प्रति उक्तिरियं परार्धस्य । पार इति पारेपरार्धं संख्या तु परार्धपर्यंता तदूर्ध्वं संख्याभावात् ॥ २१ ॥

एवमद्वैतसिद्धौ यत्पुनर्द्वैतं भासते तन्मायागुणकृतं नान्यथेत्यत्र निदर्शनमाह । शैलेति । कैलासे धरतेऽवतिष्ठते तथोक्तः । धृङ् अवस्थाने । गोवर्धनधरश्च । कुमारेण स्वामिना तुष्टः कुर्भूर्देवी मारो मदनश्च ताभ्यां तुष्टः । सत्या पार्वत्या सत्यया सत्यभामयान्वित एकं पदं अब्जेन चंद्रेण शंखेन पद्मेन च । भूतिर्भस्म संपच्च । विनायको गणेशः वीनां पक्षिणां नायको गरुडश्च । सर्पभूषणः शेषशायी च । एवमुमाधवः शिवो माधवाद्भेदं न प्रथयते । यश्च भासते सोऽतिमो गुणस्तमोगुणस्तस्य स्थानं स्थितिस्तत्कृतोऽयं न पारमार्थिकः । शब्दतोऽपि अदेङ् गुणइति अकार एकार ओकारश्चेति वर्णत्रयं गुणशब्दाभिधेयं तत्रांत्यो गुणः कः ओकारस्तस्य स्थानं किं उकारः स्थानेऽ-

वित्तार्थं यतसे भृशं यदनिशं शंसार्थमप्यात्मनो ।
व्यर्थं तन्मम मित्र तत्र भवतो नात्यंतिकं स्यात्सुखम् ॥
गुर्वाराधनतत्परेण मनसा कुर्वात्मशं साधनं ।
किं तस्मिन्नुपलभ्यते न हि धनं नो वात्मनः शंसनम् ॥ २३ ॥
तद्वित्तं त्वसुखं जनस्य नियतं यत्प्रार्थ्यते कुप्रभो-
र्वित्तः सत्तम वित्तवित्तजमदोन्मत्तेन चित्तेन यः ॥
कल्योऽहं कथमस्मि कोऽहमिति तत्कुर्वात्मनः स्वदा ।
सत्युक्त्या बहुशोधनं न बहुशस्तत्रापि किंस्विद्धनम् ॥ २४ ॥
मिलेद्यदयुतं धनं तदधनं धनं यद्युते ।
मिलेत नियुतं धनं निधनमेव तज्जायते ॥
तथा धनपरार्धकं निखिलभावहीनात्मकं ।
तदक्षरपदांतरे स्थितमरे धनं सर्वथा ॥ २५ ॥

त्तरतमइति उकार ओष्ठ्यत्वात्तादृशस्य ओकारस्य स्थानं भवति । एवं चायमुमाधवः स माधव इत्युकारकृतो भेदो नान्यथा ॥ २२ ॥

निरतिशयात्मसुखसाधनं विहायापातरमणीयसुखसाधनद्रव्यार्जनं न कार्यमित्याशयेनाह वित्तार्थमिति । लोके हि केचिद्द्रव्यमेवार्जयंति परे अर्जितद्रव्यत्यागेन कीर्तिं तदुभयमपि नात्यंतिकसुखकारणं आत्यंतिक सुखसाधनेनैव मनोजयो वासनाक्षयो हार्दभक्तिरूपेण तन्निरतिशयानंदलक्षणं सुखं तु प्राप्नुयादेव । किं च यदर्थं त्वं यतसे तदुभयमपि तत्रानुषंगिकं नास्तीति न किं तूपलभ्यत एव यथा त्मशंसाधनं आत्मनः शं सुखं तस्य साधनं अस्मिन् पदे आत्मशंसा धनं च वर्तत एवेति ॥ २३ ॥

तद्वित्तमिति । हे सत्तम यत् कुप्रभो भूपतेर्वित्तं याच्यते तज्जनस्यासुखं सुखकारकं न भवति । यद्वा असूनां प्राणानां खं जनस्य हेतुरितिशेषः । यतः स कुप्रभुः कुत्सितप्रभुः तदेव विशदयति यो धनमदेन मदोन्मत्तेन मनसा वित्तः ख्यात स्तस्मादात्मविषयकविचारमेव कुरु तेन परमसुखं स्यात् । किं च यदर्थं त्वं यतसे तद्धनमपि तत्रानुषंगिकं नास्तीति न आत्मनः बहुशोधनमित्यत्र बहुशः धनं वर्तत एवेति ॥ २४ ॥

किं च यदपि मेलितं धनं न धनं भवति । धनं तु ब्रह्मपद एव स्थितमित्याह । मिलेदिति । अयुतं दशसहस्रं धनं न धनं यस्य कस्यापि सकाशेऽस्त्येवेति अकारेण युतं युक्तं धनं अधनमेव नियुतं लक्षं तत्तु अर्जनरक्षणादिना मरणरूपमेव यन्निकारेण युतं धनं निधनमेव तत् तथा धनपरार्धं धनस्य परार्धं परमसंख्यावधिसंख्यं परार्धपर्यंता हि संख्या ज्योतिःशास्त्रप्रसिद्धा एवं सहि किमपि नास्ति धनशब्दस्य

आत्मनो बंधने हेतुं चित्तं क्षिणु हि यत्नतः ॥
चित्तस्य तस्य क्षयतः केवला चित्प्रकाशते ॥ २६ ॥
सत्यां विरक्तौ विपिनेऽपि वासे सत्यप्यथ ब्रह्मभवोपदेशे ॥
निवृत्तिसिद्धिः परमा समाधावेवेत्युवाचेह मृकंडुसूनुः ॥ २७ ॥
अये मनोमत्तमतंगजोऽयमितस्ततश्चंक्रमणो रजोभिः ॥
क्रीडन्सदा पिप्पलभोगलुब्धस्तच्छांतये त्वं हरिमाश्रयस्व ॥ २८ ॥
मर्यादा न च यस्य यो मृतमयो यस्मिञ्शुचिर्नीचगैः ।
संतप्यो न च वाडवः किल जलैर्न स्वातिवर्षेऽपि वा ॥
मुक्ता नित्यममंदरागमथनादुच्चैःश्रवा वा हरि-
र्नो लभ्यस्तदयं भवो हि नितरां वारां निधेर्दुस्तरः ॥ २९ ॥

धः पूर्वार्धे न परार्धे यश्च नकारः सोऽभावएवधनं तु अक्षरपदांतरे ब्रह्मपदे विष्णुपदे या 'अक्षरंब्रह्म परमं सदसत्क्षरमक्षर' मित्युक्ते दृश्यते । नित्यं अक्षराणि अकारमारभ्य क्षकारपर्यंतानि तत्र ये पदे पकारदकाररूपे तन्मध्ये धनेतिसर्वदा स्थितमिति यथा तथदधनपफबभमेति अक्षरशब्दो हि स्वरे रूढः स्वरव्यंजनरूपेऽपि प्रत्युज्यते यथा 'मकारतृतीयाक्षरो भवतीति, श्रुति । 'मंत्रराजः षडक्षरः' इत्यादि स्मृतिश्च पद इत्यत्र क्रमोऽविवक्षितः अतो न धनार्थं यत्नं कुर्यात्किंतु ब्रह्मविद्भवेत् ब्रह्मनिष्ठं प्रति तु धनमेव स्वयं प्रार्थयते ममांगीकारः कार्य इति स तु तत्प्रति न कटाक्षलेशमात्रेणापि संभावयतीति पूर्णधनत्वादिति तात्पर्यं ॥ २५ ॥

'एक एव मनोज यो जितः सर्वार्थसिद्धिद इति' वासिष्ठोक्तेर्मनोजयमंतरेणात्मप्राप्तेरभावात्तत्क्षयमाह आत्मनइति । चित्तस्य तस्य क्षये चित् स्वयमेव प्रकाशते यथा चित्तसंबंधिनस्तकारस्य क्षये लोपेऽर्थाच्चिदित्येवावशिष्यते ॥ २६ ॥

चित्तजयस्य निरोधसमाधिरेवोपाय इत्याह । सत्यामिति । वैराग्ये वनवासे ब्रह्मणः शिवस्य चोपदेशेऽपि समाधावेव निवृत्तिसिद्धिः । चित्तस्य विषयोन्मुखतापरिहारेणात्माभिमुखीभावः यथा सुरथस्य राज्ञः समाधिर्नाम वैश्यस्य च समाने वैराग्ये विपिनवासे ब्रह्मभवस्य सुमेधोपरपर्यायस्य वसिष्ठस्योपदेशे समानेपि निवृत्तिसिद्धिः आत्माभिमुखीभावः समाधावेव नान्यत्रेति सप्तशत्याख्यदेवीचरिते स्पष्टं ॥ २७ ॥

सुगमोपायमाह अय इति । रजः रजोगुणः धूलिश्च । पिप्पलं विषयसुखं तस्य यो भोगः तयोरन्यः पिप्पलं स्वाद्वत्यात्र तथा स्वीकारात् । पिप्पलस्याश्वत्थस्य योभोगः भक्षणं स हि गजाय रोचते । पिप्पलः कुंजराशन इति । हरिं सिंहं च प्राणस्पंदनिरोधात्सत्संगाद्वासनात्यागाद्धरिचरणभक्तियोगान्मनः स्ववेगं जहाति शनै' रित्याचार्योक्तेः ॥ २८ ॥

सर्वानर्थभूतस्य संसारस्य निवृत्तिरेव परमपुरुषार्थ इति निवर्त्यस्य तस्य स्वरूपमाह

विहीनः स्नेहलेशेन निर्दशश्च निरंजनः ॥
अध्यात्मज्ञानदीपोऽयं तमो हंत्यचलप्रभः ॥ ३० ॥
कर्मसाक्षितिरोभावे दोषावाप्तिरुदीर्यते ॥
आविर्भावे पुनस्तस्य सर्वतः सुदिनं भवेत् ॥ ३१ ॥
इतरभजनघनरसतः फलनिष्पत्तिर्न संभवेदिति न ॥
मुक्ताः परंतु मन्ये स्वातिघनरसं विना न जायेरन् ॥ ३२ ॥
संसारिणामिहामृतलाभोऽमृतमध्यवर्तिनामपि न ॥
मीनानामिव तत्राप्रत्यङ्मुखत्वेन जायते विघ्नः ॥ ३३ ॥
स्त्रीत्वं न पुंस्त्वं न नपुंसकत्वं न वा विभक्तिर्वचनं न यत्र ॥
तस्याव्ययस्य प्रतिलब्धयेऽत्र स्वस्थानमेवोपदिशंति संतः ॥ ३४ ॥

मर्यादेति । मर्यादा कूलभूमिरवधिश्च अमृतमयः उदकमयः मृतमयश्च मृतेन जननमपि लक्ष्यते । शुचिर्वाडवः वाडवानलः शुद्धो विप्रश्च नीचगैर्जलैः निम्नप्रवणैरुदकैः नीचानुसारिभिर्जडैः डलयोरैक्यात् स्वातिवर्षः स्वातिनक्षत्रवृष्टिः स्वस्य द्रव्यस्यातिवृष्टिः प्राप्तिश्च । मुक्ता मौक्तिकानि जीवन्मुक्ताश्च । अमंदस्तीव्रो रागः प्रीति स्तेनमथन-मनलसतया व्यवहारः । मंदरसंज्ञकोऽगः शैलस्तेन मथनं निलोडनंच । उच्चैः-श्रवानाम हरिरश्वः महायशा भगवांश्च ॥ २९ ॥

तन्निवृत्तिसाधनमात्मज्ञानमेवेत्याह विहीन इति स्नेहः प्रेमा तैलं च दशा वयोवस्था-वर्तिश्च । अंजनं विषयसंबंधः कज्जलं च । तमः संसारकारणमूलाज्ञानमंधकारश्च । अचलप्रभोऽव्याहतप्रभः वातादिना चलप्रभश्च । प्रसिद्धदीपादयं विलक्षणस्वभावः॥३०॥

आत्मज्ञानाभावे यत्कृतं तद्बंधावेत्याह कर्मसाक्षी आत्मा सूर्यश्च । दोषावाप्तिर्दोषस्य प्राप्तिः रात्र्यवाप्तिश्च । सुदिनं पुण्यं सुष्टुदिवसश्च ॥ ३१ ॥

आत्मभिन्नतयेतरदेवतोपासने स्वर्गादिफलं भवति न तु मोक्ष इत्याह । इतरेति । इतरेषां देवानां भजने यः घनः आर्द्रः रसः प्रेमा इतरो यो भजनः नक्षत्रजनः स्वात्यतिरिक्तो मृगादिस्तस्य घनरसः उदकवर्षं च । फलनिष्पत्तिः स्वर्गादिफलप्राप्तिः धान्यसं-वृद्धिश्च । मुक्ता जीवन्मुक्ताः मौक्तिकानि च । स्वातिघनरसः आत्मत्वेन देवभजन विषयको यो घनरसः आसक्तिः स्वातिनक्षत्रोदकं च ॥ ३२ ॥

ननु ब्रह्मणः सर्वात्मकत्वेन तत्रस्थानाम स्माकं तल्लाभः कुतो नास्तीत्यत्राह । संसा-रिणामिति । अमृतलाभः वस्तुलाभः जललाभश्च । अमृतं ब्रह्म तत्रस्थानां जलांतर्व-र्तिनां च प्रत्यगभिन्नात्मप्रवणताभावः प्रत्यगुत्प्लवनाभावश्च ॥ ३३ ॥

निर्धर्मकस्य वस्तुनः स्वात्मन्येवान्वेषणं कार्यमित्युपदिशंतीत्याह । स्त्रीत्वमिति । विभक्तिः परिच्छेदः प्रथमादिसप्तम्यंता च । वचनमुक्तिः एकद्विबहुत्वोपाधिकं च । अव्ययस्य अविनाशिनः परमात्मनः अंतरा मुहुस् इत्यादिरूपस्य च । स्वस्थानं

अचलः किल संसारो नृणां परम दुःखदः ॥
तत्र स्वरूपसंधानं मन्येऽहं सुखसाधम् ॥ ३५ ॥
संसारसागरस्त्वेष दोषाकरसमुद्भवः ॥
तच्छोषकारकं ब्रह्मतेज एकं विराजयते ॥ ३६ ॥
दोषोद्रेकभवे प्रभूततमसि ध्यासे द्विजानां व्रजो ।
मूढो नष्टसुदृक्‌ समीपगमपि स्थाणुं परं स्वाश्रयम् ॥
द्रष्टुं न क्षमते चरंति परितः किंचात्मघोषद्विष-
स्तत्रानंतपदोदयः सुखयिता स्यात्कर्मसाक्षी विभुः ॥ ३७ ॥
आत्माराम इहैक एव तनुते पुंसां परां निर्वृतिं ।
संसारातपतापतप्तवपुषामत्यंतदुःस्थात्मनाम् ॥
पूर्णाखंडरसेन बिभ्रति भृशं सर्वागमाः सद्रुचिं ।
यत्रामी शुकनीलकंठकपिराड्‌हंसा रमंतेऽनिशम् ॥ ३८ ॥

आत्मरूपस्थानं स्वरित्यव्ययस्थानं स्वरादिगणश्च । स्वरादि निपातमव्ययमिति पाणिनि स्मरणात् । स्त्रीत्वादि शून्यमव्ययं यथा स्वरादिगणे लभ्यते तथा परमात्मवस्तु आत्मन्येव लभ्यत इत्यर्थः ॥ ३४ ॥

एवं निवर्त्यं संसारं निवर्तकं चात्मज्ञानं पृथक्त्वेन निरूप्य समुच्चयेन निरूपयति पंचभिः । अचलइति । अचलः व्यवहारेण नित्यः पर्वतश्च । स्वरूपस्य संधानमनुसंधानं सर्वानुस्यूतत्वेन स्वरोर्वेजस्योपासनं च ॥ ३५ ॥

संसारसागरइति । दोषाकरस्य दोषराशेश्चंद्रस्य च । तस्य संसारस्य शोषं क्षयं करोति तादृशं ब्रह्मरूपं तेज एवैकं तं सागरं शोषयति तच्छोषं करके कुंभे भवं कारकं ब्रह्मतेजो द्विजरूपं तेजः आगस्त्याख्यमेवैकं ॥ ३६ ॥

दोषोद्रेकभव इति । दोषोद्रेकः बंधककर्मोद्रेकः तन्मूले भवे कीदृशे प्रभूततमसि बहुलाज्ञाने रात्र्युद्रेकसंभवे गाढांधकारे च । द्विजानां विप्राणां पक्षिणां च । नष्टसुदृग्ज्ञानः नष्टनेत्रशक्तिश्च । द्रष्टुं ज्ञातुं वीक्षितुंच । स्थाणुं शिवं परमात्मानं वृक्षं च । आत्मानं घोषयंतीत्यात्मघोषाः वेदांतिनस्तेषां द्विषः शत्रवो नास्तिकाः आत्मघोषाः काकास्तेषां द्विषो घूकाश्च । ते हि रात्रौ प्रवृत्तदृशः अनंतो विष्णुस्तस्य पदं चरणं तस्मादुदयो यस्य । भगवदुपासनवशाल्लब्ध । इत्यर्थः अनंतमाकाशस्तद्रूपं यत्पदं तत्रोदयो यस्य । कर्मसाक्षी परमात्मा सूर्यश्च ॥ ३७ ॥

आत्माराम इति । आत्मैव आराम उद्यानं पूर्णाखंडरसेन हेतुना अनवच्छिन्नजलसमृद्ध्या हेतुना च आगमाः शास्त्राणि अगमा वृक्षाश्च । सद्रुचिमुत्तमप्रीतिप्रतिपादनविषये सम्यक् शोभाविशेषं च । शुको योगींद्रः कीरश्च । नीलकंठो भगवान् शिवः मयूरश्च । कपिराट् हनुमान् कपिश्रेष्ठश्च । हंसाः परमहंसाः पक्षिविशेषाश्च ॥ ३८ ॥

यो वै पंचमहाभूतविवर्तपरिबाधितः ॥
तस्य ब्रह्मविचारोऽयं साक्षात्पंचाक्षरी मतः ॥ ३९ ॥
न योगे नैव करणे मूलाधिष्ठानमिष्यते ॥
मूलाधिष्ठानसंप्राप्तिर्भजने सहजा नृणम् ॥ ४० ॥
बालाः स्थूलाक्षरोपास्तिप्रतिकूला भवंति चेत् ॥
सूक्ष्माक्षरं न लेखार्हस्थिति तत्करणं भवेत् ॥ ४१ ॥
यदि न हरेः सारथ्यं गुरोर्नरोऽधिगतशास्त्रविद्योऽपि ॥
जायेत कलिभवमहाभारततरणदक्षिणः कथंकारम् ॥ ४२ ॥
सत्तारकः स्याद्भजनेन युक्तो नृणां समृद्धः किल सत्पथोऽपि ॥
साहाय्यकं चेन्न शतह्रदाया घनाघनः किं जलदानदक्षः ॥ ४३ ॥
हरिपरिचरणं वृषानुबद्धं विहितं क्षेत्रविशुद्धयेऽथ तत्र ॥
घनसुभगमहोदयामृतार्द्रे प्रभवति सत्प्रहितं स्वलाभबीजम् ॥ ४४ ॥

यो वै इति । पंचाक्षरी भूताद्युपद्रवनिवर्तकः पंचाक्षरमंत्रोपासकः पंचपरिमिताक्षरवांश्च । पंचमहाभूतानि आकाशादीनि सएव निवर्तः मिथ्याभासः पंचानां महतां भूतानां पिशाचानां विवर्तः अभिग्रहः ब्रह्मविचार इति पंचाक्षराणि ॥ ३९ ॥

उक्तात्मज्ञानं भगवद्भक्त्यैकलभ्यमित्याह । न योग इति । योगे अष्टांगे विष्कंभादिषु च । करणे ज्योतिष्टोमादि क्रियायां बवादिषु च। मूलभूतमधिष्ठानं परमात्मा मूलनक्षत्रस्थितिश्च । भजने भक्तौ नक्षत्रजने च ॥ ४० ॥

बाला इति । बाला अज्ञाः शिशवश्च । स्थूलाक्षरं व्यक्तिमापन्नं सगुणं ब्रह्मरामकृष्णशिवादि महांत्यक्षराणि अआ इत्यादीनि च । सूक्ष्माक्षरं परमसूक्ष्मवस्तुभूतं ब्रह्म अन्यत्प्रसिद्धं । लेखेषु देवेष्वेव शुद्धसात्विकत्वात् अर्हा योग्या स्थितिर्यस्य लेखेषु पत्रादिलेखेषु च । न हि पत्रादिव्यवहारः स्थूलाक्षरैर्भवति ॥ ४१ ॥

यदि न हरेरिति । सारथ्यं सूतत्वं च। गुरुः सद्गुरुर्द्रोणश्च नरो मनुजः पार्थश्च । शास्त्रविद्या तत्त्वमस्यादि वाक्यजनितज्ञानं शास्त्रसंबंधिनी विद्या च कलियुगोद्भवमहाभारस्य तरणे उत्तरणे दक्षिणः कलिः कलहस्तेन भवो यस्य तस्मिन् महाभारतानां रणे युद्धे च ॥ ४२ ॥

सत्तारक इति । सत्पथो धर्ममार्गः नक्षत्रपथः आकाशश्च । यो हि भजनयुक्तः स एव तारकः उत्तमताराविशिष्टश्च । भजनं भक्तिः नक्षत्रजनश्च । शतह्रदा विद्युत् साचानेकह्रदविशिष्टेति जलवृष्टिहेतुः ॥ ४३ ॥

हरीति । हरेर्भगवतः हलेर्महतो लांगलस्य च । रलयोरैक्यात् । परिचरणं भजनं परितः प्रवर्तनं च वृषेण स्वधर्मेण बलीवर्देन च क्षेत्रस्य शरीरस्य केदारस्य च घनवत्सुभगं महः कांतिर्यस्य हरेर्दयामृतार्द्रे घनस्य यः सुशुभेषु नक्षत्रेषु मृगादिषु

न शास्त्राभ्यासंगान्न च विवरणान्नानुकरणा-
न्न संकल्पान्नैवाध्यवसितिविधानादपि मुहुः ॥
नृणां साक्षात्प्रादुर्भवति सुरतानंदविभवो ।
विना रामासंगाद्विविधकरणव्यूहसुभगात् ॥ ४५ ॥
खगासने भव्यगुणेंतरेण वरं शरं रीतिधरं नियोज्य ॥
उपासनस्यातिबलेन सौम्य त्वं सूक्ष्मलक्ष्यं प्रति विध्य शीघ्रम् ॥४६॥
शंकरे भक्तिमान् स्याच्चेच्छं करे तस्य निश्चितम् ॥
या तनावात्मबुद्धिस्तु यातना सा सनातनी ॥ ४७ ॥
बव्हर्भकं महाभगमपि कांताभरसमन्वितं भवनम् ॥
भवति सदाभरणस्थलमपि भावस्थितिविवर्जितं तु वनम् ॥ ४८ ॥
मुमुक्षवः संपरिशीलयं तु जनाः सनादच्युतसद्गुणांल्लतान् ॥
यतो हि मुक्ता अपि तैर्विमुक्ताः सद्यो विभक्ताः पतिता भवंति ॥४९॥

महोदयस्तस्माद्यदमृतं [जलं] तेनार्द्रं सद्भिः प्रहितमुपदिष्टं सत् सम्यगुप्तंच आत्मला-भस्य बीजं ज्ञानं स्वस्य द्रव्यस्य लाभो यस्मात्तद्बीजं च ॥ ४४ ॥

न शास्त्रेति । सुरतानंदः स्वस्मिन् यो देवताभावस्तत्प्रयुक्तो य आनंदः रतिसुखं च । रामे आसंगोदृढासक्तिः स्त्रीसंगश्च । करणानि श्रवणकीर्तनादीनि चुंबनाश्लेषादीनि धेनुकादीन्यासनानि वा ॥ ४५ ॥

खगासनइति । भव्यगुणे उत्तमगुणे उत्तममौर्वीके च । खगासने गरुडासने शरास-नेच । अंतरेण मध्ये रीतिधरं ' री ' इत्याकारकं वर्णं धराति तत् शरं शरीरं पित्तल-रेखाभूषितं बाणं च । उभयत्राप्यंतरेण रीतिधरं स्वनिष्ठसौष्ठवधरं च । उपासनस्य उपास्त्याः शराभ्यासस्य च । सूक्ष्मं लक्ष्यं परमात्मवस्तु अणुशरव्यं च ॥ ४६ ॥

शंकर इति । शं सुखं तनौ आत्मबुद्धिर्देहेऽहं भावः ॥ ४७ ॥

भक्तिहीनं सर्वं न शोभत इत्याह बव्हर्भकमिति । शिशुभिरलंकृतं महैश्वर्यं स्त्रीसमृद्ध-मुत्तमाभरणं तत्तत्स्थाने एतादृशमपि भवनं गृहं भावस्थित्या भक्त्या हीनं चेद्वनमेव भवति भस्य भवर्णस्य अवस्थानेन हीनं भवनं वनमेवावतिष्ठते उक्तसर्वविशे-षणेषु भकारवर्जनेनार्थः । बव्हर्काख्यवृक्षयुक्तं यद्वा बहुरर्कप्रतापो यत्र छायाभावात् । महापर्वतप्रायं दुर्गमवर्त्मयुक्तं सदारणार्हस्थलं यद्वा दारणस्थलसहितं वनं तदप्येतादृशं न तु रमणीयं ॥ ४८ ॥

भक्तिं विना मुक्ताअपि नैव शोभंत इत्याह मुमुक्षवइति अच्युतस्य सद्गुणान्मुक्ताः जीवन्मुक्ताः मौक्तिकानिच तैरच्युतसद्गुणैः अत्रुटितसाधुदोरकैर्विभक्ताः पृथग्भूता ज्ञानरक्षकाभावात् पतिताः पातित्ययुक्तागलिताश्च येन्येऽरविंदाक्षवियुक्तमानिन

श्रीरामपादांबुजसेवकेभ्यः कथार्चनध्यानपरायणेभ्यः ॥
सांतानिकामोदकषायितेभ्यो रोचेत किं रेऽमृतसंपदेभ्यः ॥ ५० ॥
न पूजनं नो भजनं च यत्र न बंदिभावो न च मूर्तिवीक्षा ॥
फलं च किं तादृशवस्तुनः स्यादतोऽपवर्गत्वममुष्य लोके ॥ ५१ ॥
आदिमा भक्तिरित्येतत् सर्वसज्जनसंमतम् ॥
यदनाशोचिता सैव मुक्तिर्भवति निश्चितम् ॥ ५२ ॥
मातंगोऽपि प्रापमुक्तिं दुरापां भक्त्या पद्म पद्मनाभे समर्प्य ॥
तद्विप्राद्याः शुद्धजन्मान एव नैवेष्यंते शार्ङ्गिणः प्रीणनाय ॥ ५३ ॥
यत्तु भगवदपराधस्थितमपि जघन्यकर्मनिरतत्वात् ॥
पुरुषोत्तमे भवेच्चेद्दृढभावं दृश्यतेऽस्य तिरूर्ध्वम् ॥ ५४ ॥
मा राजकृपा मा रामा मा कुमार सुखगरिमा ॥
माराज मा स्वमहिमा पदपद्माराधनेऽस्तु ते प्रेमा ॥ ५५ ॥

स्त्वय्यस्तभावादविशुद्धबुद्धयः । आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधोऽनादृत युष्मदंघ्रयइति भागवते ॥ ४९ ॥

भक्तास्तु मुक्तिं न स्पृहयंतीत्याह श्रीरामेति । रामभक्ता हि ब्रह्मलोकोपरितनान् सांतानिकाख्यलोकान् गच्छंति तत्रत्यानंदेन कषायितेभ्यः अमृतसंपन्मोक्षसंपन्नरोचते संतानिकातसक्षीरोपरितनो मंडः सायइति लोके तदामोदकषायितेभ्यः अमृतं दुग्धं न रोचत इति युक्तमेव ॥ ५० ॥

ते वदंति च न पूजनमिति पूजनं फलं बंदिभावो भजनं मूर्तिवीक्षा च यत्र नास्तीति कृत्वा तादृशस्य अपवर्गत्वं लोके पवर्गरहितत्वं चेति ॥ ५१ ॥

अहैतुकी भक्तिर्मुक्तिरेवेत्याह आदिमेति आदिमा श्रेष्ठा आदौ वर्णे भकारे मकारो यस्यां सा अनाशोचिता आशया । उचिता समवेता तादृशी न भवति सा उचसमवाये अकारस्य नाशो यस्यां तत्र उना उकारेण चिता एवं भक्तिरित्यत्र भस्य मादेशे तदुत्तराकारस्य लोपे तत्र उकारनिवेशे मुक्तिर्भवतीति ॥ ५२ ॥

भक्तिर्जातिश्रैष्ठ्यं नापेक्षत इत्याह मातंगइति मातंगो गजः अंत्यजविशेषश्च ॥ ५३ ॥

तथा गुणवतामप्यपेक्ष्यत इत्याह यत्विति । भगवत्प्रोक्तकारित्वाभावान्नीचकर्मणि रतत्वेन भगवदपराधसितं प्राणिजातं यदृच्छया भगवति दृढभावं चेत्तस्याधोगति र्नास्ति. यद्भगवद्योनिमद्वस्तु जघन्यकर्मणि मैथुने निरतत्वेनापरस्याधोभागेस्थितामप्युत्तमपुरुषे दृढभावं चेत्तस्योर्ध्वगतिर्भवति पुरुषायिते विपरीतरते प्रवर्तेत इत्यर्थः ॥ ५४ ॥

अतः कविस्तामेव भगवंतमभ्यर्थयते माराजेति । राजकृपा राः द्रव्यं रामा स्त्री कुमारसुखं स्वमाहात्म्यं च माभूत् हे माराज रमानाथ ॥ ५५ ॥

उदारांस्त्वदृते नान्यान् प्रपश्याम्यपि पार्वति ॥
श्रीरामभक्तिमाणिक्यमदेयमपि देहि मे ५६ ॥
भामे भा मे कथंकारं कामे का मे गतिर्भवेत् ॥
रामे रा मे परा भक्तिर्यामे यामे भजाम्यतः ॥ ५७ ॥
श्रांतोऽसि चेत् संसृतितीव्रतापतः सीतान्वितं मारुतपोतसेवितम् ॥
पलाशसंघातसमृद्धविक्रमं रामं धृताकारमुपेहि सत्वरम् ॥ ५८ ॥
यातायातैः सुबहुभिः श्रांतोऽसि यदि हे सखे ॥
एकं कुरु घनच्छायं सीतारामपदं भज ॥ ५९ ॥
विषयोपहितोऽचलस्थितिः सतमस्कः कनकांगनाप्रियः ॥
भव उग्र इहापि राघवस्मरणाच्छांतिमुपैति निर्भराम् ॥ ६० ॥
असौ भवभुजंगश्चेद्बाधतेऽति भयंकरः ॥
रामं नरेंद्रं भजत विनतानंदनं द्रुतम् ॥ ६१ ॥

उदारानिति त्वमेव उदाराः उः शंभुस्तस्य दाराः कुटुंबिन्युदारादानशूराश्च ॥५६॥

भामइति । भामे क्रोधेऽगीकृते मे भा शोभा कथं स्यात् । कामेऽगीकृते मे गतिः का स्यात् रामे परा भक्तिर्मे राः द्रव्यं अतः प्रतियामे राममेव भजामि ॥ ५७ ॥

यतो ज्ञानं भक्त्यैकलभ्यं सा च भगवद्विषयिणीति संसारनिवृत्त्यर्थं सएवाश्रयणीय- इत्याह । श्रांतोऽसीति । भवदुःसहतापतः सम्यग्यः सृतिसंबंधी तीव्रतापस्ततश्च । पंथानः पदवी सृतिरित्यमरः । सीतयान्वितं शीतेनान्वितंच सशयोरैक्यात् वायुसुतेन हनुमता सेवितं मंदमारुतेन च पलाशिनो राक्षसास्तेषां सम्यग्घातो नाशस्तत्र समृद्धो विक्रमो यस्य पलाशिनो वृक्षास्तत् संघातः समूहस्तत्र वीनां पक्षिणां क्रमः पदन्यासो यत्र धृताकारं सगुणं रामं ब्रह्म रामपदेनासौ परं ब्रह्माभिधीयतइति श्रुतिः आकार- सहितं च राममारामं ॥ ५८ ॥

यातायातैरिति घनवच्छायाकांतिर्यस्य निबिडच्छायं च सीतायुक्तं रामचरणं शीतमारामपदं च यातायातं पुनरपि जननं पुनरपि मरणं गतागतं मार्गविषयं च ॥ ५९ ॥

विषयेति विषया उपहितायत्र विषेण यो यो मोहः स हितो गतो यस्मात् युपुरुपुलु- षु विमोहनेइति हिगताविति धात्वोरूपे भुवास्थितिः कैलासवासस्तव्यश्च साज्ञानः सतमोगुणश्च कनकमंगना च प्रिये यत्र कनकं धत्तूरो गौरी च प्रिये यस्य उग्रोऽ- पिभवः संसारः शिवश्च शांतिं निवृत्तिं परमानंदंच ॥ ६० ॥

असाविति नरेंद्रं राजानं विषवैद्यं च विनतानंदनं प्रणतानंददं गरुडं च वैनतेयत्वात् ॥ ६१ ॥

शुचिसान्निध्ययोगेन त्वदि रामोपगूहनात् ॥
कर्मसाक्षिसमालोकाद्धवं हेमंतवर्जयेत् ॥ ६२ ॥
अंधं तमश्चेदयि बाधते त्वां सरोजनेत्रं जगदेकसूत्रम् ॥
सुधाचरित्रं परमं पवित्रं कुरुष्व मित्रं वसुदेवपुत्रम् ॥ ६३ ॥
कृच्छ्रदविषयोपाहितो भवो महापन्नगोऽतिभीषयति ॥
तद्भयशमनाय विना जिष्णुपविक्रममहं न कलयेऽन्यम् ॥ ६४ ॥
कुजन्मिप्रायेयं मदकरकलिव्यासिविषमा ।
कुदारव्यासंगप्रतिहतसुगोत्राऽतिभयदा ॥
द्विजिव्हैराकीर्णा व्यथयति महावंचकवती ।
प्रपंचारण्यानी भज भज सखे तन्नरहरिम् ॥ ६५ ॥
भ्रमयति भवापित्तं चेद्भज नरसूतशेखरं कृष्णम् ॥
सद्गोरसेन सहसितमनुत्रुटिकं सर्वथा त्यज स्नेहम् ॥ ६६ ॥
पतितानां संसारांधतमसकूपे विनष्टदृष्टीनाम् ॥
महता विहिता महिता सुहिता स्यादच्युतावतारकथा ॥ ६७ ॥

शुचीति शुचिः साधुरग्निश्च रामोपगूहनंरामध्यानं स्त्रीणामाश्लेषश्च आत्मनो दर्शनं सूर्यातपसेवा च ॥ ६२ ॥

अंधंतमइति । अज्ञानं अंधकारश्च मित्रं सखायं सूर्यं च ॥ ६३ ॥

कच्छ्रदविषयेति दुःखविषयसहितः कच्छ्रप्रदेशसहितः कच्छ्रदोयोविषेण योपः विमोहः युपुविमोहने तस्य हितं आधानं यस्मात् महापन्नगः सर्पः महापत्पर्वतो वा जिष्णुः अर्जुनः तं पाति स हरिः तस्य विक्रमः अवतारलीला जिष्णुपो हरिस्तस्य विः पक्षी गरुडस्तस्य क्रमः पदन्यासः जिष्णुरिंद्रस्तस्य पविर्वज्रस्तस्य क्रमः क्षेपश्च ॥ ६४ ॥

कुजन्मीति । कुत्सितप्राणिबहुला वृक्षप्राया च मदकरो यः कलिस्तस्य व्याप्त्या विषमामदकलाः ये करिणस्तेषां च रलयोरैक्यात् कुत्सितस्त्रीव्यभिचारेण दूषितकुला कुं दारयंति ते कुदाराः सूकरास्तद्व्यासंगेन उत्कीर्णभूमिः द्विजिव्हाः खलाः सर्पाश्च महावंचकाः प्रतारका जंबुकाश्च नरहरिं नरसिंहं 'अटव्यांनारसिंहश्चेति वचनात् ॥ ६५ ॥

भ्रमयतीति । नरः अर्जुनस्तस्य यः सूतशेखरः सारथिश्रेष्ठस्तं कृष्णं हे नर कृष्णं वर्णतः सूतशेखरं नाम रसायनं च सद्गोरसः साधूनां वाग्रसः दुग्धं च घृतं वा हसितेनस्मितेन सहितं स शर्करं च अनुत्रुटिकं त्रुटिः सूक्ष्मकालमानं प्रति तत् अनुगतसूक्ष्मैलाबीजं च स्नेहं गृहदारादिषु प्रेमाणं तैलं च ॥ ६६ ॥

पतितानामिति । नष्टज्ञानानां नष्टेक्षणानां च अच्युतावतारकथा भगवत्कीर्तनं अभ्रष्टसोपानमार्गवार्ता च ॥ ६७ ॥

पतितानां संसारांधतमसकूपे विनष्टदृष्टीनाम् ॥
एकं महदुपदिष्टं कष्टहरं चक्रिणो हि गुणभजनम् ॥ ६८ ॥
संसारे वर्तमानस्य नानादुष्कृतकारिणः ॥
यदि ते नरकाद्भीतिः कृष्णमेकं समाश्रय ॥ ६९ ॥
भवसागरं तरीतुं वांछसि चेत् सौम्य कुरु मदीयवचः ॥
यत्नांतरं विहाय प्रत्नं भज तारकेशकुलरत्नम् ॥ ७० ॥
द्वाविह दृष्टौ शरणीकर्तुं संसृतितरंगिणीतरणे ॥
उडुपकुलपतिः कृष्णः श्रीरामस्तरणिकुलपतिश्चान्यः ॥ ७१ ॥
जातो जलप्रसंगाद्विस्मारयति भ्रमोऽयमात्मानम् ॥
शुभमधुनार्द्ररसेन च सुरसंसेव्यं भजस्व चंडीशम् ॥ ७२ ॥
समसितरुचिराज्योपेतमरे नरकेसरिणं संसेवेथाः ॥
अमृताभिमुखः स्याः किं कुर्याद्दुःसहतापभवज्वर एषः ॥ ७३ ॥
व्यथयति बहुदोषभवोपताप एषोऽभ्रकायकृष्णाय ॥
स्पृहय सुखोदर्कायानेकसुरसभावनैः प्रसिद्धाय ॥ ७४ ॥

पतितानामिति । महद्भिः सद्भिर्बलवद्भिश्च चक्रिणो भगवतोऽरघट्टस्य च गुणानां भजनं सेवनं गुणस्य स्थूलरज्जोश्च ॥ ६८ ॥

संसार इति । कृष्णो हि नरकस्य असुरविशेषस्य हंता ॥ ६९ ॥

भवसागरमिति । तारकाणामीशश्चंद्रस्तस्य कुले रत्नमिव श्रेष्ठं कृष्णं तारयंति ते तारकाः कर्णधारास्तत्कुलश्रेष्ठं च ॥ ७० ॥

द्वाविहेति । उडुपश्चंद्रः चर्मावनद्धवंशविदलनिर्मितं तरणसाधनं टोकरेति प्रसिद्धं च तरणिः सूर्यः नौकेति च ॥ ७१ ॥

जात इति । जलस्य जडस्य अविद्याया उदकस्य च भ्रमो भ्रांतिः शुभं अधुना उत्तममधुना च आर्द्ररसेन सांद्रप्रेम्णा आर्द्रकस्य रसेन च सुरैः संसेव्यं सुरसं सेव्यं च चंडीशं महादेवं राजचंडीश्वराख्यरसायनं च ॥ ७२ ॥

समसितेति । सम्यक् याः असिताः श्यामलाः रुचयः तासां राज्या पंक्त्या उपेतं यद्वा समा तुल्या या सिता श्वेता रुचिस्तत्पंक्त्या यद्वा मया लक्ष्म्या सहितः समः सितरुचिः श्वेतद्युतिः राज्येन त्रिभुवनाधिपत्येन उपेतः सचासाविति विशेषणोभयपदकर्मधारयः तुल्यशर्करायुत सुरसघृतेनोपेतं च नरकेसरिणं नृसिंहं नृकेसर्याख्यं रसायनं च अमृताभिमुखः मोक्षाभिमुखः दुग्धपानाभिमुखश्च भवः तरुणः संसारश्च ॥ ७३ ॥

व्यथयतीति । अनेकदोषसंभवः । संसारसंबंधी तापः उल्बणवातपित्तादिदोषसंभवः उपतापः रोगः अभ्रवत् कृष्णः कायो यस्य तस्मै कृष्णाय अभ्रकाय रसा-

संसाररोगो यदि बाधते त्वां गदारिहस्तः करुणार्द्रचित्तः ॥
सौकर्यतो यस्य रसोद्धृतिस्तं याह्योषधीशान्वयरत्नमेकम् ॥ ७५ ॥
सुवर्णमालिनीं कृष्णामधुना भज चेद्भवः ॥
जीर्णज्वरो बाधते त्वां पिंडिकोद्वेष्टनादिभिः ॥ ७६ ॥
उन्मत्तेऽतिविशृंखलं विहरति ब्रह्मांडभांडोदरे ।
नृणां धैर्यविलोपके कलियुगे स्वच्छंदसंचारिणि ॥
विध्वस्ता हि महागमा द्विजकुलं शुन्याकुलं संकुलं ।
प्रायेणैव रजस्तमोऽप्युपगतं पंथा हतो नैगमः ॥ ७७ ॥
दूरेणापगतो वृषो बहुमदामोदः पुनः पुष्कलं ।
संक्रांतो मधुपा भ्रमंति निभृतं त्वष्टाश्च पुष्टत्विषः ॥
रूढाश्चंचलदृष्टयोऽधिविटपं नानादरैर्भीरवो ।
नूनं को नु हरिं विनाऽस्य जगतः स्याद्रक्षणे दक्षिणः ॥ ७८ ॥
कलिमालिनमतेर्नरस्य नैव स्वपदप्राप्तिपरोऽपरोऽस्त्युपायः ॥
हरिगुणपरिशीलनात्तदेतन्निषधेंद्रो निपुणं विचारणीयः ॥ ७९ ॥

यनाय सुखकरः उदर्कः उत्तरफलं यस्य अनेकवारकृतसुरसमूहरक्षणैः प्रख्याताय अनेके ये सुरसाः ओषधिरसास्तेषां भावनैर्भावनाभिः प्रसिद्धाय। संपन्नाय दत्तसहस्रपुटायेत्यर्थः ॥ ७४ ॥

संसारेति । गदा अरि चक्रं हस्ते यस्य तं गदारिः औषधं च यस्य यत्कर्तृकं रसोद्धरणं भूम्युद्धरणं सौकर्येण सूकरभावेन तद्रूपावतारेण पारदोद्धरणं च सुकरत्वेन ओषधीशश्चंद्रः वैद्यश्च ॥ ७५ ॥

सुवर्णेति । सुवर्णमालाभूषितां रसायनविशेषं च कृष्णां कृष्णवर्णां अधुना कृष्णामधुना पिप्पली क्षौद्रेण च पिंडिकान्नपिंडः उद्वेष्टनं वस्त्रं पिंडिकयोः जंघापश्चाद्भागयोः उद्वेष्टनं उद्वेलनं तच्च जीर्णज्वरं द्योतयति ॥ ७६ ॥

उन्मत्तेति । धैर्यं ज्ञानं धीरता च कलियुगं प्रसिद्धं करिद्वंद्वं च रलयोरैक्यात् महागमाः महाशास्त्राणि महावृक्षाश्च द्विजकुलं विप्रकुलं पक्षिकुलं च रजः गुणः धूलिश्च तमः गुणः अंधकारश्च नैगमः वैदिकः वणिजनसंबंधी च ॥ ७७ ॥

दूरेणेति वृषः धर्मः बलीवर्दश्च मदो गर्वः आमोदस्तोषः मदस्य दानोदकस्य गंधश्च मधुपा भृंगा मद्यपाश्च विटपे वृक्षशाखायां जारश्रेष्ठे च नाना आदरैः भयैश्च भीरवः स्त्रियो भयशीलाश्च हरिं भगवंतं सिंहं च ॥ ७८ ॥

कलीति नरस्य नलस्य च स्वपदं स्वरूपं स्वराज्यं च हरिगुणपरिशीलनं भगवद्गुणचर्चा अश्वरज्जुधारणं च नलस्य राज्ञो हि ऋतुपर्णराजस्य सारथ्यांगीकारेण स्वराज्यप्राप्तिरभूदिति ॥ ७९ ॥

कलिप्रदुष्टोऽक्षवशंगतश्चेद्भ्रष्टात्मसाम्राज्यपदो नरः स्यात् ॥
स्वकं पदं प्रापयितुं पुनस्तं मन्येऽनवद्या हरिहृद्यविद्या ॥ ८० ॥

द्विजेंद्रत्रासाढ्यः किल बहलदोषोपचयकृत् ।
स्फुरज्जाड्योल्लासो गुरुसुदिनचर्याक्षयकरः ॥
कलिः शीतर्तुश्च व्यथयति भृशं चेत्स्वनयने ।
निमील्य स्वच्छंदं हृदयधृतरामः स्वपिहि रे ॥ ८१ ॥

उर्यत्र सिद्धः सततं गुणोदयो सिद्धो रलोपः स्वरगौरवप्रदः ॥
तत्रैव नूनं रघुनाथमंदिरे मनोरथः सिद्धिमियादसंशयम् ॥ ८२ ॥

कलिप्रदुष्ट इति कलिनाप्रदुष्ट इति समानमुभयत्र अक्षवशं इंद्रियवशं पाशवशं च स्वरूपामंदच्युतिः साम्राज्यच्युतिश्च नरः नलश्च पदं स्वरूपं राज्यं च हरेर्भगवतः हृद्या प्रिया या विद्या अध्यात्माख्या अश्वहृदयविद्या च । नलः किल कलिना ग्रस्तः पुष्करेण भ्रात्रा द्यूतार्थमाहूतः सन् तेन सह द्यूतं कृतवान् तत्र तेन राज्यादि सर्वं जित्वा विवासितः स ऋतुपर्णराजगृहउवास तेन चाश्वहृदयविद्याहेतुना सारथ्ये नियोजितस्तेन कारणेन पुनःस्वपदप्राप्तिरिति भारतकथासूचनं ॥ ८० ॥

द्विजेंद्रेति द्विजेंद्राणां त्रासो येषां तादृशाआढ्याः धनिका यस्मिन् चंद्राद्यस्त्रासस्तेनाढ्यो युक्तोऽतिशीतकरत्वात् बहलदोषाणां वृद्धिकृत् बहलो दोषोपचयः रात्रिवृद्धिस्तां करोति जाड्यं मौर्ख्यमालस्यं च गुर्वी या सुदिनचर्या पुण्याचरणं दिवसचर्या च हेमंते हि रात्रिमानं वर्धते दिनमानं हीयते हृदये धृतः रामो येन रामा स्त्री च ॥ ८१ ॥

ऐहिकामुष्मिकं सर्वमपि भगवदाश्रयेणैव सिध्यतीत्यतउत्तरं वर्णयति उरिति उः रुद्रः तदवतारत्वाद्धनुमान् हशिचेत्युत्वं च सिद्धः सर्वदा कार्यकरणे उद्यतः रोरीति लोपदृष्ट्या सिद्धश्च सच गुणोदयः गुणैरुत्कृष्टः गुणत्वेनोदयो यस्य ओकारो भवितेति यावत् असिद्धोऽविद्यमानः हशिचेति दृष्ट्या च रलोपोऽग्निलोपः राममंदिरे सतिवियोगेऽपि अश्वमेधादेर्जातत्वात् अग्निसद्भावः रोरीति लोपश्च सच स्वर्गे अगौरवप्रदस्तुच्छत्वापादकः स्वरस्याचो गौरवं दीर्घत्वं ददाति । मनोरथशब्द प्रक्रियायां तु मनसूरथ इति स्थिते ससजुषोरुरिति सकारस्य रेफो मनर्रथ इति तत्र रोरीतिरेफलोपो हशिचेत्युत्वं च प्राप्तं विप्रतिषेधे परं कार्यमिति परत्वाल्लोपे प्राप्तेऽपि पूर्वत्रासिद्धमिति तस्यासिद्धत्वात् हशिचेत्युत्वे मनउरथ इति ततआद्गुणइति गुणे मनोरथइत्यस्य सिद्धिर्जायते एवं च मनोरथसिद्धौ उः सिद्धो रलोपोऽसिद्धश्चापेक्षितः तदत्रोभयमस्तीति राममंदिरएव मनोरथसिद्धिर्नान्यत्रेति ॥ ८२ ॥

कस्माद्दुर्गतिविह्वलो भवसि रे श्रीरामचंद्रप्रभुः।
सर्वोदारगुरुस्तदीयजनतासंगेन संगम्यताम् ॥
भूत्वा प्रह्वतनुः स्तवैरभिनवैः स्तुत्वा निबद्धांजलि-
र्भक्त्याचारफलं निवेदय ततः पूर्णः स्वलाभो भवेत् ॥ ८३ ॥

अजरामरता यस्य पुंसो वृत्तिर्निरंतरम् ॥
अजराऽमरता तस्यावश्यं पाणितले स्थिता ॥ ८४ ॥

भुक्तिर्द्रव्यनिबंधनाऽस्य जगतो बोधैकलभ्या पुन-
र्मुक्तिस्तद्द्वयसिद्धयेऽत्र शरणं को नाम लोकत्रये ॥
एवं वेदपुराणशास्त्रनिचयानालोड्य संपश्यतां।
दृष्टिं गच्छति राम एव भगवान्नान्यो वदान्यः क्वचित् ॥ ८५ ॥

सूर्यश्चंडकरः स्वयं हि जगतां संतापको नंदन-
स्तस्यैको जगदंतकस्तदनुजो मंदो जगत्पीडकः ॥
एवं सत्यपि मित्रतामुपगतः सर्वत्र यद्भास्करः।
सोऽयं तस्य कुलेऽवतारमहिमा श्रीरामचंद्रप्रभोः ॥ ८६ ॥

सूर्यः स्थावरजंगमात्मजगतामात्मेत्यृषिः संजगौ।
मंत्राणां च स एव दैवतमिति प्राह प्रसिद्धं स्मृतिः ॥
ध्यायत्यर्चति यन्नमस्यति यजत्येनं द्विजानां गणः।
सोऽयं तस्य कुलेऽवतारमहिमा श्रीरामचंद्रप्रभोः ॥ ८७ ॥

भास्वानेष जडस्वरूपमपि मां तेजोमयं यो व्यधात्।
तत्तस्मै प्रतिदेयमेवमनिशं युक्तोऽप्यशक्तः स्वयम् ॥

कस्मादिति दुर्गतिरधोगतिर्दारिद्र्यं च उदारः सरलः दाता च तदीयजनता साधवः राजपुरुषाश्च आचारस्य कर्मणः फलं चारफलं राजादनफलानि च स्वलाभः आत्मलाभो द्रव्यलाभश्च ॥ ८३ ॥

अजरामरेति पूर्वार्धे अजश्चासौ रामश्च तंत्र रता उत्तरार्धे अजरामरता जराम-रणशून्यता ॥ ८४ ॥

भुक्तिरिति रामः राः द्रव्यं मः बोधः मनअवबोधन इत्यस्मादन्येभ्योऽपि दृश्यत इति डः एवं च रामइत्यत्र भुक्तिमुक्तिसाधनमुभयमपि लभ्यते ॥ ८५ ॥

श्रीरामसंबंधवंतं सर्वे जनाः सत्कुर्वंतीत्याह सूर्यइति मित्रतां सूर्यतां सख्यं च॥८६॥

सूर्यइति 'सूर्यआत्मा जगतस्तस्थुषश्चे' त्यृषिश्रुतिः 'एकैव वा महानात्मा देवता ससूर्य' इत्याचक्षत इति स्मृतिरूपा सर्वानुक्रमणी यतः सर्वमंत्राणां सूर्यो देवता तस्मात्तत्मंत्रैः क्रियमाणं कर्म सूर्यविषयकमेवेति ॥ ८७ ॥

भास्वानेष इति जडस्वरूपमुदकमयं मंडलं डलयोरैक्यात् जडस्वरूपे चोदकमय-

लग्नो भिक्षुकशेखरः समभवद्रामस्य पृष्ठं ततो-
ब्रह्मण्यः स चकार भास्करकुलं सर्वप्रकाशोज्ज्वलम् ॥ ८८ ॥
वृत्तिं पुनः कामपि कल्पयेथाः श्रीमानुदारस्त्वमतः श्रितोऽसि ॥
मयार्जितं वृत्तिशतं हरंतं भवंतमेतं किमिव ब्रवीमि ॥ ८९ ॥
विस्मयं वितनोत्येतद्विषमाक्षाद्विचेष्टितम् ॥
अप्यंधकारिणा येन नृणां चक्षुः प्रकाशते ॥ ९० ॥
नीलांगो मकराभकुंडलधरः खर्वश्च यः कच्छपो ।
दंताः कुंदविलासिनः करयुगे यस्याब्जशंखौ पुनः ॥
आस्ते यस्य विशालवक्षसि महापद्माधिवासोऽनिशं ।
लोका आशु मुकुंदमाश्रयत तं चेत्पूर्णवित्तेच्छवः ॥ ९१ ॥
यो वै धृतः श्रीहरिणा निजे करे स्पर्शः स एवेति विनिश्चयो मम ॥
स्वस्पर्शमात्रेण हि लोहलं ध्रुवं चकार शंखोऽपि सुवर्णसंभृतम् ॥ ९२ ॥
अहो धनार्थं प्रधनं विधाय सुखेन वीरा निधनं भजंते ॥
तत्ताहगप्यत्र धनं विहाय धीराः सुखं श्रीपतिमाश्रयन्ते ॥ ९३ ॥

मंडले संक्राताः किल सूर्यरश्मयश्चंद्रइत्याचक्षते प्रतिदेयं प्रत्युपकर्तव्यं द्विजशेखरश्चंद्रः पाठांतरे भिक्षुकः शिवस्तस्य शेखरोऽवतंसः भिक्षुकश्रेष्ठश्च ब्राह्मणश्च रामचंद्रइत्यत्र रामस्य पृष्ठं सर्वदालग्नश्चंद्रो दृश्यते ॥ ८८ ॥

वृत्तिं पुनरिति वृत्तिं जीवनोपायं क्षेत्रारामादि मनोवृत्तयश्च व्याजनिंदेयं ॥ ८९ ॥

विस्मयमिति विषमाक्षः शिवः चक्षुर्नेत्रं ज्ञानं च अंधकस्य दैत्यविशेषस्य अरिणा अंधंकरोत्येवं शीलेन च ॥ ९० ॥

नीलांग इति महापद्मश्च पद्मश्च शंखो मकरकच्छपौ । मुकुंद कुंद नीलाश्च खर्वश्च निधयो नवेति भगवतो नवनिध्यात्मकत्वात् तमेव आश्रयत हेपूर्णवित्तेच्छवः पूर्णज्ञानेच्छवश्च खर्वो वामनः विदः भावो वित्ता ॥ ९१ ॥

यो वै धृत इति स्पर्शाख्यो मणिः यत्स्पर्शेन लोहं स्वर्णं संपद्यते लोहलं अ-स्फुटवाचं बालत्वात् ध्रुवं उत्तानपादपुत्रं लोहसंग्राहकं च लोहं लातीति व्युत्पत्तेः सुवर्णाः शोभनाक्षराणि सुवर्णं कांचनं च ध्रुवः किल सपत्नमात्रावहेलितः स्वजन-नीकथनाद्भगवंतं प्रसादयितुं वनं निर्जगाम तत्र च श्रीनारदेन संबोधितः सन् मधुवने तपोऽध्यतिष्ठत् । अथानुग्रहीतुमग्रतः श्रीभगवंतमालोक्याद्वितीयोऽयं पुरुष-इति कृत्वा तं स्तोतुमियेष परं वाक्पाटवाभावान्नाशक्नोत् । तद्भगवता विज्ञाय श्रुतिमयपांचजन्येन गल्लदेशे स्पृष्टस्तत्प्रभावादधिगतवाक्शक्तिर्भगवंतं रमणीयैः स्तवैस्तुष्टावेति दिक् ॥ ९२ ॥

अहो इति प्रधनं युद्धं निधनं मरणं धीराः विवेकिनः ॥ ९३ ॥

यं सद्योऽनुजिघृक्षुरस्य हरति द्रव्यं तदेतत्प्रभोः ।
किं श्लाघ्यं ननु मादकं तदिति चेत्स्याद्दुर्बलोऽनुग्रहः ॥
मैवं युक्तमेव तस्य तदसद्वित्तापहारक्रिया ॥
सद्वित्तार्पणमेष वत्सलतया कर्ता यतः श्रीपतिः ॥ ९४ ॥
नापुत्रस्य गतिर्ममेति ससुतः स्यादित्थमुक्तश्रुतेः ॥
को नामात्र जनो न सत्यमिति तद्ब्रूयात्परं वच्म्यहम् ॥
यो गोविंदपरः ससद्गतिधरः सोऽयं सुताख्यश्च य-
ल्लोके सद्गतिभाक् सनंदन इति ब्रह्मात्मजो गीयते ॥ ९५ ॥
तेजोनिधिर्यद्यपि कर्मसाक्षी तथापि सूर्यान्वयकांतयोगम् ॥
विना कथंस्वित्प्रभवेद्वदस्व सत्पाकतासिद्धिममुष्य कर्तुम् ॥ ९६ ॥
यद्यप्यपकारधियं कुरुते परमेश्वरे तथाप्येषः ॥
सत्वं नैव विमुंचति केवललयभुक् स हि श्रीशः ॥ ९७ ॥
मानरहितः स्वकार्ये पटुश्चतुर्दशजगत्प्रथितगोत्रः ॥
मकरालयांतवासी प्रियभक्ताश्रितपावनो भगवान् ॥ ९८ ॥

यं सद्य इति सद्वित्तार्पणं उत्तमद्रव्यार्पणं ब्रह्मविद्यार्पणं च ॥ ९४ ॥

नापुत्रस्येति सनंदनः एतन्नाम नंदनेन पुत्रेण सहितश्च यो हि जातमात्रएव प्रव्राजितः यस्योपनयनमपि नास्ति ॥ ९५ ॥

सर्वगस्य सर्वात्मनोऽपि ब्रह्मणो भक्तकार्यकारित्वं सगुणद्वारेत्याह तेज इति तेजसांनिधिः प्रकाशोयमश्च कर्मसाक्षी ब्रह्म सूर्यश्च सूर्यान्वयकांतः सूर्यवंशकमनीयो रामः सूर्यसंबद्धकांतः सूर्यकांतश्च सत्पाकता पाकः पवित्रः 'तं पाकेन मनसे' त्यादौ दर्शनात् उत्तमपवित्रता साधुः पाकः पचनं यस्य तस्य भावस्तत्ता उत्तमपाकइत्यर्थः वदस्वेत्यात्मनेपदं भासनार्थे भासमानो वदेत्यर्थः ॥ ९६ ॥

तादृशस्य परमकृपालोर्भगवतः प्रातिकूल्येन चिंतनमपि न स्वार्थंविहंतीत्याह यद्यपीति अपकारो विरोधस्तद्युक्ताबुद्धिः पकाररहितोऽयमिति धीश्च परमेश्वरे अपकारबुद्धौ प्रयुक्तायामपि रमेश्वरोऽवतिष्ठते यश्च रमेश्वरः स परमेश्वरादपरो नेति ॥ ९७ ॥

भगवतो हि भक्ताः प्रियाभवंतीत्याह मानेति मानं प्रमाणं तेन रहितोऽप्रमेयइत्यर्थः यद्वा मा च नरश्च पार्थश्च ताभ्यां हितः अभिमानरहितश्च स्वेषां स्वीयानां भक्तानां कार्यसंपादने पटुः स्वस्यात्मनः कार्यसंपादने पटुश्च चतुर्दशसु जगत्सु भुवनेषु प्रसिद्धं गोत्रं नाम यस्य चतुर्दशसंख्याकानि जगत्प्रख्यातानि गोत्राणि यस्य समुद्रस्य अंते मध्ये वास्तव्यः 'विद्यांते गुरुमर्येने' त्यत्रांतशब्दस्य मध्यपरत्वदर्शी-

यः पुष्पवद्दृग्भृतपांडुबालो बल्यंचितांगो नवनीरदश्रीः ॥
हरिः पुराणोऽयमिह श्रुतिश्च भक्तप्रियस्तत्कथिकाप्रियोऽपि ॥९९॥
हर्यप्रियः सर्वजनाप्रियः स्याद्धरिप्रियः सर्वजनप्रियः स्यात् ॥
इति स्म जाने हयमारमेकं पश्यन् पदार्थं चणकं द्वितीयम् ॥ १०० ॥
सद्वंशजातः सगुणस्तु नम्रो यश्चापि शक्तौ बहुमार्गणेभ्यः ॥
ददाति लक्षं तमहं न मुंचे कोदंडमित्थं कथयन् बिभर्ति ॥१०१॥
जलजं जलस्थमपि जलसंबंधविहीनमधिगतामोदम् ॥
भ्रमरहितं वस्तु करे कलय इति निदर्शयन्बिभर्त्यब्जम् ॥ १०२ ॥

चरंति रथवत् क्षितौ ननु हरीच्छया ये जना
निधाय निखिलं चिरं तदुपरि स्वभारं परम् ॥
करेण कलयामि तच्चरणमेतमर्थं जनान्
प्रदर्शयितुमच्युतः कलयतीव चक्रं करे ॥ १०३ ॥

नात् समुद्रस्यांते प्रांते च प्रियाः भक्ताः अस्य प्रियं भक्तं ओदनं यस्य चित्तं पावयति शोधयतीति चित्तपावन इति ब्राह्मणजातिविशेषश्च ॥ ९८ ॥

यः पुष्पाति पुष्पवंतौ सूर्याचंद्रमसौ दृशौ यस्य एकयोक्त्या पुष्पवंतौ दिवाकर-निशाकरावित्यमरः पुष्पं नेत्ररोगविशेषः तद्युक्तादृक् भृताः पोषिताः पांडुबालाः पांडवा येन भृतपांडुरकेशश्च बलिना तन्नामकदैत्येश्वरेणांचितं पूजितं अंगं यस्य बलिभिः शिथिलचर्मभिरंचितं अंगं यस्य च नवनीरदवत् श्रीः शरीरकांतिर्यस्य नवं निर्गता रदश्रीर्दंतशोभा यस्य निरिति रेफस्य रोरीति लोपे ढ्रलोपइति दीर्घः भक्तप्रियः ओदनप्रियस्य कथैव कथिका गुणकीर्तनं प्रियं यस्य कथिका तक्रकृतव्यंजनविशेषः प्रिया यस्य च अतिवृद्धस्य हि कथिकाभक्तमंतरेण निर्वाहायोगात् तत्तत्प्रियत्वं योग्यमिति ॥ ९९ ॥

हरीति हयमारः करवीरमूलं सर्वाप्रियं उपविषत्वात् यश्च हयमारः सहर्यप्रिय एव हरिरश्वश्चणको हि हरेरश्वस्य प्रियः यश्च हरिप्रियः सहरिप्रियएव अतः सर्वप्रियः ॥१००॥

धर्मनिष्ठं ब्रह्मनिष्ठं सन्निष्ठं च नाहमुपेक्षइत्याह त्रिभिः सद्वंशइति सद्वंशः उत्तम-कुलं वेणुश्च सगुणः मैत्र्यादिगुणयुक्तः समौर्वीकश्च नम्रोऽनुद्धतः कुंडलितश्च यश्चा-पि शक्तौ सत्यां मार्गणेभ्यो याचकेभ्यो लक्षं तत्संख्याकं धनं ददाति यश्चापि धानु-ष्कस्तस्य शक्तौ पाटवे सति मार्गणेभ्यो लक्षं शरव्यं ददाति च ॥ १०१ ॥

जलजमिति डलयोरैक्यात् जडं मायोदकं च अधिगतामोदं आमोदोहर्षो गंधो यस्य च भ्रमेण रहितं भ्रमरेभ्यो हितं च ॥ १०२ ॥

चरंतीति हरिर्भगवान् अश्वश्च निजं भारं स्वहितादिविषयं स्वोपस्करस्वरूपं च

विष्णुपदं बहुतारकमित्युच्चैर्यद्वदंति सर्वजनाः ॥
तदिदं न मृषामन्ये परं त्वपेक्षा स्थिता प्रदोषस्य ॥ १०४ ॥
बहुतारकता विष्णुपदेऽस्त्येव न संशयः ॥
किंत्वंजसा सा बहुलदोषोद्रेके हि दृश्यते ॥ १०५ ॥
दोषाकरो भवतु विष्णुपदानुगामी
सद्वृत्ततां स कलयेत्किल पंचदश्या ॥
पाश्चात्यषोडशकलाक्षयतो विदेह-
भावं व्रजेदिह निदर्शनमेष चंद्रः ॥ १०६ ॥
भवचरणे चेतश्चेत् क्रियेत जायेत तर्हि भवतरणम् ॥
कामरणमकाकारं यर्हि भजेत्तर्हि रे भजेन्मरणम् ॥ १०७ ॥

तच्चरणं पादं रथचरणं चक्रं च ये मदेकपरास्तेषां दास्यमपि करोमि किमुतान्यदितिभावः ॥ १०३ ॥

ननु भगवानुक्तगुणकानमिवांगीकारं करोति नास्माकं पापाशयानामिति नाश क्यमित्याह विष्णुपदमिति विष्णुपदं भगवच्चरणमाकाशं च बहु यथा तथा तारकं बहुतारकाविशिष्टं च प्रदोषस्य रजनीमुखस्य प्रकृष्टदोषस्य च पातक्यपेक्षया हि तस्य तारकत्वं नान्यथेति तदंगीकारेणैव स्वमाहात्म्याभिवृद्धिरिति ॥ १०४ ॥

बहुतारकतेति पदद्वयं व्याख्यातं बहुला ये दोषास्तेषामुद्रेकः बहुलः कृष्ण-पक्षस्तस्य दोषारात्रिस्तस्याउद्रेकश्च यथा हि कृष्णपक्षे बह्वयो दृश्यंते तारकास्तथा न शुद्धे तद्वदिति ॥ १०५ ॥

दोषाकर इति दोषाकरः पातकी चंद्रश्च विष्णुपदं हरिचरणमाकाशं च सद्वृत्ततां पूर्णज्ञानतां पूर्णमंडलतां च पंचदश्या तन्नामकाध्यात्मविद्याग्रंथेन पूर्णिमया च षोडशकलाः इंद्रियदशकं प्राणपंचकं मनश्चेति लिंगशरीरं अन्यत्र प्रसिद्धाः विदेहभावो देहमुक्तिरदर्शनं च पातकिन्यपि हरिभक्तौ प्रवृत्ते तत्प्रसादेन कंचनगुरु-मुपलभ्य तत्सकाशाद्वेदांतश्रवणेन ज्ञातब्रह्मात्मैक्यो निश्चयेन लिंगदेहभंगपूर्वकं मुक्तो भवतीति तात्पर्यं 'न तस्य प्राणाउत्क्रामंति अत्रैव समवलीयंते विमुक्तश्च विमुच्यत' इत्यादि श्रुतेः ॥ १०६ ॥

भवचरण इति अकं पापे च दुःखेति विश्वः अकः पापः आकारो यस्य [तं] पापरूपमित्यर्थः कामरणं वेश्यासुरतोत्सवं मरणं संसारः मृत्युश्च भवचरण इति शब्दे चे चकारे तस्तकारः कृतश्चेद्भवतरणं भवति तथा कामरणशब्दः अकाकारः काकारेण रहितश्चेत् मरणमिति जायत इति ॥ १०७ ॥

स्याल्लिंगभंगो बहुवाररामासंगेन कामाभिहतस्य पुंसः ॥
लिंगस्य भंगे हि विदेहभावो भवेदिति स्पष्टतरं ब्रवीमि ॥ १०८ ॥
सुखस्य लिंगं वदनोज्ज्वलत्वं तत्सर्वदा सौम्य समीहसे चेत् ॥
निःसंगमंगीकुरु शर्वदास्योज्ज्वलत्वमेकं किल निर्व्यलीकम् ॥ १०९ ॥
तत्र श्रवणं ॥ भो भक्तिमार्गनिरताः श्रवणं कुरुतानिशम् ॥
भजनस्य हि संपूर्तिः श्रवणेन विना कुतः ॥ ११० ॥
स्पृहयते यदि माधवलब्धये भवतु तच्छ्रवणप्रवणो जनः ॥
श्रवणधिष्ण्यगतो भगवानिति प्रथयति श्रुतिरेव सनातनी ॥ १११ ॥
श्रवणानुसरणमेव श्रीरामं स्पृहयतां सतामेकम् ॥
श्रवणाभावं रचयन् रामविरहमन्वभूद्दशरथोऽपि ॥ ११२ ॥
यो नवीनोपनीतानां विना श्रवणकर्मणा ॥
श्रुतिग्रहः सविफलः शिष्टैश्चापि विगर्हितः ॥ ११३ ॥

स्याल्लिंग इति कामोऽभिहतो यस्य निष्कामस्येत्यर्थः बहुवारं बहुकालं रामेण आसंगः आसक्तिस्तेन लिंगदेहस्य सप्तदशकलात्मकस्य भंगो नाशः तस्मिन् सति विदेहकैवल्यं मोक्षः स्यात् कामेनाभिहतस्य ताडितस्य बह्व्यो या वाररामा वेश्यास्तत्संगेन लिंगभंगः उपदंशेन तस्मिन् सति विदेहभावो मरणं जायेतेति ॥ १०८ ॥

सुखस्येति शर्वस्य शिवस्य वास्ये उज्ज्वलत्वं निष्कपटत्वं यच्छर्वदास्योज्ज्वलत्वं तच्छब्दयोरभेदात्सर्वदास्योज्ज्वलत्वं सर्वदाऽऽस्यस्य मुखस्योज्ज्वलत्वं ॥ १०९ ॥

अथ सामान्येनोक्तां भक्तिं श्रवणकीर्तनादिविशेषाकारेण वर्णयति तत्र तावदादौ श्रवणमाह भो इति श्रवणेन तन्नामकभक्त्या नक्षत्रविशेषेण च भजनस्य कीर्तनादेः नक्षत्रलक्षणजनस्य अश्विन्यादिसप्तविंशतिराशिरूपस्य च ॥ ११० ॥

स्पृहयत इति श्रवणाधिष्ण्यं श्रवणभक्तेः पदं तन्नक्षत्रं च श्रवणस्य हि विष्णुदेवकत्वं तथा च श्रुतिः 'त्रेधा विष्णुरुरुगाय' इत्यादि ॥ १११ ॥

श्रवणेति श्रवणं तन्नामभक्तिः श्रवणाख्यो वैश्यमुनिश्च यत्र हते तत्पित्रा दशरथं प्रति शापो दत्तः किमिति त्वमप्येवं पुत्रविरहवान् भवति 'श्रवणमुनिपितुः प्रायः शापकाल' मिति हनुमन्नाटके ॥ ११२ ॥

यइति यथा नूतनब्रह्मचारिणां श्रवणनक्षत्रे कर्तव्येनोपाकरणाख्यसंस्कारेण विनाकृतं वेदग्रहणं विफलं शिष्टासंमतं च तथा विगरुडस्तस्येनो विष्णुस्तेनोपसमीपं नीतास्ते न भवंति ते नवीनोपनीताः संसारिणस्तेषां सच्छास्त्रश्रवणं विना कृतं कर्णग्रहणं विफलं शिष्टासंमतं च 'बिलेवतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्ये'ति भागवतोक्तेः ॥ ११३ ॥

श्रवो मुकुंदस्य सखे दिगंतारूढं तथासि त्वमपि श्रवो मे ॥
सख्यं तवानेन भवेत्तु मुख्यं गुणेन नाम्ना पयसोरिवेह ॥ ११४ ॥
धत्से यत्किल कुण्डलं वससि यच्चांगेषु नेत्रांकतो ।
यच्चैकांततया खलान् समुदितान् संसेवसे कौरवान् ॥
तत्कर्ण प्रतिभासि कर्ण इव मे नाम्ना गुणैः सर्वथा ।
तद्राधाप्रियसाधको भव नरस्तोत्रमवर्थास्त्यज ॥ ११५ ॥
या किन्नरोपज्ञमनेकरागा समूर्च्छना या स्वरभावयुक्ता ॥
तां गीतिकां कर्ण विहाय दूरं शृणु त्वमेताः पुरुषोत्तमस्य ॥११६॥
युक्तं विरक्तः खलु विश्वदेवश्रुतोत्तरागर्भभवः परीक्षित् ॥
ददर्श विष्णोः श्रवणं तदादौ प्रत्यग्दृशिस्थो भजनस्य मध्ये ॥११७॥

भगवद्यशः श्रवणपात्रं कुरु ततस्तुभ्यं तद्विनान्यत् किमपि न रोचतेति कविः स्वकर्णमभ्यर्थयते श्रवण इति यथा पयः पयइति नाम्ना माधुर्यादिगुणेन च दुग्धजलयोर्मुख्यं सख्यं तथा हे श्रव कर्ण तवापि मुकुंदश्रवश्च स्यात् यशोऽपि दिगंतारूढं त्वयि दिशः देवतात्वेन अंतः रूढः यस्मिन् तथोक्तं रोरीति लोपेढ्रेति दीर्घः ॥ ११४ ॥

धत्स इति कुंडलं कर्णवेष्टनं तदेव सहजं च अंगेषु प्रतीकेषु देशविशेषेषु च नेत्रांकतः नयनसमीपे नेत्रं नायकस्तस्यांकं चिन्हं तेन प्रभुत्वेनेत्यर्थः खमाकाशं लांति गृह्णंति तथोक्तास्तद्गुणत्वादुद्धताश्च समुदितानुच्चारितान् उदयं गतांश्च कौरवान् सुयोधनादीन् कौ पृथिव्यां रवान् शब्दान् राधाप्रियः कृष्णो राधायाएतन्नाम्न्याः कैवर्तकुटुंबिन्याः इष्टं च तया हि कर्णः पालितोऽभूत् नरो मनुजोऽर्जुनश्च ॥११५॥

कदाचिदापातरमणीयत्वेन प्रवर्तिष्यसे तत्राह येति । किन्नराः देवगायकविशेषास्ते [illegible] स्त्रालगावशष [illegible] पक्रममिति नपुंसकत्वं अनेके रागाः भैरवरामकल्यादयो यस्यां मूर्च्छना एकविं[illegible] सप्तस्वराणां प्रत्येकं ग्रामत्रयं स्वराः षड्जादयः सप्त तेषां सत्ता यस्यां भगवद्[illegible] न पुरुषोत्तमोपज्ञं वैराग्यापादिकाः मोहविध्वंसिन्यश्च स्वर्गप्रापिकाश्च किन्नरो [illegible] गायकः कुत्सितनरश्च रागो विषयप्रीतिः रामकल्यादिश्च मूर्च्छना मोहः एकविंशतिश्च स्वरित्यव्ययं स्वर्गवाचि तदभावः षड्जादिसत्तांचेति ॥ ११६ ॥

यत्परीक्षिद्धरिगुणश्रवणमेव चकार तद्युक्तमित्याह युक्तमिति । विश्वस्य देवो नाथो हरिस्तेन श्रितो यः उत्तराया गर्भस्तत्र भवः 'अश्वत्थाम्ना प्रयुक्तं ब्रह्मास्त्रं भगवान् गदापाणिर्गर्भस्थः सन् निवार्य परीक्षिद्रक्षणं कृतवानिति' भागवते प्रत्यग्दृशि स्वरूपज्ञाने स्थितः भजनस्य मध्ये विष्णोः श्रवणमेव ददर्शेति युक्तं विश्वैः देवैः श्रिता देवतात्वेन सा उत्तरा उत्तराषाढा त[illegible] प्रत्यक् पराचीना या दृक्

अथकीर्तनं ॥ श्रीचिंतापि मनोभवं वितनुते सत्सान्निधिः किंपुन-
स्तस्मिन् सत्यपि नित्यदा नु जपति श्रीरामरामेति यः ॥
साधोस्तस्य महेश्वरस्य न पुरः स्थातुं समर्थः स्मरो ।
नूनं दर्शयितुं जनानिति भवोऽभूदर्धनारीनटः ॥ ११८ ॥
सत्त्वप्रधानानि जगाद यास्को नामानि गीतासु तु वासुदेवः ॥
सत्त्वं सुखे संजयतीत्यतोऽपवर्गमेव तस्मान्महते सुखाय ॥ ११९ ॥
भो मानवा नाम वदध्वमुच्चैस्ततो भवेज्ज्ञानमतीव शुद्धम् ॥
सुप्रत्ययोस्मादविशेषतः स्यादिति प्रतिज्ञां कुरुते ह्यनंतः ॥ १२० ॥
मंथानं स्वधियं विधाय भगवानाम्नायरत्नाकरं ।
निर्मथ्यासकृदुज्जहार गिरिशो रामेति रत्नोत्तमम् ॥
तदस्याधिकं विराजति महाभागाय दिव्यात्मने ॥
तस्मै धन्यतमाय न स्पृहयतां किं मुक्तिपण्यांगना ॥ १२१ ॥
श्रीरामनाम्नः कथनेन मर्त्यो ह्युष्टोपि भिन्नात्मकतां विहाय ॥
ऐक्यं समेतीति वितर्कयेऽहं यन्ना कुजन्माऽजनि नाकुजन्मा ॥ १२२ ॥

दृष्टिस्तत्र तिष्ठति तथा भूतश्च विष्णुदेवताकं श्रवणमेव भजनस्य नक्षत्रजनस्य मध्ये पश्यति प्रथमोपनेत्वात् अश्विन्यादिनक्षत्राणि हि शुंशुमारचक्रे स्थितानि प्रागच्छंति ॥ ११७ ॥

अथ कीर्तनं । तत्र नाम्नः प्राधान्यात्तदेवस्तुवन्नादौ नाम कामं जयतीत्याह श्रीति साधोः सतो महेश्वरस्य महासमर्थस्य शिवस्य च यथा मम स्त्रियमर्धांगे वहतोऽपि नामजपप्रभावात्स्मरोऽग्रतः स्थातुं न शक्तोऽभूदेवं नाम संकीर्तयितुरपीति दर्शयन् ॥ ११८ ॥

सत्वप्रधानानीति 'भावप्रधा... सत्वप्रधानानि नामानी'ति यास्को नाम ऋषिर्नैरुक्तआह यतो नाम सत्त्वप्र... सत्वं च सुखकारणं तस्मान्नामैव सुखाय कल्पत इति ॥ ११९ ॥

नाम ज्ञानप्रापकमित्याह भोइति वदध्वं भासमाना ब्रूते भासमानोपसंभाषेत्यात्मनेपदं सुप्रत्ययः सम्यक् ज्ञानमविशेषतः स्त्रीशूद्राणामपीत्यर्थः न केवलं ब्राह्मणानामेवेत्यनंतः शेषावतारः पतंजलिरेकवचनमुत्सर्गतः करिष्यामीति नाम्नः प्रातिपदिकमात्रात्सुप्रत्ययैकवचनं विप्रसृद्इति ॥ १२० ॥

नाम्नामुक्तिर्भवतीत्याह मंथानमिति मंथानं मंथनदंडं दिव्यात्मने दिव्यदेहाय धन्यतमाय धनहेतुर्धन्यस्तदतिशयवते च ॥ १२१ ॥

श्रीरामेति भिन्नात्मकतां ... ...भदतां च ऐक्यमद्वैतमेकपदतां च ना नरः

बहिष्कृतः स विज्ञेयो यो हि गोत्रपराङ्मुखः ॥
धर्मोऽप्यस्य न संसिध्येत्कैवल्यं तु कुतस्तराम् ॥ १२३ ॥
बहुदोषभवोपतापशांतिं तनुतेऽतत्रिकृतिं परामकुर्वन् ॥
कलयेऽहमये जगत्त्रयेऽस्मिन्परमं नामरसायनं तदेकम् ॥ १२४ ॥
यो घातुकोऽप्यघोऽपि स्यात्कृष्णकंठो यदृच्छया ॥
निर्भिद्य मूर्धसीमानं स तत्सायुज्यमाप्नुयात् ॥ १२५ ॥
अंग श्रीराममातः श्रवदमृतरसो नामनामा स्तनोऽयम् ॥
हृद्यस्तेऽस्यानवद्यः क्रम इह परमं विस्मयं नस्तनोति ॥
बालानेवाद्विजान् यो जनयति न सुखं केवलं सेवमानान् ॥
यस्मीक्षान्सद्विजानप्यतितरलयते सद्रसेनातिरसान् ॥ १२६ ॥
श्रीरामनाममाधुर्यस्वादसंभृतचेतसाम् ॥
मृद्वीकारसरूपं तु भाति तुच्छतमं भुवि ॥ १२७ ॥

कुत्सितजन्मा नाकुर्वल्मीकं तस्माज्जन्म यस्य स वाल्मीकिरित्यर्थः ना कुजन्मेति यद्विन्नात्मतया स्थितं तन्नाकुजन्मेत्येकपदमभूत् ॥ १२२ ॥

नामपराङ्मुखं निंदति बहिरिति गोत्रं नाम ज्ञातयश्च ॥ १२३ ॥

बहुदोषेति बहुदोषविशिष्टसंसारजन्यउपतापः संतापो बहवः प्रबला ये दोषावातादयस्तेभ्य उत्पन्नो य उपतापो रोगः विकृतिमसद्वृद्ध स्वधर्मत्यागादिकं रोगांतरं च नाम रसायनं आमरसायनं न भवति तच्च आमं रसायनं सेवितमुद्दिष्टरोगं वारयेद्वा नवेति संशयएव परं रोगांतरमवश्यमुत्पादयेदिति तादृगिदं न भवति ॥ १२४ ॥

योघातुकइति घातुकः हिंस्रः अघः पाप्यपि यदृच्छया कृष्ण कृष्ण कृष्ण इति उद्घोषयेद्ब्रह्मरंध्रभेदपुरःसरं कृष्णसायुज्यमाप्नुयात् यथा कृष्णं जिघांसुरघासुरः कृष्णकंठत्वेन मूर्धानं भित्त्वा तत्सारूप्यं गतः 'अघासुरः सर्परूपः कृष्णनिघांसया मुखं व्यादाय वने स्थितः गोपाशिशुषु गह्वरधियांतः प्रविष्टेष्वपि कृष्णं प्रतीक्षमाणोऽभूत् भगवता तज्ज्ञात्वा तत्कंठं प्रविश्य शरीरं वर्धयित्वा तत्कंठनालरोधः कृतः अथ प्राणरोधे जायमाने मूर्धानं भित्त्वा तत्सायुज्यमापेति' भागवते ॥ १२५ ॥

नामेदृशं सदप्यतिमधुरमित्याहांगेति अंगेति संबोधने अमृतरसो दुग्धरसो मोक्षरसश्च हृद्यो वक्षसि भवः प्रियश्च क्रमः परिपाटी बालान् शिशूनज्ञानिनश्च अद्विजान् दंतरहितान् शूद्रादींश्च सद्रसोऽन्नरसो ब्रह्मरसश्च । सद्विजान् दंतसहितानुत्तमद्विजान्नारदादींश्च ॥ १२६ ॥

श्रीरामेति मृद्वीका द्राक्षा तस्या यो रसस्तस्य रूपं तुच्छं भासते यतस्तत् मृदोवीकारो विकारस्तत्स्वरूपं 'उपसर्गस्य घञ्यमनुष्ये बहुलमिति' पाक्षिको दीर्घः परिहारवत् ॥ १२७ ॥

श्रीरामनाममाधुर्यस्वादसंभृतचेतसाम् ॥
शर्करा वा सुधा वापि परार्थत्वेन मन्यते ॥ १२८ ॥
मन्ये वेदरसालजं फलमिदं रामेति नामेशितु-
र्व्यूढं गूढरसं तु तत्प्रथमतस्तत्रानुतापे सति ॥
रागोरिमच्छनकरुदेत्यथ महामोदोद्गमानुद्गिरं-
श्च्योक्षे चोषितमात्र एव सहसा श्च्योतत्यतः सद्रसः ॥ १२९ ॥
न द्विषंति ग्रहाश्चंद्रमेष दोषाकरोऽपि सन् ॥
माहात्म्यमेतच्छ्रीरामनामसंसर्गसंभवम् ॥ १३० ॥
चंद्रो वै परदारधर्षणरतो नक्षत्रमार्गस्थितो ॥
नित्यं क्षीणतनुः कलंककलुषो दोषाकरोऽतर्जडः ॥
ईदृक् सन्नपि यच्च राजपदवीमारूढवान्सांप्रतम् ॥
सोयंऽरामपदप्रसंगमहिमा लोके समुज्जृंभते ॥ १३१ ॥

श्रीरामेति शर्करां सितां सुधाममृतं परार्थत्वेनान्यवाचकत्वेन मन्यते ननु प्रसिद्ध शर्करामृतवाचकत्वेन शर्कराचूर्णं दृषत् सुधा चूर्णं ॥ १२८ ॥

ननु नामैतादृङ् मधुरं चेदनुभवारूढं कुतो न जायते नहि माधुर्याभिज्ञः कश्चिद्गुडशर्करादिकं परित्यज्य तत्कार्यकारित्वेन नामान्यनुसंकीर्तयतीति चेत्तत्राह मन्यइति ईशितुः परमात्मनो रामेति नाम वेदाम्रवृक्षस्य व्यूढं विशालं फलमस्ति तत्प्रथमतस्तु गूढमाधुर्यं तत्रानुतापे वैराग्ये ऊष्मणि च सति रागस्तद्विषयप्रेमा तन्निष्ठो रक्तिमा च महामोदः परमामोदो गंधश्च चोक्षे सम्यक् पक्के सद्रसो ब्रह्मरसः श्च्योतति क्षरति यथाम्रफलमादावम्लमेव तस्य च पाकसमये ऊष्मापेक्षाऽन्यथादार्ढ्य-भावहत् न सम्यक् पच्येत ततस्तत्र आमोदमुद्गिरन् रक्तिमोदेति ततो वृक्षादवचित्य चोषितमात्र एव रसं मुंचति तद्वदिदमपीति एतेन परिपाकपर्यंतं वेदोदितकर्मसाहि-त्येनैव कीर्तनं जातपरिपाके न कर्मण्यासंग इति सूच्यते 'तावत्कर्माणि कुर्वीत न निर्विद्येत यावता । सत्कथाश्रवणादौ वा श्रद्धा यावन्न जायत' इति शुकोक्तेः ॥ १२९ ॥

नाम्नः साक्षात्संकीर्तनं महाफलमिति किं वाच्यं यदेतस्य यत्र क्वापि संसर्गोऽपि महाफलइत्याह नद्विषंतीति दुराचारपीडका अपि ग्रहा न चंद्रं द्विषंति 'मिथोर्नो रिपुरिति' ज्योतिषात् रामचंद्रइति पदे चंद्रस्य रामसंसर्गो जातइति ॥ १३० ॥

चंद्रइति न सुशीलो न च क्षात्रशाली नापि बलिष्ठः नैव कीर्तिमान् न पुण्य-शीलो न च बुद्धिमान् तथाऽपि राजभावमापन्नः परदारास्तारा नक्षत्रमार्गआकाशं क्षत्रमार्गाभावश्च कलंकोऽकः गर्हाच अंतर्जडो मंदोऽतर्जलश्च जलमयमंडलत्वात् राजा भूपश्चंद्रश्च ॥ १३१ ॥

जातः सन् कुटिलत्वमेव भजते संसेवते वारुणीं ॥
शुभ्रांघ्रिर्गुरुदारधर्षणकरो ब्रह्मघ्नसंसर्गभाक् ॥
ईदृक् सन्नपि यद्द्विजेंद्रपदवीमारूढवान्सांप्रतं ॥
सोऽयं रामपदप्रसंगमहिमा लोके समुज्जृंभते ॥ १३२ ॥
जातः सन्कुटिलत्वमेव भजते संसेवते वारुणीं ॥
शुभ्रांघ्रिर्गुरुदारधर्षणकरो ब्रह्मघ्नसंसर्गभाक् ॥
युक्तं तत्क्षयजर्जरो हिमवपुर्यत्त्वेष जैवातृकः ॥
सोऽयं रामपदप्रसंगमहिमा लोके समुज्जृंभते ॥ ३३ ॥
विश्वस्यास्य पृथक् पृथग्ग्रह इह स्यान्निग्रहानुग्रहे-
ष्वेकैकोऽपि समग्रकर्मणि पुनः सर्वानुकूल्ये सति ॥
प्रायेणैव महाजनः स्पृहयते चंद्रानुकूल्याय यत् ॥
सोऽयं रामपदप्रसंगमहिमा लोके समुज्जृंभते ॥ १३४ ॥
चंद्रोऽयं क्षयजर्जरः किल तथाप्यादित्यभौमादयः
प्राणिभ्यः सदसत्फलं स्वगतिभिर्दातुं समग्रग्रहाः ॥
सर्वाधारतया श्रयंति यदमी नूनं तदीयं बलं ॥
सोऽयं रामपदप्रसंगमहिमा लोके समुज्जृंभते ॥ १३५ ॥
द्राक्षादीनि फलानि संति मधुराण्येवेति नैवान्यथा ॥
किन्त्वेको भृशमाम्र एव भवति प्रेयान्नृणां सर्वतः ॥
आत्तस्य त्वमुना कथंचिदपि यद्रामेति सर्वात्मना ॥
नाम्नो वर्णचतुष्टयस्य महिमा सोऽयं समुज्जृंभते ॥ १३६ ॥

जातः सन्निति वारुणीं प्रतीचीं दिशं सुरां च शुभ्रांघ्रिः किरणः श्वेतदूषितपादश्च ब्रह्मघ्नः शिवः 'तेन हि चतुराननस्य पंचमशिरश्छेदः कृतइति' पुराणादौ चंद्रचूडत्वात् संसर्गः अन्यत्र प्रसिद्धं द्विजेंद्रश्चंद्रः ब्राह्मणश्रेष्ठश्च ॥ १३२ ॥

जातः सन्निति जैवातृक आयुष्मांश्चंद्रश्च हिमकरो यस्य हस्तपादाद्यवयवाः शीतला जाताएतावान् क्षय्यासन्नमरण इत्यर्थः एतच्चोक्तदोषफलं युक्तं तथाऽपि जैवातृकः ॥ १३३ ॥

विश्वस्यास्येति सर्वत्र सर्वेषां ग्रहाणामानुकूल्येऽपि चंद्रानुकूल्यमपेक्षंते प्रायेणेति 'शुक्ले चंद्रबलं प्रोक्तं कृष्णे ताराबलं स्मृत'मित्यभिप्रायेण ॥ १३४ ॥

चंद्रोयमिति चंद्रस्य बहुदौर्बल्येऽपि सर्वेग्रहाः प्राणिभ्यः साध्वसाधुफलदानेऽस्यैव बलमपेक्षंते तद्रामनामवैभवप्रसंगजं 'अमृतकिरणरश्मेर्वीर्यमादाय सर्वे ददति हि फलमेते प्राणिनां साध्वसाध्विति' श्रीपतिः ॥ १३५ ॥

द्राक्षेत्यानुपूर्व्याः संसर्गे महाफलमिति किं वक्तव्यं यदानुपूर्वीभंगेनाऽपि यथा कथं-

चापः पुष्पमयो मधुव्रतमयी मौर्वी मिता मार्गणा ॥
हीनांगः स्वयमप्यसौ जयति यन्मारो जगत्सर्वशः ॥
आसस्य स्वमुना कथंचिदपि यद्रामेति सर्वात्मनो ॥
नाम्नो वर्णचतुष्टयस्य महिमा सोऽयं समुज्जृंभते ॥ १३७ ॥
अत्यंतं चपला रमा प्रकृतितोऽन्यथा जलध्यात्मभू-
रेवं सत्यपि यद्धरेर्भगवतो द्वेधापि स्थाऽभवत् ॥
आसस्य स्वमुया कथंचिदपि यद्रामेति सर्वात्मनो ॥
नाम्नो वर्णचतुष्टयस्य महिमा सोऽयं समुज्जृंभते ॥ १३८ ॥
पापा ये तु निरक्षराः परदृढासक्त्यैव रामेत्यदः ॥
संसर्गाद्दधति स्थितिं सुनियतं लेखेषु सर्वोपरि ॥
रेफात्मन्युत नापवर्गभवने वर्णे जघन्ये फलम् ॥
यस्माद्दृश्यत एतदत्र निखिलं रामेति संसर्गजम् ॥ १३९ ॥
परं पदमिदं जगद्गमयति स्वसंकीर्तना-
दनंतखरदूषणप्रतिहतिं विधत्तेतराम् ॥

चिद्वर्णग्रहणे फलमित्याह । द्राक्षेति । राम इत्यत्र रेफ आकारो मकारोऽकार इति वर्णचतुष्टयं तदाग्रेण गृहीतं यथा वाल्मीकिना मरेति तथा आकारो मकारो रेफोऽकार इति ॥ १३६ ॥

चापइति । मार इत्यत्रापि म् आ र् अ इति वर्णचतुष्टयं ॥ १३७ ॥

अत्यंतमिति । रमा इत्यत्रापि र् अ म् आ इति वर्णचतुष्टयं द्वेधाऽभ्यंतरे बाह्ये च ॥ १३८ ॥

पापाइति । पापा अपि रामेति नामसंसर्गमात्रेण लेखेषु देवेषु सर्वोपरि स्थितिं दधति परमेते निरक्षराअपेक्षिताः यत्तेषां दृढासक्तिर्भवति अधीतवतां तु वितर्का-कुलतया दृढासक्त्यभावाद्रेफात्मनि रेफरूपे कुत्सितात्मनि च नापवर्गभवने अपवर्गो भवनं यस्य स न भवत्यपवर्गभवनः स न भवति नापवर्गभवनः पवर्गीय इत्यर्थः । जघन्ये चरमे वर्णे मकारे मोक्षयोग्ये न भवति तादृशे नीचवर्णे च रामेति समुदि-तसंसर्गस्य फलं दृश्यते यल्लेखेषु लेखनेषु सर्ववर्णोपरि रेफमकारौ स्थितिं कुरुतः परमेतौ निरक्षरौ स्वररहितौ चेद्यथा भर्गः संज्ञा न तु सरसः समर इत्यादौ कस्मात्सा-क्षरत्वात् अक्षरं तत्कर्मकत्वादध्ययनं अकारादिस्वरजातं च परे ब्रह्मणि दृढासक्तिः परवर्णेषु च लेखो देवो लेखनं च रेफो रवर्णः कुत्सितश्च नापवर्गभवनः पवर्गस्थो मोक्षानर्हश्च । जघन्योऽत्यो नीचश्च वर्णोऽक्षरं ब्राह्मणादिश्च ॥ १३९ ॥

किंबहुना नामेदं रामादप्यधिकमित्याह । परमिति । रामेणत्वेकाऽयोध्यैव परं पदं नीता खरो दूषणश्चैकैक एव हतो विश्वामित्रमखश्चैकएव विहितोऽपघाता-

मखानवति सर्वतोऽप्यविदितोपघातादतो ॥
निकाममपि रामतो जयति नाम तस्योत्तमम् ॥ १४० ॥
सृजति नाम सुशीलवरं जनं रघुपतिस्तु कुशीलवरंजनम् ॥
अहमतः कथयामि गुणाधिकं रघुपतेरपि नाम तदीयकम् ॥ १४१ ॥
महेशो रामाख्यं परमममृतं वेदजलधेः ॥
समुद्धृत्य प्रेम्णा स्फटिकनिभकंठे निहितवान् ॥
जनः कश्चित्पश्येन्मलिनतरदृष्ट्येति भगवान् ॥
धृताशंकः पंकैर्मृगमदभवैः किं स्थगयति ॥ १४२ ॥
मित्रक्षेत्रकलत्रपुत्रसदनद्रव्याणि दिव्यप्रभं ॥
कूर्चं भव्यशिखोपवीतमपि यद् ब्राह्मण्यसंपादकम् ॥
त्यक्त्वाप्यस्य तदंबरं बत बलादादिश्य भिक्षाटनम् ॥
दंडं चापि पुनः स्मरेदिति महावाक्यं श्रुतेर्गोचरम् ॥ १४३ ॥
रातन्मत्त्वमसि द्वयोर्युतिरिति प्रोक्तं रहस्ये महा-
वाक्यं तत्सुलभं नृणां कथमपि स्याद्भुक्तिमुक्तिप्रदम् ॥
यच्चैतत्स्पृहयन्विमुक्तिमति यत् लोकांतया मारुति-
भोगाः संतु तवाखिलाइति बलात्सानंदमुच्च्याहृतः ॥ १४४ ॥

द्रक्षितः । नाम्ना तु त्रिभुवनं परं पदं नीयते । अनेकानि खरदूषणानि हन्यंते । 'यस्यस्मृत्येत्यादिना ' विदितादविदिताच्चोपघाताद्विदिते प्रतिपदोक्ते प्रायश्चित्ते कृतेऽपि तदीयवैगुण्यापनोदार्थं अविदितेत्वर्थादेतदेवेति मखमात्रं रक्ष्यते ॥ १४० ॥

सृजतीति । नाम सुशीलेषु वरं श्रेष्ठं जनं करोति । रामस्तु कुशीलवयोः पुत्रयोः रंजनं लालनं करोतीत्यर्थांतरं (रामावतारयोगेन रघुवंशस्य सूर्यवंशस्य भूषणं भवतीति) ॥ १४१ ॥

अत एव भगवान् महेश्वरः परमोत्कृष्टमिति कृत्वा नाम साधु रक्षतीत्याह । महेश इति स्पष्टं ॥ १४२ ॥

'आद्यो रा तत्पदस्यार्थे मकारस्त्वंपदार्थवान् । तयोः संयोजनमसीत्यर्थे तत्वविदो विदुः' । 'तत्त्वमस्यादिवाक्यं तु केवलं मुक्तिदं मतं । भुक्तिमुक्तिप्रदं चैतत् तस्मादप्यतिरिच्यत ' इति रहस्योपनिषदं मनसि निधायाह मित्रक्षेत्रेति कूर्चं श्मश्रु मित्रादि सर्वं हत्वा भिक्षाटनमादिश्य त्यक्तं पुनः स्मरेदिति दंडं निर्दिश्य तत्त्वमसिवाक्यं श्रुतिगोचरं भवति दंडो वैणवोऽपराधशिक्षार्थं क्रियमाणश्च ॥ १४३ ॥

रातन्मेति । राकारस्तत्पदार्थो मकारस्त्वंपदार्थस्तयोर्योगोऽसिपदार्थः एतन्महावाक्यं सर्वेषामाचांडालं सुलभं तत्तु ब्राह्मणानामेव नेतरेषां तत्त्वेकांते गुरुशिष्यैकसमधिगम्यमिदं तु वाद्यघोषपुरःसरं सर्वत्र विराजते । तत्तु सर्वं त्यक्त्वा श्राव्यं इदं

अनंताकारमप्येतदनंताकारमेवहि ॥
वैपरीत्यं गतमपि नार्थहानिर्मनागपि ॥ १४५ ॥
अपि ललितसुगुणवेणिः सालंकाराऽपि या सुवर्णाऽपि ॥
रघुतिलकविहीना चेद्वाणी रमणीव नैव कल्याणी ॥ १४६ ॥
भावप्रधानमस्याख्यातं यत्प्रत्ययः परः प्रकृतेः ॥
तं भज शेषगिरिस्थितमच्युतमिह शाब्दिकं वचःशुद्ध्यै ॥ १४७ ॥
नो जातः प्रकृतेः परः क्वचिदपि प्राप्नोति यत्प्रत्ययो ॥
लोपं नैव विकल्पते किल यदादेशः प्रवृत्तः क्वचित् ॥

तु सर्वं त्यक्तवनो बलाद्भुक्तिमर्पयति । भगवता रामेण वरं वृण्वित्युक्ते 'त्वन्नाम स्मरतो राम न तृप्यति मनोमम । अतस्त्वन्नाम सततं स्मरन्स्थास्यामि भूतले ' इति हनुमता सर्वत्र विरज्य नामन्येवार्थिते जगज्जनन्या जानक्या 'तमाह जानकी प्रीता यत्रकुत्रापि मारुते । स्थितं त्वामनुयास्यंति भोगाः सर्वे ममाज्ञया' त्यादतः यश्च सीतादेव्याऽऽदृतः स आनंदमुक्त्या जीवन्मुक्त्यैवादृतो विद्यामयत्वात् ॥ १४४ ॥

अनंताकारेति । एतद्रामेतिनाम अंते योऽकारस्तेन रहितमपि राम् इति बीजं भवति तच्चानंताकारं 'यथैव वटबीजस्थः प्राकृतश्च महाद्रुमः । तथैव रामबीजस्थं जगदेतच्चराचरमिति ' श्रुतेः विपरीते कृते मरेति जातं चेदपि व्यतिहारः संपद्यते सोऽहमहंस इतिवद्व्यतिहारोविशिंषतीति ब्रह्मसूत्रात् अतएव वाल्मीकेस्तत्फलदमभूत् ॥ १४५ ॥

मोक्षपदवीं प्रस्थितवतां पुरःस्थिता भगवद्गुणरहिता वाणी न कल्याणी 'नतद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् । तद्वायसंतीर्थमुशंति मानसा न यत्र हंसाविरमंत्युशिक्षयेति ' शुकोक्तेरित्याह । अपीति यथा ललितमुक्तादामग्रथितवेणिः अलंकृतोत्तमांगकांतिरपि रमणी लघुना तिलकेन विहीना यथा ग्रामांतरं प्रस्थितानां न कल्याणी पुरतः स्थिता तथोत्तमप्रसादादिकाव्यगुणानां प्रवाहो यस्यामुपमाद्यलंकारवती वर्णरचनाऽपि मधुरा यस्यां तादृश्यपि वाणी रघुतिलकेन रामेण हीनाचेन्न कल्याणी ॥ १४६ ॥

ननु वाक्शुद्धिर्व्याकरणोपासनमंतरेण न घटत इति किं हरेरुपासनेनेति चेन्न हरेर्व्याकरणरूपत्वादित्याह । भावप्रधानमिति । यस्य आख्यातं कीर्तनं भावप्रधानं भक्तिप्रधानं आख्यातं तिङंतंच भावप्रधानं देवदत्तोगच्छतीत्यत्र देवदत्तकर्तृकं गमनमिति बोधः । न तु तार्किकवत् गमनानुकूलव्यापारवान् देवदत्तइति यस्य प्रत्ययः प्रतीतिः प्रकृतेर्बुद्ध्यादिभ्यः परो यो बुद्धेः परतस्तुस' इति प्रत्ययः सुप्तिङादिः प्रकृतेर्नामधात्वादिभ्यः परः प्रत्ययः परश्चेति सूत्रात् शेषगिरिर्वेंकटाचलः शेषावतारस्यपतंजलेर्गिरिवाचि उत्तरोत्तरं मुनीनां प्रामाण्यात् ॥ १४७ ॥

वृद्ध्या यस्य गुणो न बाधित इति श्रीरामचंद्रप्रभुः ॥
सं वैय्याकरणाद्विशिष्यत इति त्वं वाक् तमेवाश्रय ॥ १४८ ॥
त्वदधिपतिरयं सदाश्रयाशः स परं सर्वजनाश्रयप्रदोऽस्ति ॥
जनयति बहुतापमंतिकस्थः स पुनर्विष्णुरनेकतापहंता ॥ १४९ ॥
शोभंते न कलाकलापकुशलाः कांता हि कांतं विना
तद्वाणि स्पृहणीयसद्गुणगणं श्रीनायकं संश्रय ॥
नन्वस्ति ज्वलनः पतिर्मे इति दुस्तर्कं वृथा मा कृथा
यत्स्वप्नेऽप्यविवाहिते न रमणे मुख्या रमन्ते स्त्रियः ॥ १५० ॥

किं च भगवान् श्रीरामो वैय्याकरणादपि विशिष्यत इति स एवाश्रयणीय इत्याह । नो जात इति । हरेः प्रत्ययः सकृज्जातो न लुप्यते 'इयं ज्ञानकला त्वंतः सकृज्जाताऽभिवर्धते' इति वासिष्ठोक्तेस्तु राजन् सु इत्यत्र प्रकृतेः परो जातोऽपि सुरूपोऽपि प्रत्ययो लुप्यते । हल्ङ्यादि सूत्रात् । किं च यस्य हरेरादेशः क्वचिन्नविकल्पते 'भीषास्माद्वातः पवत' इत्यादि श्रुतेः अस्य तु हर एहि हरयेहीति लोपः शाकल्यस्येति लोपरूप आदेशो विकल्पते यस्य भगवतो वृद्धिः परकीयगुणं न बबाधे । किं तु परगुणरसिकैवाभूत् । यद्वा यस्य वृद्धिः परिस्फूर्तिस्तथा तथा गुणस्य मैत्र्यादिकस्यापि वृद्धिरेव न बबाध इत्यस्य तु वृद्धिरेचीति (वृद्धिराद्गुणइनिगुणं बाधते गंगौघ इत्यादौ) ॥ १४८ ॥

हे वाणि यद्येवं न मन्यसे किमि 'त्वामग्निर्मे वाचि श्रित' इत्यादि श्रुतेरुत्पन्नैवाहमग्निनाधिष्ठितेति कथमन्यं भजेयेति चेन्मैवं तदाश्रयो न स्वार्थहेतुरित्याह । त्वदधीति आश्रयाशः आश्रयस्याशा यस्येति स्वातंत्र्याभावः आश्रयं अश्नातीति च हरिस्तु सर्वाश्रयप्रदः अग्निस्तापं जनयति हरिस्त्वनेकतापहा नानात्वहंता च ॥ १४९ ॥

तस्मात्सुखहेतुर्गुणवान् श्रीमानेवाश्रयणीय इत्याह शोभंत इति अग्निः पतिरस्तीति दुस्तर्कं मा कृथाः यत् सर्वस्त्रीसाधारणमिदं तथा च श्रुतिः 'सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः । तृतीयो अग्निस्ते पतिस्तुरीयस्ते मनुष्य इति' एवंचाग्निः पतिरिति कृत्वा न काभिरपि तुरीयो वृतः । अपि तु व्रियत एव तस्मात्त्वं तुरीयं मनुष्यजं वृणु स च श्रीकृष्ण एव नान्यः । यद्यग्निना तव विवाहोऽभविष्यत्तर्हीदं वक्तुं सांप्रतमभविष्यत् स त्वविवाहितोऽस्ति । अविना मेषेण वाहितश्च कृष्णस्तु विवाहितोऽस्ति परं त्वं मुग्धत्वान्न जानीषे । विना गरुडेन वाहितस्तस्माद्विवाहितं स्वतःसिद्धकांतं ककारांतत्वाच्छ्रीनायकं परित्यज्याविवाहिते रमणं मुख्यानां स्त्रीणां दूषणमित्याह न स्वप्नेति । मुखे भवा मुख्या ॥ १५० ॥

अंगेषु मुख्या द्विजमध्यसंस्था बाणानुसंधानपराऽसि नित्यम् ॥
अंधस्थिरप्रेमरसा रसज्ञे नरस्तुतिं तत्यज कर्णवत्त्वम् ॥ १५१ ॥
जिव्हे सर्वरसज्ञतां त्वयि गतां ज्ञात्वा समंतात् स्थिता
आसन् श्रीरघुनाथसद्गुणकथालाभार्थमेते द्विजाः ॥
तद्वार्ताऽपि च न त्वयीति शिथिला रुष्टा किमेकैकशो
निष्क्रांता इव संभ्रमात्तदधुना रामेत्यपि त्वं वद ॥ १५२ ॥
युक्तं स्वपंजरचरो हरितत्त्वसेवी
लोके न च क्वचन गच्छति पक्षपातम् ॥
व्यक्ताक्षरं सुमधुरं निगदन् द्विजेंद्रो
राजेंद्रमभ्यरमयत्सुतरां शुकाख्यः ॥ १५३ ॥

एवं भगवत्स्तुतिं कर्तव्यां विधाय नरस्तुतेर्दूरतरोत्सारणं कार्यमिति साधयति । अंगेषु मुख्येति अंगेषु अवयवेषु मुखे भवाऽसि दंतमध्यवर्तिनी शब्दानुसंधानपरा अंधस्यन्ने स्थिरः प्रेमरसो यस्याः कर्णपक्षे अंगदेशेषु मुख्योऽधिपतिर्द्विजमध्ये विप्रमध्ये संस्था स्थितिर्यस्य याचकैर्वेष्टित इति यावत् । यद्वा द्विजाः क्षत्रियास्तत्र संस्था प्रतिष्ठा यस्य ननु कैवर्तकपुत्रस्य कथं क्षत्रियेषु संस्था यदयं बाणानुसंधानपरो महाधानुष्कः अंधे धृतराष्ट्रे स्थिरः प्रेमरसो यस्य तदीयसंततिहितनिरतः नरोऽर्जुनः प्राकृतजनश्च ॥ १५१ ॥

जिव्ह इति मुखे भवो मुख्यो यो रसः उत्तमरसश्च । द्विजा दंता ब्राह्मणाश्च । अयं भावः रसज्ञमुखेन हि हरिगुणोल्लसनं परमरमणीयमिति तां त्वयि ज्ञात्वा भगवत्कथालाभार्थमेते द्विजास्त्वां परित आसन् त्वं न प्रौढेति कृत्वा तादृश्यां त्वयि पुनरागमिष्याम इत्येकदा निर्गतास्ततस्त्वां प्रौढां ज्ञात्वा पुनरागत्य स्थितास्त्वत्परितोषायापि त्वदलभ्या य इक्ष्वादीनां रसास्तानपि तुभ्यं दत्तवंतः । तथापि त्वयि रामकथावार्ताऽपि नास्तीति निर्विण्णा रुष्टाः संतो निर्गंतुमारब्धाः संति । अधुनाऽपि तर्हि अनभ्यस्तेन कीर्तनेनालं केवलं रामेत्यपि वदेति ॥ १५२ ॥

इदानीं श्रीशुकेन कीर्तनमेव परिशीलितमिति तद्युक्तमित्याह । युक्तमिति स्वपंजरगतः स्वः आत्मा ब्रह्म स एव पंजरः स्वकीयपंजरश्च अन्यपंजरे स्थापितश्चेत्तत्रत्येनसहवासान्न सम्यक् ब्रवीतीति च हरेस्तत्त्वं हरितत्वं हरिद्वर्णत्वं च पक्षपातमाग्रहं पक्षैः पातं गमनं च व्यक्तं यदक्षरं ब्रह्म सगुणं रामकृष्णादि स्पष्टाक्षरं च यथास्यात्तथा शुकाख्यो योगींद्रः कीरश्च । द्विजेंद्रः पक्षिश्रेष्ठो द्विजश्रेष्ठश्च राजेंद्रं परीक्षितं राजश्रेष्ठं च ॥ १५३ ॥

तालिका हस्तगा चेत्स्यान्नामादेशपुरःसरम् ॥
सखे भवसि रे ब्रह्मकपाटोद्घाटनक्षमः ॥ १५४ ॥
संतो यद्रघुनाथसद्गुणगणव्याख्याप्रसंगांतरे
पिष्टातैरवधूलयंत्यविरलं भालस्थलं देहिनाम् ॥
तन्मन्ये परमेष्ठिसृष्टजननव्युत्थानानिःश्रेणिका
जाग्रद्दुर्लिपिमार्जनस्य सुजनाः कुर्वंत्यहो रूपकम् ॥ १५५ ॥
निद्रा हते प्रेयसि कुंभकर्णे वैधव्यदीक्षां व्यधितेत्यतः किम् ॥
श्रोतुं कथां याति तथा पुराणम् न ग्राम्यगीतं विबुधैर्विगीतम् ॥ १५६ ॥
अथस्मरणम् ॥ अच्युतपदं मनसि कुरु जनयेदच्युतपदं महानंदम् ॥
न हि कोद्रवाः समुप्ताः क्षेत्रे जनयन्ति साधुगोधूमान् ॥ १५७ ॥
चेतश्चंचल संचरस्यतितरां बद्धस्पृहं सत्फले
प्रायेणैव तिरस्करोषि सुमनस्संघान् खले चाणके ॥
धत्से प्रेम वलंबसे च विटपांस्तद्वानरोऽसीत्यतः
श्रीरामं करुणार्णवं भज परं गेहानुबंधं त्यज ॥ १५८ ॥

कीर्तनप्रसंगेन तालिकावादनं स्तौति । तालिकेति । तालिका प्रसिद्धा उद्घाटनयंत्रं च किल्लीति भाषायां । ‘ अस्योद्घाटनयंत्रं तु तालपि प्रतितालय-पीति’हेमः । नामादेशः नामसंकीर्तनं नाम्ना आदेशो निदेशः मुद्रितकपाटोद्घाट-नेनांतस्थवस्तुदर्शनाय राजानो द्वयीं गतिं आचरंति अमुकोऽयमागत एनं प्रति कपाटमुद्घाट्य अंतर्वस्तु दर्शितव्यमित्येवंरूपः संदेशः भृत्यद्वारा लेख्यद्वारा वा अन्या तालिकादानं एतद्द्वयमंतरेण मुद्रितकपाटोद्घाटनं न संभवति तद्वत् ॥ १५४ ॥

पिष्टतिर्भालोद्धूलनं वर्णयति । संत इति । पिष्टाताः सुगंधिचूर्णानि बुक्केति प्रसिद्धाः कीर्तनमध्ये यदेतदाचरंति तस्यायमभिप्रायः । वक्तृश्रोतॄणां भाले ब्रह्मणा या जन्ममरणानां परंपरा लिखिता सा सर्वेषां कीर्तनजनितहरिप्रसादेन मार्जितैवेति रूपकं अनुकरणं ॥ १५५ ॥ निद्रेति स्पष्टं ॥ १५६ ॥

अथ स्मरणभक्तिमाह अच्युतमिति भगवत्पदं ब्रह्मपदं च ॥ १५७ ॥

स्मरणस्य मनोधर्मत्वात्प्रार्थयते । चेत इति । फले कर्मणां फले वृक्षफले च सुमनसः साधवः पुष्पाणि च खले दुर्वृत्ते अणके कुत्सिते प्रेमाणं धत्से चाणके चणकानामिदं तत्र खले प्रसिद्धे विटपान् वृक्षविस्तारान् जारश्रेष्ठांश्च वलंबसे अवाप्योरुपसर्गयोरित्यकारलोपः ॥ १५८ ॥

रे रे चित्त लयो ममामृतकरे स्यादित्यतो मा स्म गाः
स्वास्थ्यं यद्भवसिंधुदोषकृदयं रात्रिंचरोऽतर्जडः ॥
श्रीरामस्तु भवाब्धिशोषणकरो रात्रिंचरद्वेषणो
नित्यं चापलताधरोऽप्यमृतदस्तत्तत्र शीघ्रं विश ॥ १५९ ॥
चंचलस्य विलये तव चेतो योग्यतां वहति चापलताभृत् ॥
युज्यते कथमयं हिमरश्मिमंडलं जलमयं किल यस्य ॥ १६० ॥
मनोऽसि सांतं भज तद्धनंतं क्षयालसं चंद्रमसं जहीहि ॥
स हि स्वयं सांत इति प्रशस्तं धत्ते सदाऽनंतपदावलंबम् ॥१६१॥
रे रे चित्त त्यज द्वैतं त्वमेकत्वं समाश्रय ॥
ततश्चासि चिदेव त्वं नात्र कार्या विचारणा ॥ १६२ ॥
अयि चित्त समुत्थपित्तवद्भृशमुत्क्लेशयते भवो यदि ॥
समसितरुचिराज्यसंभृतं भज शीघ्रं सुखदं महागदम् ॥ १६३ ॥
अथ कथय कथं नु मत्तवन्मां भ्रमयासि पित्तमिवेह वित्तहेतोः ॥
रघुपतिपदपद्मचिंतया त्वं भव तूर्णं मम चित्त पूर्णवित्तम् ॥१६४॥

रे रे चित्तेति । 'पंचत्वोत्तरं मनसश्चंद्रमसि लयो भवतीति' श्रुतिसिद्धमर्थं मनसि कृत्वाह ममामृतकरे लयः स्यादिति किं तेन जन्ममरणनिस्तारो भवति नेत्याह भवः शिवः सिंधुः समुद्रः भवसिंधुश्च दोषाकरोऽतर्जड इति गते रात्रिंचरा राक्षसाः चापलता धनुर्वल्ली चांचल्यं च । चापलश्चपल इतिद्विरूपः । अमृतं मोक्षं ददाति चंद्रस्तु अमृतं करे कृत्वा प्रलोभयति न तु ददाति ॥ १५९ ॥

चंचलस्येति गतार्थः पूर्वश्लोकेन ॥ १६० ॥

सांतेन सांताश्रयणे कृते किं स्यादित्याह । मन इति । सांतमंतसहितं सकारांतं च । अनंतं नाशरहितं भगवंतं ननु ममाधिपतिश्चंद्रोऽस्तीति तं विहाय कथमन्यं भजामि चेत् मैवं तदाश्रयस्याकिंचित्करत्वात् । यतः स हि चंद्रमाः स्वयं सांत इति कृत्वाऽनंतपदं विष्णुपदमाकाशपदं च ॥ १६१ ॥

रे रे चित्तेति द्वैतं भेदं द्वयोस्तकारयोः समाहारो द्वितं तदेव द्वैतं द्वितकारात्मतां त्यज ततश्चि इत्युर्वरितं एकत्वमभेदं । एकः 'त्' यस्य एकत् तस्यभावः एकत्वं एकहलूरूपतकारं भज ततश्चिदसि भवति ॥ १६२ ॥

अयीति । उत्क्लेशयते बाधते उपस्थितवमनमिव करोति सम्यक् असिता कृष्णा रुचिर्यस्य सचासौ राज्यसंभृतः राजभावापन्नस्तं समा न्यूनाधिकप्रमाणरहिता सिता शर्करा यस्मिंस्तच्च तद्रुचिराज्यं सद्यस्कघृतं तेन संभृतं च महागदं महती गदा यस्य तं कृष्णं शुंठीं च ॥ १६३ ॥

अथेति पूर्णं वित्तं द्रव्यं यस्य पूर्णवित्ता ब्रह्मसंपन्नता च ॥ १६४ ॥

पित्रा पितृव्येण च नामशेषतामापादितासीच्छ्रुतिरत्र विष्टपे ॥
अतः स्वधर्माचरणे धृतव्रतः प्रल्हाद एष स्मृतितत्परोऽभवत् ॥ १६५ ॥
अथ पादसेवनं ॥ प्राज्ञानुभूतो भविता यतः स्वप्रत्ययः स किम् ॥
प्रसादः श्रीमतः सिध्येत्पादाधारं विना दृढम् ॥ १६६ ॥
अपि प्रसंगवशतो यो वैकुंठपदं श्रितः ॥
शास्त्रा ब्रवीमि निःशंकं स वैकुंठपदं श्रितः ॥ १६७ ॥
न विष्णुपदसेवनं त्यजत मानवाः सर्वथा
नरस्य कृतकृत्यता भवति यद्द्विजाधीश्वरः ॥
सदाचरणतत्परोऽमृतकरोऽप्यमायां गत-
स्ततः परमधाम्न्यहो विशति कर्मसाक्षिण्यसौ ॥ १६८ ॥

अथ यत्प्रल्हादः स्मरणं प्राधान्येन चकार तद्युक्तमित्याह पित्रेति पित्रा हिरण्यकशिपुना पितृव्येण हिरण्याक्षेण नामशेषतां लोपं श्रुतिः श्रवणं वेदश्च धर्मो भगवत्सेवारूपो जीवनिष्ठः नित्यनैमितिकरूपश्च स्मृतिः स्मरणं मन्वादिधर्मशास्त्रं च धर्मानुष्ठाने प्रत्यक्षश्रुत्यभावे स्मृतिरेव प्रमाणमावहतीति ॥ १६५ ॥

पादसेवनभक्तिमाह प्राज्ञ इति । यः प्राज्ञैर्ब्रह्मादिभिरनुभूतः स्वप्रत्ययः आत्मज्ञानं यतो भविता स श्रीमतो हरेः प्रसादः पादाधारं विना किं सिध्येत् तस्मात्सोऽपेक्षितः यथा प्रज्ञ एव प्राज्ञ इति प्राज्ञेनानुभूतः स्वप्रत्ययः स्वार्थप्रत्ययः अण् 'प्रज्ञादिभ्योऽण् इति' सूत्रात् स यस्माद्भविता स आढ्यस्य प्रसादः नामप्रसादः प्रसादशब्दादणि कृते प्रासादो भवति स दृढं पादाधारं विना न स्यात् तथा पादो नाम पाषाणादिभिः प्रासादतलभूमिगर्भे दार्ढ्यार्थं पूरणं 'पायाइति लोके' ॥ १६६ ॥

अपीति । सकामतयाऽपि वैकुंठो विष्णुर्लोकविशेषश्च ॥ १६७ ॥

न विष्ण्विति सर्वदा विष्णुपदसेवनं कुरुत तत्फलं नरस्य सर्वथा कृतकृत्यता तत्रायमेव दृष्टांतः यथा नरस्य पार्थस्य एवं सामान्यतः कृतकृत्यतामुक्त्वा विशेषाकारेणाह द्विजाधीश्वरः ब्राह्मणः सदाचरणतत्परः अमृतकरः अमृतं भक्तिर्मोक्षश्च करे यस्य जीवन्मुक्त इत्यर्थः । अत्र दृष्टांतोऽयमेव यथा द्विजाधीश्वरश्चंद्रः सदाचरणतत्परः विष्णुपदस्थितः आकाशस्थितः अमृतकरः सुधाकरः स च अमायां अमावास्यायां गतः परमधाम्नि कर्मसाक्षिणि सूर्ये विशति विदेहभावमाप्नोति तद्वत् । नन्वेतेन 'स्वधर्मे निधनं श्रेयइति' साक्षाद्भगवता कर्तव्यत्वेन प्रतिपादितस्य स्वधर्मस्य त्याग आपद्येतेति चेन्न सर्वतः संप्लुतोदकस्थानीये भगवच्चरणसेवने स्वधर्मस्यापि संपद्यमानत्वात् तथाहि यो द्विजः सदाचरणतत्परः सदाचरणे विहिताचरणे तत्परो नेति न तथा योऽमृतकरः स यज्ञशेषहस्तो नेति न तस्य श्रौतस्मार्तोभयमपि तत्रैव च संपद्यत इति । अथ द्विजाधीश्वरः क्षत्रियः येषामुप-

सर्वोपरि वरीवर्ति सदा रामपदाश्रयः ॥
गणिकासंगिनोऽप्यस्मिन्नतिमुक्ताः सहस्रशः ॥ १६९ ॥
विष्णोः सर्वावयवनिवहात्पादपद्मे विशेषः
कश्चिद्वाचामविषय इति स्पष्टमेते न विद्मः ॥
लब्ध्वा वक्षस्यपि पदमियं सर्वदा पद्मसद्मा
त्यक्तच्छद्मा सरसमनसा सेवते येन पद्मा ॥ १७० ॥
श्रीप्राणनाथमृदुसुंदरपादपद्म-
संवाहनोत्थसुखनिर्भरकृष्टचेताः ॥
श्रीस्तस्य किं क्षणवियोगजदाहभीता
हस्ते बिभर्ति किल तत्प्रतिमासरोजम् ॥ १७१ ॥

नयनं ते सर्वेऽपि द्विजा इति क्षत्रियवैश्ययोरपि द्विजत्वात् । चंद्रदृष्टांतसहितः प्राथमिकोऽर्थः पूर्ववत् तस्य 'धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यतेइति' धर्मसंपादनं तु यथा यः क्षत्रियः सदाचरणतत्परः सदा च रणे युद्धे तत्परो नेति न तथा योऽमृतकरः सः अमृताः जीवंतः कराः करभारा यस्य स नेति न अथ द्विजाधीश्वरो वैश्यः प्राथमिकोऽर्थः सदृष्टांतः पूर्ववत् तस्य 'कृषिवाणिज्यगोरक्ष्य मिति' धर्मसंपादनं तु यथा यो वैश्यः सदाचरणतत्परः सदा चरणे इतस्ततः संचरणे वाणिज्ये अथवा अंतर्भावितण्यर्थेन चारणे गवादीनां तत्परो नेति न तथा अमृतकरः दुग्धकरः अमृता जीवंती कला मूलधनवृद्धिः यस्य रलयोरैक्यात् 'कलास्यान्मूलरैवृद्धाविति' मेदिनी । अथ शूद्रः द्विजास्त्रिवर्णमधीश्वरा यस्येति प्राथमिकार्थः पूर्ववत् 'परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजमिति' त्रैवर्णिक-चरणसेवनरूपधर्मसंपादनं यथा यः सदाचरणतत्परः स तादृशपरिचर्यावान् वर्तत एव मृतं याचितं अन्नादि करे यस्य अथवा ब्राह्मणभोजनस्यापि यज्ञत्वं 'त्रयः पाकयज्ञा हुता अग्नौ हूयमाना अग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुता इति' सूत्रात् ततश्चामृतं द्विजभुक्तशेषं करे यस्येति ॥ १६८ ॥

सर्वेति 'यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । योगेन दानधर्मेण श्रेयोभिरितरैरपि । सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽजसेति भागवतं सदा रामपदस्य आश्रयः सन् आरामः स एव पदं तस्य आश्रयः गणिकावेश्या यूथिका च अतीवमुक्ताः पुंड्रकाश्च ॥ १६९ ॥

किंच लक्ष्म्या व्यवहारदर्शनेनापि भगवत्पदेऽस्ति कोऽप्यनिर्वचनीयो विशेषइति गम्यत इत्याह विष्णोरिति ॥ १७० ॥

श्रीति तस्य पादस्य प्रतिमाभूतं सरोजं कमलं ॥ १७१ ॥

वत्से विष्णुपदे सुखं समधिकं यद्भाग्यगम्यं परो
लाभः किंच जगत्त्रयीमहितता तस्मात्तदेवाश्रय ॥
अंतःक्षीरनिधेर्मुहुर्मुहुरिति श्रीविष्णुपद्या रमा
कारुण्यात्किल शिक्षितेव चरणं नास्य क्षणं मुंचति ॥ १७२ ॥
विरक्ता मुक्ता अप्यनिशमनुरक्ता पदमिदं
भजंते तत्कोऽस्मिन्मधुरिमगुणो नास्मि कलये ॥
स संप्रत्यास्वाद्यो यदि तदुपहासोऽत्र तदजः
शिशुः सन्नंगुष्ठं रसयति जलेऽस्तवटदले ॥ १७३ ॥
लब्ध्वा वक्षस्यपि पदमियं तीर्थपादस्य विष्णो-
र्वारंवारं चरणकमलं सेवते स्नेहसांद्रा ॥
कन्या धन्या सकलसरितां पत्युरत्युत्तमांगी
युक्तं स्त्रीणां भवति बहुशो मातृगेहं सुखाय ॥ १७४ ॥
नेत्रारुण्यं यदेतद्भवति ननु रुषो लिंगमक्षिप्रसादः
स्नेहैः पादोपचारादिति सुरभिषजोऽधीतमंतः समुद्रम् ॥
मच्छीलाय प्रकुप्येन्न स खलु भगवान् सुस्थिरात्मेति मुग्धा ॥
स्निग्धा दुग्धाब्धिकन्या चरणसरसिजं सेवते सत्यनन्या ॥१७५॥

वत्स इति विष्णुपदी भागीरथी सा च समुद्रकांता ततश्च रमाया जननी यदा रमा समुद्रान्निर्गंतुमारब्धवती तदा या शिक्षिता किमिति विष्णुपदे सुखमधिकं किं च जगत्त्रयपूज्यत्वं च तदुभयं तत्रत्यया मयाऽनुभूतमतस्त्वं तदेवाश्रयेति तेन सा सर्वदा तन्निष्ठा भवतीति तात्पर्यं ॥ १७२ ॥

विरक्ता इति शिशुभावं विनांगुष्ठेरसिते जगत्युपहासः स्यादिति शिशुरभूत् शैशवमपि कृतकमिति संशयानः सर्वभूतापरमे यत्पुनर्जलमवशिष्टं तत्तु जडं ज्ञानशून्यं न किमपि ज्ञातुं समर्थं तत्रापि वटदले लीनः सन् महतामनुचिताचरणस्य परमदुष्करत्वादेतेनापि व्यवहारेण पूर्वोक्तोऽर्थः सुसाध्यएवेति ॥ १७३ ॥

प्रासंगिकतया लक्ष्मीकर्तृकपादसेवनमुत्प्रेक्षते द्वाभ्यां । लब्ध्वेति । तीर्थं भागीरथी पादे यस्य सा तु समुद्रपुत्र्या लक्ष्म्या माता भवति ॥ १७४ ॥

नेत्रारुण्यमिति लक्ष्म्या समुद्रमथनात्पूर्वं धन्वंतरिणा सह एकत्रावस्थानात्सकाशाद्द्वयमधीतं किं तत् नेत्रारुण्यं क्रोधेनापि भवति नेत्रप्रसादस्तु स्नेहैर्घृतादिभिः पादोपचारेणेति ततश्च मम शीलं चंचलं भगवांस्तु स स्वरमेकुपितस्तु नस्यादित्याशंक्या स्नेहसांद्रा सती मुहुः पादोपचारं कुरुते कृतेऽस्मिन्सर्वदाक्षिप्रसादः आरुण्यापगमेन आरुण्यं नास्ति चेत्कोपो नास्तीति मुग्धभावरमणीयं ॥ १७५ ॥

रामश्चिन्मयविग्रहोऽस्य जगति प्राप्तुं पदप्रख्यतां
भूत्वैवामृतवृत्ति संततमधोवक्त्रं सदप्यात्मनः ॥
आकल्पं नलिनं तपो यदि गुणाधानाय तीव्रं तपे-
ल्लोके यन्नलिनं तदेव नलिनं को वा विशेषो भवेत् ॥ १७६ ॥
तोये तामरसं तपः प्रभुपदं स्यामित्यताप्सीदधो-
वक्त्रीभूय ततस्तु तत्र समभूत्सश्रीकता केवलम् ॥
नैवाप्नोत्त्वमथो हुताशमपि तच्छायापि चंद्रोदये
सद्यः संभृतरामचंद्रचरणं पश्याधिना ताम्यति ॥ १७७ ॥
नलिनं मुख्यमावासं यद्यप्यस्ति तथाप्यहम् ॥
श्रीरामचरणौपम्ये मन्ये मलिनमेव तत् ॥ १७८ ॥
श्रीरामस्य नखेंदुनाऽस्मि विजितः स्वेंदुः पुनः सन्निति
क्षीणात्माथ निरेति तत्कुलगुरुं वक्तुं जडध्यात्मजः ॥
रामश्चंद्र इवेति तद्विषयितां नीतोऽसि शिष्टैः सखे ॥
तत्किं ग्लायसि याहि सांत्विति इति प्रायः शनैर्वर्धते ॥१७९॥

पादसेवनप्रसंगात् पादस्य सौभाग्यमाह राम इति अमृतवृत्ति अयाचितवृत्ति अमृते जले वर्ततइत्यमृतवृत्ति आत्मनो गुणाधानाय अधोवक्त्रमपि सत् इति नामनामिनोरभेदाध्यवसायेन यथावस्थिततत्वनलिनमधोवक्त्रत्वं चोच्यते । अधोवक्त्रमपि: नलिनमेव न तत्र कोऽपि विशेषः ॥ १७६ ॥

इति कस्यचिद्भगवज्जनस्य वचनमवधार्य तदसहमानमिव तदेव पुनः कर्तुं प्रवृत्तं तस्य कः परिणाम इत्याह तोये तामरसमिति । अधोवक्त्रमपि भूत्वा तपस्तप्तवत् तत्पुण्यवशेन श्रीसहितता प्राप्ता श्रिय आवासस्तत्रासीत् न पदभावः तामरसं अधोवक्त्रभावेन सरमता जाता या च सरमता सैव सश्रीकता रमया सहितस्य भावः सरमता ॥ १७७ ॥

ननु माभूत्पदसायुज्यं मुख्यलक्ष्यानिवासत्वात् पदे नलिनौपम्यं तर्हि स्यान्नेत्याह नलिनमिति मुख्या या माया आवासो यत्र मुख्ये आद्ये वर्णे मकारस्यावासो यत्र च आद्यो नकारस्तत्र मकारादेशे नलिनं मलिनं भवति ॥ १७८ ॥

श्रीरामस्येति । चंद्रः पंचदश्यां पूर्णकलः सन्नात्मानं सुभगं मन्यमानः श्रीरामनखं जेतुं गतः गतमात्र एव तत्प्रभया हतप्रभोऽभूत् अथात्मन्यसूयां करोति । नखेत्यादि तदा हि क्षीणः कुलगुरुं सूर्यमेतत् पुत्रस्य दुर्वृत्ततां कथयितुं तद्धाम गतः सूर्येण तत्सर्वं ज्ञात्वा कोऽयमतिमूर्खशिशुः परमेतस्य कथमपि सांत्वनं तु कर्तव्यं खल्विति विचार्योक्तं रे आयुष्मन् अधुना रामचंद्र इति शिष्टा रामे त्वामुपमानं कल्पयंति उपमेयादुपमानं गुणाधिकमिति सर्वजनीनं तत्कुतो ग्लायसि

अथार्चनं ॥ गोऽस्थितोऽमृतरसस्तुष्ट्यै पुष्ट्यै च नो गवाम् ॥
सभाजनगतो नित्यं सेवितस्तुष्टिपुष्टिकृत् ॥ १८० ॥
नैरंतर्येण यस्मिन्नतिसुलभतया जायते स्वस्य लाभः
श्रीरामाराधनं तत्सुरवरमहितं हंत संत्यज्य लोकैः ॥
सेव्यंते ते नरा अत्यतिकठिनतराराधना अप्यधन्या
हा हा हा कोऽयमेषां कलितिमिरकृतो नष्टचाक्षुष्कभावः ॥१८१॥
नारायणे नेच्छति यो निरंतरं नरः सहावस्थितिमेव यत्नतः ॥
पुरा श्रयेद्दक्षविनिर्मितां सतां मूर्तिं मतां तां वरधर्मसंस्कृताम् ॥१८२॥
स्रग्गंधसुंदरीगीतं नैव श्रीफलमिष्यते ॥
तदेव श्रीफलं येन पूज्यते गिरिजापतिः ॥ १८३ ॥

हो किमर्वं खल्विति स्वस्थः सन् पुनर्वर्धते जलव्याप्तमजत्वात् पुनःपुनराकल्यमे तदेवेति जलधिः समुद्रः जडधीश्च ॥ १७९ ॥

क्रमप्राप्तमर्चनमाह । गो इति । यथा गवामंगेषु स्थितोऽमृतरसस्तासां तुष्ट्ये पुष्ट्ये च न भवति तं ताभ्यो दुग्ध्वा भाजनगतं कृत्वा ताभ्यः पायितश्चेत्तुष्टिपुष्टिदो भवति तथाऽमृतरसो ब्रह्मरसो गोऽतः मनआदिष्विंद्रियेषु अभिव्यजमानोऽस्त्येव परमसौ तत्तुष्ट्यै पुष्ट्यै न भवति तर्हि सभाज्यते पूज्यतेऽस्मिन्निति सभाजनं पूजाधिकरणं प्रतिमादि तत्रावाह्य सेवितश्चेत्तुष्टिपुष्टिद इति ॥ १८० ॥

भगवत्पूजां विहाय द्रव्यार्थं प्रयतमानान् निंदति नैरंतर्येणेति । अखंडतया स्वलाभः आत्मलाभो द्रव्यलाभश्च कथं नैरंतर्येणात्र द्रव्यलाभ इति चेत् श्रीः राः मा राः धनमिति एवं च धनमयमपि श्रीरामाराधनं विहाय धनार्थं येन राः सेव्यंते ते तु न राः द्रव्यं न भवंति । अधन्याश्च सत्सु तेषां धन्यता ना धन्या धनहेतवश्च न भवंति । आराधनमपि तेषामतिदुष्करं ॥ १८१ ॥

नारायण इति । दक्षेण चतुरेण शिल्पिना निर्मितां सतां विदुषां मतां यथोक्तलक्षणसंपन्नत्वात् वरेण धर्मेण प्रतिष्ठाविधिना संस्कृतां मूर्तिं प्रतिमां श्रयेत् अर्चनं कुर्यादिति यावत् यथा दक्षेण प्रजापतिना उत्पादितां मूर्तिं नाम कन्यां वरः पतिर्यो धर्मः एतन्नामा ऋषिस्तेन संस्कृतां विधिवत् पाणिगृहीतामाश्रित्य नरस्य नारायणेन सहावस्थानं तथा धर्मस्य दक्षदुहितरि मूर्तौ नरनारायणौ यमलौ जाताविति भागवतादौ ॥ १८२ ॥

किं च सत्यपि द्रव्ये तस्य फलं भगवत्पूजनमेवेत्याह स्रग्गंधेति श्रीफलं लक्ष्मीफलं बिल्वं च ॥ १८३ ॥

कुंदात्सौगंधिकाद्या न वहति तुलसी गंधमेधा तथापि
प्रेष्ठा दृष्ट्वा मुकुंदं प्रति कति यदहो पत्रमात्रेण यस्याः ॥
सोऽमुष्मै स्वात्मभावं प्रदिशति यमिनां दुर्लभं यत्सदोष-
तृष्णां कृष्णप्रियार्थं त्यजति न सुरसाऽद्यापि वृंदावनं या ॥ १८४ ॥
तुलसी रामचंद्रस्य प्रेयसीति किमुच्यते ॥
यदस्याः पश्य दासोऽपि प्राणप्रियतमोऽभवत् ॥ १८५ ॥
यस्त्वमार्गमपोह्यास्ते स भातु धृतशेखरः ॥
पश्यापामार्गपत्रं हि हरिर्मूर्ध्नाऽभिनंदति ॥ १८६ ॥
रामाग्रतो विरचयन् सह गीतनृत्यं
नित्यं नयेदुपनतं पुरुषः प्रदोषम् ॥
संशिक्षयन्निति जनान् भगवान् महेशः
शक्रादिभिः किमिव नृत्यति भृत्यवर्गैः ॥ १८७ ॥

प्रसंगात्पूजासाधनेषु प्राधान्यतया तुलसीं वर्णयति द्वाभ्यां कुंदादिति । तुलसी कुंदादिभ्योऽधिकगंधा यद्यपि न भवति तथापि मुकुंदस्य कियन्नाम प्रेयसी यस्याः पत्रमात्रेण दलमात्रेण लेखमात्रेण च स्वात्मभावं कृष्णः समर्पकाय प्रयच्छति एतावत प्रेष्ठत्वं कुत इति चेत् पुरा किल कृष्णस्य वृंदावने गोपीभिर्विहारः परमः श्रेष्ठोऽभूत् युगांते तु भगवान् गोप्यश्च गताः यदि पुनर्भवंतं प्रति वृंदावनविहारेच्छा स्यात् तदा तत्र तं रमयितुं कापि नास्तीति कृत्वा यत्र यत्र वृंदावननाममात्रं तत्र सुरसा सती अद्यापि वसतीत्यं भगवदुपरि तस्या महानुपकारभारस्तेन यस्याः पत्रमात्रेणापि पत्रार्थकमुद्धरति सुरसा सशृंगाररसा तुलसी च वृंदावनं प्रसिद्धं इष्टकादिना निर्मितं तुलसीनिवासस्थानं च ॥ १८४ ॥

किं च तुलसीति । अस्या दासस्तुलसीदासः तन्नामा कश्चिद्वाराणसीस्थो महाभगवद्भक्तश्च भगवान् रामभद्रः साक्षाद्येन सह शारिकापीडनं कुर्वन्नभूदिति आविद्वद्बालं प्रसिद्धिः ॥ १८५ ॥

प्रसंगान्महरिप्रियमपामार्गं वर्णयति यस्त्विति यः अमार्गमपोह्यास्ते तेनात्र शेखरं धृत्वा वर्तितव्यं निःशंकतयेति यावत् सोऽत्यंतं साधीयानिति पश्य यस्य पत्रं दलं विलिखितं च हरिर्मूर्ध्नाभिनंदति अपोहितः अमार्गो येन सोऽपामार्गः ॥ १८६ ॥

किं च भगवदग्रे नृत्यगीतादिकमपि कार्यमित्याह रामाग्रत इति । रामाग्रतः श्रीरघुपतेरग्रतः भक्तैः सह संभूय नृत्यं गीतं च कृत्वा नित्यमुपनतमुत्पन्नं प्रदोषं प्रकृष्टदोषं नयेत् दूरीकुर्यादिति शिक्षयन् भगवान् भवो रामाग्रतो गौर्यग्रतो नृत्यं कुर्वन्नित्यनुपनतमागतं प्रदोषं कालविशेषं नयति क्रमयति रामा स्त्री रामचंद्रश्च ॥ १८७ ॥

दानोदकार्द्रः सततं दधद्धरिमहादरम् ॥
करः कटकशोभाढ्यः स वै नागस्थितो मतः ॥ १८८ ॥
भगवति परमेश्वरे निवेशो भवतु ममेति यदीहसे तदाशु ॥
रचय मनस एव सुष्ठुभावं सुमनस ईशतनौ हि निविशंति ॥ १८९ ॥
धन्यानहं तु कथयामि कुजन्मिपादान्
क्षेत्रं गतान् घनरसाप्लुतिमादधानान् ॥
पाश्चात्यया ससुमनस्कतया सशोभा
ये स्वात्मनः सफलयंति हरिभवंतः ॥ १९० ॥
सत्तारकं नादि नांतं यस्यांतर्वर्तते स्थितिः ॥
अतो नयन ते सख्यं भवेन्मुख्यं मुरारिणा ॥ १९१ ॥
पृथुरुच्चपदे सहसा कथमारोक्ष्याम्यहं विनापचितिम् ॥
इति मधुवनसेवनतो व्यधादुदारः सदात्मनोऽपचितिम् ॥ १९२ ॥

हरेः पूजनेनैव करस्य निरपराधत्वमित्याह दानेति । दानार्थमुदकेनार्द्रः हरौ महांतमादरं दधानः कटकस्य करभूषणस्य शोभयाढ्यः स न आगः अपराधं स्थितः दानोदकेन मदधारया हरेः सिंहान्महांतं दरं भयं कटाविव कटकौ करटौ तच्छोभयाढ्यः करः शुंडादंडो नागस्थितः गजस्थितः हरिपूजनमंतरेण 'श्रावौ करौ नो कुरुतः सपर्यां हरेर्लसत्कांचनकंकणौवेति' शुकेन गर्हितत्वात् ॥ १८८ ॥

पुष्पं वर्णयति भगवतीति । सुमनसः पुष्पाणि साधवश्च ॥ १८९ ॥

भगवद्यात्रोत्सवलिंगानिरीक्षणादेरप्याराधनहेतुत्वात्तदुपयुक्तावयवानुद्दिश्याह । भगवद्यात्रार्थं यौ पादौ पुण्यक्षेत्राणि न गच्छतस्तौ निंदन्नाह धन्यानिति । कुजन्मिपादाः वृक्षमूलानि क्षेत्रं काश्यादि केदारं च घनरसाप्लवं तीर्थस्नानं जलार्द्रभावं च सुष्ठु मनः सुमनस्तेन सहितः ससुमनस्कस्तद्भावस्तत्ता तया सुमनोभिः पुष्पैः सहिताश्च सफलयंति कृतार्थीकुर्वंति फलसहितान् कुर्वंति च हरिभूता हरिद्रूपाश्च ॥ १९० ॥

सत्तारकमिति । हे नयन त्वं सती तारका यस्य तत् हरिरपि सत्तारकः त्वं नादि नकारः आदिर्यस्य तत् आदिरहितश्च त्वं नांतं नकारांतं सोऽतरहितश्च यस्य यकारस्यांतर्मध्ये स्थितिरस्ति त्वयि यस्य हरेरंतर्यामित्वेन स्थितिः समानशीलत्वेन सख्यं भवति त्वमेकदा भगवद्विग्रहं पश्य ततस्तव तेन विना न क्रम्येतेति तात्पर्यं ॥ १९१ ॥

यत् पृथुराजा प्राधान्येन पूजां कृतवांस्तद्युक्तमेवेत्याह पृथुरिति । यश्च पृथुः पीवरतनुस्तेनोच्चैः पटुभिरपि दुरारोहे पदे सहसा गंतुं कथं शक्यते विना देहस्य कार्श्यं तदर्थं स पृथुरिति कृत्वा उदारः सन् सतां आत्मा कः हरिस्तस्यापचितिं पूजां व्यधात् उदार इत्यनेन शरीरकृशीकरणे उत्साहोऽभिधीयते स भगवन्मंदिर-

अथ वंदनं॥ सर्वांगेषु वरांगता तव कृता नैतावता सार्थता
गुह्यं देशमपीह शब्दनिपुणाः स्त्रीणां वरांगं जगुः ॥
तस्माच्छ्रीरघुनंदनस्य चरणं ब्रह्मादिवंद्यं मुहु-
र्नत्वा याहि वरांगतां मम सखे मूर्धन्सतां संमताम् ॥१९३॥
भूषणोत्तमकिरीटकलाभाद्धुद्धतत्वमिह मा वह मूर्धन् ॥
यन्मुकुंदपदपंकजयुग्मं सर्वदैव नमति स्म किरीटी ॥ १९४॥
अक्रूरोऽहमपि प्रसंगवशतो भाता मम क्रूरता
श्रीमद्गोकुलवासिनां भगवतः प्राणप्रियप्राणिनाम् ॥
हेतोस्तस्य हरिर्ममोपरि पुनारुष्टस्तु न स्यादिति ॥
प्रासाशंकतया क्षमापनकृते श्रीशं ववंदे मुहुः ॥ १९५॥

अथ दास्यं॥
ज्ञानेन मुक्तिः किल तत्तु सत्वतस्तत्सिद्धये श्राम्यसि रे वृथा कुतः॥
त्वं नित्यदासत्वमुपाश्रय प्रभोस्तस्मिंस्तु सत्वं किमु नास्ति नित्यदा
॥ १९६ ॥
ज्ञानादेव तु मुक्तिरेवमवदन् वेदांतिनस्तत्पुनः
श्रद्धावाँल्लभते न चान्य इति हि श्रीवासुदेवो जगौ ॥

संमार्जनसेचनोपलेपनजलाहरणपुष्पगंधादिसंपादनं स्वयमेव राजा सन् चक्रे अथ च काश्यमापादितवान् मधुवनं वृंदावनं तत्र स आसीदिति कूर्मपुराणे प्रसिद्धं अन्यच्च मधु क्षौद्रं वनमुदकं च तस्य सेवनात् सतोवर्तमानस्यापचितिरपचयो भवति तथा च वैद्याः ' शिशिरांबु पिबेन्मधुप्रयुक्तं गणनाथोऽपि भवत्किलास्थिशेष इति ' ॥ १९२ ॥

अथ वंदनं वर्णयति सर्वांगेष्विति । ' वरांगं मूर्धगुह्ययोरित्यमरः ' ॥ १९३ ॥

भूषणेति । सर्वेष्ववयवेषु ममैव किरीटमिति गर्वं मा वह किं तु हरिचरणं प्रति नम यान्नित्यदा कीरीट्यपि अर्जुनोऽपि नमति स्म ॥ १९४ ॥

अक्रूरो हि प्रधानतया वंदनभक्तिमेव चकार तद्युक्तमित्याह अक्रूरोहमिति । भाता भासते स्म अपराधक्षमापनं हि यथा दृढपादपीडनेन भवति तथा नान्योपायेन ॥ १९५ ॥

अथ दास्यं ज्ञानेनेति । नित्यं यद्दासत्वं तन्नित्यदासत्वं तन्मध्ये नित्यदा सर्वदा सत्वं नास्तीति न तस्माद्भगवद्दास्येनैव सुगमा मुक्तिरिति ॥ १९६ ॥

ज्ञानदेवेति । ' ज्ञानादेव तु कैवल्यं ' ' श्रद्धावाँल्लभते ज्ञानमिति ' प्रमाणद्वयमुक्तं सत्वेश्रद्धा इत्यत्र प्रमाणमिति प्रसिद्धमित्याह ललनाइति सत्वे गर्भे सत्येव श्रद्धा

सा सत्वोदय एव तत्र ललना अप्याददुरेतत्कृते
नैवान्यत्कुरु हे सखे भव सदासत्वोदयः श्रीपतौ ॥ १९७ ॥
सोऽहंसोऽहमिति स्थितिं स्पृहयसे चेत्तर्हि सर्वात्मना
भ्रातः श्रीखगगामिनो भगवतो दासोऽहमित्थं स्मर ॥
अभ्यासाङ्कुशमाद्दताद्विगतदाकारोभवार्थोदथ
स्यात्ते किं न मनोरथः सुफलितोऽतोऽन्यद्वृथा मा कृथाः ॥ १९८ ॥
स्वानंदभाक् श्रीरघुनंदनस्य दास्यान्नरः स्याद्विपयाकुलोऽपि ॥
यदंजनानंदपदं हनुमान्निरंजनानंदपदं बभूव ॥ १९९
कुतः श्रियै त्वं यतसे निष्कामं श्रीरामदासो भव मानव त्वम्
श्रीरामदासस्य पराङ्मुखस्य सदानपायिन्युपतिष्ठते श्रीः ॥ २०० ॥
निष्कारणं सेवनमीहमानो जनस्तनोत्यस्य मनोविनोदम् ॥
तथा धनोपाधि न हीति युक्तं वित्तापहार्यव्यय एष हीशः ॥ २०१॥
श्रीरामं न विना गती रविकुले तत्पक्षपातो ध्रुवं
दृष्टो वालिसुकंठयोः स कलहे संजातमात्रस्त्वहम् ॥
तस्यार्कस्य वहेलनं विहितवांस्तं स्वापराधं प्रभु-
र्दास्येनैव सहेत नान्यत इति श्रीरामदासोऽभवत् ॥ २०२ ॥

दोहदं 'दोहदं दोहलंश्रद्धेति' यादवः सदासत्वोदयः दासत्वस्य दास्यस्योदयस्तेन सहितः सदासत्वोदयस्तत्र सदा सर्वदा सत्वोदयोऽस्त्येवेति ॥ १९७ ॥

सोहमिति । खगगामिनो गरुडगामिनो दासोऽहमिति स्मरणाभ्यासे दृढे साति विना गच्छतीति विगो गरुडगामी तेन सह तदाकारो भव समुद्रे गंगांबुवद्विगते। दाकारो यस्मादिति च एवंच दासोऽहमिति स्मरणाद्दाकारो गतश्चेत्सोऽहमित्येवावतिष्ठते इति यत्तवाभीष्टं तदर्थात्सिध्यतीति ॥ १९८ ॥

स्वानंदेति । अंजनाया एतन्नाम्न्यामातुरानंदस्थानं अंजनेन विषयसंबंधेनानंदस्तत्पदं च ॥ १९९ ॥

धनाद्यर्थोऽपि श्रीरामदास्येनातिसुलभ इत्याह । कुत इति । त्वं श्रियै यतसे श्रीस्तु त्वां प्रति पराङ्मुखी रामदासस्तु श्रियं प्रतिपराङ्मुखो भवति । श्रीस्त्वनपायिनी तं प्रति सम्मुखी उपतिष्ठते । यथा श्रीरामदास इति पराङ्मुखं चेत् सदामरा श्रीरित्यक्षराण्युपतिष्ठंते । सदा अमरा अनपायिनी श्रीरित्यर्थः 'सबिंदुका बिंदुकयोः सविसर्गाविसर्गयोरित्यैक्यात्' पक्षे सविसर्गत्वमेष्टव्यं ॥ २०० ॥

अहेतुकं दास्यमेव भगवतेऽतीव रोचत इत्याह । निष्कारणमिति । वित्तापं सतां तापं हरति वित्तं चापहराति । अव्ययो नाशरहितः कृष्णश्च ॥ २०१ ॥

हनुमान् प्राधान्येन दास्यमेव चकार तद्युक्तमित्याह श्रीराममिति । सुकंठः सुग्रीवः

अस्त्येषा परिपाटिका सुमनसां यः स्यात्पितुः पोषक-
स्तत्पुत्रोऽपि करोतु निष्कपटतस्तस्यैव दास्यं विभोः ॥
वायोर्नंदन एष आशुगभृतं पश्यन् जगन्मंडले
त्वेकं श्रीरघुनायकं सुचरितस्तत्तस्य दासोऽभवत् ॥ २०३ ॥
दासश्चेत्परमेश्वरस्य भविता तर्ह्येव धीमानसौ
दासो यो हि स एव धीवर इति स्पष्टं जगुः शाब्दिकाः ॥
पश्याम्यप्यमृतस्थितिं पुनरसावेवेह धन्येतरा-
मेवं स्वात्मनि चिंतयन् पवनजः श्रीरामदासोऽभवत् ॥ २०४ ॥
न स्वस्मिन्विपरीतभाव उदयेद्योऽनर्थकारी कदा-
प्येवं श्रीरघुनंदनं परमया भक्त्या भजेयं सदा ॥
इत्येवं सुकृती कृती दृढमतिः सर्वात्मना यः सदा
दासः सन् रघुनंदनस्य हनुमान् वन्योऽपि धन्योऽभवत् ॥ २०५॥
अथ सख्यं ॥ क्षमा दया सत्यमुदारभावो संगो विरागः समता प्रबोधः ॥
एते गुणा यस्य हरेः सखाऽसौ शीले समाने हि वदंति सख्यम् ॥
॥ २०६ ॥
मैत्री चेद्विहिता समं भगवता स्वात्मप्रियाप्राप्तये
स्यादेवेत्यनुभूतमस्ति सकलं पूर्वेऽवतारे विभोः ॥

वहेलनं अवहेलनमनादरं ॥ २०२ ॥

अस्त्येषेति । आशुगो बाणः वायुश्च तं बिभर्ति धारयति पोषयति च ॥ २०३ ॥

दासश्चेदिति । अमृतस्थितिं मोक्षस्थितिं जलाशये स्थितिं च धीवरा हि सर्वदा जलाशय एव तिष्ठंति ॥ २०४ ॥

न स्वस्मिन्निति । विपरीतभावो यत्र भक्तौ कदाऽपि नोत्पद्येत तथाऽहं भजेयं यो हि सदादासोऽहमिति ब्रवीति स कदापि स्वामिभावं नापद्यते कदाचिदुत्पन्नोऽपि सोऽनर्थकारी न भवति । अनर्थकारी स्वार्थहानिकरः उभयत्र समानं दासरूपोऽर्थः शब्दाभिधेयं च तादृशभक्तिस्तु दास्यमेव न यजनादि तथा हि सदादासो यस्तस्मिन् विपरीतभावे कदाचित् के उत्पन्नेऽपि अनर्थकृन्नभवति सदादास एतत्पदं वैपरीत्येन पठितमपि सदादासरूपमेवार्थं वक्ति कनकवत् यजनरूपायां तु भक्तौ वैपरीत्यं चेन्नजयइत्यर्थांतरमनर्थोपादकं भवति । वयं तु वन्याः ज्ञाने शून्याः अतः सर्वतो मुख्यस्वार्थायामेव भक्तौ अभियोक्तव्यमिति दासएवाभवदीति तात्पर्यं॥ २०५ ॥

अथ सख्यमाह क्षमेति । क्षमादयो हि गुणा भगवति विलसंति अतः कतिपयतादृशगुणवतामंतरेण सख्यं कथं स्यात् ॥ २०६ ॥

अर्जुनो मुख्यत्वेन सख्यं कृतवांस्तदुक्तमित्याह मैत्रीति । पूर्वेऽवतारे रामावतारे

शक्रांशः स इति स्म बुद्धिनिपुणो मध्यः पृथायाः सुतः
सख्यं मुख्यतयाऽकरोदिव हरेः सर्वासु तद्भक्तिषु ॥ २०७ ॥

अथात्मनिवेदनं ॥ श्रियस्ताः शतं या विरागादिनिष्ठा
अधिष्ठाय भाव्यं मयेतीहसे चेत् ॥
अहं श्रीश तेऽस्मीति नारायणाग्रे
सदा ब्रूहि कामं स्वमापूरयस्व ॥ २०८ ॥

धृता याऽल्पात्मत्वादहह विपुलाशा भगवता
गताशंकं योऽहं सपदि सफलां तां व्यरचयम् ॥
महाभूतस्यास्य त्रिभुवनगुरोः किं बलिरयं
निहन्यां तन्वाशामिति स सहसाऽत्मानमददात् ॥ २०९ ॥

नाचर स्वहितजातघातकं पातकं तु निरये निपातकम् ॥
शंभवे स्पृहय मानसानिशं शं भवेऽपि भवतो भवेत्सुशम् ॥ २१० ॥

आशाविरहितो यस्तु नाशस्तस्य न विद्यते ॥
यतो न संति यस्याशा अनाशः सोऽभिधीयते ॥ २११ ॥

आशाविरहितो यस्तु स मुक्त इति तर्कये ॥
आशा अपगता यस्य सोऽपाशः सद्भिरीर्यते ॥ २१२ ॥

तावच्छक्रो वालिरूपांशेनासीत् कृष्णावतारे पार्थरूपांशेन तत्रार्जुनो विचारितवान् आत्मप्रियावाप्तिरपेक्ष्यते चेद्भगवता मैत्री कार्या यथा सुग्रीवेण मैत्री कृताऽभूत्तेन तस्य आत्मप्रियावाप्तिरभूत् स्वस्त्रीलाभोऽभूत् । तदपहारकवालिघातेन इदं सर्वं मयापूर्वेऽवतारे अनुभूतमतः सैव कर्तव्येति निश्चित्य तामेव कृतवान् ॥ २०७ ॥

आत्मनिवेदनमाह । श्रिय इति । वैराग्यज्ञानादिनिष्ठाः याः सर्वाः शोभास्ताः अधिष्ठाय मया भाव्यमितीच्छाचेद्भगवते आत्मनिवेदनं कुरु तत्प्रकारमाह । अहमित्यादि एवमात्मनिवेदने कृते तत्र तव कामः सिद्ध एव अहं श्रीश तेऽस्मि इति वचने श्रीणां शतं तत्र अहमस्मीत्यर्थांतरमुपलभ्यत एवेति ॥ २०८ ॥

यद्बलिनाऽऽत्मार्पणं कृतं भगवते तदुक्तमित्याह । धृतेवेति । भगवता अल्पात्मत्वच्छामनत्वाद्विपुलाशा महती आशा पृथ्व्या आशा च धृता । यो हि अल्पो भवति स बह्वाशां करोतीति युक्तं तामहं सफलितवान् । अधुना महाभूतेन तेन तदनुरूपा तन्वाशा अल्पाशा देहस्य मम आशा च कृता तामहं किं विहन्यामिति आत्मार्पणं कृतवान् ॥ २०९ ॥

सर्वथा हेयान्याह । नेति । भवेऽपि शं सुखं भवेत् ॥ २१० ॥

आशेति । न संति आशा यस्य सोऽनाशः नास्ति नाशो यस्य सोऽपि च स एवेति ॥ २११ ॥

याचनायां प्रवृत्तस्य का का नाम न दुर्दशा ॥
चेतश्चेत्क्रियते यस्यां यातमेवोपतिष्ठते ॥ २१३ ॥
आशा हि परमं दुःखं नैराश्यं परमं सुखम् ॥
यदाशासहितस्तांतो निराशः शांत उच्यते ॥ २१४ ॥
स्त्री सतीयं ममास्तीति प्रतिभाति विनिश्चितम् ॥
भवंति मूर्छिता शूरा अपि यद्गवलक्षिताः ॥ २१५ ॥
यदधरतुलाप्रसंगात्सद्यः प्रज्ञां हरत्यहो तुंडी ॥
तस्याः साक्षात्संगः किं किं न हरेदिदं न जानीमः ॥ २१६ ॥

यच्चेहैव जघन्यकर्मवशतोऽधःपातमेति स्वयं
सद्यः संगभृतां तनोति महतां पुंसां च्युतिं तेजसाम् ॥
इत्थं नित्यममंगलं समुदितानंगं कुरंगीदृशा-
मंगं तत्र तु संगमः सुमनसां मा भूत्प्रसंगादपि ॥ २१७ ॥

मुखेन रम्या याः कांता नित्यं रेफांतराश्च याः ॥
नरका इति ता मन्ये तासु सज्जेत कः पुमान् ॥ २१८ ॥

आशेति । अपगता आशा यस्य सः अपाशः न संति पाशा यस्य सोऽप्यपाशः यश्च पाशरहितः स मुक्त एव ॥ २१२ ॥

याचनायामिति । याचना कार्येति मनस्यानीतं चेद्यातमेव उपतिष्ठते याचना-शब्दे चे चकारस्थाने तकारः कृतश्चेद्यातमेवेति ॥ २१३ ॥

आशेति । तांतो ग्लानिमापन्नः तमुग्लानौ आशासहित इति शब्दस्तकारांतः निराश इति शब्दस्तु शांतः ॥ २१४ ॥

'न तथाऽस्यभवेत्क्लेशो बंधश्चान्यप्रसंगतः' 'योषित्संगाद्यथा पुंसो यथा तत्सं-गिसंगतः' इति भागवतोक्तेः स्त्रीणां हेयत्वमाह । स्त्रीति । अस्त्रमास्ति यस्य सः अस्त्री यस्या गावौ नेत्रे ताभ्यां लक्षिता विलोकिता यस्य गावः बाणास्तैर्लक्ष्यीकृता 'गोरतद्धितलुकीति' गोशब्दाच्च ॥ २१५ ॥

यदधरेति । स्पष्टं । 'सद्यः प्रज्ञाहरी तुंडी सद्यः प्रज्ञाकरी वचेति' ॥ २१६ ॥

स्त्रीणामंगं परमममंगलमित्याह । यच्चेति जघन्यकर्म नीचं कर्म मैथुनं च अधः-पातो नरकावाप्तिः रतिप्रयोगार्थं अधःपतनं च संगः सहवासः समागतश्च । तेजः माहात्म्यं रेतश्च । इह केनचिन्निंद्यं कर्म कृतं चेत्तस्याधःपातरूपं फलं प्रेत्य भवति अस्य तु अत्रैव महद्भिरसज्जनसहवासः कृतश्चेत् कियता कालेन सत्तेजश्च्युतये भवंति इदंतु सद्यएवेति सत्तेजश्च्युदेव भवति ॥ २१७ ॥

स्त्रियः केवलं नरकरूपा इत्याह । या मुखेन रम्या रमणीया यद्वा मुखे नकारेण रम्याः स्वापेक्षितसुखविषयेऽपि या नकारमेव प्रयुंजते । रेफं कुत्सितं अंतरं मनो

हा हंत संहारमुरोजमंडलं स्त्रियाः क्रमं लोचनयोश्च रौरवम् ॥
पश्यन्नताश्यां रमतेतरां जनो मनोभवो हंत दुरंतविक्रमः ॥ २१९ ॥

एकांतेंकगता स्वविभ्रमभरं संदर्शयंती मुहुः
सीत्कारं नखलेखने विदधती व्यक्तानुरक्ता सती ॥
आनंदं जनयेत् क्षणं मधुरतावेशेन पामेव रे
रामेयं पुनरंततः किमपि यत्कुर्वीत तच्चिंतय ॥ २२० ॥
नूनमुन्नतपयोधरो भवेत्कारणं घनरसस्य भूयसः ॥
तेन पूर्णतमताजलाशये तत्र विप्लुततया निमज्जनम् ॥ २२१ ॥

यासां बहिः साध्वीभावं दर्शयंत्योऽपि अंतः केनापि पुरुषविशेषेण संगता इति भावः । तादृशाः कांता नरकाएव शब्दतोऽपि या मुखे आदौ नकारेण रम्याः रेफः स्वर्णः अंतरे मध्ये यासां याः कांताः ककारांताः एवं च नरक इति सिध्यति ॥ २१८ ॥

हाहंतेति । संहारं सम्यग्हारयुक्तं संहारनामा नरकविशेषः । रुरोः कृष्णसारस्यायं रौरवः एतन्नामा नरकविशेषश्च 'महारौरवरौरवाः' 'संहारः कालसूत्रंचेत्यमरः'। चकारात्कालसूत्रं कंठं ॥ २१९ ॥

कांतासंगजन्यं सुखं क्षणिकं सदंते अतीव क्लेशदमित्याह । एकांत इति । इयं रामा एकांते अंकगता समीपगता उत्संगगता वा स्वस्य विभ्रमः विलासः सस्मितनयनचमत्कारादिः तमादौ दर्शयति । ततोऽङ्कुरितकामेन कांतेन स्तनपीडनचुंबनादिबाह्यसुरते आरब्धे सीत्कारं तनोति ततो बाह्यरतेनानुरागं गता सती मधुवत्* स्वादु मादकं च यद्रतं तत्र यआवेशस्तेन कांतं रमयंती सती क्षणमानंदं जनयति न तु चिरं परमंते परमसंतापकारिणी भवेदिति चिंतय । कथं यथा पामा साऽप्यंकगता प्रायेणास्ते तत्कंडूयनं लज्जावशाज्जनसमक्षं न भवति स्वयमेकांते यदा एकएवावतिष्ठते तदा सा स्वविभ्रमं कंडूत्यतिशयं दर्शयति ततो नखैर्लेखने खर्जने आरब्धे सीत्कारो भवति ततः व्यक्तं रक्तं यस्यां सा किंचिद्रक्तोद्गमे जाते मधुरता पुनः पुनः खर्जनविषयिका रुचिस्तया यआवेशः उत्साहस्तेन क्षणं सुखं स्यात्परमनंतरं भगभगायितः संतापो भवति तथा ॥ २२० ॥

स्त्रीणां प्रसंगेन निमज्जंतीति युक्तमित्याह । उन्नतं स्तनमंडलं सांद्रशृंगाररसस्य कारणं भवति ततो जडानां मूढानां आशये तेन पूर्णतमता तत्र विप्लुतता व्यसनिता तया निमग्नो भवति यथा उन्नतमेघोदयो बहुजलस्य कारणं तेन जलाशयानां पूर्णता तत्र विगतं प्लुतं प्लवनं जलतरणपाटवं यस्मात् तत्तथा निमज्जनं युक्तमेव प्लुङ् गतावित्यस्य धातोः उडुपं तु प्लवः कोल इत्यादौ जलतरणरूपार्थदर्शनात् भावे क्तः । विप्लुतो व्यसनंविव्हल इति हेमचंद्रः ॥ २२१ ॥

यो रामभजने सक्तः स रामां दूरतस्त्यजेत् ॥
रामाभक्तिर्यतो वक्ति भक्तस्यभावं रघूत्तमे ॥ २२२ ॥
उद्वाहः प्रथमार्तवोत्सवविधिर्गर्भाहितिः पुंसवः
सीमंतोन्नयनं प्रसूतिरसकृज्जातक्रियाश्चाखिलाः ॥
आकल्पा मणिमौक्तिकादिखचिता वासांसि सूक्ष्मोत्तमा-
न्येवं वै पुरुषार्थहानिकरणे सृष्टाः स्त्रियो वेधसा ॥ २२३ ॥
लोके प्रथमताभाजः कांता रसहितांतराः ॥
तारका इति ता मन्ये दुस्तरे भवसागरे ॥ २२४ ॥
परमैव या स्वभावादपकारं प्रापिता यदपि ॥
सा किं स्वावस्थितया दैन्यापादनकरी भवेत्पुंसः ॥ २२५ ॥
पुत्रदारादिसंबंधोऽमृतश्चुदिव भासते ॥
तत्प्रसंगः पुनः पुंसां सेहुंडइव तापदः ॥ २२६ ॥
मोदिष्यसे मनश्चेत्स्यात्सदामोदरसद्रवम् ॥
रोदिष्यसि त्वं हृदयदारकार्तस्वरो ध्रुवम् ॥ २२७ ॥

यइति । रामाभक्तिरित्युक्ते रामे अभक्तिः प्रतीयते ॥ २२२ ॥

उद्वाह इति । आकल्पा भूषाः पुरुषार्थो जन्ममरणातीतभवनं पुरुषद्रव्यं च ॥२२३॥

लोकइति । प्रथमता श्रेष्ठयं या लोकेन साध्वीयमित्युच्यते रसो हितं च भर्तृविषयके अंतरे यासां तादृश्यः मदालसाचूडालाप्रभृतयः संसारसागरे तारका भवंति याभिः स्वकांता ब्रह्मभावमापिताः तारकस्योत्सर्गतः तथा पुंधर्मतया पुंस्त्वनिर्देशः शब्दतोऽपि याः प्रथममादौ तां ताकारं भजंति रेण रेफेण सहितमंतरं यासां याः कांताश्च ककारांताः एवं चादौ ता मध्ये रः अंते कः इति तारकपदं निष्पद्यते ॥ २२४ ॥

परमैवेति । या स्वभावतः परमा सा अपकारं प्रापिताऽपि भर्तुर्दैन्यापादनकर्त्री भवति उत्तमत्वात् परमा हि अपकारं पकाराभावं प्रापिताऽपि रमैव भवति या रमा सा किं दैन्यापादनकरी ॥ २२५ ॥

पुत्रेति । अमृतं सुधां श्चोतति तत् तत्रातीव आसक्तिश्चेत्तापाय यथा सेहुंडो वृक्षविशेषः शेरइति भाषायां तत्संबंधः अमृत क्षीरं स्रवति तत्रात्यंतं प्रसंगश्चेत्तापाय ॥ २२६ ॥

मोदिष्यस इति । दामोदरस्य दः सद्रवः उत्तमशब्दः वेदरूपः रामकृष्णादिनामरूपो वा तेन सहितं यन्मनस्तत्सदामोदरसद्रवं । हृदये दाराः कार्तस्वरं च यस्य सः हृदयदारकाः आर्तस्वरा यस्येति च ॥ २२७ ॥

स्यात्पुंसां तु यथा यथाऽधिकतरो योषित्कुमारादिषू-
ल्लेखस्तत्र तथा तथा नवनवा प्रादुर्भवेन्माधुरी
तत्पश्चादनुरक्तता तु यदहो संतापयुग्जीवनम् ॥
प्रेष्ठं तत्र निदर्शनार्थमत्रमां पामां समालोकये ॥ २२८ ॥
पुरुषझषः संसाराकूपारप्रसृतकामिनीजाले ॥
पतितोऽपि बलान्निरियात् बालिशवेधः परं विनाशाय॥२२९॥
वित्तं चित्तभ्रमकरं जिज्ञासो मा स्म संग्रहीः ॥
वित्तस्य तस्य तु त्यागे नूनं विदुपलभ्यते ॥ २३० ॥
कोऽयं हंत महामोहग्रहग्रस्तोऽखिलो जनः ॥
अर्थस्यार्थे कदर्थः सन् परमार्थं त्यजत्यहो ॥ २३१ ॥
मधुपोऽपि कुजन्मिसंगतोऽपि प्रविजह्याद्यदसौ सुवर्णगंधम् ॥
अमुना किमु ना यदात्तगंधाः शतधाऽमी सुमनोगणाः क्रियेरन् ॥२३२॥
अविवादि धनं यत्तु नैव स्यात्तद्विबाधनम् ॥
यन्निकारेण मिलितं तद्धनं निधनं भवेत् ॥ २३३ ॥

स्यात्पुंसामिदि । योषिदादिषु यथा यथा अधिकमधिकमुल्लेखः परिचयस्तथा तथा तत्र माधुरी रुचिरुत्पद्यते ततोऽनंतरमनुरक्तता भवति सा च कीदृशी यत्र संतापयुक्तमपि जीवनं प्रेष्ठं भवति यदीयभरणेन संतापेऽपि माभूदितः परमतिनिर्वेदो न भवति यथा पामायामुल्लेखः उल्लेखनं च ततः माधुरी सुखास्वादः ततोऽनुरक्तता अनुगतरुधिरता तत्र संतापयुक्तमपि उष्णमपि जीवनं जलं प्रेष्ठं भवति ॥ २२८ ॥

पुरुष इति । अकूपारः समुद्रः जालं आनायः जालके पतितमत्स्यानां मध्ये कश्चिद्बलेन बहिर्निरेति । बालिशः अपत्यं बलिशस्यायं बालिशः । डलयोरैक्यं । कदाचित्प्रियामपि स्त्रियं त्यक्त्वा कश्चित् गच्छेत् परं बालिशं त्यक्तुं न शक्नुयात् यथा मत्स्यो जालात् बलेन निरियात् परं बडिशेन विद्धो म्रियेतैवेति ॥ २२९ ॥

द्रव्यं हेयमित्याह । वित्तमिति । हे जिज्ञासो वित्तं मा संग्रहीः तत्संग्रहं मा कुरु यद्वित्तस्य तस्य त्यागे दाने वित् ज्ञानमुत्पद्यते 'धनं तु धर्मैकफलमिति' भागवता-द्वित्तशब्दसंबंधिनस्तकारस्य त्यागे वित् इत्येवात्रातिष्ठत इति ॥ २३० ॥

कोयमिति स्पष्टं ॥ २३१ ॥

मधुप इति । मधुपः मद्यपः भृंगश्च । कुजन्मिनः नीचाः वृक्षाश्च । सुवर्णगंधं स्वर्णलेशं स्वर्णचंपकगंधं च । आत्तगंधाः पराभूताः गृहीतगंधाश्च । सुमनोगणाः साधवः पुष्पाणि च ॥ २३२ ॥

धनमपि न्यायोपार्जितमुत्तममित्याह । अविवादीति । अस्ति विवादो यत्र तद्विवादि तद्धनं विबाधनं न भवति यत्तु निकारेण शाठ्येन मिलितं तन्निधनं मरणहेतुः

रे नानारामाणां मुखमधुनि सौम्य पद्मकोशेषु ॥
लंपटतया द्विरेफो भ्रमरवदिह बत नरोऽपि सन् मा भूः ॥ २३४॥
स्रष्टा सर्वस्वहान्यै स्वत इव जगतो निर्ममौ वस्तुनी द्वे
शस्त्रीत्येकं तथान्यन्निधनमिति ततः शंकितः को नु चैते ॥
स्वीकुर्वीतेति वर्णं प्रथममथ तयोः कोविदो गोपनार्थं
विच्छिद्यापातरम्यैर्मधुरिमनिवहै रंजयामास भूयः ॥ २३५ ॥ सुगमम्॥
तत्राशेषा विदग्धा अपि बत विविधापातमाधुर्यमुग्धाः
स्निग्धाः संतो रमंते कलयति कुशलः कोऽपि नैतत्स्वभावम् ॥
विच्छिन्नं वर्णयुग्मं तदिह शनिरभूद्दृष्टिमार्गं गतोऽसौ
कीदृक्षोऽस्तीति पूर्णं विमृश मम सखेऽद्यापि बुध्यस्व तूर्णम् ॥२३६॥
सृष्ट्वा पक्षिमृगादिकानि विविधानीशः पुराण्यात्मनाऽ-
तुष्टस्तैरचितात्तरोऽथ पुरुषः सृष्टोऽभवत्तुष्टये ॥

शब्दतश्च अविवा इत्यानुपूर्वीआदिर्यस्य तदविवाधनं । वबयोरभेदादविबाधनं निकारेण यत्संगतं तद्धनं निधनं ॥ २३३ ॥

उक्तस्त्रीधनयोरासक्त्या त्वं निंद्यो माभूरित्याह । रेति । अनेकस्त्रीमुखसंबंधिमधुनि लक्ष्म्याः कोशेषु च लंपटो भूत्वा भ्रमरइव द्विरेफः द्वाभ्यां कारणाभ्यां रेफः कुत्सितो मा भूः नरः सन् नाना ये आरामास्तत्संबंधि मधुनि पुष्परसे पद्मानामिमे पाद्माः ते च ते कोशाः कोरकाणि तेषु लंपटः सन् भ्रमरो द्विरेफो भवतीति युक्तं यतो भ्रमतीति भ्रमरः अज्ञानी तिर्यक्त्वात् रेफद्वयविशिष्टश्च त्वं तु नरो ज्ञानवान् स्वर्णरहितश्च ॥ २३४ ॥

स्रष्टेति । विश्वकर्तेदं जगत् स्वत इव संसरणाय कल्पतामिति वस्तुद्वयं निर्मितवान् । एका शस्त्री अन्यत् निधनं शस्यते हिंस्यते ऽनया शस्त्री तरवारिः निहन्यते अनेन निधनं एतयोरुभयोराकलनया स्वत एव नाशो भविष्यतीति अथ शंकितः एते दारुणे को नाम ज्ञातांगीकुर्यादिति ततः स तत्प्रज्ञानभंगाय आदिमंवर्णं अपहृतवान् ततः अवशिष्टं स्त्रीधनमिति तत्रापि आपातमाधुर्यरूपेण रागेण रंजितवान् येन सर्वथा तत्स्वभावो माविरभूदिति तदिमे सर्वे चतुरा अपि तन्माधुर्येण मोहं गताः सक्ताः भवंति परं कोऽपि निपुण एतयोः वास्तवघातुकं पूर्वस्वभावं न वेत्ति स चावशिष्टरूपेण कदापि नज्ञातुं शक्येत माधुर्यरंजितत्वात् अतः तज्जिज्ञासा चेत् तयोर्यौ वर्णौ आहृत्य निहतौ तत्र रंजना नास्तीति तत्र एतयोर्वास्तवस्वभावज्ञानं स्यात् अतस्तदवलोकय स च शनिः स च दृष्टौ संगतः सर्वस्वहान्यै भवतीति सर्वजनीनं तद्वदेते अपीति ज्ञात्वा तत्र प्रसंगं माकार्षीरिति तात्पर्यं ॥ २३५ ॥ ३६ ॥

सृष्ट्वेति । परमेश्वरो हि नानाविधान् प्राणिनः सृष्ट्वाऽपि नातुष्यत् ततः उचितं

सोऽयं चेन्निजलिंगहायमहह स्यादीसमेतांतर-
स्तुष्ट्यै स्यात्कथमीश्वरस्य परमामोदोद्गमोल्लासिनः ॥ २३७ ॥
त्यजाक्षवशतां तात या महानर्थकारिणी ॥
यया विनष्टसर्वस्वा युधिष्ठिरनलादयः ॥ २३८ ॥
जगत्यामत्र जनता मता का मरणोन्मुखी ॥
प्रश्नवागियमेवैतदुत्तराय प्रजायते ॥ २३९ ॥
वृथैव रे कामरतोऽसि शत्रुं दुरासदं तं भगवानवादीत् ॥
जनो महाराष्ट्रगतोऽपि न त्वां किमाक्षिपत्येव कृपार्द्रचित्तः ॥ २४० ॥
रागो न्यक्क्रियतामये द्विजनिना दोषस्थितेर्ज्ञापकः
पश्चास्य क्षणिकप्रसंगवशतः सन्मार्गवर्त्यप्यसौ ॥
आदित्यो मधुपौघचुंबितमहापद्मिन्यभीष्टायय-
स्कोशेषु स्वयमर्पयन् श्रियमयं न प्रेक्ष्यतां गाहते ॥ २४१ ॥

स्वनीरीक्षणयोग्यं अंतरं बुद्धिर्यस्य तं पुरुषं सृष्ट्वा तुष्टोऽभवत् तथा च भागवतं "सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान् सरीसृपपशून् खगमत्स्यदंशान् तैस्तैरतुष्टहृदयः पुरुषं विधाय आत्मावलोकधिषणं मुदमापदेव इति" यदि स पुरुषः स्वीयं उचितांतरस्वरूपं निजलिंगं हित्वा ईसमेतांतरः स्यात् इः कामः ईः श्रीस्ताभ्यां समेतांतरः तर्हि परमामोदोद्गमोल्लासिनः आनंदरूपस्य तस्य तुष्ट्यै किं स्यात् यदर्थमनेन उत्पादितस्तदकर्ताऽयमिति शब्दतोऽपि पुरुषो हि उचितांतरः उना उकारेण चितं अंतरं मध्यं यस्य पुरुषइत्यत्र मध्यमवर्णे रेफे उकारः संगतोऽस्ति तदुचितांतरत्वं विहाय ईकारेण समेतः स्याच्चेत् पुरुष इत्यस्य पुरीषं इति जायते यच्च पुरीषं तत्परमामोदैरुत्कृष्टसुगंधैः समाहितस्य तुष्ट्यै कथं स्यात् स तन्मनसा न स्मरति न च पश्यति न शृणोतीति ॥ २३७ ॥

इंद्रियवशो माभूरित्याह । त्यजेति । अक्षाणि इंद्रियाणि अक्षाः पाशाश्च यया अक्षवशतया द्यूतं कृत्वा सर्वस्वं हारितवंत इति ॥ २३८ ॥

जगत्यामिति का जनता मरणोन्मुखी मता उत्तरं कामरणोन्मुखी कामरणः वेश्याभिः सुरतोत्सवः जनता जनसमूहः ॥ २३९ ॥

वृथैवेति 'जहि शत्रुं महाबाहो कामरूपं दुरासदमिति गीतासु आक्षिपति निषेधति वृथैव रे का मरतोसि महाराष्ट्रभाषानुकरणमिदं ॥ २४० ॥

राग इति द्विजनिना त्रैवर्ण्येन रागः कामः तिरस्क्रियतां यस्माद्दोषस्थितेर्ज्ञापकः सः तदेवाह यस्य क्षणं प्रसंगे सन्मार्गवर्ती त्र्यात्मा वैदिकोऽपि मद्यपानां गणैश्चुंबितामपि पद्मिनीमुत्तमवेश्यां वशयितुं तत्कोशगृहे स्वसंपत्तीरर्पयेत् जनैरस्य पापिनः मुखमपि नावलोक्यते तादृग्भवति यथा सन्मार्गः आकाशस्तद्वर्ती त्र्यात्मा सूर्यः

कामः क्रोधश्च लोभस्त्रयमपि परमं कष्टमाहुस्तथापि
द्वावाद्यौ तत्र सौम्यौ कथमपि हि परं त्वंतजोऽत्यंतचंडः ॥
यत्स्यातां पंगुलौ द्वौ रतिरसविरतावादिमोऽन्यो विरोधि-
ध्वंसे त्वेतस्य लाभादुपरि पदचतुष्कप्रतिष्ठा हि दृष्टा ॥ २४२ ॥

देहदारकदारादौ यावन्मोहाकुलः पुमान् ॥
तावन्न वित्तविषयतर्कसंपर्कवर्जितः ॥ २४३ ॥
नरकोपास्थितिं नाम नान्यां मन्यामहे वयम् ॥
या चैषा दृश्यतेऽमुष्मिन् नरे कोपस्य रे स्थितिः ॥ २४४ ॥
बिंदुमात्रेण यो हि स्यादंतरे समदः पुमान् ॥
स मंद एवेत्येतस्मिन्न कस्याप्यस्ति संशयः ॥ २४५ ॥
मत्सरः समुपादेयो यागेऽभ्युदयकारणात् ॥
पणनात्तु पुनर्मृत्युहेतुर्ब्राह्मण्यहानिकृत् ॥ २४६ ॥
अनेकधातुश्रेष्ठं यत् कल्याणं संगृहाण रे ॥
कल्याणसंग्रहे तात नैव दुर्गतिभाङ्नरः ॥ २४७ ॥

मधुपाः भृंगाः पद्मिनी कमलिनी कोशः कोरकः श्रीः शोभा अप्रेक्ष्यतां 'नेक्षेदुद्यंतमादित्यमिति' स्मृतेः एतत्केनेति चेत् क्षणं रागप्रसंगेण स च द्विजकृताः निनादाः यत्र तस्याः उपःस्थितेः प्रातःकालावस्थितेर्ज्ञापकः ॥ २४१ ॥

काम इति कामः सुरतावसाने पंगुलः क्रोधः प्रतिरोधिनाशे पंगुलः लोभस्तु तत्तल्लाभेऽपि पंगुलो न भवति किं तु पदचतुष्टयमग्रत एव यथा लाभः लीभः लूभः लेभः लोभः लाभोपर्येतस्य मात्रेत्यपि बोध्यं ॥ २४२ ॥

देहदारकेति दारका अपत्यानि मोहेनाकुलः मायायाः संपत्तेर्विषये ये ऊहास्तर्कास्तैराकुलश्च ॥ २४३ ॥

नरकोपेति नरे मनुजे या कोपस्थितिः अवस्थानं सैव नरकोपस्थितिः ॥ २४४ ॥

बिंदुमात्रेणेति अंतरे मनसि बिंदुमात्रेण समदः मदसहितः स मंद एव अंतरे मध्यमवर्णे बिंदुना युक्तत्वात् ॥ २४५ ॥

मत्सरइति यागादौ मत्सरः उपादेयो भवति अमुना पशुनेष्टं मया ज्योतिष्टोमेनेज्येतेति पापकृन्न भवति पणनं व्यवहारस्तं प्राप्य कृतश्चेदनिष्टे हेतुः यथा मत्सरः सोमवल्लीयागे उपादेयस्तस्य पणनं विक्रयः कृतश्चेदनिष्टकृ 'त्सोमविक्रेता हंतव्यः बहिष्कार्योवेति' श्रौतसूत्रे प्रसिद्धं ॥ २४६ ॥

अथोपादेयमाह अनेकेति अनेकप्रकारेण यच्छ्रेष्ठं कल्याणं साधु कर्म तत्संगृहाण 'न हि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छतीति' गीतोक्तेः अनेकेषु धातुषु श्रेष्ठं कल्याणं स्वर्णं दुर्गतिं दारिद्र्यं निरयं च ॥ २४७ ॥

यस्तु नित्यं शमापन्नः सर्वत्रोत्सृज्य लोलताम् ।
स नैव सुखमापन्न इति कः पंडितो वदेत् ॥ २४८ ॥
शमस्य साधनं तात कर्तुं यदि न शक्यते ॥
शमो भविष्यति शनैः शमलं त्वमलं कुरु ॥ २४९ ॥
शमीक एवं परिपृच्छ्यमाने प्रश्नोऽयमेवोत्तरतां बिभर्ति ॥
परीक्षिता यः परिहेलितोऽपि निर्भर्त्सयामास सुतं शपंतम् ॥ २५० ॥
नूनमविद्याविजयाजनितो देहोऽहमिति मदो भूयान् ॥
तस्यैक एव सद्भिः प्रतिकूलो दृढतमो दमो दृष्टः ॥ २५१ ॥
यः सर्वदा संश्रितरामपादो दांतं तमेनं सहजं ब्रवीमि ॥
यः केवलं स्याद्विनिरुद्धशुक्रः स क्रांत एवेह भवेन्न दांतः ॥ २५२ ॥
स्याच्चेदुपरमः सौम्य भवतश्चित्तमंदिरे ॥
स साक्षाच्छ्रीनिवासोऽयमिति निश्चिनुमो वयम् ॥ २५३ ॥
येषां सदासमाधानो दृश्यते शांतराशयः ॥
इंदिराधिपतिस्तत्र वसतीति प्रतीयते ॥ २५४ ॥

सामान्यत उक्तं विशेषेणाह शमइति शमं आपन्नः शमापन्नः शं आपन्नश्च शं सुखं ॥ २४८ ॥

शमस्येति अरे त्वं शमलं पापं अलं कुरु मा कार्षीः तेन शनैः शनैः शमः स्यात् शमलं अलं लकाररहितं कृतं चेत् शमइति भवति ॥ २४९ ॥

शमीक इति शमी शमयुक्तः कः इति प्रश्ने इदमेवोत्तरं शमीकः एतन्नामा मुनिः यस्य कृतसमाधेः कंठे परीक्षिता मृतसर्पकलेवरं प्रतिमुक्तं निर्भर्त्सयामास तपोव्ययो नास्माकं धर्मः किं तु शांतिरेवेति त्वया मूढेन तस्मै शापो दत्तस्तदसांप्रतमिति ॥२५०॥

दममाह नूनमिति देहोहमिति मदः अविद्यैव विजया मदद्रव्यं भांग इति लोके तज्जनितः तस्य प्रतिकूलः दम एव बाह्येंद्रियनिग्रहः स च परंपरया ज्ञानद्वारा तन्नाशको भवति दमइति मदस्य प्रतिकूल एवेति ॥ २५१ ॥

य इति ' हरेः प्रसादो येन स्यात्तादृशं साधनं कुरु ' तच्च रामपदसेवनं तत्र कृते दमः सहजः संश्रितरामपादो हि दांत एव तदकृत्वा केवलं हठेन शुक्रनिरोधः कृतः दमो न तेन स क्रांत एव स्यात् न दांतः शुक्र इति पाठे क्रांतः सर्वैराक्रांतः दांतः दकारांतः क्रांतः क्रकारांतः क्लकारांतश्च ॥ २५२ ॥

स्याच्चेदिति उपरमः इंद्रियाणां भगवद्विषयव्यतिरिक्तविषयेषु निर्वेदः उप समीपे रमा यस्य सः इति च ॥ २५३ ॥

येषामिति सदा समाधानेन सहितः दासी चासौ मा च दासमा तस्या आधानं स्थितिस्तत्सहितः हरेरावासं विना श्रियआवासो न संभवतीति ॥ २५४ ॥

यस्यां तु दृश्यते श्रद्धा बुद्धिः सा सत्त्वभाविता ॥
अदूरादेव बोधाख्यं तनयं जनयिष्यति ॥ २५५ ॥
आढ्योऽयमित्थं क्षितिपोऽयमित्थं किं भूयसा श्रीपतिरेव इत्थम् ॥
अर्हंति वक्तुं विबुधा भवंतं सखे यदि त्वं बहुलक्षमोऽसि ॥ २५६ ॥
यो वर्तते शुचित्वेन स वैश्वानर उच्यते ॥
यो वर्ततेऽशुचित्वेन स वै श्वा नर उच्यते ॥ २५७ ॥
नूनं ब्रह्मभवः कृतोपनयनोऽनड्वाहमारूढवां-
स्तस्याप्यस्य महेशितुः शिरसि रे दोषाकरः संगतः ॥
कार्माकार्यतयोपदिष्टमिह यच्छ्रीवेदराजेन त-
न्नोल्लंघेत जनः कथं कथमपि प्राज्ञः समर्थोऽपि सन् ॥ २५८ ॥
यथा कथं चिद्वर्णस्य ग्रहणाद्वर्णसंग्रहः ॥
विनाऽर्थलाभाद्वेदानां सामर्थ्यं तु न संभवेत् ॥ २५९ ॥
परमार्थस्य निदानं परमार्थं श्रुतिगतं समुत्सृज्य ॥
अर्थकृते प्रतिसदनं श्रुतिमातरमहह नर्तयंत्येते ॥ २६० ॥
वेदानधीत्य यो व्यर्थः स स एवेति तर्कये ॥
तत्रैव यः समर्थः स स एवेति न को वदेत् ॥ २६१ ॥

यस्यामिति श्रद्धा विश्वासः दोहलं च तच्च सत्त्वं विना न संभवति तस्मात्सा सत्त्वभाविता सत्त्वं गर्भः सत्त्वगुणश्च ॥ २५५ ॥

आढ्योयमिति बहुला क्षमा यस्य सः क्षांतिमानित्यर्थः बहुलक्षप्रमाणा धनं संपत्तिर्यस्येत्याढ्यपक्षे ननु किं धनसंपत्त्या यदि सत्ता नास्ति बहुला क्षमा भूमिर्यस्येति नृपपक्षे ननु किमल्पीयस्या सत्तया बहु लक्षं चित्तावस्थितिर्यस्याः सा तादृशी मा रमा यस्मिन् स इति श्रीपतिपक्षे ॥ २५६ ॥

शौचमाह शुचिः शुद्धः अग्निश्च वैश्वानरः अग्निर्यः अशुचिः स नरः श्वा शुनकः वै निश्चयात् ॥ २५७ ॥

वेदोक्तमेव कुर्यादित्याह ब्रह्मभवः ब्राह्मणः शिवश्च स हि ब्रह्मणो ललाटादुत्पन्न इति प्रसिद्धं कृतं उपनयनं व्रतबंधः तृतीयनेत्रं दोषाकरश्चंद्रो दोषसमूहश्च ॥२५८॥

यथा कथंचिदिति वर्णानां वेदाक्षराणां गुरुमुखात् सम्यग्ग्रहणेन वर्णसंग्रहः दौर्ब्राह्मण्यं गतं भविष्यति परं यद्वेदपठनेन सामर्थ्यं तदर्थलाभं विना न स्यात् वर्णाः अक्षराणि ब्राह्मणादयश्च सामर्थ्यं शक्तिः संप्राप्त्यर्थत्वं च ' योऽर्थज्ञ इत् सकलं भद्रमश्नुतइति ' श्रुतेः ॥ २५९ ॥

परमार्थेति परमार्थो मोक्षः परमः निर्बाधः योऽर्थः वेदार्थः अर्थकृते धनार्थं तां श्रुतिमातरमहह प्रतिगृहं नर्तयंति मूढाः ॥ २६० ॥

वेदार्थज्ञो हि नाकस्य पृष्ठमारोक्ष्यतीति चेत् ॥
पृच्छ्यते पश्य तत्रासौ प्रश्न एवोत्तरायते ॥ २६२ ॥
विनाशास्त्रं तु यद्वर्त्म विनाशायैव केवलम् ॥
अमाधवस्तु यः पंथाः स महातामसः स्मृतः ॥ २६३ ॥
धिगस्तु काव्यव्यासंगं मूलमासुरसंपदाम् ॥
अतो भागवतं सत्त्वापादकं शीलयामहे ॥ २६४ ॥
काव्येनासुरसंपत्तिर्नाटके प्राकृतक्रमः ॥
न रामताऽलंकारित्वे वरा भागवतस्थितिः ॥ २६५ ॥
बालकानां यथा माता तथा गीता हितावहा ॥
अमेध्यहारिणी सद्यः स्वहृद्याऽमृतदायिनी ॥ २६६ ॥
ब्रह्मचर्यनिरतास्तपस्विनो दूरमुज्झितगृहा विवेकिनाः ॥
यद्वदंति सुरतार्थिनोऽपि तद्विस्मयाय विपुलाय जायते ॥ २६७ ॥

वेदानधीत्येति व्यर्थः विगतोऽज्ञातोऽर्थो येन स व्यर्थ एव अकृतार्थ एवेत्यर्थः यः समर्थः संप्राप्तोऽर्थो यस्य स सएवेत्यर्थः ॥ २६१ ॥

वेदार्थज्ञ इति वेदार्थज्ञः ना नरः कस्य पृष्ठं आरोक्ष्यतीति पृष्टे नाकस्य पृष्ठमित्युत्तरं नाकः स्वर्गः ॥ २६२ ॥

विना शास्त्रेति अशास्त्रीयं यद्वर्त्म तद्विनाशस्य अस्त्रमेव 'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थिताविति' गीतोक्तेः माधवेन रहिता यः पंथाः सः अमाधवः अमा अमावास्या तस्याः धवः पतिः अमा तमस्विनी तत्पतिरर्थान्महातामसः ॥ २६३ ॥

धिगस्त्विति काव्यं कादंबर्यादि तच्च आसुरसंपदः रजस्तमोमय्याः मूलं शृंगारादिपरत्वात्काव्यः शुक्रः तन्मूलकैवासुरसंपत् भागवतं तु सत्त्वापादकं सत्त्वं सद्गुणः साधुत्वं देवत्वं च शुद्धसत्त्वस्य भगवतस्तत्र वर्ण्यमानत्वात् ॥ २६४ ॥

काव्येनेति काव्येन कादंबर्यादिना शुक्रेण च आसुरसंपत्तिः 'ईश्वरोऽहमहंभोगीत्यादि' रूपा नाटके प्राकृतक्रमः बालभाषाप्रचारः प्राकृतजनप्रचारश्च अलंकारशास्त्राभ्यासेन अलंकारित्वे संपादिते रामत्वं नास्ति लंकाया अरिः शत्रुः तत्त्वे सति रामत्वं अतः भागवते स्थितिः निष्ठा वरा या हि भागवतस्थितिः सा भगवतएव स्थितिः भगवतः इयं भागवती सा चासौ स्थितिश्चेति विग्रहे स्त्रियाः पुंवदितिपुंवद्भावः सा च साधारणी न किं तु भागवतः महाभाग्यवतस्तत्र स्थितिः न त्वल्पभाग्यस्य ॥ २६५ ॥

बालकानामिति बालकाः शिशवः अज्ञाश्च या माता अमेध्यं मूत्रपुरीषादि हरति स्वयं निष्कासयति स्वस्य हृदये तत्स्थस्तने भवं यत् अमृतं दुग्धं तत्प्राशयित्री अमेध्यं दोषजालं स्वस्यात्मनः हरेयेत् हृद्यं प्रियं अमृतं मोक्षं भक्तिं वा ददाति ॥ २६६ ॥

संपूर्णप्राणभृत्त्राणविश्राणनपरायणः ॥
यथार्थं राजतेऽत्यर्थं सकलत्रः किलाश्रमः ॥ १६८ ॥
यो नित्यं मार्गणंविभ्रत्सवै देही वरो मतः ॥
यो नित्यं मार्गणंबिभ्रत्स वैदेहीवरो मतः ॥ २६९ ॥

विप्राः शांताश्च दांताः सकरुणमनसः सात्विकाः सत्यशीलाः
सत्प्रज्ञाश्चेति दृष्ट्वा निपुणतरमथाध्याश्रमं श्रीमतैषाम् ॥
संन्यासः स्थापितोऽभूत्स यदि विधिवशाल्लभ्यते येन पुंसा
युक्ताचारं विचारं स च रचयति चेद्धीयते किं स्वलाभः ॥ २७० ॥
सूत्रं शिखामप्यविहाय दंभान्नरश्चतुर्थाश्रममाश्रितोऽपि ॥
विधाय साहाय्यकमस्य कृष्णः क्षिप्रं सुभद्रावगमं तनोति ॥ २७१ ॥

कर्ममार्गे यथा शूद्रा एकगोत्रावलंबिनः ॥
मोक्षमार्गेऽपि ते तद्वदेकगोत्रावलंबिनः ॥ २७२ ॥
आदौ यत्परिशील्यते दृढतरं तच्चाग्रतो धावती-
त्यर्थो डिंडिमकर्णशृंगनिनदैर्लोकेषु संभावितः ॥
तस्माद्वाञ्छसि सत्पदं यदि सखे मद्वाक्यमंगीकुरु
प्रेम्णा संश्रय सत्पदं भवमहाकूपारपारप्रदम् ॥ २७३ ॥
दोषोद्रेकभवे प्रभूततमसि ह्यासे द्विजानां व्रजो

नैष्ठिकं ब्रह्मचारिणं वर्णयति गृहं गेहं भार्या च सुरतं मैथुनं सुरता देवत्वं च ॥ २६७ ॥

गृहस्थं वर्णयति विश्राणनं दानं कलत्रेण सहितः सकलान् त्रायत इति च ॥ २६८ ॥

योनित्यमिति मार्गणं याचकं अतिथिं बाणं च स देही वरः श्रेष्ठः स वैदेही सीता तस्या वरः रामः बिभर्ति पोषयति धारयति च ॥ २६९ ॥

संन्यासं वर्णयति श्रीमता भगवता केनचिदाढ्येन च विप्रा योग्याइति कृत्वा अध्याश्रमं गृहेषु आश्रमेषु च संन्यासः चतुर्थाश्रमः सम्यक्न्यासश्च द्रव्यनिधिः स्थापितः क्षत्रवैश्ययोस्तयोरनधिकारात् स यस्य विधिवशाल्लब्धः लब्धेआचारंविचारं च करोति तस्य द्रव्यलाभः स्वस्वल्पलाभश्च कदापि न हीयते सम्यगाचारविचाराभावे तु निषेधीतत्वात् संन्यासस्य भ्रष्टत्वात् स्वलाभाद्धीनो भवतीति ॥ २७० ॥

संन्यासं प्रस्तौति सन्यासवेषमात्रमपि फलदं किं पुनः सत्यतया यथाऽर्जुनेन दंभसंन्यासे क्रियमाणेऽपि भगवता साहाय्यं कृत्वा सुभद्रावाप्तिः कारिता अन्यत्र नरः मानवः सुभद्रं कल्याणं तदवगमश्च ॥ २७१ ॥

कर्ममार्गइति एकं काश्यपमेव गोत्रं येषां तथा एकं गोत्रं भगवन्नामैव साधनं नान्यत् ॥ २७२ ॥

उक्तज्ञानभक्तिवैराग्याणां सत्संगएव मूलकारणमिति तं प्रस्तौति आदाविति स-

मूढो नष्टसुहृक्च समीपगमपि स्थाणुं परं स्वाश्रयम् ॥
द्रष्टुं न क्षमते चरंति परितो यत्रात्मघोषद्विषो
हंसस्तत्र यदृच्छया समुदितश्चेत्स्यात्समृद्धं हितम् ॥ २७४ ॥

शुचिमानसात्रगम इह हंससमागमवशाद्द्विजेंद्राणाम्
तदमृततमाः शांताः संतो विहरंति कुवलयेऽथ सुखम् ॥ २७५ ॥

स्रग्गंधाद्युपभोगेषु विरक्तस्य वने सतः ॥
नरस्य रामावाप्तिस्तु नूनं हंससमागमात् ॥ २७६ ॥

सृष्टिं वर्णमयीं सलेखकपतिः पश्यन्नदो दृष्टवा-
न्नत्रस्थं सदपीदमक्षरमसंवेशेन बाह्ये स्थितम् ॥
वर्णास्तेनविना भवेयुरहहानर्थाकुलाः केवलं
तस्माद्धंसपदं कृपावशस्तल्लब्धये निर्ममौ ॥ २७७ ॥

प्रमादाद्विस्मृतं यत्तद्बाह्येऽवस्थितमक्षरम् ॥
अनायासेन तल्लब्ध्यै नान्यद्धंसपदं विना ॥ २७८ ॥

त्पदं ब्रह्मपदं साधुचरणं च कर्णो वाद्यविशेषः ॥ २७३ ॥

दोषोद्रेकइति इदंपद्यं पूर्वम् व्याख्यातं हंसः परमहंसः साधुः सूर्यश्च ॥ २७४ ॥

शुचिमानसेति द्विजेंद्राणां विप्राणां पक्षिणां च शुचिमानसं शुद्धांतःकरणता शुचि शुद्धं यन्मानसं सरोवरं हंसः परमहंसः प्रसिद्धश्च अमृतं जलं स्वरूपलाभश्च कुवलये कमलखंडे पृथ्वीवलये च द्विजानां सत्समागमेनांतःकरणशुद्धिद्वारा ज्ञानसंप्राप्तिर्भवति ततो जीवन्मुक्तत्वेन सुखं चरंति यथेतरपक्षिणां मानसप्राप्तिस्तदुदकलाभस्तत्रत्यकमलवनविहारश्चैतेषां वांच्छा चेद्धंससमागममंतरेण न सफला स्यादिति ॥ २७५ ॥

स्रगिति यथा नलस्य हंससमागमेनैव दमयंतिस्त्रीलाभः तथा नरस्य रामस्य भगवतः प्राप्तिर्हंससमागमादेवेति ॥ २७६ ॥

सृष्टिमिति लेखाएव लेखका देवास्तेषां पतिरीश्वरः वर्णाः द्विजादयस्तत्प्रधानां सृष्टिं कृत्वापश्यत्तावत्तेन दृष्टं अत्रस्थमेव एकाक्षरं सद्बाह्येस्थितं असमावेशेन सृष्टिर्हिपरब्रह्मणि एकदेशेविवर्तरूपा तच्चानुपहितमित्युच्यते वर्णानां तत्प्राप्तिस्तत्त्वमस्यादिवाक्येन लक्ष्यांशेन नास्ति चेद्वर्णाअनर्थं संसारादिरूपं गताः स्युः तस्माल्लब्ध्यै साधुपदं निर्मितं ततश्च तत्त्वमस्यादिवाक्योपदेशेन अनुपहितेन सहैक्यवर्णामुक्ताः स्युरिति यथा कश्चिल्लेखकानां पतिः वर्णमयीमक्षरमयीं सृष्टिं पुस्तकं लिखित्वा पश्यति अहो यल्लिखितं श्लोकादि तस्यैकमक्षरमसमावेशतः कल्पितपंक्त्यपेक्षया बाह्ये लिखितं ततः वर्णानां सर्वेषां वाक्यार्थो न संगतो भवेदिति तज्ज्ञानार्थं हंसपदं अलक्तकेन निर्माति तेन बाह्यस्थितस्याक्षरस्यप्राप्तिर्भवति ॥ २७७ ॥

सत्यपि व्यापके दिव्ये परमे तीव्रतेजसि ॥
स्यात्ते पाकस्य संसिद्ध्यै सन्मण्युदितमेव तत् ॥ २७९ ॥
कौटिल्यं स्वगतं स्वबंधकमिदं युक्तं पुनर्मुक्तये
सांद्रानंदकदंबकाग्सुिरताविर्भावकर्तुः परः ॥
संगः स्यात्पुरुषोत्तमस्य निभृतानंगप्रसंगान्न किं
स्पष्टं दृष्टमिदं कचेषु कुचयोः कामं कुरंगीदृशाम् ॥ २८० ॥
स्तोतुं कथं नु कल्पेय संगं सुमनसामहम् ॥
मलिनोऽपि गतो येन मधुसूदनतामलिः ॥ २८१ ॥
स्वामोदहेतुसुमनःसमयं श्रितो यः
पश्चात्कृतः सपदि तेन भगप्रसंगः ॥
सर्वत्र चात्र किल चैत्रविलासभाजः
श्रीमाधवः सविध एव भवत्यमुष्य ॥ २८२ ॥

प्रमादादिति गतार्थमिदमुक्तश्लोकार्थेन ॥ २७८ ॥

सतीति यथा तीव्रेऽपि सूर्यतेजसि सति पाकसिद्धिर्न किं तु मध्ये सूर्यकांते कृते तज्जन्येन तेजसा तथा ब्रह्मणि सर्वत्रानुस्यूतेपिपाकः ब्रह्मत्वाकारेण परिपाको न भवति मध्ये सतां मणयः श्रेष्ठास्ते कृताश्चेत्परिपाको भवति ॥ २७९ ॥

कौटिल्येति कुचे कोटिः अणिस्तदाकारश्चूचुकं तं लाति कोटिलः तद्भावः कौटिल्यं कचे तु वक्रता तत्कौटिल्यं स्वगतं स्वबंधकं कुचयोः कंचुकेन बंधः कचानां मुक्तादामादिना धमिल्ल रणं उभयोर्बद्धयोर्मुक्तिकारणं तु सुरतस्याविर्भाव कर्तुः पुरुषोत्तमस्य रतिकलाकोविदस्य संगः तथा स्वगतदुर्वासनाभिर्बद्धस्य नरस्य मुक्तभावः सुरता देवत्वं तच्छिष्यस्यात्मनि आविर्भावयति ॥ २८० ॥

स्तोतुमिति सुमनसां साधूनां पुष्पाणां च मधुसूदनता भ्रमरत्वं माधवत्वं च ॥ २८१ ॥

स्वामोदेति स्वामोदः निजानंदः सुष्ठुगंधश्च तस्य हेतुः यः सुमनसां साधूनां समयः आचारः पुष्पसमयो वसंतश्च भगप्रसंगः स्त्रीश्रीलोलुप्यं भगः एतदाख्य-देवता तदुपलक्षितः फाल्गुनमासः 'उत्तराफल्गुनीनां भगो देवतेति' ज्योतिषे प्रसिद्धं तन्नक्षत्रस्य तद्व्यपदेशकत्वात् भगेत्यनेन स विवक्षितश्चैत्रसंबंधी यो विलासः चित्राणां लेख्यानामयं चैत्रः स चासौ विलासश्च माधवो हरिर्वैशाखश्च यथा यो वसंतमाश्रित-स्तेन फाल्गुनः पश्चात्सारितएव वसंतेऽपि चैत्रविलासं भुक्तवतः वैशाखः समीपएव तथा सतामाचारमनुतिष्ठता श्रीस्त्रीलोलुप्यमपसारितं स्यात् ततः सर्वत्र जगति चित्र-तुल्यतां पश्यतः माधवः समीपएव यथामृन्मयगजभानेऽपि मृतबुद्धिस्तथा जगद्भानेऽपि चैतन्यबुद्धिर्यस्येति चित्रविलासत्वं ॥ २८२ ॥

अपत्रपा अपि प्रायः सर्वथाऽपि कुजन्मिनः ॥
सुमनः समयस्थाश्चेद्दूरभूय स्फुरंत्यहो ॥ २८३ ॥
यस्तु द्विजेंद्रः कुटिलो मंतव्योऽपूर्ण एव सः ॥
यस्तु पूर्णत्वमापन्नः स सद्वृत्तो हि दृश्यते ॥ २८४ ॥
पुण्यक्रियादौ फलनिःस्पृहत्वं बोधो विशुद्धोऽप्यथ भक्तियोगः ॥
मोक्षः क्रमेणेति तु यत्र पंच सोऽयं पुमान् स्यादिति मे मनीषा ॥२८५॥
यदृच्छलाभसंतुष्टाः परदारपराङ्मुखाः ॥
स्वच्छंदचारिणः केचिद्द्विजा विष्णुपदानुगाः ॥ २८६ ॥
योगं यः प्रथयन् हरेरिह पुनर्भोगं महांतं स्वयं
वाञ्छेदेष हि शेष एव स पुनर्याता बताधोगतिम् ॥
आकल्पं विपुलादिभारगहने स्थाता न भोगस्तु यः
सुव्यक्तं द्विजनायकः किल शुकः सोऽव्यक्तवाङ्मुक्तिभाक् ॥२८७॥

अपत्रपा इति कुजन्मिनो वृक्षाः पत्ररक्षणमकुर्वंतः वसंतोपनतौ पूर्वपत्राणि-पतंतीति सुमनःसमयं वसंतं प्राप्ताश्चेद्धरितभावं वहंतो विराजंते तथा पापयोनयोऽपि निर्लज्जा अपि साधूनामाचारमनुतिष्ठंतो हरिरूपा भवंतीति ॥ २८३ ॥

यइति द्विजेंद्रः विप्रादिः चंद्रश्च कुटिलः दुर्वृत्तो वक्रश्च सद्वृत्तः सुशीलो वर्तुलश्च ॥ २८४ ॥

पुण्येति यत्र पुंसि पुण्यक्रियादौ फलनिःस्पृहत्वं विशुद्धो बोधो भक्तियोगो मोक्षश्चेति क्रमेण दृश्यते स एव पुमान् नान्यः पुमान् इत्युक्ते पुः पवर्गः विद्यते यस्य पुमान् शब्दतोऽप्ययमर्थो भवति स च उक्तपंचपदाद्यक्षरैर्घटतएवेति 'बोधोत्तरं भक्तियोगो ज्ञानीचभरतर्षभेति' भगवदुक्तेः ॥ २८५ ॥

यदृच्छेति केचिदित्यनेन चटकादयः न कुक्कुटादयः चटकादयः केचिद्युग्मत्वेनोत्पद्यंते मिथुनीभावश्च तयोरेव नायं कुक्कुटादौ नियमः विष्णुपदं आकाशः हरिचरणं च ॥ २८६ ॥

योगमिति यः हरेर्योगं कुर्वन्नपि महांतं भोगं वांछेत् स शेषएव न तु मुच्येत प्रत्युत अधोगतिं याता किं च आकल्पं विपुलो य आधिभारः दुःखजालं तदेव गहनं कष्टं तत्र स्यात् यथा हरेर्योगं शयनसंबंधिनं प्रथयन् महांतं भोगं सर्पदेहं वांछति सशेष एव अधोगतिं पातालमूलं गतः कल्पपर्यंतं च विपुलायाः पृथिव्याः अधिको यो भारस्तदेव गहनं तत्र स्थितश्च अथ यो हरेर्योगं भक्तियोगं प्रथयन् नभोगः नास्तिभोगो यस्य विषयपराङ्मुखः स द्विजनायकः सुव्यक्तं शुकएव मुक्तिभाक् अव्यक्तं मौनि यद्वा अः वासुदेवः व्यक्तवाचि यस्य कीर्तनपरइत्यर्थः यथा हरेः हरिद्वर्णस्य योगं प्रथयन् नभोगः आकाशगामी द्विजनायकः पक्षींद्रः शुकः

रोमांचोंऽगेषु कंपो वचनविरचनाऽपाटवं नेत्रचंद्र-
ग्रावद्रावस्तमोद्रागपसरति चचिच्चंद्रिकोच [?] त्यकस्मात् ॥
मन्येऽहं तस्य धन्येशितुरमलतपोयोगमासाद्य सद्यः
शीतोल्लासाधिवासोऽधिल्हृदयगगनं रामचंद्रोऽवतीर्णः ॥ २८८ ॥

श्रीरामाविर्भावो यत्र स इह दृश्यते महत्त्वेन ॥
यदनेकतारकत्वं पुनर्वसुत्वं च सर्वजनसिद्धम् ॥ २८९ ॥

जातुचिन्नैति विकृतिं कुसंगप्रभवैर्गुणैः ॥
सर्वत्र तु सदामोदमाधत्ते सुमनोगणः ॥ २९० ॥

प्रसिद्धः सुमनस्त्वेन सर्वदामोदसंभृतः ॥
स्वत्वं कुसुमवन्नैव शिरश्छेदेऽपि मुंचति ॥ २९१ ॥

द्विजिव्हपीडिताश्चापि विक्रियां नैव तन्वते ॥
परतापोपशमने गुरवोऽगुरवो जनाः ॥ २९२ ॥

लाभेषु नूनमखिलेषु वदंति संतो
मुख्यः कुलाभ इति तस्यकृतेऽपि नाशे ॥

कीरएव स च मुक्तिभाक् स्वच्छंदचारी अव्यक्तवाकूच ॥ २८७ ॥

रोमांचइति यस्य हृदये सीताया उल्लासस्थानं रामचंद्रः तपोयोगमासाद्याव-तीर्णः तस्य एतानि चिन्हानि भवंति तदुक्तमेव यतः तपोयोगः माघयोगः तमासाद्य यश्चंद्रः स शीतोल्लासाधिवासः अत्यंतं शीतं वर्षति सहायेरैक्यात् अतएव रोमांचः कंपः वचनापटुत्वं च संपद्यते तमोऽज्ञानं तामिस्रं च ॥ २८८ ॥

श्रीरामेति यत्र पुंसि रामस्याविर्भावः स्फूर्तिः स महान् अनेकेषां च तारको भवति पुनः पुनर्वसु द्रव्यं यस्मिन् समृद्ध इत्यर्थः यथा यत्र नक्षत्रे रामावतारः तत् महत्वेन दृश्यते तत्पुनर्वसु नक्षत्रं द्वितारिकमिति ॥ २८९ ॥

जातुचिदिति कुसंगो दुःसंगः विकृतिः शाठ्यादि मृद्गंधश्च सदामोदं सर्वदानंदं उत्तमगंधं च सुमनसां साधूनां पुष्पाणां च ' आमोदं कुसुमभवंमृदेव धत्ते मृद्गंधं न हि कुसुमानि धारयंतीति ' ॥ २९० ॥

प्रसिद्धइति शिरः अद्याक्षरं तस्य छेदेऽपि सिद्धः इति कृत्वा न स्वत्वं गतं यथा कुसुमं स्वशिरश्छेदेऽपि सुमं तथापि न स्वत्वापगमः ' कुसुमं सुममित्यमरः ॥ २९१ ॥

द्विजिव्हेति द्विजिव्हाः सर्पाः खलाश्च गुरवो महांतो जनाः अगुरवः गुरवो वयमिति न मन्यमानाः अगुरवश्चंदनाश्च ' अगरु अगुरु ' इत्युभयमपि को-शप्रसिद्धं ॥ २९२ ॥

लाभेष्विति कुलाभः भूमिलाभः कुइति वर्णस्य लाभश्च तस्यापहारेकृतेऽपि

नैव त्यजंति सहजश्रवणाः कुलीनाः
शुद्धात्मनः कुसुमवत्परमात्मभावम् ॥ २९३ ॥
उपसर्गप्रकारोऽपि निर्मितः संमुखे यदि ॥
नैव स्वभाववैकल्यं वराणां जायते क्वचित् ॥ २९४ ॥
गतोऽपि द्विजराजो यः क्षयं वा वृद्धिमेव वा ॥
नैव विष्णुपदं जह्यात्सचामृतकरः स्मृतः ॥ २९५ ॥
हृदयप्रणिहितकृष्णो नित्यं यो विष्णुपदभजनधुर्यः ॥
क्षपयन्स्ववपुर्विबुधान् पुष्णात्येनं द्विजेंद्र इति मन्ये ॥ २९६ ॥
शूरः स एव यो वै विष्णुपदस्थः प्रचंडकरपालः ॥
नक्षत्रलोपकृद्यः सद्यो द्विजसंघदैन्यभंगकरः ॥ २९७ ॥
कृतपर्यस्तिकाबंधो जलामृतविवेचने ॥
यः शुचिः स्वात्मना नित्यं स द्विजो हंस उच्यते ॥ २९८ ॥
यद्भिन्नकठिनविषयजरसं रसाज्ञा रसाकुला दधते ॥
विशदस्वभावसुभगास्त एव मुख्या द्विजा विराजंते ॥ २९९ ॥

कुलीना उच्छृंखला न भवंति लीनाएव स्युः कुसुमस्यापि कूपहारे सुमवत् ॥ २९३ ॥

उपसर्गेति वरस्य समक्षं उपसर्गः उपद्रवः न्यक्कारादि तस्य प्रकारे निर्मितेऽपि न स्वभावं मुंचति वरस्य संमुखे पुरस्तात् उपसर्गो यः प्रकारः तस्य आसंजनेऽपि प्रवरो भवति पूर्वावस्थातोऽप्यधिको भवति ॥ २९४ ॥

गतइति द्विजराजः विप्रादिश्रेष्ठः चंद्रश्च क्षयं आपत्तिं कलाक्षयं च वृद्धिं संपत्तिं कलावृद्धिं च विष्णुपदं भगवच्चरणं आकाशंच अमृतं मोक्षः करे यस्येति अमृतरूपाः कराः यस्येतिच ॥ २९५ ॥

हृदयेति यः कृष्णध्यानपरः तद्गुणश्रवणकीर्तनादिपरायणः स्ववपुश्चंदनवत्क्षपयन् विदुषः प्रीणयति सएव द्विजश्रेष्ठः यथा चंद्रः कृष्णं कालिमानं मंडले दृश्यमानं यं अंकमिति वदंति आकाशे नक्षत्रजने धुर्यः कृष्णपक्षे स्वमंडलं क्षपयन् अमृतेन देवान् पुष्णाति अतएव द्विजेंद्रः ' पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेरिति कालिदासः ॥ २९६ ॥ शूरइति ॥ २९७ ॥

कृतेति पर्यस्तिका परिकरः जलामृतं चिज्जडयोगः जलदुग्धयोश्च शुचि पवित्रः शुद्धश्च द्विजोविप्रादिः पक्षीच हंसः परमहंसः प्रसिद्धश्च ॥ २९८ ॥

यद्भिन्नेति यथा मुखे भवाः द्विजाः दंतास्तएव मुख्याः के यैः भिन्नाः चर्विताः ये कठिनविषयाः खर्जुरीक्षुरूपास्तज्जं रसं रसज्ञा जिह्वा दधते बिभर्ति दधधारणइत्यस्य रूपं किं च विशदः शुभ्रः यः स्वभावः तेन सुभगाः तथा यैर्भिन्नाः

निजमहिमभदं न मनाग्ज्ञानघना आत्मना जना दधते ॥
यस्माच्छुकोऽपि हंसो हंसः सन्नप्यहंस इति मनुते ॥ ३०० ॥
या साध्वसंगता युक्तं जनता साध्वसं गता ॥
या साधुसंगता चित्रं जनता साऽध्वसंगता ॥ ३०१ ॥
उत्तममूर्धन्येऽस्मिन् जगतीतलभूषणायिते पुरुषे ॥
उपकारित्वं मुख्यं मन्ये किल तदनुरूपयुक्तत्वम् ॥ ३०२ ॥
संप्रार्थितो भव्यजनो न कालतः
स्यात्पूर्वभावस्थितिरस्य यद्यपि ॥
भ्राम्यन्स्वयं स्पर्शनमल्पशोऽर्पयं-
स्तोषं स जोषं तनुयाद्विशेषतः ॥ ३०३ ॥
नूनं भवेद्विगलितं बहुलोहजातं
व्यर्किं गते किल यदंतरनंतदेवे ॥

स्पष्टतां नीता ये कठिनाः दुःखगाहाः विषयाः शास्त्रसिद्धांतास्तज्ज्ञं रसं रसज्ञाः रसिकाः दधते दधति धाधातोरिदंरूपं बहुवचनांतं विशदः शुद्धः ॥ २९९ ॥

निजेति शुको हि श्रेष्ठः पक्षी काकाद्यपेक्षया स हंसतां गतः हंसः सन्नपि तत्त्वगर्वं न भजते शुकः व्यासपुत्रः परमहंसोऽपि अहंसः सोहं सोहमिति मनुते न हंसो हंसइति ॥ ३०० ॥

येति या जनता जनसंहतिः साधुषु असंगता सा साध्वसं भयं प्राप्तेवेति युक्तं परं तु या साधुसंगता सा साध्वसंगतेति चित्रं सा अध्वसंगता सन्मार्गलग्नेति विरोधपरिहारः ॥ ३०१ ॥

उत्तमेति पुरुषो हि परमेश्वरेण यः सृष्टः स उत्तममर्धन्य इति सृष्टः कस्मात् पश्य उत्तमः अंत्यः मूर्धन्यः षकारो यस्य अन्यदपि स्पष्टं किं मुख्यं उपकारएव कार्यइति कस्मात् पश्य मुख्यं आद्याक्षरं उपकारयुक्तं उकारयुक्तं पकारयुक्तं चास्ति नन्वस्य रूपेणैव मुख्यता भवतु नैवं तच्च तदनंतरं न तु मुख्यं कुतः पश्य पु इत्यक्षरादनंतरमेव रुणा रुवर्णेन उपयुक्तं दृश्यते तस्मादुक्तमनवद्यं ॥ ३०२ ॥

संप्रार्थितइति यो हि भव्यः उत्तमः जनः सः अर्थाय प्रार्थितः तस्य कालवशात् पूर्वभावस्थितिः पूर्ववत्समृद्धता यद्यपि नास्ति तथापि यत्र क्वापि स्वयंभ्रमन् किंचित्संपाद्य अल्पमपि स्पर्शनं दानं ददत् तोषं कुर्यादेवेति एतच्च युक्तमेव यो हि भव्यजनः तस्य पूर्वभावस्थितिः पूर्वो यो भकारस्तदयस्थानं न चेदव्यजनो जातः यश्च व्यजनः सः स्वयं भ्राम्यन् अल्पशः स्पर्शनं वायुं ददत्तोषयत्येव व्यजनस्य पुंस्त्वं कोशांतरे दृष्टं ॥ ३०३ ॥

नूनमिति यदंतर्भगवानाविर्भूतस्तस्य बहवः ऊहास्तर्का न संति बहु लोकानां

यस्माच्च्युतानि सहसा वसुदेवकारा-
गारे स्वयं निगडतालकशंखलानि ॥ ३०४ ॥
जानद्भिः परमं ज्योतिः सल्लग्नधिषणैरपि ॥
किं नाद्रियेत सद्योगकरणं चोत्तमा तिथिः ॥ ३०५ ॥
जानंति ये परं ज्योतिस्ते तु धन्यतरा नराः ॥
येषां लीलावतीमध्ये पश्य व्यासोऽप्यवस्थितः ॥ ३०६ ॥
जातस्वात्मपरीपाको नन्वपामार्गशेखरः ॥
रंजनायेह जायेत नाप्रत्यक्प्रवणात्मनाम् ॥ ३०७ ॥
सन्नाथमंडलस्था भजंत इह जंतवोऽमृतं संतः ॥
यद्विषयमाननस्था दुरंतमृत्युं तदप्युचितमेतत् ॥ ३०८ ॥
निलयः कष्टाय स इव वनिता स्वहिताय जायते सेव ॥
यं प्रति किल स्वलौल्यं तदिव स हि जनो विराजते विरलः ॥ ३०९ ॥
बहुतराहिते रसातल उत्तिष्ठंते हि सुमनसस्तपसि ॥
कांतारैजनवेगं विषह्य सद्रसफलास्तु विरलाः स्युः ॥ ३१० ॥

जातं बहु तच्च तल्लोहजातं तालकं कुलुप इतिलोके शृंखलं कडीति ॥ ३०४ ॥

जानद्भिरिति परमात्मज्ञानपूर्वकं सति ब्रह्मणि लग्ना धिषणा येषां ब्रह्मनिष्ठा अपि उत्तमं योगं अष्टांगं करणं वर्णाश्रमकर्माणि उत्तमातिथिपूजनं न त्यजंति पूर्वानुवृत्याऽचरंत्येव न तु यथा दैवज्ञा गमनादि मुहूर्तदाने लग्नमेव प्रबलं मन्यंते तत्र सति संभवे नक्षत्रयोगकारणतिथीनामुत्तमानामादरं न कुर्वंतीति न ॥ ३०५ ॥

जानंतीति लीलावत्यः स्त्रियः तन्नामा ग्रंथश्च व्यासः वेदव्यासः वृत्तादीनां विस्तारश्च एतासां अत्युत्तमानां साक्षात्सहवासस्तु पवित्रएव पमासांस्त्रीणां सहवासोऽपि ज्ञानफलायेति कृत्वा तत्रव्यासोऽवस्थितो भवति ॥ ३०६ ॥

जातइति अपामार्गशेखरः अपामार्गाः सन्मार्गस्थाः तेषां मध्ये शेखरइव जातस्वात्मपरिपाकः अप्रत्यक्प्रवणात्मनां विषयिजनानां रंजनाय न स्यात्परिपक्वा अपामार्गमंजरी प्रतिलोमं आस्फालयतां यथेति ॥ ३०७ ॥

सन्नाथेति सतां नाथाः साधुश्रेष्ठास्तेषां मंडले निविष्टाः संतः अमृतं मोक्षं भजंते यदि च विषयाणां मानने सत्कारे स्थिता दुरंतमृत्युमित्युभयमपि युक्तं सतां नक्षत्राणां नाथश्चंद्रः अमृतं सुधां विषं गरलं यमश्च तयोरानने मुखे स्थिताः ॥ ३०८ ॥

निलयइति निलयः गृहं रलयोरैक्यात् निरयः नरकः वनिता वनमस्यास्तीति वनी तद्भावः वनिता वनवासः सा वनिता स्त्री स्वस्य आत्मनः लौल्यं आत्मज्ञानोत्कंठा तत्रलौल्यं द्रव्यलोलुपता च ॥ ३०९ ॥

बहुतरेति कर्मभूमित्वात् देवाअपि अत्र जन्म याचंतइत्यत्यंताहितकारके रसातले

पंकोद्भूतौ रजोभिः कलुषितहृदयः कंटकासंगबद्ध-
श्चेत्सूर्यात्प्रसादो भ्रमरहित इह स्यात्सदामोदपूर्णः ॥
तं धत्ते वासुदेवो निजकरकमले पद्मवत्सादरं तत्-
किं वाच्यं तत्र लक्ष्मीर्निवसति निभृतं नित्यदा निर्व्यलीकम् ॥३११॥

यः प्रीतिमानपि सदैव कलिप्रवृत्तौ
संकीर्तयन्नटति कृष्णयशः पवित्रम् ॥
स ब्रह्मभूत इति सुप्रथितस्त्रिलोक्यां
दृष्टा करेऽस्य सततं महती प्रतिष्ठा ॥ ३१२ ॥

वीणाया अपि भुवनत्रयश्रियोऽपि
मायाया अपि निपुणं गुणान् महत्याः ॥
धुन्वानः समभिदधान आजिहानो
दिव्यात्मा विहरति नारदो जगत्सु ॥ ३१३ ॥

तपसि तपोविषये सुमनसः साधवः बहव उत्तिष्ठंते उदोऽनूर्ध्वकर्मणीत्यात्मनेपदं उत्थिता भवंति परं तत्र अंतरायभूतं कांताः स्त्रियः राः द्रव्यं जनाः अनुबंधिन इतरे च तद्विषयकं वेगं संसक्तिरूपं विषह्य सद्रसः ब्रह्मरसः फलं येषां तादृशाः विरलाः तथा च गीतासु 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वत' इति अयमेव दृष्टांतः यथा बहु इति भिन्नपदं तरहिते तकाररहिते रसातले तकारापहारे सति रसालइति जातं तत्र आम्रे तपसि माघमासे सुमनसः पुष्पाणि बहु यथास्यात्तथा उत्तिष्ठंते परं कांतारं वनं तत्संबंधि यत् एजनं वातादिना कंपनं तस्य वेगं विषह्य सन् उत्तमो रसोयेषु तानि फलानि येषां तादृशरूपेण अल्पाएवावतिष्ठंतइति ॥ ३१० ॥

पंकेति पापयोनिरपि रजोगुणव्याकुलितोऽपि फलसंग्यपि चेत् सूरिभ्यो ज्ञानिभ्यः सकाशात् प्रसादः अनुग्रहोलब्धः तर्हि भ्रमेण रहितः सदामोदेन हर्षेण पूर्णः स्यात् वासुदेवोऽथ तं करे धत्ते कथं पद्मवत् तदपि कर्दमोत्पन्नं परागपूर्णं कंटकैः शूकैः संगतं दक्षिणापथे हि सरसीषु महापद्मदंडेषु कंटका दृश्यंते 'दंडे चुंबति पद्मिन्याः सह कर्कशकंटकइति' दंडिप्रयोगाच्च तच्चेत्सूर्यादात्तः प्रसादःफुल्लता येन तर्हि भ्रमरेभ्यो हितः सन् आमोदो गंधस्तेन पूर्णो भवति ततस्तं पद्मं हरिर्हस्ते करोति अथ किं वाच्यं तत्र पुरुषे मोक्षलक्षणा लक्ष्मीर्निवसेदिति व्यथा तादृशपद्ममेव तस्या आलयः तथाऽयमपीति ॥ ३११ ॥

सामान्येन साधून् वर्णयित्वा विशेषाकारेण स्तौति तत्र नारदं इति कलिर्युगं कलहश्च सः ब्रह्मरूपः नारदश्च महती प्रतिष्ठा महतीनाम्न्या वीणायाः प्रतिष्ठा स्थितिश्च ॥ ३१२ ॥

प्रल्हादप्रमुखा हि बालमतयो विष्णोर्गुणग्राहिणो-
ऽभूवन्नारदसंगजं फलमिति प्रस्तौमि यावद्भृशम् ॥
तावत्तु स्मृतिमार्गमागतमिदं यत्पर्वतः सर्वतो
गायन्विष्णुगुणान्स ह व्रजति मद्वाचस्ततो मुद्रिताः ॥ ३१४ ॥
हीनजातिरपि यच्छवर्यभूक्रीरमेशकरुणारसस्पदम् ॥
इत्यवेक्ष्य बदरीफलं मुनिस्तद्वने वसति बादरायणः ॥ ३१५ ॥
कृष्णं द्वैपायनं वंदे महाभारतमोदिनम् ॥
पुराणपुरुषं ब्रह्मविद्यां निदधतं नरे ॥ ३१६ ॥
यद्ब्रह्मसूत्राणि विधाय कंठे सपद्ययं ब्राह्मणभावमेति ॥
वेदोपदेष्टारमिमं पुराणाचार्यं मुहुर्व्याससगहं नमामि ॥ ३१७ ॥
आशावसाना लोकेषु निजगुह्यप्रकाशकाः ॥
उपहासास्पदं प्रायो नूनमेकं शुकं विना ॥ ३१८ ॥
द्विजेषु शुक एवेह मुनीनां सुमनः स्थितम् ॥
रसमास्वादमास्वादं सुखं चरति सर्वतः ॥ ३१९ ॥

वीणायाइति महत्या वीणाया गुणान् तंत्रीः धुन्वानः महत्याः बृहत्याः त्रिभुवनश्रियः भगवद्रूपायाः गुणान् कथयमानः महत्या मायाया गुणान् हेयोपादेयविषयरूपान् त्यजन् ॥ ३१३ ॥

प्रल्हादेति पर्वतो नाम नारदसहचारी कश्चिद्गायकः पर्वतः सन् हरिगुणान् गायन् व्रजति किं पुनः सचेतनाः प्रल्हादध्रुवप्रभृतयइति तस्माद्वर्णयितुं वाक् न प्रसरतीति ॥ ३१४ ॥

व्यासं वर्णयति त्रिभिः हीनजातिरिति स्पष्टं ॥ ३१५ ॥

कृष्णमिति कृष्णं व्यासं हरिं च द्वीपे अंतर्जलतटेऽयनं यस्य तस्य पराशरस्य पुत्रं द्विपस्य गजस्य इदं द्वैपं तच्च तदयनं गजेंद्रगतिं महाभारतेन मोदते महान् यो भारः सएव तमः तस्य तमसः दिनं दिवसरूपं पुराणवक्तारं पुरुषं अनादिं च नरे मनुष्ये पार्थे च ब्रह्मविद्यां ब्रह्मसूत्ररूपां गीतारूपां च ॥ ३१६ ॥

ब्रह्मेति यत्प्रणीतब्रह्मसूत्राणि अथातो ब्रह्मजिज्ञासाइत्यादीनि यज्ञोपवीतानि च ब्राह्मणत्वं ब्रह्मज्ञत्वं च वेदविभाजकं च वेदमध्यापयंतं पुराणाचार्यं पुराणवक्तारं॥३१७॥

शुकं वर्णयति त्रिभिः आशा दिशः वसानाः दिगंबराः आशाकुलाश्च निजगुह्यं आत्मतत्त्वं गुह्यदेशं च शुकस्तु आशानामवसानं यस्य तादृशः ॥ ३१८ ॥

द्विजेष्विति मुनीनां ऋषीणां अगस्तिवृक्षाणां च शुद्धांतःकरणगतं ब्रह्मरसं पुष्पगतरसं च ॥ ३१९ ॥

द्राक्षानिंबफणिज्येषु यस्य साधारणी रुचिः ॥
तादृशः शुक एवेह द्विजेंद्रेषु विलोक्यते ॥ ३२० ॥

सदुपासनसंपन्ना कुलस्यारिपरिक्षया ॥
अबला शबरी नूनं शरधारी परः पुमान् ॥ ३२१ ॥

शबरी कोलवितरणादपि भवजलधेर्महोर्मि घोरस्य ॥
पारं परं गतवती येन स लाघवसमाश्रयो जयति ॥ ३२२ ॥

आत्यंतिकं स्वकुशलं परिलिप्समानाः
सेवंत एव सुजना बहुशोऽपि रामम् ॥
सर्वेषु तेषु रघुनाथ गृहीतसेवा
सैकैव भाति शबरी परिशुद्धभावा ॥ ३२३ ॥

महाकपिः श्रीरामांघ्रिसरसीरुहतत्परः ॥
विलोपितांतको यस्मात्तस्माद्वाच्यो महाकविः ॥ ३२४ ॥

सत्त्वं सुखे संजयतीति हि स्मृति-
श्चेन्नित्यदा सत्त्वमथानिशं सुखम् ॥
इतीव विद्वान्पवनस्य नंदन-
स्तन्नित्यदासत्वमसौ दृढं दधौ ॥ ३२५ ॥

द्राक्षेति फणिज्जं क्षुपमरीचं मिरचीति लोके कमपि रसविशेषं नावैति ॥ ३२० ॥

शबरीं वर्णयति त्रिभिः सदुपासनेति उपासनं उपास्तिः शराभ्यासश्च अरिः कामादिः खरदूषणादिश्च अबला स्त्री बलातिबला नबला अबला च शबरी बकारहीना चेत् शरी भवति स च रामएवेति ॥ ३२१ ॥

शबरीति कोलं बदरीफलं तद्वितरणं दानं लाघवं लघुत्वं राघवश्च महतो भवजलधेः पारं कोलेन चर्मावनद्धवंशविदलनिर्मितभांडेन टोकराख्येन गंतुमशक्यं तथापि गता तत्र हेतुः लाघवसमाश्रयः सोऽत्यतीव लघुः तूलप्रायस्तेन शक्यतैव गंतुं गुरुभूतेन परमशक्यं ॥ ३२२ ॥

आत्यंतिकमिति सेवापरिचर्या 'मुष्टिप्रमाणं बदरं सेवमित्यभिधीयते' इति भोजनकुतूहले वचनात् सेवानि बदराणि ॥ ३२३ ॥

महेति विलोपितोऽतको येन सः महाकपिः हनूमान् महाकविर्वक्तव्यः विना विकारेण लोपितः अंतः अंत्यवर्णः विकारो यस्य सः तादृशएव भवति ॥ ३२४ ॥

सत्त्वमिति स्मृतिर्भगवतो गीतारूपा 'सत्त्वं सुखे संजयतिरजः कर्माणि भारत' इति नित्यं यद्दासत्वं दास्यं तन्नित्यदासत्वं नित्यदासत्वमंगीकृतं चेत्तत्र निश्चदासत्वमस्येव नित्यदा हि सत्त्वे अनिशं सुखं यतः 'सत्त्वं सुखेसंजयतीति भगवानेवाहेति ॥ ३२५ ॥

बिभीषणो राक्षसवंशदीपकः सभाजनोद्दामदशास्यदूषकः ॥
सर्वोत्तमस्नेहभरेण पूरितश्चिरं ज्वलत्यत्र परं निरंजनः ॥ ३२६ ॥
अहो सदारामपदं श्रितस्य कुजन्मनः सद्रससंभृतस्य ॥
समुद्भवेत्सत्सुमनस्कताऽस्य निदर्शनार्थं यवनः कबीरः ॥ ३२७ ॥
यो ह्यादिमवर्णोत्तररसंगतोऽसौ कुजन्म्यपि कबीरः ॥
सुमनःसहस्रमध्ये श्रैष्ठ्यं न समाश्रयेत्कथंकारम् ॥ ३२८ ॥
नृणां मूर्धस्रक्त्वं कलयति कबीरस्य तनयः
कमालेत्येतस्मिन्विषय इह हेतून् समुचितान् ॥
उपन्यस्तुं यावत्कृतपरिकरस्तावदचिरात्
समाख्यैवास्येयं मम समवरुंद्धे मतिगतिम् ॥ ३२९ ॥
आत्मारामसमद्भूतिस्तुलस्यामोदमंदिरम् ॥
सुमनःकोटितः प्रीत्यै श्रीरामस्य भवेन्न किं ॥ ३३० ॥

बिभीषणं स्तौति बिभीषणइति । दीपकत्वं साधयति सभाजनेषु उद्दामो यो दशास्यो रावणः तं दूषयति रामो हि साक्षादादिनारायणस्तेन सह विरोधं मा कार्षीरिति सभायां येन रावणं प्रति बोधः कृतः भाजनं पात्रं तेन सह या उद्दामदशा महती वार्तिस्तस्याः आस्यं मुखं दूषयति सर्वोत्तमो रामस्तत्र यः स्नेहस्तस्य भरेण पूरितः सर्वोत्कृष्टः यः स्नेहः तैलं च अतएव निरंजनः विषयवासनाशून्यः कज्जलरहितश्च निकृष्टतैले च कज्जलबाहुल्यं ॥ ३२६ ॥

द्वाभ्यां कबीराख्यं भगवद्भक्तं वर्णयति सन् आरामः उद्यानं तत्पदं सदा रामस्य चरणं च कुजन्मनः वृक्षस्य नीचयोनेर्यवनस्य च सतोत्तमेन रसेन जलेन ब्रह्मानंदेन च सत्यः सुमनसः पुष्पाणि यस्य तस्य भावस्तत्ता उत्तमसाधुता च ॥ ३२७॥

योहीति यः कबीरः आदिमो यो वर्णो ब्राह्मणस्तस्य योग्यः यः उत्तमरस उत्कृष्टरसः ब्रह्मरसस्तं प्राप्तः सः साधुसहस्रे श्रेष्ठः कथं नस्यात् अपि तु स्यादेवेति यो हि कबीरः कुजन्मी वृक्षः आदिवर्णः ककारस्तदुत्तरं रेण रेफेण संगतः करवीरो भवति बवयोरैक्यात् यश्च करवीरः स पुष्पसहस्रमध्ये श्रेष्ठः एकतोऽन्यानि सहस्रं पुष्पाणि एकतः करवीरमिति पारिजातादौ द्रष्टव्यं 'बकुलं पुष्पसाहस्रान्नंद्यावर्त्तं विशिष्यते ॥ नंद्यावर्तसहस्राद्धि करवीरं विशिष्यतइति' नृसिंहपुराणे ॥ ३२८ ॥

कमालं स्तौति नृणामिति कमाला इयं समाख्या नाम इयमेव अयं नृमूर्धन्य इतीममर्थं कथयति के मस्तके माला पुष्पस्रक् कमाला या कमाला मुंडमाला सा मूर्धन्यैवेति ॥ ३२९ ॥

तुलसीदासं द्वाभ्यां आत्मारामनामा कश्चित् कान्यकुब्जो विप्रः तुलसीदासस्य पिता आत्मारामात्समुद्भूतिर्यस्य आमोदस्य संतोषस्य मंदिरं एतादृशस्तुलसीनामा

लोकोऽयं किल मोहितो ममतया काः का न नामाचरेत्
प्रेतासंगमहाभुजंगमपरिष्वंगादिघोरक्रियाः ॥
तां जह्याद्यदि रामदर्शनसुधालाभस्य सद्भाजनं
स्यादित्यत्र निदर्शनाय तुलसीदासः समुज्जृंभते ॥ ३३१ ॥
अकिंचनवरेण्योऽपि समर्थपदवीं गतः ॥
दासोऽपि यः किल स्वामी स साधुः कोऽपि राजते ॥ ३३२ ॥
यो हि श्रीरामदासः स्यात्परित्यज्य श्रियं स्त्रियम् ॥
असौ न परलीनः स्यादिति कः सज्जनो वदेत् ॥ ३३३ ॥
यो रामदासः स्यात्तस्य कल्याणस्थितिरालये ॥
सभाजयति तं प्रेम्णा दुर्गाधीशः सदाशिवः ॥ ३३४ ॥

साधुः रामस्यान्येभ्यः कोटिसाधुभ्यः प्रीतये भवतीति युक्तं आमोदस्य गंधस्य गृहं तुलसी हि अनेकपुष्पापेक्षया रामाय रोचते तथा च तत्त्वसागरसंहितायां 'योगिनां निर्वृतौ वांछा कामिनां च यथा रतौ ॥ पुष्पेष्वपि च सर्वेषु तुलस्यां तु तथा हरेरिति' सा चेत्परोद्यानसंभूता किंचिद्गुणहीना इयं तु आत्मारामसमुद्भूतिः॥ ३३०॥

लोकइति अत्रेयमाख्यायिका 'तुलसीदासो हि राजपुरुष आसीत् स राजकार्यार्थं क्वचिद्गत्वा कियता कालेन गेहमागतस्तावत् ममतानाम्नी तस्य भार्या मातृगृहं गताऽभूत् तदा काममोहितः सन् रात्रौ श्वशुरगृहं प्रति गंतुं निर्गतस्तदा मध्ये महानदी उपस्थिता तत्र दृष्टं तावत् कश्चित् प्रेतः वटे लग्नोऽभूत् तदा मन्यते स्म किमहो वाच्यं मम प्रियया नौकेयं मदागमनार्थं प्रेषितेति ततस्तदुपर्यारुह्य पारं गतः श्वशुरगृहं गतस्तावत् प्रियानिद्रागेहगवाक्षात् कृष्णभुजंगो महांल्लंबमानोऽभूत् तदा मन्यते स्म किमहो मत्प्रियया मदारोहणार्थं महारज्जुर्मुक्तेति तेनारुह्यांतर्गतः निद्रितां ममतां बोधितवान् सा विस्मिताऽब्रवीत् किमिदं कथमत्रैते श्रीमच्चरणा आगतवंतः स आह किं मम नर्माचरसि त्वयैव नद्यां नौका स्थापिता गवाक्षे रज्जुश्च मुक्ता हूं पश्यामि परं काऽसौ रज्जुरिति दीपं गृहीत्वा दृष्टं तावन्महान् कालसर्पो दृष्टः शिव शिव केयं साहसिकता हंहो कीदृगयं दुरंतवीर्यः कामः ततश्च तयोक्तं एवं सौहृदं भगवदर्थे कृतं स्याच्चेत् किं नाम दुर्लभं स्यात् तदाकर्ण्य तदात्वएव विरक्तस्तां नमस्कृत्य त्वमेव मम माता मम गुरुरिति वनं गतः ततश्च तत्र रामदर्शनं जातमिति' ममता ममत्वं च केचिद्द्रव्यार्थं प्रेतमधिष्ठाय मंत्रं जपंति जांगलिका भुजंगानाकलयंति ॥ ३३१ ॥

रामदासं वर्णयति दासः स्वामीसमर्थइति तस्य समाख्या ॥ ३३२ ॥

योहीति रामदासो हि परे ब्रह्मणि लीनः परल्यास्तन्नामकदुर्गस्य इनः स्वामी परलीनः ॥ ३३३ ॥

रामदासपदांभोजरजःस्पर्शो विराजते ॥
यः कुशीलजनस्यास्य कल्याणाय प्रकल्पते ॥ ३३५ ॥
गंगाधरप्रेमरसास्पदं यो यः सूर्यवंशैकमणिप्रवेकः ॥
खरांतकः शोभनलक्ष्मणाढ्यः स रामदासः किल राम एव ॥ ३३६ ॥
ध्वस्तमहाशोकवनं दलिताक्षं सद्रुचाफलावासम् ॥
कल्याणशिवप्रभुपदसोल्लासं रामदासमवलंबे ॥ ३३७ ॥
श्रीरामो विपिनप्रयाणसमये श्वःश्रेयसध्वंसको
नास्ति क्रोधसमोऽपरो रिपुरिति प्राह प्रियं भ्रातरम् ॥
तद्भूयासमकोपयुक्त इति चेत् श्वःश्रेयसावाप्तये
सर्वस्वं सहसा विहाय तृणवच्छ्रीरामदासो भव ॥ ३३८ ॥
श्रीरामः किल भिन्नभिन्नविधया मातेव कौतूहला-
न्याधत्ते स्वजनस्य पूर्णकरुणस्थाने तदेतद्यतः ॥

यइति यो रामस्य दासः स्यात् तस्य गृहे सदा कल्याणं ते दुर्गायाः पार्वत्याः ईशः शिवः सदा सभाजयति पूजयति 'अथ भागवता यूयं प्रियाः स्थ भगवान्यथेति' भागवतोक्तेः अथ रामदासस्य गृहे कल्याणस्वामी दुर्गाणां पर्वतकोटराणां रचयिता शिवः शिवाजी नाम राजा तं पूजयति च ॥ ३३४ ॥

रामदासेति स्पर्शः मणिः कुशीआयस्यो यः शंकुः तां लाति कल्याणाय सुवर्णाय अन्यत् स्पष्टं ॥ ३३५ ॥

गंगाधरइति गंगाधरो रामदासस्य ज्येष्ठभ्राता श्रेष्ठइति रामीरामदासइति च ख्यातः शिवश्च । सूर्यः रामदासस्य पिता सूर्याजीपंत इति रविश्च । खरस्य खलस्य शोभनेन लक्ष्मणेन चिह्नार्बुदाख्येन च 'भाळीं अवाळू असे' ॥ ३३६ ॥

हनूमता सहाभेदं स्तौति । ध्वस्तेति यथा हनूमान् अशोकवनं रावणस्य अक्षः एतन्नामा रावणसुतः सती रुक् रुचिः प्रीतिः तया फलेषु आवासो वासना यस्य सीतासंदेशेन कल्याणस्य यच्छिवं कल्याणं तादृशं रामपदं च 'मंगलानां च मंगल' मित्युक्तेः तत्र सोल्लासं अन्यत्र महाशोकस्तदेव वनं अक्षाणि इंद्रियाणि संतः उत्तमा द्रुमा यत्र तादृशश्चाफलाख्यो ग्रामः तत्र वसतिः कल्याणः शिवश्च तयोः शिष्ययोः पदे रक्षणे ॥ ३३७ ॥

श्रीरामइति 'नास्ति क्रोधसमो रिपुः' इति लक्ष्मणं प्रति रामआह तस्मात्कोपयुक्तेन न भवितव्यमिति चेद्रामदासो भव ततस्तथा । स्याः यो हि रामदासः सः अकोपयुक्तएव अकानाम्नी काचिच्छिष्यभावंगता तया उप समीपे युक्तइति प्रसिद्धं ॥ ३३८ ॥

श्रीरामइति यथा माता बालकं प्रति भावाभावरूपेण लालयति रे वत्स अद्य तत्तुभ्यं दत्तं परं श्वो नास्ति परश्वो दातास्मीति अकानाम्न्याः पिता रुद्रनामा देशले-

पूर्वं काननजातयाऽभिरमितो रुद्रः स्वया लीलया
भूयोऽकाननजातया रमयितुं प्रायः प्रवृत्तः कलौ ॥ ३३९ ॥
अकामतात्युत्तमेति कृत्वा चेदिष्यते त्वया ॥
श्रीरामदासशरणं व्रज तत्रास्त्यकामता ॥ ३४० ॥
आपूर्य स्वमुखेन कर्णविवरं वेणुं करांभोरुहे
कृत्वा वादयता पुरा भगवता साधुव्रजस्यार्पितः ॥
मोहो मंजुरवेण हंत स पुनर्दासेन तु ध्वंसितो
जानीमस्तदतीव साधु चरितं दासस्य देवादपि ॥ ३४१ ॥
रामाकाशनृपालसंमितशके संवत्सरे दुर्मतौ
माघे मासि शनेर्दिनेऽथ चरमे पक्षे नवम्यां तिथौ ॥
हित्वा दासपदं स सज्जनशिरोभूषामणिः स्वात्मना
शिष्टः कैवल्यमर्थयत्समये श्रीरामदासो गुरुः ॥ ३४२ ॥
यस्त्यक्त्वा तृणवच्छ्रियं स्त्रियमपि श्रीरामदासोऽभवत्
सोऽयं षोडशशून्यपूर्वकतया लीनोऽधिरामं भवेत् ॥

स्वकआसीत् रामेण कानने जाता रावणवधादिरूपा लीला तया रुद्रः शिवः अभिरमितः कलौ तु अकाननजातया रुद्रं रमयितुं प्रवृत्तएव अकाया आननं मुखं तस्माज्जातया अभंगपद्यरूपया ॥ ३३९ ॥

अकामेति निष्कामता परमश्रेष्ठेति कृत्वा वांछसि चेत् श्रीरामदासो यः शरणं रक्षिता तं प्रति व्रज तत्र अकामता वर्तते श्रीरामदासस्य शरणं मठं व्रज तत्र अकामता मान्याऽस्ति ॥ ३४० ॥

आपूर्येति पुरा भगवता वेणुं करे कृत्वा मुखेन कर्णविवरं अंतश्छिद्रं आपूर्य तज्जन्यमंजुरवेण साधुर्यो व्रजः गोकुलं तस्य मोहउत्पादितः दासेन तु वेणुं हस्ते धृत्वा तत्कर्णं स्वमुखेन आपूर्य मंत्रोपदेशं कृत्वा तदुत्थेन रामायणादिप्राकृतग्रंथरचनया साधुसंमोहस्य मोहो ध्वंसितइति वेणुनाम्नी काचित्स्त्री शिष्यत्वमागताऽभूत् तत्कृतरामायणमतीवरामणीयकशालि ॥ ३४१ ॥

श्रीरामदासस्य प्रयाणोत्सवं वर्णयति रामेति रामास्त्रयः आकाशं शून्यं नृपाः षोडश एवं च 'अंकानां वामतो गतिः' रिति शालिवाहनशकः त्र्युत्तरषोडशशती संख्या (शके १६०३) तत्र दासपदं हित्वा स्वात्मना शिष्टः रामएवाभवदिति सज्जनेषु श्रेष्ठः सज्जननामदुर्गस्य भूषणं। परळीदुर्गस्य सज्जनइति नामांतरं ॥ ३४२ ॥

उक्तसंख्यशकएव कुतः प्रयाणमित्यत्र हेतुमाह यस्त्यक्त्वेति यः श्रीस्त्रीत्यागपूर्वकं रामदासोऽभूत् तस्य षोडशकलाः पंचज्ञानेंद्रियाणि पंचकर्मेंद्रियाणि पंचप्राणाः चित्तचतुष्टयमेकमिति एतच्च लिंगमित्युच्यते तच्छून्यपूर्वकतया तद्भंगपूर्वकं रामे

इत्थं दर्शयितुं शकाब्दगणनासंस्थामुखेनास्थितो
रामाकाशनृपालसंमितशके श्रीरामदासो लयम् ॥ ३४३ ॥
यः पुंसा मनसा नियम्य सहसा स्वार्थाय पुण्यस्तपो-
योगस्तत्रास्थित एनमार्यमहितं संत्यज्य सर्वात्मना ॥
त्यागो नैव वरस्तनोरिति जनान् संदर्शयन् किं तपो-
योगे तापसशेखरो निजतनुं श्रीरामदासोऽत्यजत् ॥ ३४४ ॥
आदौ दुर्मतिसंगतिस्त्वसुभृतां प्रायो मनोभ्रंशिका
चेत्तत्रापि भगप्रसंग उदये त्यागस्तनोस्तद्वरः ॥
स्थैर्यं न क्षणमात्रमित्युपदिशन् पक्षेंतिमे सत्तमो
माघे मासि जगद्गुरुर्निजतनुं श्रीरामदासोऽत्यजत् ॥ ३४५ ॥
अस्मिन्भूवलये विधाय विमलां चंद्रप्रभाकोमलां
कीर्तिं जेतुमितो नरः परपदं यो रामदासो व्रजेत् ॥
तत्रैवैष चिरं वसेन्न पुनरागच्छेदिति द्योतयन्
जेतुं मंददिने जनेशपदवीं श्रीरामदासो ययौ ॥ ३४६ ॥

ब्रह्मणि लयः स्यात् 'इति रामपदेनासौ परं ब्रह्माभिधीयत' इति तापनीयश्रुतेः तथा च षोडशांकः लिंगबोधकः तदुपरि शून्यं कृत्वा त्र्यंकाभिहिते रामे लयः एवं सूचयन्निव स्वयं निदर्शनायाभवत् ॥ ३४३ ॥

माघे प्रयाणे हेतुरित्याह यः पुंसेति येन यस्तपोयोग आस्थितस्तेन तत्रैवावसानं कार्यं न तु तत्परित्यज्य आरूढपतितत्वदोषस्मरणात् अतस्तपस्येवावसानमकरोत् 'तपामाघेऽथ फाल्गुन इति' कोशात्तपः शब्दो माघवाचकः ॥ ३४४ ॥

दुर्मतिवत्सरकृष्णपक्षाभिप्रायमाह आदौ दुर्मतीति आदौ दुर्मतीनां विषयिणां संगएव निंद्यः भवतु नाम सः यथा कथंचन पारयामः परं तत्र भगप्रसंगः सुरतप्रसंग उपनमेच्चेत् तदा देहावसानमेव वरं नत्ववस्थानं 'न तथाऽस्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः ॥ योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः पदाऽपि युवतिं भिक्षुर्न स्पृशेद्दारवीमपि' इति भागवतात् तथा मम दुर्मतिः तन्नामसंवत्सरसंगोऽभूत् पुनस्तत्र भगप्रसंगः फाल्गुनप्रसंगः समीपउपनतः अतो मया देहस्त्यक्तइति निदर्शनं लोकसंग्रहार्थं 'कार्तिकादिषु संयोगे कृत्तिकादि द्वयं द्वयं ॥ अंत्योपांत्यो पंचमश्च त्रिभं मासत्रयं स्मृतमिति' सूर्यसिद्धांतोक्तेर्नक्षत्राणां मासव्यपदेशत्वात् भगः पूर्वाफाल्गुनी तद्युक्तो मासः फाल्गुनः लक्षणाअर्शाद्यच्वा ॥ ३४५ ॥

मंदवारप्रयाणहेतुमाह अस्मिन्निति 'मंदवारगमनेपुनरावृत्तिर्नेति' क्वाचित्कज्योतिःशास्त्रं मनसि कृत्वैतत् यो रामदासः परं पदं जेतुं गतः स तत्र चिरं तिष्ठतु न पुनरागच्छेत् इति सूचयितुं मंददिने शांतोऽभवत् ॥ ३४६ ॥

स्नातानां गुरुराजपूर्णकरुणापीयूषधारांबुभिः
श्रीगोविंदपदांबुजस्मृतिसुधास्वादैकतृप्तात्मनाम् ॥
संस्था नैव च शुक्लपक्षउदये देवं जनान् सूचयन्
संस्थामाप स कृष्णपक्ष इव नः श्रीरामदासो गुरुः ॥ ३४७ ॥
पुण्यादौ मधुशुक्लपक्षनवमी श्रीरामजन्मोत्सवै-
र्दासस्याप्यथ तेन तां विजहसुस्ताः कृष्णपक्षस्थिताः ॥
ता एनं शरणंगता इव सतां प्राणप्रयाणोत्सवैः
कारुण्यात्तपसि स्थितां व्यचरयत्पुण्यां शरण्याग्रणीः ॥ ३४८ ॥
पूर्वाह्णोऽवभृथोत्सवेन भवता संभाव्यतामीदृशं
देवौघैरभियाच्यते स्म पितृभिः स्वीयो पराह्णस्त्विति ॥
तत्रासावुभयानुरोधकुशलस्तत्संधि मध्यंदिनं
किं संभावयति स्म मानुषहितः श्रीरामदासो गुरुः ॥ ३४९ ॥
किं युक्त्या प्रतिपादयामि बहुधा श्रीरामदासः सतां
नाथोऽवातरदेषरामयशसः ख्यात्यै हनूमानिति ॥
आख्यैवास्य यतः समस्तजनताश्रोत्रातिथित्वं गता
चेत्तावत्प्रभवत्यभेदधिषणा श्रीमन्मरुत्सूनुना ॥ ३५० ॥

पुनश्च कृष्णपक्षावसानहेतुमाह स्नातानामिति गुरुकरुणापिठराणां संस्था स्थितिः शुक्र (क्ल) पक्षे आसुरभावे न स्यात् किं तु कृष्णपक्षे दैवभावे गुरुर्देशिकः बृहस्पतिश्च शुक्रः दैत्यगुरुः पूर्वपक्षश्च रलयोरभेदात् कृष्णः विष्णुः वद्यश्च नत्ववद्यः संस्था स्थितिर्मरणं च ॥ ३४७ ॥

नवम्यां प्रयाणहेतुमाह पुण्यादाविति चैत्रशुक्लनवमी रामजन्मोत्सवेनादौ पुण्याऽभूत् पुनः अस्य दासस्य जन्माप्यस्यामेव तिथाविति वदंति तेन कारणेन अतीव महत्वभूत् ततश्च साजात्यात् यात्व्यः शुक्लपक्षस्था नवम्यस्ताः सर्वा गह्लफुल्लं कृष्णपक्षीयां नवमीर्जहसु न भवत्यः अस्मादृशइति ततश्च ताः सर्वाएनं शरणागताइवाभवन् अनेनोक्तं 'पुण्यं विना न हि भवंतिसमीहितार्थाः' इति तपस्तप्यतामिति तत्र काचित्तपोयोगं कृतवती तामयमवदत् त्वां प्रति जन्मोत्सवेन कृतार्थयिष्यामि परं मम पुनर्जन्माभावः अतः प्रयाणोत्सवेन भवतीं संभाव्य पुण्यां करिष्यामीति तदैव तां पुण्यतिथिं कृतवानिति ॥ ३४८ ॥

मध्यंदिनहेतुमाह पूर्वाह्णइति पूर्वाह्णो वै देवानामपराह्णः पितॄणां मध्यंदिनं मनुष्याणामिति तैस्तैः स्वस्य कालपुण्यत्वायाभ्यर्थितः सन् सर्वेषामपि प्रियाय मध्यंदिनमंगीचकार तत्र त्रयाणामपि संबंधोऽस्तीति अवभृथः मरणं 'यन्मरणं तदवभृथ' इति श्रुतेः ॥ ३४९ ॥

गद्यं। दुस्तरतरसंसारसागरपरपारदस्य, साक्षान्नारदस्येव शारदशशधरगौरवपुषोसिंहसंहननस्याशेषतमस्तोमनिस्तोदनिपुणैर्द्वादशभिरर्कैरिवो-र्ध्वतिलकैरलंकृतस्य तीव्रतरतपःप्रभावात्संभूय स्वयमयत्नोपनता अणिमाद्यनेकसिद्धीरेताः खलु भगवद्विभूतयइति शिरसा श्लाघं श्लाघं निबध्य निहिताइवातिपिंगटविशंकटा जटा बिभ्राणस्य विधातृकरविलिखितमहाभाग्याक्षरपंक्तिवल्या उदयमानेन फलेनेव लघुनार्बुदेन घटमानललाटपदस्य, जातमात्रएवैषश्रुत्यंतदर्शीति दर्शयद्भ्यामाकर्णविशालाभ्यां नयनाभ्यां विराजमानस्य, श्रीमद्रामप्रभुनामधेयसंकीर्तननिगूढरागेणेवोष्टपुटेन-विनटमानस्य, कलिमहिमगलितजीवनीयगुणमात्मानमनवरतनिःसरन्नामपीयूषशीकरैराप्याययितुमिवमुखमभितः प्ररूढश्मश्रुमिषेण समाश्रितौषधिजालस्य, अनेन निगीर्णमिव त्रैगुण्यमिति सूचयता रेखात्रयेण विलसत्कंठस्य, एष साक्षाद्भगवतो रामस्य दासइत्यस्माकं दासस्य भूमंडलविसृत्वरामपि कीर्ति महिम्नापसारयति न कश्चिदिति शंकाकुलतया महता चिंताभरेण शुष्काभिर्मणीभूय कतिपयीभिरुपकंठं लुठंतीभिः कतिपयीभिश्चास्मद्दासकीर्तिः स्वीयकीर्तेः सखी करणीयेति रहस्यवादं कर्तुमिव लाघवसमाश्रयेण श्रुत्यंतं लग्नाभिस्तुलसीभिरुपशोभमानस्य, दीनजनकारुण्यकंदलस्यांकुरायमाणैरिव लोमभिः परिचितवक्षःपीठस्य, पुरा किल त्रेतायामसंमानितायाः साम्राज्यच्युतिरभवदिति द्वापरे मथुरायां भगवता वासुदेवेनादावेव कृतपरिग्रहायां यस्यां सद्यः स्वसाम्राज्यसिद्धिरपादीति निपुणतरदर्शनेन स्वसाम्राज्यसंसिद्धय इव कराब्जादत्तकुब्जापरिग्रहस्य, एतस्य खलिंद्रियगणो मुष्टिगतइव वशीभूतइति द्योतयंत्याक्षमालयाभिलक्षितस्य सकौपीन इत्यंतर्गर्भिताशयां 'कौपीनवंतः खलु भाग्यवंत' इति श्रीमदाचार्यभणितिं स्वस्मिन् प्रवर्तमानाभ्यां स्वामीसमर्थशब्दाभ्यां समर्थयितुमिव कौपीनं परिदधानस्य, समाश्रितानां मनोरथान् सर्वथा पूरयामि परमन्यत्र ज्ञानादिति तादृक्कौशलीं शिक्षितुमिवोपसदनसंपत्तये तपसा शुक्लीकृतवपुषा पृच्छतो महाराष्ट्रान् श्रीरामदासचरणे किमपि नपरिक्षीणामिति चट चट चटेति जल्पिते नोत्तरयतेव हरिचंदनेन पादुकीभूय समुपासितपादयुगलस्य, सर्वांगीणामरविंदाक्षकृपाकटाक्षपातप्रभामिव शीतार्तिभंजिनीमानीलपाटलां मेखलां उभयपार्टीं वसानस्य ब्रह्मानंदोद्गारानिव जय रघुवीर जय रघुवीरेति मुहुर्वाक्यान्यु-

श्रीरामदासो हनु(नू)मदवतारत्वात् सएवेत्याह किं युक्तेति अस्य अभिधा नाम रामदास इति सैव हनुमानयमिति बोधयति तदर्थमुक्तिप्रपंचक्लेशो न कार्यइति॥ २५०॥

दाहरतो, ब्रह्मर्षिद्विरक्तभक्तसार्वभौमस्य श्रीरामदासस्य गुरोऽश्चरणसरोजयोः पंतविठ्ठलविरचितानंतप्रणतयः संततमुल्लसंतु ॥ १ ॥

व्हाया सफळ मनुजजनि अत्रलंबुनि रामदासता राहे ॥
श्रीरामदास होता बा याजनिं चाफळावगम आहे ॥ ३५१ ॥
बोधस्य यत्नं त्यज राघवस्य दासो भव त्वं यत एष बोधः ॥
न दासपृष्ठं त्यजतीति गुह्यं प्रबोधयन्भाति स दासबोधः ॥ ३५२ ॥
शूरकुलालंकारं विबुधात्याद्दतपदांबुजाद्वितयम् ॥
निगडीकृतसंस्थानं कविनाथं रंगनाथमवलम्बे ॥ ३५३ ॥

गद्येन तं नमति दुस्तरेति गौरवं पुष्णाति तस्य सिंहसंहननः स्वंगः यथोक्तलक्षणानयनइत्यर्थः तमस्तोमः अंधकारः अज्ञानं च श्लाघं श्लाघं श्लाघयित्वेति णमुलंतं विशंकटाः विशालाः अर्बुदं अवाळूं इति लोके श्रुत्यंतदर्शी वेदांतावलोचकः रागः प्रेमा रक्तिमा च अस्माकं दासस्य तुलसीदासस्य उपकंठं समीपे कंठसान्निधौ च राघवः रामः लघुत्वं च रलयोरभेदः श्रुत्यंतं वेदांतं कर्णसामीप्यं च स्वसामराज्यं ब्रह्मसाम्राज्यं राज्यं च रामावतारे कुब्जा मंथरा नाम्नी कृष्णावतारे कंसदासी कुब्जा नाम्नी कुब्जा यष्टिविशेषः कुबडीति अक्षमाला स्मरणी इंद्रियमाला च यः सकौपीनः सः कौपृथिव्यां पीनः समृद्धः आचार्याः शंकराचार्याः धर्मप्रवक्तारश्च स्वामी ऐश्वर्यवान् समर्थः शक्तश्च एतस्य लोके स्वामी समर्थइति संज्ञा प्रसिद्धा आचार्योक्तधर्मः राज्ञाप्रवर्तितश्चेत् प्रचराते नान्यथेत्यर्थः कल्पवृक्षो हि ज्ञानवर्जं सर्वं भोगजातं ददाति तादृक्कौशलीं ज्ञानप्रदानकौशलं अहो कल्पवृक्ष भवता एवं तपसा ,वपुः संशोष्य रामदासपदयुगं समाश्रितं तर्हि तत्र किमस्ति चेति पृच्छतो महाराष्ट्रजनांस्तदीयभाषया चट चट इति उत्तरयतेवेति चटइति सर्वनाम महाराष्ट्रेषु प्रसिद्धं चटचटेति पादुकाशब्दानुकरणं च सर्वांगीणां सर्वांगव्यापिनी शीतार्तिः जानकी दुःखं शीतपीडा च आनीलपाटलां हुर्मुर्जीतिलोके ॥ १ ॥

व्हायेति मनुजजनि नृजन्म रामदासता रामदासत्वं या जनिचा अस्य जन्मनः फलावगमः साफल्यं या जनि अत्र जने चाफलावगमः चाफळनामकग्रामप्राप्तिः ॥३५१॥

तत्कृतं दासबोधाख्यं ग्रंथं वक्तुमाह बोधस्येति बोधः ज्ञानं दासस्य पृष्ठं न त्यजति दासस्य यद्यप्यौदासीन्यं तत्र तथाप्येतत्पृष्ठलग्नएव दासबोधइति शब्दे दासस्य पश्चाल्लग्नो बोधः स्पष्टएव दृश्यतइति ॥ ३५२ ॥

रंगनाथनामानं भक्तं वर्णयति शूरेति सच सर्वदा कंचुकोष्णीषखड्गधनुर्बाणादि शूरवेषेन वर्तते स्म रंगनाथः कृष्णः अयंच शूरकुलं यादवकुलं तस्य भूषणं शूरकुलयोग्यभूषणयुक्तश्च विबुधैः देवैरादृतं पदं यस्य ज्ञानी यः आत्या नाम तस्य भ्राता तेनाराधितं च निगडमस्यास्तीति निगडी निगडीकृतं संस्थानं मरणं येन

यस्य मनोहरनामा हरिः सहायो नरस्य नीलांगः ॥
अरिवर्गं विजितवतो द्रुतसद्गतयेऽस्य को नु विवदेत ॥ ३५४ ॥

गंगा तत्र सरस्वती च यमुना तत्रैव चेत्यादिना
प्रोक्ता श्रीधरकीर्तनस्य मुनिभिर्निःशेषतीर्थात्मता ॥
लोकप्रत्ययगामिनी तु विहिता सा तेन धन्यात्मना
नैके यत्कृतकीर्तने गतिमगुर्यद्ब्रह्मरक्षोगणाः ॥ ३५५ ॥

साधोः श्रीरंगनाथस्यायतनं चरणे हरेः ॥
इति ज्ञापयितुं गंगा यतः स्रवति नित्यशः ॥ ३५६ ॥

आनंदं यदि संततं स्पृहयसे कुर्यास्त्वमेकं सखे
याहि श्रीरघुनाथपादयुगलीमन्यद् वृथा मा कृथाः ॥
यामासाद्य समूर्तिमांस्त्रयमयं वर्तत्यहो सर्वदे-
त्येवं दर्शयति स्फुटं न हि जनं किं ब्रह्मनालंबनम् ॥ ३५७ ॥

निगडी नामा ग्रामस्तत्र संस्थानं यस्य को ब्रह्मा विर्गरूडस्तयोर्नाथः कवीनां ज्ञानिनां नाथश्च ॥ ३५३ ॥

यस्येति मनोहरनामा श्यामलः हरिः यस्य सहायः जितकामादिरिपोस्तस्य द्रुतं सद्गतिर्नस्यादित्यत्र को विवादं कुर्यात् नकोऽपीति यस्य रंगनाथस्य मनोहरसंज्ञकः नीलः हरिरश्वः सहायआसीत् तेन भाग्यनगरात् यामचतुष्टयेन वटग्रामं आगच्छतः मध्ये चौरैर्निरुद्धस्तान् जित्वा शीघ्रमागच्छदिति रंगनाथः निगडीग्रामान्निर्गत्य केशवस्वामिनो दर्शनार्थं भाग्यनगरं गच्छन् मध्ये वटग्रामे वसतिं चकार तत्र जयरामस्वामिनाभ्यर्थितं भवंतस्तु दूरं गच्छंति श्रीगुरुचरणानां पुण्यतिथौ कीर्तनार्थं आगमनं भवितव्यं तदवश्यमित्यंगीकृत्य गतस्तत्र तु कीर्तनसमारंभवशात् पुण्यतिथिदिनस्मरणं नासीत् तत्र दिने यदा संध्योपासने देशकालसंकीर्तनं कृतं तदा स्मरणं जातं अथ तदात्व एव निर्गत्य यामचतुष्टयेन वटग्राममागतइत्याख्यायिकामाचक्षते ॥ ३५४ ॥

गंगेति यत्कृतहरिकीर्तने ब्रह्मराक्षसाः गतिमाप्नुवंतिस्मेति प्रसिद्धं ॥ ३५५ ॥

साधोरिति यस्य समाध्याख्यापतनात् भागीरथी स्रवतीति कथयंति तद्युक्तं एतस्य हरेः पदएव आयतनं तत्र सास्त्येवेति यदाचायं शिवाजीराजेनाहूतो मार्गेऽश्वेना गच्छन्नभूत् तदा निगडीग्रामेऽश्वपदं प्रवाहजले निमग्नं तत्कशया ताडितोऽपि नोद्धृतवान् तदा चायमवरुह्याह अत्रैवास्माकमायतनमिति ततः पदमुद्धृतमिति हरेरश्वस्य पदे ॥ ३५६ ॥

आनंदमूर्तिं वर्णयति रघुनाथपादयुगुले आनंदो मूर्तिमानास्तइति नालंबनं इतरप्रमाणानपेक्षं स्वतः प्रमाणमित्यर्थः ब्रह्मदेवः न किं दर्शयति आनंदमूर्तेर्गुरवो

भाग्याभिधाननगरे सुरदर्शनार्थं
गच्छन्यथा किमपि नर्मपरैस्तुरुष्कैः ॥
कृष्टोऽधिचूडमधिदर्शयति स्म सद्यः
सान्वर्थभावमवतात्सहि केशवोऽस्मान् ॥ ३५८ ॥

जलाशयं स्वेन पुरा प्रविश्य संहारकृत्पत्तनमेत्य सद्यः ॥
चकार शांतस्य गुरोरभीष्टं कृष्णं वितृष्णं तमहं प्रपद्ये ॥ ३५९ ॥

गद्यम् । अदूरगोपुंजं भांडीरकोपनामान्वयं वटग्रामं समासाद्य कामं सह वयस्यैः क्रीडायां स्वपृष्ठमारूढं मामवरोहणसीमामतीत्याविलंबितं लंबमानस्य प्रलंबस्य प्राणनिर्वापणेन परिश्रान्तमश्रांतं सखिभिः समं भूरिशः परिचरतोऽस्य परमेश्वरस्यैतत्सांप्रतमपि समात्यंनमसांप्रतमिति स एष इहैव तादृक् परिचर्यं एवं विचार्य तत्कामो रामः प्रतीक्षमाणोऽभून् तावत् कलावतरंतं तादृग्वटग्रामं समाश्रयंतं प्रलंबासुरसंपद्विधमनेन परिश्रमवन्तं भगवन्तं श्रीकृष्णं समालोच्य त्रेतायां दशग्रीवरूपेण द्वापरेऽपि शिशुपालरूपेण च श्रीमच्चरणद्वेषमेवार्जितवन्तं स्वमंडलीस्थं चैनं जयं 'मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः ॥ तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ' इत्यूचिवान् भगवान् पुनरप्यासुर्यामेव योन्यां न कच्चित् क्षिपतीति शंकमानस्तस्मिन् प्रसादाचिकारयिषया तं जयं पुरस्कृत्यैव निरंतरं यः परिचचार तमामकामं जयरामं दीनानुद्धरंतमनंतं सन्तं प्रति संप्रति पंतविठ्ठलकृतानंतनतयः संततमुल्लसन्तु ॥ १ ॥

रघुनाथचरणाः तत्सन्निधिमासाद्य मूर्तिमानानंदः आनंदमूर्तिरित्यर्थः आस्ते इति वनरूपं न तु निवासरूपं ब्रह्मनालं नाम ग्रामः कथयति ब्रह्मनालं वने रघुनाथायतने समीपे आनंदमूर्त्यायतनं प्रसिद्धं ॥ ३५७ ॥

केशवस्वामिनं वर्णयति भाग्येति अत्रेयमाख्यायिका ' केशवो हि पूर्वं यवनकार्यपुरुषआसीत् अथ केनचित्कारणेन विरक्तोऽभूत् तस्य कदाचिद्भाग्यनगरे देवदर्शनार्थं गच्छतः केनाचिद्यवनेन पूर्वपरिचितेन नर्मणा पश्चादेत्य तूर्णीं शिखां धृत्वा स्थितं यावत्स्वामी अग्रतो जगाम तावती शिखा वृद्धा तदद्भुतं दृष्ट्वा यवनैरपराधःक्षमापितइति ' सान्वर्थभावः केशवभावः प्रशस्ताः केशाः यस्य स केशवः केशाद्वोऽन्यतरस्यामिति व्याकरणसूत्रं ॥ ३५८ ॥

त्रिलोकीसाम्राज्यं तृणमिव यदग्रे स्फुरति तत्
पदं यत्संबंधात्परमनुभवंत्यत्र विबुधाः ॥
न यत्र स्थेमानं कलयति कदाचिन्मदलवः
स कोऽप्यस्मिँल्लोके गुरुरमृतराजो विजयते ॥ ३६० ॥
यन्नूनं समजीजनत्सुमधुरं सारस्वतो मां रसः
श्लाघंते स्पृहयंति हंत विबुधा मामेव नैनं क्वचित् ॥

कृष्णाप्पानामानं जयरामस्वामिगुरुं वर्णयति । जलाशयमिति अत्रैवऽमाख्यायिका ' महादेवगिरिशिखरे शांतो नाम जंगमः सिद्ध आसीत् तच्छिष्यः कृष्णाप्पा शांतेन स्वदेहावसानसमये उक्तं मया काश्यां ऋणं कृतमस्ति तदिदानींनिर्याप्य मयि जीवति मे ऋगपत्रमानेतव्यमिति तदानीं कृष्णाप्पा महाप्रसाद इत्युक्त्वा तत्रत्यजलाशये द्रविणं गृहीत्वा निमज्ज्य काश्यां मणिकर्णिकाघट्टे उन्मग्नः । अथ ऋणनिर्यातनं कृत्वा पत्रं गृहीत्वा तदात्वएव पुनस्तेनैव पथाऽगतइति ' संहारकृत् शिवः स च कृष्णः कृष्णएव यथा कृष्णो जलाशयं समुद्रं प्रविश्य संहारकर्तुर्यमस्य पत्तनं गत्वा गुरोः सांदीपनेः अभीष्टं मृतपुत्रानयनरूपं चकारेति ॥ ३५९ ॥

(गद्यव्याख्या) पुरा श्री कृष्णो रामादिभिः सह वृंदावने भांडीरवटाधः क्रीडन्नभूत् तदा प्रलंबासुरः शिशुरूपेण तत्र प्रविश्य क्रीडायां रामं स्वपृष्ठमारूढं जिघांसया दूरमनैषीत् तज्ज्ञात्वा बलभद्रेण स हतः तच्छ्रमश्रांतं रामं श्रीकृष्णः परिचचार तद्बलरामो न समीचीनमिति मत्वा क्वचिदपि स्वयमेवं चिरं कृष्णः परिचर्यइति कलौ कृष्णरूपेणावतरन् रामः परिचचारेव जयनशापदग्धेन त्रेताद्वापारयोरावणशिशुपालरूपेण हरिद्वेषएव कृतः तेनानिष्टं प्रसजेतेति स्वमंडलस्थं तं जयं पुरस्कृत्य परिचचारेव वटग्रामः बहुशिफासंकुलत्वेन एकोऽपि सन्ननेकवटप्रायत्वेनासीदिति ग्रामव्यपदेशः अन्यत्र वडगांवइति अदूरे गोपुंजोस्म अन्यत्र गोपुंजनामको ग्रामो यत्समीपेऽस्ति भांडीरकेत्युपनाम्नः आश्रयभूतं भांडिरकामिति उपनामस्यतत्कुलस्याश्रयभूतं वटग्रामे एतदुपनामकमेकं कुलं चिरं वर्तते प्रलंबस्य असुरसंपत् घातुकत्वकौशल्यं प्रलंबा महती असुरसंपतिश्च निधमनं नाशः जयं पुरस्कृत्य वर्तमानो रामो जयरामो भवतीति ॥ २ ॥

अमृतराजाख्यं भक्तं वर्णयति त्रिलोकीति अमृतसंबंधाद्विबुधाः देवाः स्वर्गसाम्राज्यमनुभवंति किं च तदमृतं मादकं अतएव तुच्छं अयं तु अमृतराजः सत्संबंधाद्विबुधाः संतः तत्पदं ब्रह्मपदमनुभवंति यदग्रे त्रिलोकीराज्यं तृणवद्भाति किं च यत्र मदलवोऽपि नास्तीति अमीच मम गुरोःपरात्परगुरुगुरवः॥ ३६० ॥

यन्नूनमिति अहं सारस्वतात् सामुद्राद्रसाज्जलादुत्पन्नं तन्मामेव विबुधा आद्रियंते न तु मम जनकमित्ययुक्तमिति मत्वेतःपरं सारस्वतं रसमेव यथामदधिकं श्लाघतां तथा

तत्कुर्यामहमीदृशं मदधिकं सारस्वतं तं रसं
श्लाघंतां स्पृहयंत्विलीह धरणौ तेनामृतेनोपितम् ॥ ३६१ ॥
शिरःस्थितामृतकरो ज्ञानानंददयास्पदम् ॥
समर्पितशिवानंदः सिद्धराजो विराजते ॥ ३६२ ॥
शिवेन शिरसा श्लाघ्यः कलानाथस्तमोऽपहः ॥
जगदाल्हादयन्नास्ते रामश्चंद्र इवापरः ॥ ३६३ ॥
द्विश्रुतित्वं द्विदृक्त्वं च तथैवैकरसज्ञता ॥
नृमात्रे सहजं त्वेतद्रामेऽकृत्रिममप्यदः ॥ ३६४ ॥
पुरैव सिद्धेशकृतप्रसादो घनोदयायस्य महाप्रकाशः ॥
यज्ज्योत्स्नयांध्यं श्रुतिपद्धतिस्थं नष्टं स रामो विधुरद्वितीयः ॥३६५॥
शेषो लक्ष्मण एव वै मदनुजो भूत्वाऽप्यशेषात्मना
निर्व्याजं यदसेवतास्मि कृपणो स्वर्णस्य निर्यातने ॥

कुर्यामिति किमत्रावतीर्णामिति यस्य सारस्वतः वाग्भवो रसः कवितारूपः अमृतादप्यतिस्वादुरिति तात्पर्यं ॥ ३६१

सिद्धराजं वर्णयति शिरइति शिरसि स्थितः अमृतकरश्चंद्रो यस्य आनंदः दया च तदास्पदं समर्पितः शिवयोरुमामहेश्वरयोःआनंदो येन सिद्धराजो गणेशः अन्यत्र अमृतराजेन यस्य शिरसि हस्तः कृतः तच्छिष्यइति अमृतराजेनैवं बहु शिक्षयित्वा स्वगुरूणां ज्ञानानंदाख्यानां निकटे काश्यां प्रेषितः तत्र तेभ्योऽपि दया संपादिताऽभवत् शिवाख्यः करवीराधिपः राजा छत्रीभूतः तस्मै आनंददः एते च मम गुरोः परात्परगुरवः ॥ ३६२ ॥

श्रीरामचंद्रपंडितं स्तौति शिरसेति चंद्रपक्षे स्पष्टं गुरुपुत्रत्वाद्यः शिवाख्येन राज्ञा शिरसा वंद्यः चतुःषष्टिकलानिपुणःकिमेतावदेव न तमसः अज्ञानस्य नाशकः ज्ञानदातेत्यर्थः ॥ ३६३ ॥

द्विश्रुतित्वमिति ऋग्यजूरूपवेदद्वयघनांताध्ययनवान् ज्ञानं शास्त्रीयं विज्ञानमनुभवइति दृग्द्वयवान् शाब्दे परे च निष्णातमित्यर्थः एकरसं ब्रह्मरसं अनुभवंति सदा अन्यत् स्पष्टं ॥ ३६४ ॥

पुरैवेति चंद्रविलक्षणत्वमाह चंद्रस्य आदौ शापो दत्तः पश्चात्सिद्धेशेन गणेशेनानुगृहीतः अयंतु पूर्वमेव चंद्रो हि घनपटले हतप्रभः अयं तु घनेन अष्टविकृति मध्ये चरमो विकारस्तेन प्रकाशमानः चंद्रस्य ज्योत्स्नया नेत्रगतं तमो नश्यति एतत्कृतज्योत्स्नया एतन्नामकेन प्रातिशाख्यसूत्रैकजातीयसंदर्भरूपग्रंथेन श्रुतिपद्धतिस्थं वेदपाठविषयकमांध्यं कर्णपद्धतिस्थं च एते च मम परमगुरवः एतैः श्रीचरणैः स्वप्ने आगत्य मम गुरुचरणाः श्रीरामोपासनाबीजदानेन कृतार्थीकृताइति ॥ ३६५ ॥

तत्कार्यं स्वयमेतदीयचरितं श्रीराम इत्यादृतः
कृत्वा राममिमं स्वयं तदनुजो भूत्वाऽनुकूलोऽभवत् ॥ २६६ ॥
ध्यानेनात्मगतं स्त्रीत्वं गतं बाह्यं विरागतः ॥
लयेन माधवीभूता राधा तन्न तयोर्भिदा ॥ २६७ ॥
वक्तुं वयं न शक्ताः स्मो राधायाः प्रेमगौरवम् ॥
यदस्या माधवाद्भेदो न खचाकारं विनेतरः ॥ २६८ ॥
सा रंगामायमना राधा स्त्रीशतविधा प्रतीपा चेत् ॥
स्यादेवानर्थकृते केशव इति लालसो बभूवास्याम् ॥ २६९ ॥
श्रीकंठादपि पद्मजादपि महालक्ष्म्या अपि ज्येष्ठतो-
ऽपीष्टोऽभून्न हि केवलं भगवतः किंत्वात्मनोऽप्युद्धवः ॥
तद्धेतुः प्रतिभाति मेऽस्य कृतिनः कालत्रयाबाधिता
देवेऽपि व्यभिचारिणी क्वचिदहो यैकांतसत्त्वात्मता ॥ २७० ॥

बलरामं वर्णयति शेषइति रामेण चिंतितं अयं शेषोऽप्यशेषात्मना मां सेवते स्म तस्य ऋणापकरणे नान्यउपायः तादृशाकरणमंतरेणेति कृष्णावतारे तं रामं कृत्वा स्वयमनुजो भूत्वा तं सेवतेस्मेति ॥ २६६ ॥

राधां वर्णयति ध्यानेनेति स्वाभाविकं स्त्रीत्वं ध्यानदार्ढ्येन बाह्यं लज्जादिकं वैराग्येण गतं स्त्रीत्वे गते राधइति जातं यश्च राधः समाधवएवेति तयोर्भेदो न वैशाखे माधवो राधइत्युभयोरेकार्थत्वेनाभेदात् ॥ २६७ ॥

वक्तुमिति स्पष्टार्थम् ॥ २६८ ॥

सारंगेति सा राधा रंगे सुरतरंगे अमायं निष्कपटं मनो यस्याः ननु अनतिलावण्यगुणा उत्तमनायकलाभे तादृशी भवेदेवेति चेन्न स्त्रीशतविधा स्त्रीणां शतवत् विधा प्रकारो यस्याः एकतः स्त्रीशतं एकतइयमिति लावण्यगुणाधिका इयं प्रतीपा प्रतिकूला चेत् मम अनर्थाय स्यात् एतस्यविपरीत्ये 'धावितशस्त्री धारा नाम यमागारं सा' इति जायते तत्र धाविता सद्यःशाणोल्लीढा या शस्त्री खड्गस्तस्या धारा नाम किं यमस्य अगारं गृहं सा मरणाय स्यादिति भावः स्वयं तां प्रति विपरीतश्चेत् वशाकइति भवति नाम वशएव वशाकः अनर्थाय न भवति प्रत्युत हितायैवेति ॥ २६९ ॥

उद्धवं वर्णयति श्रीकंठादपीति सत्त्वात्मकस्य हरेः सत्त्वशीलता प्रिया शिवे तामसत्वं ब्रह्मणि राजसत्वं स्त्रियां चंचलत्वाद्राजसत्वं बले उभयविधत्वं आत्मनोऽपि सत्त्वात्मता क्वचिद्व्यभिचरत्येव परमस्य क्वचिदपि नव्यभिचारितेति प्रियत्वे हेतुः ॥ २७० ॥

यस्योपसर्गः क्व च नास्ति लोके सदा समाकारतया स्थितो यः ॥
स उद्धवो माधव एव साक्षादित्थं कथं प्राज्ञजनैर्न वाच्यम् ॥ ३७१ ॥

अर्जुनेन विभेद्यंते दुर्भेदा अपि भूभृतः ॥
कृपामाहात्म्यमेतद्धि मन्ये भगवतो हरेः ॥ ३७२ ॥

देवाधीनमिहानूनं नूनमर्जुनवैभवम् ॥
देव एवात एवायं श्रितो वासवसूनुना ॥ ३७३ ॥

समये शरवर्षाणां श्रीदेवस्य प्रसादतः ॥
हरितत्त्वस्य लाभोऽभूदर्जुनस्येति सांप्रतम् ॥ ३७४ ॥

स्वयं सहजतेजस्वी यद्यप्येष धनंजयः
तथाप्यसौ स्फुरद्धेतिरहिप्रियसहायतः ॥ ३७५ ॥

सर्वपार्थप्रियतमा नीलोत्पलदलप्रभा ॥
भिद्यते कृष्णतः कृष्णा स्त्र्याकारेणैव नान्यथा ॥ ३७६ ॥

स्वधर्मपरिनिष्ठया य इह तीव्रया सादरं
पुमानभियुनक्ति चेद्धृतनरानुकंपे हरौ ॥
सुदर्शनकरो हरिर्भवति तं प्रति श्रीपति-
र्निदर्शनकृतेऽत्र नः स्मरणमेति देवव्रतः ॥ ३७७ ॥

अनेकधातुश्रेष्ठस्य गांगेयस्य लयो विना ॥
धनंजयप्रसंगेन दिव्यभावोत्तरः कुतः ॥ ३७८ ॥

यस्येति उपसर्गः उपद्रवः उद्धवइत्यस्य उपसर्गः उत् नास्ति चेत् धवः इति जातं सः समाकारतया माकारयुक्तश्चेन्माधवएव भवति ॥ ३७१ ॥

अर्जुनं वर्णयति अर्जुनेति अर्जुनः पार्थस्तृणं च भूभृतः राजानः पर्वताश्च ॥ ३७२ ॥

देवाधीनमिति देवः कृष्णः पर्जन्यश्च अर्जुनः पार्थस्तृणं च ॥ ३७३ ॥

समयेति शराः बाणाः उदकानि च श्रीदेवः कृष्णः पर्जन्यश्च हरितत्त्वं भगवतस्तत्वं गीताभिरुपदिष्टं हरितवर्णत्वं च अर्जुनः पार्थस्तृणं च ॥ ३७४ ॥

स्वयमिति धनंजयः पार्थः स्फुरंतो हेतयः आयुधानि यस्य ज्वालाश्च अहिप्रियः शेषशायी कृष्णः सर्पप्रियो वायुश्च ॥ ३७५ ॥

सर्वेति स्त्रियाकारष्टाप् ॥ ३७६ ॥

भीष्मं वर्णयति स्वधर्मेति नरः अर्जुनः मानवश्च सुदर्शनं चक्रं सुष्ठु दर्शनं च यद्यपि भगवतासमरसीम्नि पतितं रथचक्रं धृतं सुदर्शनं तथापि तदपि तत्प्रायमेवेति ॥ ३७७ ॥

अनेकेति अनेकधा श्रेष्ठस्य गांगेयस्य भीष्मस्य लयो मृत्युर्धनंजयस्य पार्थस्य

यः कृष्णेन महाप्रसादसुमुखीभूतेन तूत्पादितः
कृष्णेनेव सहोषितो भगवता कृष्णेन चांते स्मृतः ॥
तत्त्वं कृष्णसखेन यस्य गदितं यः कृष्णकृष्णस्तुवः
सोऽयं कृष्णमयः कथं न विदुरो वाचः सतां संसदि ॥ ३७९ ॥
न भुंक्ते स्वाद्वन्नं विविधमपि मंदस्य भगवा-
नथो भुंक्ते फल्ग्वप्युदितरुचि तज्ज्ञान्युपहृतम् ॥
खलप्रत्तं यत्नाद्विषमिव परित्यज्य विदुरो-
टजे गत्वाऽभुंक्त स्वयमहह जोन्नालकणिकाः ॥ ३८० ॥
लोकेषु हंहो मम सोदरं तत्पद्मं बभूव श्रिय आसनाय ॥
तत्पुंडरीकेण तदीर्ष्यया किं स्थानं रमेशो गमितः किमेषः ॥ ३८१ ॥
भित्तिं कापि वदत्यभित्तिमपरेत्येवं द्विधाऽपि श्रुति-
स्तत्रादर्शि तु भित्त्यभाव उचितः श्रीशंकरार्यैर्विभिः ॥
भित्तिः सर्वत ईक्षणे पुनरिति श्रीमध्वपादैरिहा-
द्ये साकाशजता तु हेतुरपरे सा मध्यगेहोत्थता ॥ ३८२ ॥

प्रसंगेन दिव्यभावो वसुता उत्तरा यत्र अनेकेषु धातुषु श्रेष्ठं गांगेयं हेम तस्य लयो विलीनता अग्निप्रसंगेन दिव्यभावो निर्मलता उत्तरा यत्र ॥ ३७८ ॥

विदुरं वर्णयति यइति कृष्णेन वेदव्यासेन कृष्णेन अर्जुनेन कृष्णसखेन उद्धवेन मैत्रेयेण च स हि व्याससखः सतीर्थ्यत्वात् भगवता निर्वाणसमये यस्य स्मरणं कृतं ॥ ३७९ ॥

न भुंक्तइति जोन्नालाः यावनालाः ॥ ३८०

पुंडरीकं वर्णयति पुंडरीकः सितांभोजं च तेन विचारः कृतः मम सहोदरं पद्मं श्रियआसनाय बभूव श्रीस्तत्रास्ते इतीर्ष्यया श्रियः पतिः स्थानं गमितइव ॥ ३८१ ॥

भित्तिमिति कापि श्रुतिर्जीवेशयोर्भेदमाह कौशिकोपनिषदिति ‘ भिन्नो चिंत्यः परमोजीवसंघातपूर्णः परो जीवसंघो ह्यपूर्णः यतस्त्वसौ नित्यमुक्तोऽयं च बद्धस्तस्मान्मोक्षं तत एवाभिवांछे ’ दित्यादिका अपरा अभित्तिमैक्यमाह तत्रैव ‘ स्वविभ्रमापोहि परः स्वतंत्रस्तस्मादसौ मोच्यते नित्यमुक्तः सएव जीवोऽविद्ययाबंधमेति तन्नाशे तु ब्रह्मसंपद्यतेतः ’ मिथ्या भेदो ब्रह्मभावस्तु ‘सत्यस्तस्माद्विद्वान्न प्रमाद्येत सत्यादिति’ तत्राभेदं श्रीशंकराचार्यउचितत्वेन मेनिरे श्रीमध्वाचार्यास्तु भेदं उचितत्वेन मेनिरे अत्र कारणं शंकराचार्यास्तु आकाशलिंगादुत्पन्नास्तैः सर्वतईक्षिते भित्तिः क्वापि नास्तीति दृष्टं मध्वाचार्यास्तु मध्यगेहनामभट्टादुत्पन्नास्तैरादौ सर्वतईक्षितं तावत् परितो भित्तिरेवेति मध्यगेहस्थत्वात् शंकराचार्याणां पिता क्वचित् तीर्थयात्रां कर्तुं गतवान्

नित्यानिमेषचक्षुः सत्पक्षसमाश्रयेण मत्स्येंद्रः ॥
विहरति वनेकवृत्तिर्विमलयितुं सर्वतो भुवनम् ॥ ३८३ ॥
लोकोत्तरानुकंपो अनपार्थविभूतिरचितगोरक्षः ॥
मत्स्येंद्रो न विरक्तं कंकं कुरुते स्वकाक्षपातेन ॥ ३८४ ॥
भुवने विचरत्यनिशं शंखं जित्वैव सर्वशो निगमम् ॥
गोरक्षाय समददाद्धृपहितशृंगोऽत्र मत्स्येंद्रः ॥ ३८५ ॥
अथ नाथपथं तात कथं कथयितुं क्षमे ॥
मूर्त्ता यत्रोपलभ्यंते निवृत्तिज्ञानमुक्तयः ॥ ३८६ ॥
यदि ज्ञानं च मुक्तिं च लब्धुमिच्छस्ययत्नतः ॥
निःसीमप्रेमभरितो निवृत्तिं नित्यमाश्रय ॥ ३८७ ॥

पश्चात्तन्मात्रा आकाशलिंगसेवा चिरं कृता कदाचित्तस्य महोत्सवे सर्वजनेषु पश्यत्सु आकाशलिंगात्तेजो निर्गत्य तस्या मुखं प्रविष्टं तेन सा गर्भवती अभवत् अथ महाजनैस्तद्दैव कृत्यमिति मत्वा न जुगुप्सा कृता ते शंकराचार्याइति संबंधोस्थितं ॥ ३८२ ॥

मत्स्येंद्रनाथं वर्णयति नित्येति निमेषरहितज्ञानः अनिमेषनेत्रश्च सत्पक्षः साधुपक्षः सत्पतत्रश्च मत्स्येंद्रः मीनश्रेष्ठश्च वनं विपिनं जलं च भुवनं जगत् जलं च मत्स्यानां स्थित्या जलं विमलं भवति ॥ ३८३ ॥

लोकेति अतिशयितकरुणः अनपार्था अमोघा या भूतिर्भस्म तेन रचितः उत्पादितः गोरक्षो येन येन कस्यै चित् पुत्रार्थिन्यै विभूतिर्दत्ता इमां भक्षय तव पुत्रः स्यादिति तया गृहीत्वाऽनंतरं भीता सती तां उत्करे तत्याज वर्षेषु गतेषु मत्स्येंद्र आगत्य पृष्टवान् पुत्रः क्वास्ति तयोक्तं मया भस्म न भक्षितं तर्हि त्यक्तं क्व उत्करे दर्शय दर्शितं तेनाहूतं तावद्बहिर्यातः पुत्रः तं गोरक्षनाम्ना चकारेति समाख्यायिका स मत्स्येंद्रः स्वकाक्षः कटाक्षस्तस्य पातेन कं कं विरक्तं न कुरुते अपि तु यो यो मिलितस्तं तं सर्वं मत्स्येंद्रः विराटः लोके उत्तरे स्वपुत्रे कृपालुः पार्थरहिता अपार्था सा न अनपार्था तद्वती संपत्तिस्तया रचिता गवां रक्षा यस्य स्वको यः अक्षः पाशः तेन कंकं धर्मराजं विगतरक्तं न करोतिस्मेति किं ॥ ३८४ ॥

भुवनेति यथा मत्स्यावतारो हरिर्भुवने जले विचरन् शंखासुरं जित्वा वेदं गोःवाण्याः रक्षकाय ब्रह्मणे दत्तवान् तस्य च शृंगमभूत् तथायं भुवने जगति निगमं खं जित्वा मथित्वा शं सुखं गोरक्षायाददात् वादनार्थं गृहीतं शृंगं येन ॥ ३८५ ॥

नाथपथं वर्णयति नाथः आदिनाथः शिवः निवृत्तिः निवृत्तिनाथश्च ज्ञानं ज्ञानदेवश्च मुक्तिः मुक्तिनाथा च ॥ ३८६ ॥

निवृत्तिनाथं वर्णयति यदिति निवृत्तिं वैराग्यमाश्रितस्य क्रमेण ज्ञानमुक्तीभवतः

यद्विलासवशादात्मवस्तु नैव प्रकाशते ॥
अलंदीपो विनाशाय तमसस्तस्य केवलम् ॥ ३८८ ॥
सर्वथा सेवकं नामदेवं यः समुपादिशत् ॥
ब्रह्मात्मभावं विदितो गुरुः स इह खेचरः ॥ ३८९ ॥
सिषेविरे हृषीकेशं संतो नाम सहस्रशः ॥
सेवकत्वं परं नामदेव एव व्यवास्थितम् ॥ ३९० ॥
यस्यनाम्नः पराख्यातिः सदा सर्वत्र राजते ॥
स्तुत्यं ब्रवीमि लोकेऽत्र सदामोदरसंगतः ॥ ३९१ ॥
श्रीरमारमणप्रेमा यत्र स्थेमानमास्थितः ॥
अतिधन्या सतां मान्या सैव नाम जनी मता ॥ ३९२ ॥
लौकिकजनेषु साधुषु दिविषत्स्वपि समनुवर्तते यस्य ॥
उत्तमसुमनस्तासौ मालाकृत्सावताह्वयो जयति ॥ ३९३ ॥
नन्वर्पितः परस्मिन्माधवदासस्य सर्व एवार्थः ॥
अतिसारे तत्पटकान्कथमिव भगवान् स्वयं न धावयतु ॥ ३९४ ॥

निवृत्तिनाथस्याश्रये कृते तत्र ते स्यातामेवेति ॥ ३८७ ॥

ज्ञानदेवं वर्णयति । दीपस्तमसो नाशाय अलं समर्थः। अलंदी एतन्नाम ग्रामे पाति सोऽलंदीपो ज्ञानदेवस्तत्र हि तदायतनं ॥ ३८८ ॥

नामदेवगुरुं विसोबाखेचरं वर्णयति । सर्वथेति नामदेवो हि केवलं भृत्यभावं गतः श्रीपांडुरंगं सिषेवे तदा तेन खेचरानुसरणं कुर्विति संदिष्टस्तं शरणं गतस्तेन ज्ञानोपदेशेन सर्वत्रात्मभावं गमितः देवं इंद्रं खेचरो गुरुः बृहस्पतिः । खेचरोऽयं ज्ञानदेवशिष्यइति वदंति ॥ ३८९ ॥

नामदेवं वर्णयति । सिषेविरइति । अत्रैव सेवकत्वं दृष्टं सीव्यतीति सेवकः सिंदोलकः शिंपीति लोके ॥ ३९० ॥

यस्येति यः सर्वत्र गीयते सदामोदरसंगतः यद्वा सदा मोदरसं ब्रह्मानंदरसं गतः दामेति नामदेवस्य पिता तदुदरात्संगतश्च ॥ ३९१ ॥

जनीं वर्णयति । श्रीति यत्र जन्यां जन्मनि भगवति प्रेमा सा नाम जनी अतिधन्या नाम्नः नामदेवस्य जनीनामिका दासी च ॥ ३९२ ॥

सावताख्यं वर्णयति । लौकिकेति उत्तमपुण्ययुक्तता जने प्रेत्य देवेषु उत्तमदेवता साधुषु उत्तमसाधुता च ॥ ३९३ ॥

माधवदासं वर्णयति नन्विति येन यो योऽर्थः संपादितः स सर्वोपि भगवतेऽर्पितः येन गृहीतस्तेनैव तस्य सर्वं कार्यं करणीयं अतएव हरिस्तस्यातिसारे पटकान् स्वयं धावयति स्म। युक्तं चैतत् माधवदासपदयोरर्थः सर्वः परस्मिन्नन्यपदार्थेऽर्पितः न तत्

विध्वस्ततमःस्तोमो जयति द्विजराज एष आत्रेयः ॥
श्रितसज्जनैकनाथो जनार्दनो यस्य वंशेऽभूत् ॥ ३९५ ॥
युक्तायुक्ततया किमप्यगणयन् जागर्त्यहो सर्वथा
सत्संकल्पसमर्थनाय भगवान् विन्यस्तपर्यस्तिकः ॥
यन्नाथस्य जनार्दनो घनरसं यच्छत्विति ध्यातवान्
दत्तस्तावदिहोदवीवधमपि स्कंधे दधार स्वयम् ॥ ३९६ ॥
याच्यं चेद्विदुषा हरेर्भगवतो भक्ताय याच्यं यतो
नित्यं ते ददते दयार्द्रहृदयाः स्वाम्येकनाथो यथा ॥
प्रादादुत्तमपूरणं विपुलशो गाऊबानाम्नः शिशो-
र्जिह्वायै निवसन्निहाप्यथ परब्रह्मप्रपन्नोऽपि सन् ॥ ३९७ ॥

पुरुषवदुत्तरपदे राजाश्ववत् नाव्ययीभाववत् पूर्वपदे उपकुंभादौ अन्यपदार्थेऽर्थ्यमाणत्वाद्बहुव्रीहिरियं तेन माधवः दासोयस्येत्येवार्थः न तु माधवस्यदासइति तत्पुरुषः दासभूतो माधवस्तत्करोतीति युक्तमेव ॥ ३९४ ॥

दत्तपथं वर्णयति । विध्वस्तेति तमः अज्ञानं तमिस्रं द्विजराजो विप्रेंद्रश्चंद्रश्च आत्रेयः अत्रिकुलोत्पन्नो दत्तश्चंद्रोऽपि तादृशएव वंशो द्विधा विद्यया जन्मना च यस्य विद्यावंशे जनार्दनः जनार्दनस्वामी अभूत् स कथं श्रितः सज्जनः एकनाथः एतन्नामा शिष्यः यस्य चंद्रस्य जन्मवंशे जनार्दनः कृष्णोऽभवत् श्रिता ये सज्जनास्तेषामेकनाथः ॥ ३९५ ॥

एकनाथस्वामिनं वर्णयति । युक्तेति भगवान् साद्भिः कृतं संकल्पं सर्वथा समर्थयितुं जागर्ति यन्नाथं ज्ञानपात्रं दृष्ट्वा दत्तचरणैरुक्तं अस्य जनार्दनः घनरसं यच्छतु तदा भगवता मनस्यानीतं मया घनरसो ब्रह्मरसो देयः उदकदानं च कर्तव्यं तर्ह्येव दत्तवाक्यस्य सर्वथा समर्थनं स्यान्नान्यथेति एकेन जनार्दनरूपेण ब्रह्मरसं दत्वा अपरेण उदकं दातुं स्कंधे वीवधं बभारेवेति । उद-वीवधं 'पाणकावड ' इतिदेशभाषायां पर्यस्तिका पर्यंकः ॥ ३९६ ॥

याच्यमिति यदि याच्यं तर्हिभगवद्भक्तायैव याच्यं यतस्ते अविनाशि ददते यतः एकनाथः गाऊबानाम्नः शिशोर्जिह्वायै इह वसन्नपि ब्रह्मभागपि सन् उत्तमपूरणं ददौ । अत्रेयमाख्यायिका । प्रतिष्ठाननगरे काचित्पाकक्रियया स्वनिर्वाहकर्त्री योषिदासीत् तस्याः कश्चिच्छिशुरुन्मत्तइवाभवत् कदाचित्तया स्वेन साकं पाकार्थं यत्र गतवती तत्र स नीतः तेन च तत्र पूरणं भक्षितं तदाप्रभृति स पूरणं विना नैवाभुंक्त माता त्रस्ता सती नाथसमीपे गत्वा प्रार्थितवती महाराजायं पूरणं विना न भुंक्ते मया प्रत्यहं पूरणं कुतआनेतव्यं श्रीमद्गृहे श्रीहरिनैवेद्यार्थं तदस्तीत्ययं भगवत्प्रसादं भुंजानोऽत्रे निवसतु । नाथैरुक्तं तथेति तस्मै प्रत्यहं उत्तमपूरणं दातव्यं

श्रीविश्वंभरलीलायोगो मुक्तेशभूतिमातनुते ॥
या हि महाभारतरणसमुद्यमे प्राकृतान्सतृष्णयति ॥ ३९८ ॥
भाषंते विबुधाः सुधा मधुरिमोद्गारं विधत्ते सुधा
स्फारं मुग्धकुमारवागिति पुनः सा नैव किंचिद्वचयम् ॥
आपन्नाऽस्ति चिराय यत्पुनरियं मुक्ताऽथ मुक्ताधिपा-
दुक्ता पर्वचतुष्टयी मधुरतां तस्याः किमु ब्रूमहे ॥ ३९९ ॥
या नाथेन समर्पिता भगवते पीयूषबुद्ध्या सिता
या चास्वाद्य मुखामृतेन हरिणा संभाव्य दत्ता पुनः ॥
न्यस्ता साऽमृतपाणिनास्य रुदतो वक्त्रेऽग वत्सेदृशं
ब्रूहीति प्रभुणैव तस्य बत वाक् स्वाद्वीति किं ब्रूमहे ॥ ४०० ॥

सतद्भुत्का सर्वदा भृंगवद्गुंजारवं कुर्वन्नासीत् तेन तस्य गाऊबाइति नामाभवत् अथ नाथैर्देहावसान-समये शिष्यान् प्रत्युक्तं मया भावार्थरामायणं सुंदरकांडांतं कृतं अवशिष्टं कः पूरयिष्यतीति शिष्यैरुक्तं नास्माकं तादृशी शक्तिः अथ गाऊबामाहूयोक्तं त्वमवशिष्टं पूरयेति तेनोक्तं महाप्रसादइति तथा चक्रे चेति तथा च जीवदशायां उत्तमपूरणं दत्तं पश्चादपि उत्तमस्य रामचरितस्य उत्तमं रामचरितभिरुक्तिः पूरणं दत्तमित्यविनश्वरं दानं भगवद्भक्तानां ॥ ३९७ ॥

मुक्तेश्वरं वर्णयति । श्रीति श्रीविश्वंभरस्य हरेर्लीलासंबंधः मुक्तेशस्य जीवन्मुक्तस्य भूतिं संपत्तिं शमदमादिकां तनुते या विभूतिः प्राकृतान् जनान् महाभारस्य संसाररूपस्य तरणप्रसंगेन सतृष्णान् करोति तद्विषयोत्कंठ्यं भवतीति यावत् । यथा नाथस्य लीला नाम कन्या विश्वंभरभट्टाय दत्तासीत् ताभ्यां मुक्तेश्वरनामा पुत्रोऽभूत् भूतिर्जन्म तेन तु भारतपर्वचतुष्टयी महाराष्ट्रभाषया व्याकृता प्राकृतग्रंथवाचकान्प्रति तस्य भूतिः महाभारतरणसमुद्यमे उद्योगपर्वणि सतृष्णयति पर्वचतुष्टयीवदिदं व्याख्यातमभविष्यच्चेत्समीचीनमभविष्यदिति ॥ ३९८ ॥

मुक्तेश्वरस्य पर्वचतुष्टयीव्याख्यानरूपं काव्यमतिमधुरमभूदित्यत्र हेतुमाह । द्वाभ्यां भाषंतइति । मुक्तेश्वरो जन्मप्रभृति मूकआसीत् यदा च नाथप्रसादेनोक्तवान् तदैव पर्वचतुष्टयं व्याख्यातं तन्मधुरतरमभूदिति युक्तं बालभाषणं तावदमृतप्रायं तद्यस्य ईषदपि न व्ययमागतं अतश्चिरसंचितत्वेन माधुर्यभारसंभृतं ॥ ३९९ ॥

यानाथेति कदाचिन्नाथचरणानां भगवत्पूजासमये रुदंतं मुक्तेश्वरं कटौ गृहीत्वाश्रीकृष्णः स्थितोऽभूत् नाथेन भगवते खंडशर्करानैवेद्यमुपहृत्य अमृतभावनया निवेदिता भगवता च तां स्वीकृत्य स्वमुखामृतेन भावयित्वा प्रसादीकृता अरे कृष्ण शिशुरयं रोदिति तदस्माएतां चारयेति निवेदितां तां श्रीकृष्णः स्वेन अमृतपाणिना

मुक्तस्थितेः पर्वचतुष्कमार्या वदंति सर्वत्र सलोकतादि ॥
तामन्यथाऽसौ कथमंग कुर्याद्गुर्या न संतः सदतिक्रमस्य ॥ ४०१ ॥
पूर्वं सर्वमयाचमेव हरिणा सख्या सुवर्णेन म-
य्यत्याज्येऽथ कृते सुवर्णमदरां जातं किमेतावता ॥
चेद्दास्येऽहमसौ सुवर्णरहितोऽप्यर्थ्यर्थितं तत्पुन-
र्दानं स्यादिति किं तथावतरता धान्यं सुदाम्नार्पितम् ॥ ४०२ ॥
अभंगकीर्तिग्रामेण तुकारामेण साधुना ॥
अजो दशरथो नित्यं परमानंदसंभृतः ॥ ४०३ ॥
शृण्वन्वचांसि स जघन्यतुकोदितान्य-
व्यक्तान्यपि प्रमुदमेति पिता प्रकामम् ॥
तैः शास्त्रगर्भभरितैः किमभंगरूपै-
र्युक्तं द्रवीभवति विश्वगुरुस्तदेषः ॥ ४०४ ॥
रक्षार्थान्यजनार्पितैर्ननु धनैर्नित्यं द्विजानां यदि
स्यात्संतर्पणमेव वित्तपतिना गण्यो व्ययो न क्वचित् ॥
तद्योगेन हरेः प्रसाद उदितः प्राज्ञप्रकृष्टो यत-
श्चात्मप्रत्यय उद्भवेदिह तुकारामं स्मरामो वयम् ॥ ४०५ ॥

यन्मुखे न्यस्येदृशं मधुरं ब्रूहिइति वरमदात् तस्य वाक्स्वाद्वीति किं वक्तव्यं ॥ ४०० ॥

मुक्तेश्वरेण पर्वचतुष्टयमेव कुतो व्याख्यातमित्यत्र हेतुमाह । मुक्तेति मुक्तस्थितेः सलोकता सरूपता समीपता सायुज्यतेति पर्वचतुष्कमेवोक्तं आर्यैःतदन्यथा कथं कार्यमिति मम कृतेः पर्वचतुष्टयमेव विषयः यतः महदतिक्रमो न युक्तइति ॥ ४०१ ॥

दामाजीपंतं वर्णयति । पूर्वेति सुवर्णरहितो यः सुदामा सएव दामा तादृशः अवतीर्य यत्सकाशि तदत्तं ॥ ४०२ ॥

तुकारामं वर्णयति अभंगेति अभंगरूपा याः कीर्तयस्तद्ग्रामेण दश रथाः देहाः यस्य दशावताराः अजः विष्णुः अजः दशरथश्च साधुना तुका अपत्यरूपेण रामेण अभंगा याः कीर्तयस्तद्ग्रामेण तुक् अपत्यं ॥ ४०३ ॥

शृण्वन्निति तुकारामस्य अभंगरूपाणि वचांसि हरयेऽतिप्रियाणीति युक्तं प्राकृतः पिता जघन्येन चरमेण तुका अपत्येन उक्तानि अव्यक्तान्यपि शृण्वंस्तुष्टो भवति तानि चेच्छास्त्रप्रमेयभरितानि निर्बाधानि च तर्हि तुष्येदिति किं वाच्यं अयं विश्वगुरोः जघन्यं चतुर्थं शूद्ररूपमपत्यं स तादृशं वदति तस्माद्द्रवीभावो युक्तः ॥ ४०४ ॥

रक्षेति अत्रेयमाख्यायिका । कश्चित् कृषीवलस्तुकारामं प्राह रे मम प्रवासउपस्थितः क्षेत्रं च पक्कसस्यं तदिह त्वमत्र पक्षिणो रक्ष मम पुनरागमपर्यंतं तथेत्यंगीचकार । गते क्षेत्रस्वामिनि तुकारामस्तत्क्षेत्रमंडपिकायामुपविश्य भगवन्नामसंकीर्तनपरोऽभूत् प्रात-

गोरससेवी साधुव्रजसोषकरो यशोदयायुक्तः ॥
आनंदसुतो हरिणा सम इत्याकारतः परं भेदः ॥ ४०६ ॥
अरणिसमुद्भूतो यो गोरससेवी परिस्फुरत्कांतिः ॥
आनंदसुतोऽग्निसमो भेदस्तु परं नरानरत्वेन ॥ ४०७ ॥
प्रकटितचारुहरिगुणं मंजुमधुरवचसमरणिसंभूतम् ॥
तं कृष्णलेखकंठं शुकमहमानंदनंदनं वंदे ॥ ४०८ ॥

स्तावत् पक्षिणो मिलिताः तदानीमनेन विचारितं क्षेत्रिणादिष्टं पक्षिणो रक्षेति यद्यहमेतान् दूरमुत्सारयामि तदेतद्रक्षणं कथं स्यादिति तदेते कामं भक्षयंतु तैर्भक्षितु मारब्धेऽधिकाधिकाः पक्षिणः संभवंति स्मेति एवं क्षेत्रिण आगमनपर्यंतं सर्वं क्षेत्रं निःसस्यमभूत् सच तद् दृष्ट्वा तुकाराममूचे अरे मंद किमिदं कृतं । अनेनोक्तं यत्त्वयोपदिष्टं पक्षिरक्षणं तन्मया कृतं ॥ हूँ हूँ अतिधूर्तोऽसि तच्चल ग्रामाधीशसकाशमिति प्रसह्य नीतः ग्रामाधीशेन पृष्टं अरे किमिदं आचरितं । तुकारामेणोक्तं यथैतेनादिष्टं तथाचरितमिति । तद्वैर्त्यमालोच्यायं दंडनीयइत्याह सः । तु० अहो मया सस्यं नाशितमित्युच्यते आस्तां नामेदं यद्यहमेतादृक् नाकरिष्यं तर्हि कति धान्यमभविष्यदिति ब्रूहि कृ० एतावत् मम धान्यराशिर्भवितव्यः । तु०मर्दय तावद्यदि एतन्न्यूनस्तर्हि दंडमर्हामि अथ धान्यं मर्दितं तावत् उक्तमानद्विगुणो धान्यराशिरभूत् । तद्दृष्ट्वा ग्रामाधीशो विस्मयमापन्नः अस्ति महानयं सिद्धइति कृषीवलमुवाच अरे यावत्त्वयोक्तं तावद्धान्यं गृहीत्वा शेषमेतस्मै प्रयच्छ । ततस्तद्धान्यं तुकारामाय दातुं प्रवृत्तः तेनोक्तं नानेन मम किंचित्कार्यं मया श्रीपांडुरंगमंदिरमारब्धं तदेतद्व्ययेन समापनीयमिति अथ ग्रामाधीशेन हरेः प्रासादस्तद्धान्यव्ययेन निर्मितोऽभूदिति । द्विजाः ब्राह्मणाः पक्षिणश्च यतः प्रज्ञेषु विद्वत्सु प्रक्लृप्तः प्रसिद्धआत्मप्रत्ययः स्वरूपसाक्षात्कारः भवेत् सहरेः प्रसादः अनुग्रहः प्रज्ञादिशब्देभ्यः प्रक्लृप्तः आत्मप्रत्ययः स्वार्थे प्रत्ययः अण्रूपः यतः प्रसादात्सप्रासादो भवति प्रसादएव प्रासादइति प्रज्ञादिभ्योऽण् इति व्याकरणं ॥ ४०५ ॥

आनंदतनयं वर्णयति । गोरसेति गोरसः वाणीरसः साधुव्रजः सतां संघः साधु गोकुलं च यशः दया च ताभ्यां यशोदयाभ्यां गोप्या च आकारतः हरेश्चिन्मयो विग्रहः अस्य तु पांचभौतिकः आकारेण च अयमानंदसुतःसतु नंदसुतइति ॥ ४०६ ॥

अरणीति अरणौ समुद्भूतः अरणिस्तन्निवासग्रामः काष्ठमयः श्रौतपात्रविशेषः येनाग्निर्मथ्यते गोरसः वाग्रसः घृतं च कांतिः प्रभा कांत्याख्यकाव्यगुणश्च अयं नरः अग्निस्तु अनरः देवः अनलश्च ॥ ४०७ ॥

प्रकटितेति प्रकटिताः हरेश्चारवो गुणा येन मंजु मधुरवचनं स्पष्टं अरणिनामके ग्रामे संभूतं कृष्णो यो लेखः देवः स कंठे यस्य तन्नामजापी शुको व्यासपुत्रः तत्पक्षे अरणेः संभूतं अग्निमंथनसमये धृतोत्तरारणेर्व्यासस्य अप्सरोदर्शनेन रेतः

तंत्रीज्ञानसुनिपुणः सुश्रुतचरकांतनिष्ठितप्रज्ञः ॥
नवरसनिबंधचतुरो वैद्य इवानंदनंदनो जयति ॥ ४०९ ॥
यः काव्यं किल सर्वदानवमहामोदप्रदं तं रसा-
स्हृत्या शास्त्रविशारदो विरसयांचक्रे पुरा वामनः ॥
सोऽयं जातमहाप्रसादविततिर्भूयो रसाऽधानतः
काव्यं भव्यतमं द्विजेंद्रतिलकः प्रोल्लासयामास किम् ॥ ४१० ॥
स्वबोधयुक्तिकौशल्यं वामनस्य महाद्भुतम् ॥
गिरेरपि समुद्भूता येन चिद्घनता द्रुतम् ॥ ४११ ॥
वामनस्य गिरीशस्य चैकमत्यं तु सर्वथा ॥
इत्याह वामनो भूत्वा स्वयमेव निदर्शनम् ॥ ४१२ ॥
इह मुख्यकलोपेतो कोऽभवत्कविनायकः ॥
इति मीमांस्यमाने तु मयूरेशः स्मरत्यलम् ॥ ४१३ ॥

अरणौ पतितं तस्माज्जातः शुकइति भारते । अन्यत्समानं । कीरपक्षे हरिः हरितरूपो गुणः अरणिकृते यो वृक्षः पिप्पलस्तत्र जातः पिप्पलकुहरसंभूतः कीरोहि सम्यक् वदतीति लोके प्रसिद्धिः ॥ ४०८ ॥

तंत्रीति तंत्र्यो वीणागुणाः तंत्रीवादने निपुणः नाडीज्ञाने च उत्तमशास्त्रचरी कांता रम्या निष्ठिता भगवत्परायणा प्रज्ञा मतिर्यस्य सुश्रुतचरकनामके आयुर्वेदसंहिते यदंते निष्ठिता प्रज्ञा यस्य च नवाः रसाः शृंगारादयः रसायनानि च ॥ ४०९ ॥

वामनस्वामिनं वर्णयति । यइति पूर्वं वामनो रसायाः भूमेर्हरणं कृत्वा काव्यं शुक्रं विरसं कृतवान् सर्वदानवानां मोदप्रदं । सएव कलौ तत्र जातप्रसादइव रसाऽऽधानेन काव्यमुल्लासयांचक्रे किं । काव्यं सुरसं कृतवानित्यर्थः सर्वदनवमोदप्रदं ॥ ४१० ॥

स्वबोधेति गिरिः एतन्नाम्नी तद्भार्या गिरिः पर्वतश्च ॥ ४११ ॥

वामनस्येति विष्णोः शिवस्य च परमात्मतयाऽभेदो ' हरिरेवशिवः साक्षाच्छिवएव हरिः स्वयं ' इत्यादिवचनजालमैक्यमत्याभिप्रायमाह योहि वामनः स गिरिशः गिरेरीशएवेति ॥ ४१२ ॥

मयूरकविं वर्णयति । इहेति कलाभिः काव्यचातुर्यै रुपेतः कविनायकः कः इतिः विचार्यमाणे मयूरेशः स्मृतिविषयो भवति । कस्य लोपं इतो गतः कविनायकः विनायको भवति यश्च विनायकः स मयूरेश एव कलोपः प्रथमत्यागे मानाभावादाद्यएव विवक्षितः ॥ ४१३ ॥

आर्यार्पितमहानंदः सर्वलोककलादरः ॥
विराजते मयूरेशः कलाधरशिरोमणिः ॥ ४१४ ॥
अतिचित्रकलापाढ्यः सदारामपरस्थितिः ॥
कारिकाजनितानंदो मयूरेशो विराजते ॥ ४१५ ॥
श्रीकालिदासकविकीर्तिकलापमुच्चैः
कल्पामहे कथयितुं कथमल्पजल्पाः ॥
काल्या यदी गुरुरिति प्रथितापि लोके
दासेन येन लघुतां गमिता बभूव ॥ ४१६ ॥
कालीच्या लीला जो ऱ्हस्व करी असुनि दास निजलीला ॥
कवितेला जागवुनि प्रकटुनि कवि कालिदास निज लीला ॥ ४१७ ॥

आर्येति आर्याभिः आर्याधिकारस्थगीतिभिः अर्पितः आनंदो येन । आर्येभ्यः अर्पितइति वा । आर्या पार्वती च सर्वलोके यत्कविता गीयते सर्वत्र पूज्यते च चतुरः श्रेष्ठः भालचंद्रश्च मयूरेशः कविर्गणेशश्च ॥ ४१४ ॥

अतिचित्रेति अतिचित्राणि यस्मिन्सः समासांतकप् सचासौ कलापः वागूरचनं तेनाढ्यः बहुतरयमकत्वात् सदारामपरा स्थितिर्यस्य रामोपासकत्वात् बहुविस्तृतग्रंथस्य सारं गृहीत्वा अल्पग्रंथेन रचनं कारिका ताभिर्जनितः आनंदो येन भारतभागवतरामायणविस्तृतग्रंथा येन गीतिरूपेण अल्पग्रंथेन प्रणीताइति मयूरेशः कविः बर्हिणःपक्षे अतिचित्रः यः कलापः बर्हं आरामः तत्परा स्थितिर्यस्य कालिका मेघमाला तया जनित आनंदो यस्य । गणेशपक्षे आश्विनपौर्णमास्यां पूर्णचंद्रः ततः चित्रां अतिक्रांतः षड्राशिभोगे जाते योऽवशिष्यते सचासौ कलापश्चंद्रस्तेन सदा यः रामपरः शिवः तत्र स्थितिर्यस्य कालिका पार्वती तया जनितः आनंदो यस्य ॥ ४१५ ॥

कालिदासं वर्णयति । श्रीकालिदासेति काली तस्याः दासः कालिदासः । ङ्यापोः संज्ञाछंदसोर्बहुलमिति ऱ्हस्वः । अनेन दासेन सता काल्याः ईः श्रीः गुरुरपि लघुतां ऱ्हस्वत्वं प्रापिता यस्य श्रियोऽग्रे काल्याः श्रीरल्पेति शब्दतोऽपीदं कालीशब्दस्य इकारो दीर्घोऽपि यत्संबंधेन ऱ्हस्वो जातः कालिदासइति ॥ ४१६ ॥

कालीति यः कालिदासः काल्या दासोऽपि सन् तत्प्रसादजन्यसामर्थ्येन चिरं निद्रितां कवितां प्रबोध्य निजलीलाः कवितारूपाः प्रथयित्वा ताभिः काल्या लीलां ऱ्हसयामास काल्या यशसोऽप्यस्य यशः प्रथितमित्यतिशयोक्तिः कथमिदमनुभवारूढमिति चेत् कालीशब्दगतं लीकारं ऱ्हस्वयति वा नवेति द्रष्टव्यं कालिदासइति ॥ ४१७ ॥

श्रीकालिदासकविवर्यसरस्वतीयं
किं वर्णयाम्यतितरां रसवाहिनीति ॥
यत्कालिका भगवती शुचिभावयोगा-
द्यस्यामहो मुहुरनुग्रहमादधाति ॥ ४१८ ॥
उच्चावचपदार्थानां दर्शिका रसहारिणी ॥
भारती भाति भव्यस्य भारवेर्भा रवेरिव ॥ ४१९ ॥
युक्तं तु नैमिषारण्ये शौनकाद्यैर्महर्षिभिः ॥
सूतः पारयितुं सूतो हरिबद्धं मनोरथम् ॥ ४२० ॥
ज्यायस्तमैस्तु शौनकमुख्यैर्मुनिभिर्वृतोऽभवत्सूतः ॥
युक्तं पुराणवृत्तिर्बहुदोषभवोपतापशमनाय ॥ ४२१ ॥
पारं भवांबुधेर्गंतुं शौनकाद्यैर्महर्षिभिः ॥
सूतो वृतोऽभवद्यस्मात्सूतः पारद इष्यते ॥ ४२२ ॥
वन्ध्याक्षिप्तइति ह्येष निमज्जतु भवांबुधौ ॥
तच्चित्रं यत्पुनर्दैवाल्लब्धपोतोऽपि मज्जति ॥ ४२३ ॥

श्री कालिदासेति यतः यस्यां कालिदाससरस्वत्यां कालिका भगवती शुचिभावयोगेन निर्मलचित्तेन मुहुरनुग्रहं कुरुते ततः रसवाहिनीति किं वक्तव्यं । शुचिः आषाढस्तस्य भावः सत्ता तद्योगेन कालिकाया मेघपंक्तेरनुग्रहश्चेद्रसवाहित्वं युज्यतइति ॥ ४१८ ॥

भारविं वर्णयति नानाविधपदानामर्थानां च दर्शयित्री रसं हरते आकर्षति तथा-रवेर्भा यथा सापि पदार्थदर्शिका रसं जलं हरति ग्रीष्मे इति प्रसिद्धं ॥ ४१९ ॥

सूतं पुराणवक्तारं वर्णयति युक्तमिति सूतः सारथिश्च हरौ बद्धः यः मनोरथः तं पारयितुं सफलीकर्तुं हरिभिरश्वैर्बद्धं मनोरथं शीघ्रगामिनं रथं पारयितुं गमयितुं ॥ ४२० ॥

ज्यायस्तमैरिति आतिवृद्धानां प्रायः रोगशांत्यै कषायचूर्णादीनि नोपयुज्यंते किं तु रसायनमेव युज्यते तच्च पुराणवृत्ति जीर्णमपेक्ष्यतइति ज्येष्ठतमैस्तैः पुराणवृत्तिः सूतएव वृतः सूतः पारदः अन्यः प्रसिद्धः बहुदोषेभ्यो भवति यः उपतापो रोगस्तस्य बहुदोषो यो भवः तस्येति च ॥ ४२१ ॥ पारमिति सूतः प्रसिद्धः पारदश्च ॥ ४२२ ॥

सत्प्रशंसानंतरं प्रसंगादसतां चरितं वर्णयति वन्ध्येति विधिवत्पाणिगृहीत्याभार्यया: पुत्रोत्पादनात्पूर्वं त्यागो न युक्तइति तया सह गृहधर्ममाचरतु वन्ध्याक्षिप्तत्वात् वयो-रैक्यात् बद्धो निक्षिप्तो निमज्जत्वेव परं दैवात् पोतं पुत्रं लब्धवान् तेन न मंक्तव्यं । कुतः पोतस्य नौकाया लाभात् 'तथा व्यवायः प्रजया न रत्या' इति शुकोक्तेः ॥ ४२३ ॥

यत्तु भगवदपराधस्थितिमस्मदहो जघन्यकर्मरतम् ॥
तत्र निलयमग्नत्वं युक्तं चित्रं तदन्यत्र ॥ ४२४ ॥
परदाररतिः फलाभिसंधिर्बहुदंभो भगकामना ममत्वम् ॥
चरितं मुहुरीदृगस्मदीयं कथमपवर्गरसस्य भाजनं स्मः ॥ ४२५ ॥
कांतं रघुकुलतिलकं सर्वजगत्पालकं विहाय जनः ॥
अनुसरति नरं कांतं नानाकष्टाश्रयं शिवाशिवायम् ॥ ४२६ ॥
कोऽयं हंत महामोहग्रस्तचित्तोऽखिलो जनः ॥
अर्थस्यार्थे कदर्थः सन्परमार्थं त्यजत्यहो ॥ ४२७ ॥
दानं तपो मख इति त्रितयं पवित्रं नेतुं क्रमादमृतधाम गतिं क्षमं सत् ॥
तत्कामदोषकलुषं पुरुषा विधाय प्रायः सुरालयगतिं स्पृहयंति हंत ॥४२८॥
दानं तपो मख इति त्रितयं पवित्रं स्वानुष्ठितं परमहंसगतिं ददाति ॥
तत्कामदोषकलुषं पुरुषा विधाय प्रायेण कौशिकगतिं बत कामयंते ॥४२९॥
दिव्यागमोदितमहो हरितत्त्वमत्र यो नाभिनंदति जनः कृपणस्तमेनम् ॥
वक्तुं त्रपे पशुमपीति तृणोदितं तद्यत्पश्य पश्य पशवः कियदाद्रियंते॥४३०॥

गृहे निमग्नत्वं स्त्रीणां युक्तं न पुंसामित्याह यत्त्विति । यत् भगवतः अपराधे स्थितं तत्प्रोक्तकारित्वाभावात् किं च निंद्यकर्मरतं निषिद्धाचरणपरं अतः एतादृशस्य निरयमग्नत्वं युक्तं रलयोरभेदात् निलयमग्नत्वं भगवत् सत् अपरस्य अधःस्थितं जघन्यं कर्म मैथुनमाचरति तादृशं कलत्रं ॥ ४२४ ॥

परेति परदाररतिः फलाभिसंधिः बहुदंभः भगकामना ममत्वं प. फ. ब. भ. म. इति पवर्गस्थमस्मदीयं चरितं तेन अपवर्गरसस्य भाजनं कथं स्मः ॥ ४२५ ॥

कांतमिति यतो जगत्पालकः अतः कांतः रघुतिलकः स्वाभाविकोयं न कृत्रिमः सर्वजगत्पालकरघुतिलकशब्दौ हि कांतावेव तं हित्वा नरं कांतं कृत्वानुसरति नरो हि जीवकोटयंतर्गतत्वेनास्वतंत्रत्वात् कांतो न नास्ति च नरशब्दः ककारांतः तत्र कृत्रिमं कांतत्वं कृत्वानुसरति तत्र कृते तु स नरकएव भवति रामं हित्वा नरानुसरणं नरकानुसरणमेवेति भावः ॥ ४२६ ॥ कोयमिति अर्थस्य द्रव्यस्यार्थे परमार्थं त्यजतीति ॥ ४२७ ॥

दानमिति अमृतधाम मोक्षधाम पीयूषधाम च सुरालयः स्वर्गः मद्यगृहं च ॥ ४२८ ॥

दानमिति परमहंसानां ब्रह्मनिष्ठानां राजहंसानां च गतिं पदवीं कौशिकः इंद्रः घूकश्च ॥ ४२९ ॥

दिव्यागमेति दिव्यागमाः सच्छास्त्राणि तत्रोदितं दिव्यागमे कल्पवृक्षे उदितं च हरितत्वं भगवत्तत्त्वं यो नाभिनंदति सपशुरिति वक्तुं लज्जोदेति यतः पशुः तृणो-

विठ्ठले निर्विकारेऽस्मिन्विपरीतमतिस्तु यः ॥
कोऽसौ केवलमित्येतन्महाराष्ट्रान्विचारय ॥ ४३१ ॥
मत्तः सन्यो हरिं द्वेष्टि महिषः स हि पूरुषः ॥
स नाम नैव कालेनाधिष्ठितः कथमुच्यताम् ॥ ४३२ ॥
यो जातप्रत्ययः स्वार्थे यश्चाल्पो यश्च कुत्सितः ॥
नराख्यस्ते नरकास्तत्संगं दूरतस्त्यजेत् ॥ ४३३ ॥
सुवृत्तदर्शिनां बाह्येऽभ्यंतरे कठिनात्मनाम् ॥
बहुधान्योपमर्दाय खलानां दृश्यते स्थितिः ॥ ४३४ ॥
अपकारस्य जनका उपकारविलोपकाः ॥
पुरुषा न ततोऽन्ये तु दृश्यंते कठिना मम ॥ ४३५ ॥
परस्परमतिप्रेमरसेनाश्लिष्टयोर्द्वयोः ॥
सन्निविश्यांतरं कर्तुं बालिशः पंडितायते ॥ ४३६ ॥

दितमपि तृणेषु उदितं हरितत्वं हरितवर्णत्वं आदरेणाभिनंदति तुच्छोदितमपि सोऽभिनंदाति ॥ ४३० ॥

विठ्ठलेति विठ्ठलः पांडुरंगः निर्विकारः शुद्धं ब्रह्म एवं सति तं यो नायं तादृशः किं तु कस्यचिज्जनस्य विग्रहोऽयमिति विपरीतमतिं करोति स कः इति चेन्महाराष्ट्राः कथयिष्यंति तान्पृच्छ विठ्ठलइत्ययं निर्विकारः विकाररहितश्चेत् ठ्ठलइत्युर्वरितं तत्र विपरीतमतिर्यः स लठ्ठइति भवति महाराष्ट्राश्च यो यो ज्ञानशून्यः धृष्टश्च तं तं प्रति लठ्ठइति वदंति ॥ ४३१ ॥

मत्तइति यो हरिं भगवंतं द्वेष्टि हरिं अश्वं च यो द्वेष्टि स महिषएव । गोन्याघ्रं महिषाश्व मोतुखनकमिति तयोर्नित्यवैरत्वात् महिषश्चेत् कालेनाधिष्ठितएव महिषो हि कालवाहनं ॥ ४३२ ॥

यो जातइति स्वार्थमेव यस्य ज्ञानं न परोपकारार्थं पाणिनिना हि स्वार्थे अल्पे कुत्सितेचार्थे कप्रत्ययो विहितः यथा नरएव नरकः अल्पो नरः नरकः कुत्सितो नरः नरकः ॥ ४३३ ॥

सुवृत्तेति यथा खलः धान्यमर्दनस्थानं बाह्यतः सुवृत्तं वर्तुलं दृश्यते अभ्यंतर तु कठिनं अन्यथा मर्दनासंभवात् बहूनां धान्यानामुपमर्दाय खलः दुष्टो बाह्ये सुवृत्तः अंतः क्रूरः बहुधा अन्येषामुपमर्दाय ॥ ४३४ ॥

अपकारस्येति ये पुरुषा उपकारं विलोप्य अपकारं जनयंति तदन्ये कठिना न किंतु तएव कठिनाः पुरुषइत्यत्र उकारयुक्तपकारः पु तस्य लोपे रुष इत्यवशिष्टं तत्र अकारयुक्तः पकारः प तत्र जनिते परुषइति जायते यः परुषः स कठिनएव ॥ ४३५ ॥

ओषधीशोऽमृतकरः सन्नपींदुः क्षयान्वितः ॥
न हि प्रतिक्रियासंपत्तिसिद्धिर्दोषाकरे भवेत् ॥ ४३७ ॥
मा खिद्यस्व यदि खलो बहूपचरितोऽपि नोपकुरुत इति ॥
गरलमलंकृतमपि किं कथय सखे स्वस्वभावमुत्सृजति ॥ ४३८ ॥
कौटिल्यं शिथिलांतरत्वमपि सद्वृत्तत्वहानिं परं
पातित्यं वितनोति बालिशजनस्येह प्रसंगो नृणाम् ॥
तादृग्बालिशदूषितस्य न पुनः शर्मप्रदः संस्तवः
प्रत्यक्षं तु न नैव पंकजदृशां वक्षोरुहद्वंद्ववत् ॥ ४३९ ॥
सदसिचमत्कारकरश्चतुरतरश्चित्रबाणसंधाने ॥
कोशधरोऽप्यर्थपरो रसेश्वरो जगति जयति कविराजः ॥ ४४० ॥
मथ्नंतु परमप्रेम्णा सारस्वतरसं मुहुः ॥
यो मंदरागमथितोऽप्यसूत परमामृतम् ॥ ४४१ ॥

द्वयोः स्त्रीपुंसयोरंतरं कर्तुं बालिशः शिशुः पंडितः उभयोः प्रेमभावात् । तथा सुहृदोरंतरं कर्तुं मूर्खः पंडितः असत्यकथनादिना ॥ ४३६ ॥

चंद्रः ओषधीनां राजा अमृतकरश्च परं दोषाकरत्वात्क्षयी तन्मन्यामहे पुण्यकर्मविना औषधं न रोगं प्रतिकरोति ॥ ४३७ ॥

मा खिद्यस्वेति गरलं अलं सत्कृतं कृतं लकाररहितं च कृतं गरमेवावशिष्यते यच्च गरं तत् गरलमेव तथा खलोऽप्यलंकृतः खइत्यवशिष्यते यच्च खं तच्छून्यमिति ॥ ४३८ ॥

कौटिल्यमिति यथा बालिशजनस्य शिशुजनस्य प्रसंगः स्तनयोः कौटिल्यं कोटी अग्रे लातः गृहीतः कौटिल्यं बृहच्चूचुकत्वं शिथिलात्मता सद्वृत्तत्वस्य वर्तुलत्वस्य हानिं पतितत्वं च करोति तादृशयोः दूषितयोः परिचयः परंपरासंबंधेनापि वस्त्रादिव्यवधानेनापि नसुखदः प्रत्यक्षं तु नैव । तथा मूर्खप्रसंगः कुटिलत्वं शैथिल्यं दुर्वृत्तत्वं पतितत्वं च करोति तादृशस्य परिचयः परंपरासंबंधेनापि न सुखदः कुतस्तरां प्रत्यक्षमिति ॥ ४३९ ॥

अथ कवितादि वर्णयति सदसीति सदसि सभायां चित्रा ये बाणाः शब्दाः तेषां संधाने संयोजने कोशान् अमरादीन् अर्थे अर्थालंकारविन्यासे परः रसानां शृंगारादीनां ईश्वरः निबंधननिपुणः राजपक्षे सन् यः असिः खड्गस्तस्य चमत्कारः हस्ते कृत्वा धूननं चित्रं यद्बाणानां संधानं तत्र कोशो द्रव्यराशिः तथापि पुनरर्थसंपादनतत्परः रसाया भूमेरीश्वरः ॥ ४४० ॥

मथ्नंत्विति सारस्वतं सरस्वत्याः संबंधिनं समुद्रस्य च मंदरो नाम यः अगः पर्वतः तेन मंदः यो रागः प्रेमा तेन च परमं अमृतं ॥ ४४१ ॥

सरस्वती सद्गुवती सत्कवीनां च भारती ॥
प्रवर्तंते गूढरसाः सज्जनानंददायकाः ॥ ४४२ ॥
समलंकृताऽपि बहुधा सुगुणैरनुरंजिताऽपि नोपैति ॥
कविना न विनाश्लेषं कविता वनिता च सुरसभरितत्वम् ॥४४३ ॥
कवयः कुरुत सुकाव्यं नानालंकारसंकुलं तादृक् ॥
येन श्रुतेन जात्वपि न भवेत्सहृदयमनस्यलंकारः ॥ ४४४ ॥
न द्विष्मो द्विजराडसाविति धिया दोषाकरोऽप्येष सन्
सोऽयं त्वत्र बुधाय किं च कवये मह्यं जडो द्रुह्यति ॥
इत्थं रुष्ट इवावतीर्य बहुधैनं न्यक्करोतीव किं
राज्ञां सद्यशसा सुखैरपि नखैः स्त्रीणां जितोऽसाविति ॥ ४४५ ॥
भृशं दोषाहर्षं भजति न च निद्रां वितनुते
विधत्ते बालानां नवमुदमलंकाररचनैः ॥
प्रियो यः प्रौढानां नवरसनिबंधैकनिपुणः
सदाश्लेषैस्तुष्टो जयति सुकविर्जारसदृशः ॥ ४४६ ॥

सरस्वतीति रसः जलं रसः प्रेमरसः रसः शृंगारादिः गूढः अदृश्यः स्मितादिभावो-श्लेयः भावानुभावैरुन्नेयश्च ॥ ४४२ ॥

समलंकृतेति सम्यक् अलंकारैः उपमादिभिः भूषिता कर्णिकाकर्णपूरग्रैवेयकादिभिश्च गुणैः प्रसादादिभिः काव्यशोभाकरैः रतिकौतिदत्वादिभिश्च श्लेषं श्लेषालंकारं आश्लेषं आलिंगनं विना च रसश्चमत्कारपूर्णत्वं प्रसन्नचित्तत्वं च ॥ ४४३ ॥

कवइति नानाअलंकारैः संकुलं सदपि यथा अनलंकारो भवेत्तथा कुरुत अनलंकारः अलंभावः ॥ ४४४ ॥

प्रायः कवयः उपमानदशायां चंद्रं गर्हयंति तत्कारणमुत्प्रेक्षते न द्विष्मइति कविना शुक्राचार्येणेत्थं विचारितं एष चंद्रः दोषाकरोऽपि द्विजराट् ब्राह्मण इति कृत्वा सर्वे वयं एनं नद्विष्मः 'विधोर्नो रिपुरिति' ज्योतिषं ग्रहस्वभावश्च 'पापिनामतिपीडकः' एवं सति अयं जडो बुधाय किं च मह्यं कवये द्रुह्यति आस्तां नामेदमिदानीमिति रुष्टः भूमौ बहुरूपेणावतीर्य स कविः प्रतिपदं तं न्यक्करोति अयं हि नलस्य राज्ञोऽश्वपादत्राणं अयं दमयंतीमुखनिर्माणाय ब्रह्मणापात्रे लावण्यं गृहीतं तेन निर्मिते च मुखे यदवशिष्टं पात्रे किंचित्तेनायं निर्मितइति अस्या वासवदत्तायाः नखविरचनार्थं ब्रह्मणा दिव्यहीरमणीनां रसं कर्तुं मूषा कृता रसं कृत्वा नखानि निर्मितानि उपयोगाभावात्त्यक्ता मूषेयमिति ॥ ४४५ ॥

भृशमिति दोषेषु अहर्षं रात्रौ हर्षं च यमकादिविभावनावशान्निद्रां न भजति रतिविव्हलत्वाच्च बालानां ध्वन्यनभिज्ञानां शब्दालंकारार्थालंकारैः बालानां मुग्धानां

अभ्युत्तिष्ठति यां प्रति द्रुततरं लोम्नां गणः सादरं
कर्णावर्पयतः सुखासनमथो पाद्यादिपूजाविधिम् ॥
नेत्रे कल्पयतः स्तवीति वदनं यां साधुवादैर्मुहुः
सा साध्वी कविता जगत्सु विदिता मान्यातिधन्यात्मनाम् ॥४४७॥
महांतं कौशल्यव्ययमिह विधायैव विहिता
विचित्रा सौवर्णी विविधसदलंकाररचना ॥
यदेषा सर्वेषां प्रियकरणसाद्गुण्ययुगपि
प्रसादश्चेन्नैकः सकलजनतोषं न तनुते ॥ ४४८ ॥
यो मूढो गुणदोषचिंतनविधौ स्वच्छंदसा यद्वति-
र्नस्वप्नेऽपि सुवर्णसंग्रहपरव्यापारविद्वांतरः ॥
सच्छब्दान् विजहाति यः स कुकविर्वेदांतपित्तल्यतां
यायादेकमसौ निरंतरतया सेवेत चेत्सद्रसम् ॥ ४४९ ॥
अनर्थपदपूरिता रुचिरवृत्तहीनाऽपि या
श्रयंति किल कौरवा गुरुतिरस्कृता याऽनिशम् ॥

तरुणीनां च अलंकारदानादिभिः प्रौढानां सहृदयानां प्रौढावस्थापन्नानां व्यंग्यरसनि-बंधनेन सुरतचातुर्येण " बाला तांबूलदानाद्यैस्तरुणी भूरिभूषणैः ॥ सुप्रेम्णा रज्यते प्रेम्णा वृद्धा स्वालापगौरवैः" इति ॥ ४४६ ॥,

अभ्युत्तिष्ठतीति यत्प्रसंगात्सात्त्विकभावा भवंति ता कविता सा मान्या भवतीति मान्यत्वे हेतुरभ्युत्थानादिसत्कारः आनंदाश्रुपूर्णे नेत्रे पाद्यादिपूजां कुरुतइत्यादि॥ ४४७॥

गुरुदेवताप्रसादमंतरेण कविता न सर्वतोषिकेत्याह यथा केनचित्स्वर्णकारेण सुवर्णानां अलंकाराः निर्मिताः तत्र स्वकौशल्यमप्यतीव प्रकटितं तच्च कौशल्यं अद्भु-तानंदकारकं परं तु तत्प्रसादोऽपेक्षितः अंत्यसंस्कारः कषायलेपनपूर्वकझिल्लीनिर्माण-रूपः तेन विना न चमत्कारिता तथा उत्तमवर्णानां अलंकारघटना कृतापि प्रसादम-पेक्षतइति ॥ ४४८ ॥

यो मूढइति गुणाः प्रसादादयः दोषा विसंध्यादयः स्वच्छंदसा न तु पैंगलच्छं-दानुरोधेन सुष्ठुवर्णानां संग्रहः नत्तद्रसानुगुणान् शब्दान् सं शृंगारादिरसं तद्विभा-वानुभावव्यभिचारिभावैर्व्यंग्यं अन्यत्र गुणाः दोषाः प्रसिद्धाः स्वेच्छया सुवर्णं कांचनं 'नाधीयीत बहु शब्दान् वाचो विग्लापनं हि तदिति' सद्रसं ब्रह्मरसं ॥ ४४९ ॥

अनर्थेति प्रतिपक्षे यैः अनर्थो भाव्यः तानि साध्व्याः केशाकर्षणवस्त्रहरणादीनि पदानि स्थानानि तैः पूरिताः सद्वृत्तं चारित्रं तेन हीनामपि यां सर्वे कौरवाअनुमोदंते गुरुणा द्रोणेन कवितापक्षे अर्थरहितानि यानि पदानि तैः रुचिराणि श्राव्याणि यानि वृत्ताणि पुष्पिताग्रादीनि तैः यां कुत्सिताः रवाः शब्दाः तेषां समूहाः कौरवाः

सुयोधनमतिस्तथा कुकविता तयोरुत्तमा
मतिर्मम मता यतो भवति कर्णसंतोषदा ॥ ४५० ॥
सर्वदानवचिंतायां गतस्य महतः कवेः ॥
अंतर्गतं विजानाति गुरुपुत्रस्तु केवलम् ॥ ४५१ ॥
समलंकरोति काव्यं सुकविः कुकविश्च तदुभयकाव्यम् ॥
वर्धयति सुखं सद्यः सत्हृदयत्हृदयं प्रविष्टमात्रं चेत् ॥ ४५२ ॥
समलंकरोति काव्यं सुकविः कुकविश्च तदुभयं काव्यं ॥
अनलं तनोति चित्ते सत्हृदयत्हृदयं प्रविष्टमात्रं चेत् ॥ ४५३ ॥
कविरहिताः कविलापा जायंते कंठशोषणायैव ॥
संमुखगतः कविश्चेद्भवति कुलपिताऽपि कविकुलपितैव ॥ ४५४ ॥
बहुवृत्तोपकलितमप्यलंकरणयुगपि विपकथाढ्यमपि ॥
कविजनकवनं चेत्कविहीनं न मनोज्ञभावमावहति ॥ ४५५ ॥

अतएव गुरुभिः महाजनैः कर्णः राधेयः श्रवणं च ॥ ४५० ॥

सर्वदेति सर्वदा नवा नूतना या चिंता सर्वेषां दानवानां या चिंता तस्यां कवेः कविताकर्तुः शुक्रस्य च अंतर्गतं अभिप्रायं उदरगतं यत्किंचित् गुरुपुत्रः गुरोः पुत्रइव पुत्रः शिष्यः उपासितगुरुकुलः कचश्च ॥ ४५१ ॥

समलंकरोतीति समलंकरोति सम्यक् अलंकारयुक्तं मलसहितं च वर्धच्छेदनपूरणयोः वर्धयति पूरयति नाशयति च ॥ ४५२ ॥

समलंकरोतीति अनलं अलंभावाभावं अग्निं तदुपलक्षितं संतापंच ॥ ४५३ ॥

काव्यस्य श्रोतुः कवेरभावे श्रमएवेत्याह कवीनां लापाः श्रोतृभिः रहिताश्चेत् केवलं कंठशोषणाय एव युक्तं चैतत् कविलापाः ककारेण विरहिताश्चेत् विलापाः भवंति ये तु विलापास्ते कंठशोषणायैव कवेः श्रोतुः सद्भावे गुणमाह कुत्सितलापिता कुलपिता असंबद्धवक्ताऽपि सन् यदि तस्य संमुखे श्रोतृत्वेन कविः स्थितश्चेत् कविकुलस्य गुरुर्भवति श्रोताकविस्तस्य तात्पर्यवर्णनेन तं कविकुलगुरुं करोति युक्तमिदं यत्कुलपिताइति अस्य संमुखे कविः स्थितश्चेत् कविकुलपिता भवति ॥ ४५४ ॥

बहुवृत्तेति कविजनस्य कवनं भाषणं कवितारूपं कविभिः श्रोतृभिर्हीनं न मनोज्ञं भवति कीदृशं तत् बहुभिर्वृत्तैः सहितं अलंकारयुक्तं च विं गरुडं पाति विपः कृष्णः तस्य कथया आढ्यं एवमपि सम्यक् युक्तं चैतत् कविजनकवनं ककारद्वयेन विहीनं विजनवनं भवति तत्किं मनोज्ञं स्यात् तदपि रमणीयं स्यान्नेत्याह बहुवृत्तोपकलितं कविहीनमिति सर्वत्र बहुवृत्तोपालितं बहवः वृत्ताः वर्तुला ये उपलाः पाषाणास्ते संजाता यत्र तत्र अलंभूषितं रणभूषितं अलं पर्याप्तो यो रणस्तदर्थे या

तरंगिणी तथा वाणी पुरःस्थानपि भूभृतः ॥
तिरस्कृत्य समभ्येति रसिकं रसवाहिनी ॥ ४५६ ॥
व्रजति वितानं विपुलं विरचयते सुमनसां महामोदम् ॥
अतिमुक्तकवनमपि तद्रसिकस्थलमलमपेक्षते किमपि ॥ ४५७ ॥
सुसंगतिवशाच्छ्लोकः सुश्लोको भवति स्फुटं ॥
अलंचिकीर्षोः संसर्गाल्लूनः श्लोको भविष्यति ॥ ४५८ ॥
यस्मिन्नासुरसंपदः समभवन्नेकांततः संगताः
काव्यस्यास्य तमः समागमवशाच्छुक्रः प्रकाशो महान् ॥
न स्वल्पोऽपि हि सूर्यवस्थितिमतस्तत्रापि चेत्स्तोककः
सोऽयं पूर्वतपःप्रभावमहिमा नान्यत्प्रपश्यामहे ॥ ४५९ ॥

भूः तया उषितं अलमिति भिन्नपदं वा निश्चयार्थकं विपयादयं विपयेन दुरध्वना युक्तं ॥ ४५५ ॥

तरंगिणीति भूभृतः पर्वतान् राज्ञश्च रसिकं समुद्रं रसज्ञं च ॥ ४५६ ॥

व्रजतीति अतिमुक्ताः व्यासादयस्तेषां कवनं कविता वितानं विस्तरं गच्छति सुमनसां साधूनां च महामोदं महानंदं रचयति परं किमपि रसिकरूपं स्थलमपेक्षत तत्र किं वक्तव्यमन्येषां कवनं तदपेक्षतइति युक्तं चैतत् अतिमुक्तकानां पुंड्रकानां वनं विस्तृतं तत्सुमनसां पुष्पाणां सुगंधं तनोति रसिकस्थलं सजलमालवालं चेत् ॥ ४५७ ॥ पुंड्रकं कुसरी, मधुमाधवी इति महाराष्ट्रा वदंति

सुसगंतीति श्लोकः सुसंगतिः सत्संगतिः निर्मत्सरश्रोतृसमागमइत्यर्थः तद्वशेन सुश्लोकः चमत्कारातिशयवान् भवति श्लोकस्य यदि सोः उपसर्गस्य संगतिश्चेत् सुश्लोकएव श्लोकं अलं मा मा इति निषेधं चिचिकीर्षोः अरसिकस्येत्यर्थः संसर्गात् श्लोको लूनः छिन्नः स्यात् चमत्कारभंगइत्यर्थः युक्तं चैतत् अलं लकाररहितं चिकीर्षोः समागमात् लूनः लकारेण ऊनः स्यात् तथा चेत् शोकएवोपतिष्ठतइति भावः ॥ ४५८ ॥

यस्मिन्निति यत्र काव्ये आसुरसंपदः शृंगाररसोपेता विटकथाः सर्वत्र संगताः तत्काव्यस्य तामसजनसमागमएव प्रकाशः न तु सूरीणां साधूनां अवस्थितौ इत्येतयुक्तं यत्र काव्ये शुक्रे दैत्यसंपदः संगताः तस्य काव्यस्य शुक्रस्य प्रकाशः तमसः समागमएव न तु सूर्यस्य वस्थितौ अवस्थितौ अवाप्योरुपसर्गयोरित्यकारलोपः अथ तस्य काव्यस्य सूर्यावस्थितावपि चेन्मनाक्प्रकाशः तत्र कारणं तस्य कवेस्तीव्रतपएव यथा पूर्वे तपसि माघारंभेइत्यर्थः पूर्वमाघमासे सूर्यवस्थितावपि शुक्रो दृश्यते तृतीयप्रहरादौ ॥ ४५९ ॥

कुटिलप्राया लक्ष्मीस्तत्र प्रभवति सरस्वती यत्र ॥
प्रायः श्वश्रूस्नुषयोः सौहार्दं नैव दृश्यते क्वापि ॥ ४६० ॥
विभाति दिवि चंद्रिका द्विजवरस्य विद्या भुवि
प्रयाति जडराशिरप्यतितरां प्रमोदं यया ॥
तमोविशसनक्षमा कुवलयप्रकाशप्रदा
करोतु कमलोदयं कथमसावहो कथ्यतां ॥ ४६१ ॥
हस्ताब्जे चतुराननस्य तनया धत्ते सरस्वत्यसौ
सद्वंशं गुणिनं रमा तु जलजं धत्ते जलध्यात्मजा ॥
नैकस्या गुणएव संभवति नो दोषः परस्या यतः
प्रायः कारणनिष्ठधर्मसदृशं कार्यं समुत्पद्यते ॥ ४६२ ॥
आवासं सरसीरुहं हिमकरं सद्भ्रातरं क्षीरधिं
तातं चापि नृपालकीर्तिललनासौंदर्ययोः संस्तवे ॥
प्रेम्णात्युत्कटकोटिनाहतधियो निंदंति ये नित्यदा
धृष्टेष्वेषु कथं कृपाविलुलितान् कुर्यात् कटाक्षान्रमा ॥ ४६३ ॥
अथसंकीर्णं ॥ राजा पूर्णकलाधरः कुवलयानंदप्रदाता शुचिः
सद्वृत्तश्च तमोऽपहोऽमृतकरो मित्राश्रय श्चंद्रमाः ॥

प्रायः कवयो दरिद्रास्तद्धेतुमाह कुटिलेति स्पष्टं ॥ ४६० ॥

विभातीति द्विजवरस्य चंद्रस्य यथा चंद्रिका दिवि तथा द्विजश्रेष्ठस्य विद्या भुवि यथा चंद्रिकया जलराशिः समुद्रः प्रमोदते तया जडानां राशिः मंदाअपि कवितयां मोदंते यथा चंद्रिकया तमोनाशः एवं विद्ययापि अज्ञाननाशः यथा चंद्रिकया कुवलयानां प्रकाशः विकासः एवमनयापि कोः पृथ्व्यावलये मंडले प्रकाशः कीर्तिरूपः एवं सर्वसाम्ये सति यथा चंद्रिकया कमलानां उदयः प्रकाशो न भवति एवमनया कमलायाः लक्ष्म्याः उदयो न स्यादिति युक्तं ॥ ४६१ ॥

हस्ताब्जेति सरस्वती यतश्चतुराननात् ब्रह्मणः सकाशादुत्पन्ना चतुरं आननं यस्य तस्माच्च अतः सद्वंशं गुणिनं धत्ते गुणाः तंत्र्यः तद्युक्तं सद्वेणुं वीणामित्यर्थः रमा जलध्यात्मजा समुद्रकन्या जडधीकन्या च ततः जलजं कमलं जडसंभूतं मंदं च तदेतत्सर्वं युक्तं कार्यं हि कारणगुणं धत्ते इति ॥ ४६२ ॥

आवासमिति एते कवयः राज्ञां कीर्तेः स्त्रीणां च सौंदर्यवर्णने प्रवृत्ते लक्ष्म्या निलयं पद्मं तुच्छी कुर्वंति । नैतावदेव शिवेन शिरसा श्लाघ्यं भ्रातरं चंद्रं भगवन्निवासभूतं समुद्रं तातं चेति दृष्ट्वा कथमेतान् पश्येदिति युक्तमेव दारिद्र्यमिति॥ ४६३॥

राजति रामः चंद्रइव रामचंद्रइति उपमानं कल्पयंते तत्र पूर्णकलाधरत्वं सद्वृत्तत्वं पौर्णमास्यां तत्क्षणएव न सर्वदा तत्क्षणे यद्यपि उपमानतां यायात् परं तु तत्रापि

यायाच्छ्रीरघुनंदनस्य तुलनामेष क्षणं पर्वणि
स्याच्चेदेकमसौ तदापि कमलानंदप्रदानक्षमः ॥ ४६४ ॥
श्रीरामो दिनकृत्कुलैकतिलकस्तीरे सरय्वा वसन्
सीताश्लिष्टतनुः समीरशिशुना संसेव्यमानः सदा ॥
साकेते मणिमंडपे जवनिकासंभारसंभाविते
देदीप्यच्छुचि पुष्पकं प्रतिवसन् लोकाञ्शशासाखिलान् ॥ ४६५॥
श्रीरामचंद्रे रविवंशभूपे शासत्यभूद्भूभिरनामयेयम् ॥
तथाहि सोमस्य विभावसोश्च साम्येऽन्यथा प्राणभृतः कुतः स्यात्॥४६६॥
सार्द्धं चापलतां द्विषां सहतयोत्थाप्य प्रकल्प्यानतिं
सत्रातत्र तथा विधाय तदिव ज्याप्रापणं कुर्वतः ॥
जीवाकृष्टिमपीश मार्गणगणो लेभे स्वलक्षं न य-
स्तपूर्णं प्रतिमार्गणं प्रतिपदं प्रत्यर्पितं प्रत्यहं ॥ ४६७ ॥
मुक्तानां स्वातिरभूज्जननीत्येवं नु रोहिणी सुषुवे ॥
रत्नं किंचन सौम्यं मुक्तोत्तममृग्यमाणपदधूलिम् ॥ ४६८ ॥

क्षणे कमलानंदप्रदो यदि स्यात्तर्हि नान्यथेति कथमपि नोपमानं पूर्णतया संभवति राजा भूपश्चंद्रश्च कलाश्चतुःषष्टिः षोडशाच कुवलयं भूवलयं उत्पलं च शुचिः शुद्धः श्वेतश्च वृत्तं चारित्रं वृत्तत्वं वर्तुलत्वं च तमः अज्ञानं तमिस्रं च अमृतं मोक्षः सुधा च मित्रं सूर्यश्च ॥ ४६४ ॥

श्रीरामइति सूर्यवंशजोऽप्यहं नद्यास्तीरे वसन् सीताश्लिष्टः मारुतसेवितश्चेति जवनिकापरिवृते पुष्पकं प्रतिवसामीति शास्ति शीतबाधा चेत्पुष्पकं हसंती देदीप्यच्छुचि दीप्तावल ॥ ४६५ ॥

श्रीरामेति अग्नीषोमयोः साम्ये कापि बाधा नोत्पद्यते इति शास्त्रसिद्धरविवंशभवत्वादुष्णः रामचंद्रत्वाच्छीतः एवं च साम्ये सति अनामयत्वं युक्तं ॥ ४६६ ॥

सार्धमिति हे ईश अयं भावः भवता यदा चापलता धनुर्लता उत्थापिता हस्तेकृता तदा शत्रूणां चापलता चपलभावः कंपोऽभूत् यदा त्वया तत्र पुनरानतिः कल्पिता तदा शत्रुभिरपि आनतिः कृता यदा तत्र ज्याप्रापणं मौर्व्यासंजनं कृतं तदैव तैर्ज्याप्रापणं भूसमर्पणं कृतं यदा जीवाकृष्टिः जीवाया ज्याया आकर्षणं कृतं तदैव तेषां जीवानामाकर्षणं जातं हताइति भावः अनंतरं मार्गणस्य बाणस्य स्वलक्षं शत्रुरूपं लक्षं नासीत् इति वीररसे तेषां वासनापूर्तिर्नाजायतेति कृत्वा दानवीररसे तद्वासनापूर्तिः कृता मार्गणौ बाणयाचकौ स्वं द्रव्यं स्वीयं च लक्षं शरव्यं शतसहस्रसंख्याकं च ॥ ४६७ ॥

मुक्तानामिति रोहिणीनक्षत्रं कृष्णजन्माधिकरणं मुक्तानां मौक्तिकानां ज्ञानिनां च

स्त्रीष्वन्यासु सतीषु केवलमहं राज्ञः परा प्रेयसी-
स्येवं विष्टपवित्तमेव भगवानाविर्भविष्यन्कुले ॥
सत्कुर्याद्यदि मामलं तदिति साऽभूद्ब्रह्मभक्ता तत-
स्तेनास्या अनुरोधतोऽर्थित इवैनां सत्चकाराच्युतः ॥ ४६९ ॥

सूर्यं वर्णयति

औषधान्वेषणक्लेशैर्भृशमुत्क्लिश्यते कुतः ॥
रुगब्धितरणे हेतुं तरणिं शरणीकुरु ॥ ४७० ॥

नृसिंहं वर्णयति

वयस्य पश्य यस्यास्य पंचास्यास्यस्य वश्यता ॥
शस्यस्य तस्य सस्यस्य संपत्किं नु विनश्यति ॥ ४७१ ॥

शिवं वर्णयति

योऽनंतभूषितभुजोऽधिकशैलवासः
संदर्शयन् द्रविणनायकसख्यमुच्चैः

स्वातिः जननी अभूदिति आत्मनि भर्तुः प्रीतिर्न स्यादिति सापत्न्यमत्सरेण रोहिणी किं च न रत्नं सुषुवे कस्तत्रातिशयइति चेत् मुक्तोत्तमैर्मृग्यमाणा पदधूलिर्यस्य तत् ननु स्वातिरपि तादृशं रत्नं नृसिंहाख्यं सुषुवइति किं तयाधिकं कृतमिति चेत्तत्राह सौम्यमिति सोमस्य भर्तुरनुरूपं पुरुषाकारत्वात् 'दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दनेति वचनाद्दर्शनीयतमं च तत्तु उग्रं 'उग्रं वीरं महाविष्णुमिति' मंत्रवर्णनाद्विजातीयं च पुरुषसिंहाकारत्वात् अतो भर्तुः शंकयाकुलतया तत्र प्रेमातिशयो न स्यादिति भावः ॥ ४६८ ॥

रोहिणीनक्षत्रे कृष्णजन्मकारणमाह स्त्रीष्विति अन्यासु अश्विन्यादिषु राज्ञश्चंद्रस्य भूपतेश्च विष्टपे भुवने वित्तं प्रसिद्धं यईक्षणे मन्निमित्तमेव इतरपराङ्मुखस्य चंद्रस्य क्षयी भविष्यसीति शापो दत्तइत्यादि भर्तुः प्रेयस्त्वेन मम माहात्म्यातिशयो वर्ततएव अथ यदि अवतरिष्यता भगवताहं सत्कृता भविष्यामि इति चेन्मम माहात्म्यस्य पराकाष्ठा स्यादिति तदर्थं ब्रह्मणोभक्ता अभवदिति । रोहिण्या देवताब्रह्मेति प्रसिद्धं । 'यद्धैर्वाजनजन्मर्क्षमिति' भागवतंअवतरिष्यंतं भगवंतं प्रति तथा ब्रह्मणा प्रार्थितमिति तदनुरोधेन रोहिणी सत्कृताऽभूदित्र ॥ ४६९ ॥

औषधेति तरणिं सूर्यं नौकां च ॥ ४७० ॥

वयस्येति हे वयस्य सखे पश्य अस्य जनस्य पंचास्यास्यस्य सिंहाननस्य नरहरेर्वश्यता चेत् शस्यस्य स्तुत्यस्य तस्य सस्यस्य धनधान्यादेः संपत् किं विनश्येत् अपि तु न । स्वयं मोक्षसंपत् यं वृणुते ॥ ४७१ ॥

यइति अनंतः शेषस्तेन केयूरकटकादिकरणात् अधिकः सर्वाधिको यः शैलः

भव्याकृतिर्बहुविसर्गनिबद्धभाषो
दुर्गाप्रियोऽस्तु चिरं करहाटको नः ॥ ४७२ ॥

अस्मिन्नीशे शशीशेऽभ्युदयति न कदाऽनर्थकृत् प्रातिकूल्यं
कांते चावां तथेमे भगवत उचिते कालिका काशिका च ॥
प्रायस्त्वेकांतरेयं जनयति हि सुतान् पंचवक्त्रांस्तथाऽहं
नातस्यागस्तु न स्यादिति गिरितनयाद्धांगलग्नेव शंभोः ॥ ४७३ ॥

कालिकासन्निधानेन विना शैलेंद्रमूर्धनि ॥
सानंदं नीलकंठस्य कथं स्यात्तांडवोत्सवः ॥ ४७४ ॥

कपर्दमाली धृतभैक्ष्यपात्रो भूताधिपो नृत्यति तेन मन्ये ॥
आराधकोऽयं तव देवि वर्म्हेर्धृतिस्तु लिख्यास्य ललाटपेट्ठं ॥ ४७५ ॥

कैलासः कुबेरसख्यं दर्शयन् भव्यार्थं जगत्कल्याणार्थं आकृतिर्यस्य 'उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना ' इति श्रुतेः बहवो विसर्गा दानानि तैर्निबद्धा भाषा वाक् यस्य बहुवरप्रदः इति यावत् दुर्गा भार्या यस्य करे हाटकं धत्तूरो यस्य मदोत्पादनार्थं तद्भक्षित्वात् धत्तूरः कनकाव्हयः यच्छिवः करहाटकः अतः करहाटकः ब्राह्मणजातिविशेषः कथं साहि अनंतदोरधारी प्रायेण कशैले इत्याधिकशैलं वासो यस्य कशैल इति ग्रामनाम तत्र तेषां प्रायो वासः यः दारिद्र्येऽपि समर्थतां दर्शयति वस्त्रपात्रभूषणादिनोज्वलाकृतिश्च यस्य भाषा विसर्ग-बद्धा दंडाःपेटी दाराःकडी ताकाःफोडणी इति स्त्रीणां च 'नि' कारेण बद्धा केलेंनि घेतलेंनि पाहिलेंनि इत्यादि दुर्गादेवी प्रिया यस्य उपास्यत्वात् ॥ ४७२ ॥

अस्मिन्निति पार्वत्या विचारितं अयं भगवान् शशीशः शिवः साधुस्वभावात् अत्र अनर्थकृत् प्रातिकूल्यं नास्ति तत्सहचरत्वात् अहं कालिका एषा काशिका काशी च तया मिथः सापत्नभावरहिते एव। परं इयं पंचवक्त्रान् सुतान् जनयति अत्र ये मृतास्ते शिवस्वरूपा भवंतीति भर्त्रनुरूपतनयजनयित्री अहं तु न तथा एकं षडाननं गजाननं परमिति जनितवतीति भर्तृविरूपसुतजनयित्री तस्मादियं एकांतरा भर्त्रासहेति निश्चयः तत्कदाचित्कृत्यागस्तु न स्यादिति अर्धांगलग्नेवेति शशीशे कालिका काशिका शब्दाः प्रातिकूल्येन पठिताअपि अनर्थदा न भवंति काशिका शशीशेन सह एकांतरा समानमध्या उभयोर्मध्ये शिकारः एकत्र दीर्घः अन्यत्र ऱ्हस्वः इति प्रायिकत्वं ॥ ४७३ ॥

शिवस्तांडवं कालीनिकटे कुतः करोति तत्राह कालिकेति नीलकंठस्य शिवस्य मयूरस्य तांडवोत्सवः कालिका गौरी मेघपंक्तिश्च ॥ ४७४ ॥

कपर्दमालीति कपर्दं जटाजूटं मालते धारयति कपर्दाः वराटिकाः तन्मालां बिभर्ति च भैक्ष्यपात्रं कपालं प्रपीटिकां परडीति लोके भूताधिपः शिवः उपासकवि-

संसारं निजकर्मणैव भजते जंतुः परंतु ध्रुवं
क्षेत्रेऽस्मिन्नविमुक्तके पशुपतौ राजन्यहो तामसे ॥
स्यात्किं मुक्तिकथा नृणामिति महाकुत्साऽवयोः स्यादिति
न्यस्तः सत्रविशेषतो व्यरचयत्किं मुक्तिसत्रं शिवः ॥ ४७६ ॥

मार्तंडं वर्णयति

स्वैरवंध्यगणैर्युक्तं वैरवंचितकैरवम्
स्वैरबंधाच्छिदं देवं वंदे मार्तंडभैरवम् ॥ ॥ ४७७ ॥
चरंतं तं तुरंगेण रजनीचूर्णभासुरम्
प्रचंडकरपालं श्रीमार्तंडं प्रणमाम्यहम् ॥ ४७८ ॥

काशीं वर्णयति

महादोषाचारा भयलवविहीना अपि महा-
श्मशाने चासीना उपिलवति भूताधिपतिना ॥
महामंत्रं कंचित्सकृदुपगता एव सहसा
वशीकुर्वंत्येते शिव शिव परां मुक्तिरमणीम् ॥ ४७९ ॥

दोषश्च भुत्याशति आराधकः आराधनकर्ता आराधीति तस्यैव नामांतरं एवं शिवः तव आराधकः संपन्नः परमस्य दीपिका कास्तीति चेत् एवं विधो यो जातः तस्य भालएव सा कीलितेति शिवनयने हि दीप्तो वन्हिरास्ते ॥ ४७५ ॥

संसारमिति न संति विमुक्ता यस्मिंस्तत् पशुपतिः शिवः मूर्खश्च तामसः तमोगुणी अलसश्च आवयोः पुरपुराधीशयोः मुक्तिसत्रं 'क्षेत्रेऽत्र तव देवेश यत्र कुत्रापि वा मृताः ॥ कृमिकीटादयोऽप्याशु मुक्ताः संतु न चान्यथा' इति श्रुतेः ॥ ४७६ ॥

स्वैरिति स्वैः स्वकीयैः अवंध्याः आदिष्टकार्यसंपादका ये गणास्तैः वैरेण वंचिताः कैरवा दैत्याः येन तं स्वैरः यथेष्टचारी अनिच्छायामपि बलादापतितो यो बंधः संसारस्तच्छिदं ॥ ४७७ ॥

चरंतमिति मल्लारिपक्षे करपालः खड्गः करवालः करपालइत्युभयऽमपि कोशांतरे स्पष्टं [रजनी निशा हरिद्रा] श्रीमार्तंडः सूर्यस्तत्पक्षे तुरंगेण तद्युक्तरथेन रजन्याराज्ञेश्चूर्णे चूर्णीकरणे नाशे इति यावत् भासुराः दैदीप्यमानाः प्रचंडा ये कराः किरणास्तान् पालयति तं ॥ ४७८ ॥

महादोषेति ये जारणं कुर्वंति ते महारात्री भयहीनाः संतः श्मशाने भूतप्रेताद्य-धिष्ठितेऽपि कृते येषां भयं नास्ति किमनेनस्यादिति महाश्मशानं काशी भूताधिपती-रुद्रः महामंत्रं तारकं ब्रह्ममंत्रजपं कृत्वा परस्त्रियं वशीकुर्वन्ति तथा काशीस्था दोषाचारेऽपि सकृदेवोपगता मुक्तिं वशीकुर्वंति ॥ ४७९ ॥

गंगां वर्णयति

एषादौ तु सुरापगाऽन्यदपि च ब्रह्मघ्नसंसर्गिणी
स्यादस्या गतिरस्य का नु जगतः स्यादेष दोषो मयि
यद्येतस्य समुद्धृतौ विरचयाम्येषा विचारं मना-
गप्येवं मृशती समुद्धरति किं गंगाऽविशेषाज्जगत् ॥ ४८० ॥

करवीरं वर्णयति

पत्ये श्रीः कुपिताऽत्र वस्तुमगमत्प्रेनं कुवासं धिया
पश्यंत्याः किलनीरजस्थलमिहासीत्सौमनस्यप्रदम् ॥
त्रस्तास्मिन्मधुपप्रसंगत इति श्रेष्ठं ततोऽधिष्ठिता
प्रेष्ठं किं करवीरमत्र यदसौ तद्वासवाक्त्वन्यथा ॥ ४८१ ॥

भूमिं वर्णयति

अप्यवर्णं जनैरेषा गमितोष्मपरोदयम् ॥
क्षमामेव प्रथयति क्षमेव क्षमेव विराजते ॥ ४८२ ॥

शास्त्रिणं वर्णयति

अर्थाहरणकौशल्यं किं स्तुमः शास्त्रवादिनाम् ॥
अव्ययेभ्योऽपि यैरर्था निष्काश्यंते ह्यनेकशः ॥ ४८३ ॥

एषेति सुरापगा देवनदी मद्यनदी च ब्रह्मघ्नः शिवः ब्रह्महा च । शिवेन ब्रह्मणः शिरःकर्तितमिति स ब्रह्मघ्नः ॥ ४८० ॥

पत्येति लक्ष्मीः पत्ये नारायणाय कुपिता सती वैकुंठं परित्यज्य अत्र भुवि वस्तुमगमत् इयमाख्यायिका व्यंकटेशमाहात्म्ये प्रसिद्धा । परंतु एनं कुवासं पृथ्वीवासं कुत्सितवासं मन्वानायाः नीरजस्थलं कमलस्थानं रजोरहितस्थलत्वात् सौमनस्यप्रदं प्रसन्नचित्तत्वस्य कारकं आसीत् तत्र सुमनोभावः पुष्पत्वं चास्ति अथ तत्र मधुपानां मद्यपानां भृंगाणां च सदा प्रसंगइति त्रस्ता सती इदं तु निःशेषरजस्थलं सौमनस्यं प्रकर्षेण ददातीत्येव सत्यमिति मन्वाना तत्परित्यज्य तादृशं श्रेष्ठं करवीरमेवाध्यतिष्ठदेव ननु अत्र पद्मे तस्याः लक्ष्म्याः वासइति वाक् लौकिकी शास्त्रीया च उक्तिः तस्याः का गतिरिति चेत् सा तु अन्यथा अन्यप्रकारेण वर्तमाना साधारणैर्न ज्ञायते यथा कस्यांचित् मंजूषिकायां कस्तूरी कियत्कालं स्थापिताऽभूत् अथ तस्यां कियता कालेन निष्कास्य नीतायामपि तस्यावासस्तत्रास्ति तद्वदत्र स्थिताया अनंतरं गताया अपि लक्ष्म्या वासोऽस्तीति तत्वं वासः सुगंधः वसतिश्च ॥ ४८१ ॥

अप्येति ऊष्मा तापः तस्य परः उत्कृष्टउदयो यस्मात्तादृशं अवर्णं निंदां गमितापि यत्र क्षमामेव प्रथयति निंदितापि क्षमामेव कुरुते इति अवर्णं अकारं ऊष्मा षकारः तस्मात्परः उदयो यस्य क्षमा इत्यत्र षकारात् परं अवर्णं गमिता

भूपादयोऽपि विग्रस्ता नूनं यदुपसर्गतः
विसृजंति बहूनर्थांस्तस्मै ते शास्त्रिणे नमः ॥ ४८४ ॥

वैद्यं वर्णयति

प्रवर्ततेऽगदंकाराः सत्यंकारादनंतरम्
यदाह कारे सत्येति भगवान् पाणिनिः क्रमम् ॥ ४८५ ॥

रोगिणं वर्णयति

देवोऽपि गदी नीचैर्भूत्वादौ प्राप्तरसतया प्रायः ॥
कृतकार्यः पुनरेवं रसार्पकमवंचयन्नरि न चित्रम् ॥ ४८६ ॥
येन स्वस्थाः संतस्तीर्त्वा दुस्तरतरोपतापभरम् ॥
तं वैद्ययोगमिह ये त्यजंति तान्निर्गुणान्नरान् मन्ये ॥ ४८७ ॥

सभ्यं वर्णयति

सभारतो यः पुरुषः स एवेदृङ् न चान्यथा ॥
भूरिवित्तः पुमान्यस्तु स एवेदृङ् न चान्यथा ॥ ४८८ ॥

क्षमा भवति ॥ ४८२ ॥

अर्थाहरणेति अर्थः अभिधेयं द्रव्यं च अव्ययाः व्ययं न कुर्वतः कृपणाः अव्ययानामनेकार्थत्वं ॥ ४८३ ॥

भूपादयइति यस्य शास्त्रिणः उपसर्गात् उपद्रवात् पुनः पुनरागमनस्तवनदैन्यदर्शनरूपात् भूपादयः राजादयोऽपि बहूनर्थान् विसृजंति । भू सत्तायां पा पाने इत्यादयो धातवोऽपि येनासंजितेन उपसर्गेण अनेकार्थान् विसृजंति यथा प्रभवति संभवति अनुभवति परिभवतीति पानं अनुपानं ॥ ४८४ ॥

प्रवर्ततइति अगदंकाराः वैद्याः सत्यंकारं किंचिदादौ द्रव्यं ['सचकार' इति प्रसिद्धं] गृहीत्वा रोगचिकित्सायां प्रवर्तंते । युक्तमेतत् भगवता पाणिनिनाऽयं क्रमउपदिष्टः कारेत्यत्याग इति सूत्रे ॥ ४८५ ॥

देवोपीति गदी गदाधरः रोगी च देवो महाविष्णुरपि आदौ नीचैः वामनः नम्रश्च भूत्वा प्राप्ता रसा त्रिपदा भूः रसायनं च येन तादृशतया प्रायः कृतं कार्यं त्रैलोक्यराज्यं अनामयं च येन तथा सन्नेनं रसार्पकं बलिं वैद्यं च अवंचयत् निगृहीतवान् किं पुनर्नरा एवं कुर्वंतीति तत्र चित्रं न ॥ ४८६ ॥

येनेति ये जना येन वैद्ययोगेन रोगं तीर्त्वा तं पुनस्त्यजंति ते नरा निर्गुणाः मंदाः यथा ये विद्याया अयं वैद्यः सचासौ योगस्तेन उपतापं तापत्रयोपेतं अविद्यामयं संसारं तीर्त्वा पुनः विद्यायोगमपि त्यजंति ते निर्गुणाः कैवल्यभाजः 'येन त्यजसित्यजेति अंते ज्ञानस्यापि । त्यागोक्तेः' ॥ ४८७ ॥

सभारतइति भारतेन सहितः तत्परिशीलकः सभायां रतः स्यात् यश्च भूरि वित्ता

आश्चर्यं--प्रदाय शुणिकेभ्यस्तु स्वसकाशगतं धनम् ॥
आधिं लब्ध्वा सुखीभूता धनिका इति विस्मयः ॥४८९॥

कामांधं—श्रुत्वा विष्णोर्भक्तिमाहात्म्यचर्चां
कामांधानां मूर्ध्न्युदेतीव शूलम् ॥
मूर्धांदोलं ग्राम्यगीते वदंते
वा वाः खाशी ठीक क्यावात होहो ॥ ४९०॥

नैय्यायिकं--लिंगपरामर्शपरा व्यभिचारविचारका हि तर्कज्ञाः ॥
कलयंतीश्वरसिद्धिं तद्धि विपुलमत्र चित्रकृद्भवति ॥४९१॥

प्रश्नोत्तरं—सकलंकस्य संसर्गान्नूनं भवति गर्हितम् ॥
परिपाटी वराकस्य हितमात्रहृति ध्रुवम् ॥ ४९२ ॥

दैवं--राजराजसखोऽप्येव महादेवोऽपि भिक्षते ॥
वक्रे विधौ ललाटस्थे तत्रान्यषां तु का कथा ॥ ४९३ ॥

स्वभावः—जानीमहे जगति जंतुजनस्य नूनं
योनिस्वभावसदृशी भवति क्रियेति ॥
लब्ध्वाऽपि वक्षसि पदं जलराशिकन्या
श्रीवासुदेवचरणप्रवणैव नित्यम् ॥ ४९४ ॥

मैत्री--वन्यानामपि कोशेषु सुहृदां स्वोदयार्थिनां ॥
अर्प्यते स्वोदयादेव श्रीः सेयं मित्रता मता ॥ ४९५ ॥

विदोभावः वित्ता विद्वत्ता यस्य सः एवं भूरिवित्तं द्रव्यं यस्य तादृशः स्यात् नान्यथेति ॥ ४८८ ॥

प्रदायेति आधिं मनोव्यथां बंधकं च गहाणइति लोके ॥ ४८९ ॥

श्रुत्वेति मूर्धानमांदोलयित्वा णमुल् वदंते भासने आत्मनेपदं ॥ ४९० ॥

लिंगेति लिंगस्य गुह्यस्य परामर्शः वारंवारमास्फालनं व्यभिचारः परस्त्रीसंगः एतत्पदार्थद्वयं न्यायशास्त्रे एतन्नामकत्वेन प्रसिद्धं ईश्वरसिद्धिर्हि न्यायमंतरेण न स्यात् नास्तिकनिरासापेक्षत्वात् ॥ ४९१ ॥

सकलमिति कलंकेन सहितस्येत्युत्तरं वराकस्य अनुद्धतस्येति च ॥ ४९२ ॥

राजराजइति राजराजः कुबेरः विधौ दैवे चंद्रे च ॥ ४९३ ॥

जानीमहइति जलस्य स्वभावः निम्नं प्रति सर्पणं ॥ ४९४ ॥

वन्यानामिति वन्यानां वनेभवानां आरण्यकानां पद्मानां च कोशेषु धनगारेषु कोरकेषु च उदयः अभिवृद्धिः उद्भवश्च श्रीः लक्ष्मीः शोभा च मित्रता मैत्री सूर्यता च ॥ ४९५ ॥

सद्यो जातः सौहृदबालमरालोऽधिमानसं तनुयात् ॥
किं नु विनोदमुभयतः पत्राणि पुनर्न चेत्प्रवर्तेरन् ॥ ४९६ ॥

मित्रपत्रं—स्वांतक्षितौ स्नेहलता समुप्ता तद्यत्र सा स्वस्तिमतीति मन्ये ॥
प्रवर्तयेच्चेत्सुमनोविनोदं पुनः पुनः पत्रवती प्रभूय ॥४९७॥

समस्या- चंद्रो गजेंद्रः क्षितिनायकेंद्रो
धनुर्धरेंद्रः शिशुवाग्विलासः ॥
स्याद्दातृभोक्ता चतुरश्च कीदृक्
गृहाण विद्वन् सुकलास्त एते ॥ ४९८ ॥

दैत्यजनोऽदितितनयान् शीतं वन्यो जनो युवा युवतीः ॥
किं बलमाश्रित्य जयति वद विद्वन्नयि गृहाण शुक्रबलम् ॥४९९॥

पर्जन्यः--सरिच्छैलसमुद्रेषु कुतोऽभ्र वसु वर्षसि ॥
भ्रातरेतन्मया ज्ञातं भ्रांतस्त्वं तत्रकारणम् ॥ ५०० ॥

शीतकालः

अस्तं यातो दिनेशः प्रबलमथ हिमं जातमेतत्स्वभावा-
च्छीतानां मामकानां कथमिव पयसां स्यादवस्थेत्यचिंत्यः ॥
अंतस्त्रातुं प्रविष्टोऽनल इव कृपया तान्यपेक्ष्यंतमर्कं
ज्ञात्वा निर्गच्छतोऽग्रे चलति हुतभुजो धूम एष ध्वजोऽस्य ॥५०१॥
शीतर्तुश्चंडभानौ सति न जगदिदं व्याप्तुमीष्टेऽथ तस्मि-
न्नस्तं यातेऽस्यधुर्ये ज्वलनमिह समाक्रम्य नीराशयाऽहे ॥

सद्यइति स्नेहबालहंसः सद्यो जातः उभयतः पत्राणि लेख्यानि पक्षाश्च यदि न प्रवर्तेरन् तदा मानसे चित्ते तन्नामसरसि च विनोदं विहारं मोदं च कथं तनुयात् सुखगतये च न स्यादित्यपि बोद्धव्यं सुष्ठु खे गतिः सुखप्राप्तिश्च॥४९६॥

स्वांतेति मनआलवाले स्नेहवल्ली उप्ता सा जिवंतीति कदा मंतव्यं यदि पुनः पुनः वारंवारं पत्राणि लेख्यानि पर्णानि च समागत्य सुमनोविनोदं मनसः आनंदं पुष्पविनोदं च प्रवर्तयति ॥ ४९७ ॥

चंद्रइति कलाभिः सहितः सुष्ठुकरः शुंडादंडो यस्य करैः करभारैः सहितः रलयोरैक्यं सुष्ठुकुशलः करो यस्य सुतरां कलः मधुरः सुकलः सम्यक् धनव्ययज्ञः सुष्ठुकला गीतादयो यस्य 'सुकलो दातृभोक्तरीत्यमरः' ॥ ४९८ ॥

दैत्यजनइति शुक्राचार्यः शुक्रः अग्निः शुक्रं रेतः ॥ ४९९ ॥

सरिदिति अभ्रेति पदं भ्रांतं भ्रकारांतं भ्रांतियुक्तत्वं च ॥ ५०० ॥

शीतकाले जलाशयान्निर्गच्छंतं धूममुत्प्रेक्षते । अस्तमिति मामकानां मत्प्रसूतानां 'अग्नेराप' इति श्रुतिः शीतस्य जेता रविरागतइति जलान्निर्गच्छतः ॥ ५०१ ॥

कारागारे निवेश्य प्रसभमथ जगद्भ्रासमेतन्निशम्य
प्राप्तं क्रुद्धं दिनेशं कथयति किमयं धूमदूतैः स्वत्रासम् ॥ ५०२ ॥
वक्षोजदुर्गे सुघने त्रिवलीपरिखावृते ॥
श्रितः किमूष्मा विजितः शीतेनातिबलीयसा ॥ ५०३ ॥
यद्यंबरांतः शयितः सपौरस्त्यः पयोधरः ॥
कथं शीतकथाश्रोत्रपथमभ्येतुमर्हति ॥ ५०४ ॥
हाहाहूहूहालापैर्धनंजयस्यातिसंस्तवो यत्र ॥
मकरारंभो जंभभिदालय इव सहतिलोत्तमारंभः ॥ ५०५ ॥
स्विन्नः कंटकनिचितः प्रकटितरागश्च सहसितो मधुरः ॥
दामोदरदर्शनजो राधावस्थाविशेष इव तिलकः ॥ ५०६ ॥
उष्णकालः--ग्रामे मुखध्वनिं श्रुत्वा भयसंविग्नमानसा ॥
त्यक्त्वा वनविहारं श्रीरंतर्गंतुमना इव ॥ ५०७ ॥
बहुलोत्सवो जनोऽसावृतुश्रियः पुष्पसमय इति ॥
कंदर्पः कथमिव न स्वध्वजमस्मिन्नुदूढयतु ॥ ५०८ ॥

अन्यथोत्प्रेक्षते शीतर्तुरिति धुर्यं कार्यभारिणं सूर्यो हि स्वतेजोऽसौ दिनांते निधत्ते क्रुद्धं आरक्तत्वात् आग्नेयकोणे तदवलोकनायेव गतं चेति ज्ञेयं ॥ ५०२ ॥

वक्षोजइति वक्षोजशब्दमध्ये ऊष्मा षकारो दृश्यते ॥ ५०३ ॥

यद्यंबरांतइति अंबरांतः प्रावरणवस्त्रांतः पौरस्त्यः तारुण्यावस्थासंभवः स्तनः शयितश्चेत् शीतवार्ता न । कांतामालिंग्य सुप्तं चेन्न शीतबाधा । आकाशे यथा पौरस्त्यहस्तचित्रोत्तरभावी सहि पूर्वस्यां प्रादुर्भवति मृगमारभ्य तत्पश्चात्प्रादुर्भूय पुरो गच्छति तत्र शीतमस्ति पौरस्त्ये तूष्मेति सर्वजनप्रसिद्धं ॥ ५०४ ॥

हाहेति मकरसंक्रमणारंभः तत्र ह्यतीव शीतमिति धनंजयस्य अग्नेः हा हा हू हू इति प्रकारैः शब्दैः सह संस्तवः परिचयः तिलोत्तमानां दानाद्यारंभेण सहितः 'तिलभुक् तिलदाता चेति' स्मृतेः जंभभित् इंद्रः तस्य गृहं तत्र हाहा हूहू नाम गंधर्वयोरालापैः अर्जुनस्य सम्यक्स्तवः प्रियपुत्रत्वात् तिलोत्तमा च रंभा च ताभ्यां सहितः ॥ ५०५ ॥

स्विन्नइति महाराष्ट्रे शार्करतिलान् ददति भुंजते च जनाः ते च स्विन्नाः स्वेदेन अग्नेरूष्मणा सिद्धाः कंटकैर्युक्ताः तत्र केशरादिरंजनं कुर्वंतीति प्रकटितं रागः सितया शर्करया सहितः अतएव मधुरः अन्यत्र स्वेदयुक्तः रोमांचयुक्तः प्रकटितो रागः प्रेमा यत्र हसितेन स्मितेन सहितः मधुरो रम्यः ॥ ५०६ ॥

ग्रामेति माघांतं पश्चिमधान्यौपधिरूपा लक्ष्मीः मुखध्वनिं बुंबारवं स च महानर्थं विना न जायतइति ॥ ५०७ ॥

प्रातःकालः--सूरे तूदयमासाद्य स्वप्रतापं वितन्वति ॥
युक्तं नक्षत्रनिवहो निस्तेजस्को विलुप्यते ॥ ५०९ ॥
दोषोपचयस्तावज्जघन्यकर्मणि नरं नियोजयति ॥
सुदिनं तु शुचौ कर्मणि सदसद्वस्तुस्वभाव एवायम् ॥ ५१० ॥
पुरुषचर्या--भवितव्यं प्रसिद्धेन नरेणाति प्रयत्नतः ॥
पाणिन्याद्या ह्यविज्ञातं नरं नरकमूचिरे ॥ ५११ ॥
सदशन एव सदशनो विकलः किल जायते विकल एव ॥
असुरत एवासुरतस्तद्वदविनयो जनोऽविनय एव ॥ ५१२ ॥
श्रेष्ठ्यस्योज्ज्वलतैव कारणमिति प्रायो बहिर्दृष्टयः
पश्यंत्यस्य जना न कर्म सहजं किंसाधु वाऽसाध्विति ॥
शृंगारो हि जघन्यकर्मसचिवो मूर्धन्यतां प्रापितः
शांतः पश्य जघन्यतां बत पुनर्मूर्धन्यकर्मापि सन् ॥ ५१३ ॥
बह्वर्थतामव्ययानां विद्वद्भुक्तां न धारय ॥
सुप्रतिष्ठाऽत्र नास्तीति भगवान्पाणिनिर्जगौ ॥ ५१४ ॥

बहुलेति पुष्पसमयः वसंतः ऋतुदर्शनं च स्वध्वजः प्रसिद्धः कामांकुशश्च ॥ ५०८ ॥

सूरेइति सूरे सूर्ये शूरे च उदयं प्रसिद्धं अभिवृद्धिं च प्रतापं आतपं शौर्यं च नक्षत्राणां क्षत्रभिन्नानां ॥ ५०९ ॥

दोषेति दोषाणां उपचयः वृद्धिः रात्रेरुपचयश्च जघन्यं नीचं रतंच सुदिनं पुण्यं दिवसश्च शुचौ शुद्धे मुखक्षालनस्नानादौ ॥ ५१० ॥

भवितव्यमिति अज्ञातार्थे कप्रत्ययो विहितः अज्ञातो नरः नरक इति ॥ ५११ ॥

सदशन इति सदंतश्चेत् सम्यक् अशनं भोजनं यस्य विकलः कलाशून्यः क्लेशादिविव्हलश्च असुषु प्राणेषु रतः बलरक्षणं चिकीर्षुः नास्ति सुरतं यस्य बहु सुरतविमुखः अविनयःविनयशून्यः नयतीति नयः पचाद्यच् अवीनां मेषाणां नयः औरभ्रः धनगर इत्यर्थः ॥ ५१२ ॥

श्रेष्ठ्यस्येति उज्ज्वलता वपुर्वस्त्रभूषणादिभव्यता जघन्यकर्मणि नीचकर्मणि रते च सचिवोऽपि मूर्धन्यतां ' शृंगारवीरकरुणाद्भुतहास्यभयानकाइति ' ' शृंगारो रसमूर्धेति ' रसमीमांसा जघन्यतां अंतिमतां नीचतां च मूर्धन्यं श्रेष्ठं योगधारणादिना नित्यवस्तुविवेकेन च तस्माल्लोकयात्रायां पुरुषेण उज्ज्वलेन भाव्यं न मलिनेन ' शृंगारः शुचिरुज्ज्वलः ' ॥ ५१३ ॥

बह्वर्थतामिति यो न व्ययं करोति सः बह्वर्थः अव्ययादीनां चादीनां अनेकार्थत्वं तेषु अव्ययेषु सुपः सप्त विभक्तीनां प्रतिष्ठा नास्ति अव्ययादाप्सुपइति लुग्विधानात् यो व्ययं न करोति तस्य सुतरां प्रतिष्ठापि न ॥ ५१४ ॥

सुवृत्तो बलिमूर्धन्यो घनः पीनोऽपि वा जनः ॥
बालिशस्य प्रसंगेन पतत्येव यथा स्तनः ॥ ५१५ ॥
महदाधारदानाय महांतोऽर्हंति नेतरे ॥
अचलाधारिणो नूनमचला एव केवलम् ॥ ५१६ ॥
द्विधापि लोके बव्हाशो विद्वानपि न राजते ॥
द्विधापि सुकलस्तस्मिन्नविद्वानपि राजते ॥ ५१७ ॥
भोजनं--तनुग्रासे स एव स्यादसुग्रासेऽपि स स्मृतः ॥
तस्मात्सर्वप्रयत्नेन भवेन्नित्यं सुभोजनः ॥ ५१८ ॥
देशस्थः--अधितिष्ठन्नभिमानं व्यालस्यधरः शिरःस्थितर्णभरः ॥
भूतिव्ययकृत्तिक्तकभक्षपरः शंकरोऽग्र्यदेशस्थः ॥ ५१९ ॥
मार्जारः
अमृतैकलालसात्मा विगतस्नेहः स्वकार्भकेष्वपि यः ॥
गिरिकाननासनोऽयं मार्जारः संयमीव मे भाति ॥ ५२० ॥

सुवृत्तइति घनः गंभीरः कठिनश्च सद्वृत्तः सच्चारित्रः वर्तुलश्च बलिनां मूर्ध्नि स्थितः अत्यंतं बली त्रिवलीमस्तके स्थितश्च बालिशः मूर्खः शिशुश्च बालिशेन सह महता प्रसंगो न कार्य इति ॥ ५१५ ॥

महदेति अचला पृथ्वी अचलाः पर्वताः ॥ ५१६ ॥

द्विधापीति बव्ही आशा यस्य बहु अश्नाति सः सुकलः द्रव्यस्य सम्यक् व्ययं जानाति शोभनगीतादिकलायुक्तश्च ॥ ५१७ ॥

तनुग्रासइति तनुः स्वल्पः यो ग्रासः भोजनं तत्र सति तनोः शरीरस्य ग्रासः कार्श्यं असुग्रासे सुग्रासाभावे असूनां प्राणानां ग्रासः मरणमित्यर्थः तस्मात् सुष्ठु सुतरां च भोजनं यस्य तथा स्यात् तेन जनः सुष्ठु भा कांतिः प्रतिभा च यस्य तादृशः स्यात् ॥ ५१८ ॥

अधीति अभिमानी विशेषेण आलस्यधरः शिरस्थितऋणभरः ऋणे मग्नः भूतेः संपत्तेः व्ययं करोति तिक्तं तेमनं भक्षं भाकरीति लोके तत्र परः अग्र्यदेशस्थः बालेघाट्या द्विजः शंकरइति सहि अहंकाराधिष्ठितः रुद्रइति प्रसिद्धं व्यालः सर्पः शिरस्थितः ऋणभरो जलभरो गंगाधर इत्यर्थः तिक्तकं कालकूटं तद्भक्षणपरः भूतेः भस्मनः व्ययं करोति बहुभस्मधारित्वात् अग्र्यः ऊर्ध्वः यो देशः कैलासस्तत्र तिष्ठति ॥ ५१९ ॥

अमृतेति अमृते दुग्धे स्वशिशून् भक्षयति गिरिकाः बालमूषिकाः तासां अनाः प्राणाः तान् नाशयति सशयोरैक्यं अन्यत्र अमृते मोक्षे स्वपुत्रेष्वपि ममताशून्यः गिरौ कानने च आसनं स्थितिर्यस्य ॥ ५२० ॥

शृंगिणं वर्णयति

शृंग्यर्भकोऽपि कुपितो घाताय महतां मतः ॥
अचिरादेव यत्प्राप्तः पंचतां राजकुंजरः ॥ ५२१ ॥

धूम्रपत्री तमाखुरिति भाषायां तां वर्णयति

सुपर्णपरिशीलितो भवति साधुपूगाश्रितः
करोति सुदृढस्थितिं द्विजगणस्य साराान्वितः ॥
सदा स्पृहयते सुधामिति बुधा गदाभृत्सम-
स्तमाखुरिति सेव्यतां न वितनोति रागं यतः ॥ २२ ॥

ज़र्दा--जनार्दनो नरहितो भूत्वाऽऽकारविपर्ययात् ॥
अवतीर्ण इव प्रायः स जर्देत्यभिधीयते ॥ ५२३ ॥
भर्तुः प्रियतमं वस्तु संगृह्णातु सदा सती ॥
करोति यद्वैमवती विजयां निजसन्निधौ ॥ ५२४ ॥

सायंकालः

संध्या प्रौढवधूरिनो व्रजति मां हित्वेति रागाकुला
पृष्ठे यात्यपि हस्तगो न स इति प्रायो विरक्ताभवत् ॥
ताभिस्त्रैर्यमुनाजलैर्हरिपदं संस्नप्य दत्वा पुन-
र्गंधानिंदुमयांस्तनोति परितस्ताराप्रसूनांजलिम् ॥ ५२५ ॥

शृंगीति अर्भकोऽपि शृंगी वृषमहिषादिः कुपिता महतामपि प्राणिनां घाताय स्यात् यतः राजकुंजरः महागजः पंचतां मरणं प्राप्तः स्यात् शृंगीनामा शमिकमुनि पुत्रः तस्य शापेन राजकुंजरः नृपश्रेष्ठः परिक्षिन्मरणं प्राप्तः ॥ ५२१ ॥

सुपर्णेति सुष्टुपर्णानि तांबूलीदलानि तैः शीलितः सेवितः साधुपूगं पूगफलं द्विजगणस्य दंतानां दृढस्थितिं दाढर्यं ' धूम्रपत्री दंतदाढर्यप्रदा पित्तकरी सरेति ' वैद्यकात् सारः खदिरसारः सुधां चूर्णं अन्यत्र सुपर्णो गरुडः साधूनां सनकादीनां पूगः समूहः द्विजानां स्थितिं पालनं सारं अराभिः सहितं चक्रं सुधा अमृतं एवं गदाभृता विष्णुना समश्चेत्सर्वदा सेव्यः किंत्र यतः रागं रक्तिमानं स्नेहं च विष्णुस्तु वैराग्यं तनोति भेदः ॥ ५२२ ॥

जनार्दनेति धूमपत्र्येव एलालवंगकेशरपथ्यादिसंस्कृता जर्देति उच्यते ज़नार्दनः नरेभ्यो हितः सन् आकारस्य आकृतेः विपर्ययं कृत्वा रूपांतरं गृहीत्वा अवतीर्ण इव जनार्दनः नरहितः नकारद्वयेन रहितः जआर्द इति शिष्टं तत्र आकारस्य विपर्यासः कृतः दकारोत्तरभावं गतश्चेत् जर्दाइति संपद्यते ॥ ५२३ ॥

भर्तुरिति विजयां नाम सखीं पार्वत्याः जयाविजयेति सखीद्वयं विजया मदद्रव्यं भांगइति सा च शंभोः प्रिया शांभवीत्युच्यते ॥ ५२४ ॥

कुक्कुरः

मध्यऋतुसमय एव स्त्रियमुपगच्छत्यशेषभूतानाम् ॥
यो जागर्ति निशायां शुनकः प्रतिभाति संयमीत्र मम ॥ ५२६ ॥

मत्कुणः

यो रात्रिंचरशेखरः किल दशास्यः कोणपाल्याश्रयो
वज्राबाधितशक्तिको नृरुधिरं पातुं सदा वांछति ॥
उन्मत्तो मधुयोगतो भवति यस्तन्मत्कुणो रावण-
स्तस्मान्नश्यति पुत्रपौत्रसहितः सीताभिसंधानतः ॥ ५२७ ॥

मैथुनं

सततं सुरताभिकांक्षिणो बलिमुख्या अपि शुक्रबृंहिताः ॥
असुराः क्षयमाशु भेजिरे मनुजानां पुनरत्र का कथा ॥ ५२८ ॥
स्त्रीणामल्पापराधानां नैव कार्यं गवेषणम् ॥
अपराधस्थितिं ह्यस्या निर्ममौ स्वयमीश्वरः ॥ ५२९ ॥

संध्योति इनः सूर्यः स्वामी च हरिपदं विष्णुपदं आकाशं च रागः रक्तिमा प्रेमा च विरक्ता निर्विण्णा रक्तिमहीना च ॥ ५२५ ॥

मध्येति ऋतवः षट् वसंतादयः एतएव समयः तस्य मध्ये वर्षाशरद्रूपे हेमंत शिशिरयोः समासोनेति पंचर्तुपक्षे वर्षासु मध्यर्तुसमयइत्यव्ययीभावः तृतीयासप्तम्योर्ब हुलमिति नामभावः पारेमध्येषष्ठ्यावेति एकारांतनिपातनेऽपि तस्य संधिव' शाल्लोपः तादृशे काले मैथुनमाचरति ' कुक्कुरो रात्रिजागरः संयमी ' या निशा सर्व भूतानां तस्यां जागर्ति संयमीति ' भार्यां ऋतुसमयमध्येएव गच्छति तेन ब्रह्म-चर्यहानिरभावात् ॥ ५२६ ॥

यइति रात्रिचराणां मशकादीनां मध्ये शेखरः अतिनिपुणत्वात् दशाकारोऽव-यवः आस्ये मुखे यस्य यया रक्तं शोष्यते प्रशस्तः कोणः कोणपाली ' प्रशंसावचनै-श्चेति ' समासः सा आश्रयो यस्य स्तंभकुड्यादीनां कोणेषु वसति वज्रेषु हीरकेषु अबाधितशक्तिः एतस्य रक्तेन हीरकाः स्फुटंति वज्रभस्मप्रकरणे वैद्यके स्पष्टं नृरु-धिरं विना यस्य आहारएव नास्ति मधोश्चैत्रस्य योगेन समृद्धो भवति रावणपक्षे रात्रिचराः राक्षसाः दशमुखः कोणपाः राक्षसाः तेषामाली पंक्तिस्तस्याः आश्रयो यस्य वज्रेण इंद्रायुधेन अबाधिता शक्तिर्यस्य मधु मद्यं अतएव यथा रावणः सीताभिसं-धानेन सकुटुंबो मृतः एवमयमपि शीतकालस्याभिसंधाने सतीति ॥ ५२७ ॥

सततमिति सुरता देवत्वं बलिः एतन्नामा दैत्यः शुक्रः शुक्राचार्यः सुरतं मैथुनं बलिनः बलवंतः शुक्रं रेतः तस्माद्बहुव्यवायो न कर्तव्यः ॥ ५२८ ॥

स्त्रीणामिति अपरस्य अधास्थितिः रतिममये ॥ ५२९ ॥

स्तनः—पयोधरोद्गमस्यांतरंबरे प्रांशुभाविनः ॥
चांचल्युपस्थितिः कार्येजपत्वमधिगच्छति ॥ ५३० ॥
धाराधराणां किल वृष्टिपातो धराधराणां शिखरेषु पूर्वम् ॥
तथैव यूनामपि दृष्टिपातः पयोधराणां शिखरेषु पूर्वम् ॥ ५३१ ॥
पयोधरघनीभावस्तावदंबरमध्यगः ॥
आश्लेषोपगमस्तत्र यावन्नैव प्रवर्तते ॥ ५३२ ॥
पयोधरघनीभावस्तावदंबरमध्यगः ॥
हस्तलीलायितं तत्र यावन्नैव प्रवर्तते ॥ ५३३ ॥

प्रौढां प्रति भर्तुर्नर्मोक्तिः

सद्वृत्तं स्तनमंडलं यदभवत्तत्किं पुनः सांप्रतम्
दूरादेव बलंबते भवति न स्प्रष्टुं यमस्यादरः ॥
देवेनैव जघन्यकर्मणि बलादापीड्य संयोजितं
भूयो बालिशसंस्तवो बत ततः पातित्यमेयान्न किम् ॥ ५३४ ॥
स्तनौ तवाशेषपतनौ तु बाले स्थ्याबसीतेति तदीयभाले ॥
कालेन लिप्त्वा जनदृष्टिभीत्या प्रीत्या महत्या किमिवावृणोषि॥५३५॥

वृद्धस्य भार्या

पुरुषस्य पुराणस्य द्वितीया युवतिस्तु या ॥
असौ वसुमती नैवेत्येवं हि कथमुच्यताम् ॥ ५३६ ॥

पयोधरेति चंचलस्य भावः चांचली सा स्त्रीणां वस्त्रांतरे पयोधरोद्गमः शीघ्रमेव भविष्यतीत्यस्य सूचिका यथा चंचला विद्युत् तस्याइयं चांचली उपस्थितिः आकाशे मेघोद्गमस्य सूचिका ॥ ५३० ॥

धरेति स्पष्टं ॥ ५३१ ॥

पयोधरेति पयोधरो मेघः स्तनश्च घनीभावः सांद्रता काठिन्यं च अंबरं नभः वस्त्रं च आश्लेषा नक्षत्रं आलिंगनं च आश्लेषानक्षत्रनिर्गमे मेघाः विरलाः भवंति तथाऽन्यत्र शैथिल्यं भवति ॥ ५३२ ॥

पयोधरेति पूर्वार्धं समं हस्तनक्षत्रस्य करस्य च ॥ ५३३ ॥

सद्वृत्तमिति सद्वृत्तं उत्तमचरित्रं वर्तुलं च यथा कथंचिदपि तं प्रति स्प्रष्टुं आदरो न भवति स च दूरात् अवलंबते सन्निकर्षं न भजति तद्वदिदं कुतः उत्तरं देवेन परमेश्वरेण भवता च जघन्यकर्मणि नीचकृत्ये रते च योजितं तदनंतरं बालिशस्य अज्ञस्य बालस्य च संस्तवः परिचयः तस्मात्पातित्यं कथं न स्यात् तत्र च सति सर्वं संगच्छत एवेति ॥ ५३४ ॥

स्तनाविति हृद्यौ हृदि भवौ मनोहरौ च ॥ ५३५ ॥

सर्वोत्तमस्यापि पुराणपुंसो योषिद्द्वितीया किल सारसाढ्या ॥
नूनं पतत्येव विचल्यमाना भुजंगराजस्य बतोत्तमांगे ॥ ५३७ ॥
पुराणपुंसो ललनाद्द्वितीया विचल्यमाना पतिता भुजंगे ॥
विलोक्यतेऽथापि कुनायकैः सा तत्साधु सर्वसहतां बिभर्ति ॥ ५३८ ॥
परस्त्रीपराङ्मुखः
मामकं कौशलं दृष्ट्वा मा कार्षीः किलकिंचितम् ॥
भुजंगेन विना भोगलाभो नैव भविष्यति ॥ ५३९ ॥
जरा—ब्रवीम्यहं किं बहुशः कवीश्वरा
जरा नराणां सुतरां दुरासदा ॥
यया यियासोरपि निर्जरेशितुः
पादेऽपि वेधो रचितो निजोचितः ॥ ५४० ॥
कायापक्षयहेतू जरे परं तत्र राक्षसी प्रवरा ॥
या किंचिदपि शरीरं सुदृढतरं संदधाति स्म ॥ ५४१ ॥
सुप्प्रत्ययादजायाह्वहुशोभव्याकृतिख्याता ॥
त्वमेक एव हि जराकारं कुर्यादसारचितम् ॥ ५४२ ॥

पुरुषेति पुराणपुरुषः वृद्ध· विष्णुश्च तस्य द्वितीया भार्या भूदेवी च वसुमती द्रव्यवती पृथ्वी च वृद्धस्य स्त्री तस्य सर्वस्वं स्वाधीनं कृत्वास्ते इति ॥ ५३६ ॥

सर्वोतमस्यापीति सर्वोत्तमस्य गुणैः संपत्त्या च वृद्धस्य विष्णोश्च द्वितीया योषित् भूः सा रसा पृथ्वी आढ्या धनिका किं च सारसाढ्या कमलाढ्या 'कूर्मवराहशिला रूढां नीलोत्पलकरद्वयां' इति तद्ध्यानात् किं च सारसाढ्या शृंगारेणाढ्या विचल्यमाना यदा तदा भुजंगराजस्य शेषस्य उत्तमांगे शिरसि पतिता भुजंगा जारा. येषां राज्ञः श्रेष्ठस्य उत्तमे अंगे पतति या वृद्धस्य द्वितीया भार्या सा रसेन आढ्या सती विचल्यमाना चेत् व्यभिचारिणी भवति वा पतिता भुवि भवति ॥ ५३७ ॥

पुराणेति कुनायकाः राजानः ये केऽपि पुरुषास्तैरपि एतादृशी या सा सर्वं सहतएव या तु सती सात्वन्यकृतनर्मादि नितरांनसहते तथा नेयं ॥ ५३८ ॥

मामकमिति किलकिंचितं रागभयलज्जादिगुंफः रतेराभिव्यंजकः भुजंगेन जारेण सर्पेण च भोगः रति सर्पदेहश्च ॥ ५३९ ॥

ब्रवीमीति यियासोः निजधाम गंतुमिच्छोरीशितुः श्रीकृष्णस्य पादेऽपि यदा जरया वेधः कृतः जरा नाम व्याधः सा आख्यायिका भागवते स्पष्टैव ॥ ५४० ॥

कायेति हे जरे शरीरनाशहेतू यया राक्षस्या जरया जरासंधस्य जन्मना द्विधाभूतशरीरस्य शरीरे दृढतरं संहितं अन्या जरा तु न तथा दृढतरसंधां न करोति ॥ ५४१ ॥

इति संकीर्णे

इंदोर्नैल्यमिदं वदंतु कवयो यत्किंचिदंकादिकं
सिद्धांतस्त्वमुनैव हृत्प्रणिहितः श्रीकृष्ण आलोच्यताम् ॥
नोचेज्जातमिमं नमेत्कथमयं द्रुह्यंति नास्मै ग्रहा
ईहंते किल यद्बलं सुमनसां श्रेष्ठः कुले चाच्युतः ॥ ५४३ ॥

तस्मात्

ध्यातव्यं सर्वदा त्वत्पदमिति मम यश्चित्त आशांकुरोऽस्मिन् ॥
बीजावापः कृपा ते रघुवर न परं किंचिदन्यद्विजाने ॥
लोभं दुर्वासनेयं शलभ इव मुहुः प्रेक्षते तत्कृपाब्धे
रक्षैनं स्त्रोतवृक्षानपि कृपणजना प्राय आप्याययंति ॥ ५४४ ॥

कवयः कथयत कोऽन्यः कृष्णात्करुणाकराद् विनैकस्मात् ॥
करकमलकोरके स्वे कामं कुर्वीत नरकभीरुजनम् ॥ ५४५ ॥

मृत्यूदर्कादघाद्घोरात्त्रातुं मुग्धजनं प्रति ॥
कतमो नाम कुशलो विना कृष्णं कृपार्णवम् ॥ ५४६ ॥

सुप्रत्ययेति यः बहुशः भव्या कल्याणकारिणी आकृतिर्यस्य तस्य [illegible] स एवैकः अजाद्यात् अजोऽहं अद्वयोऽहं इत्याद्यात [illegible]यात् उत्तमज्ञानात् जराकारं असारचितं तुच्छं कु[illegible] यः बहुशोभावेदस्य येन मुखस्थानीयत्वात् ' मुखं [illegible] स्मृतं ' इत्युक्तेः तस्याः व्याकृतेर्व्याकरणस्य ध्याता स्मर्ता [illegible] इत्यर्थः सएव अजाद्यात् स्वराद्यात् सुप्रत्ययात् सुप्संज्ञात् प्रत्ययात् औजसादि रूपात् जराकारं जराशब्दसंबंधिनं आकारं आवर्णं असारचित्तं कुर्यात् ' जराया जरसन्यतरस्यामिति ' सूत्रात् ॥ ५४२ ॥

इंदोरिति चंद्रस्याभ्यंतरे यत्कृष्णं दृश्यते तद्विषये बहवो विवदंते मम तु सिद्धांतः अनेन द्विजराजेन हृदये श्रीकृष्णएव प्रणिहितः तेन कारणेन यं द्वितीयायां दृश्यमानमात्रं जना नमंति नास्मै ग्रहाद्रुह्यंति ' विधोर्नो रिपुः इति वचनात् सर्वग्रहानुकूल्येऽपि यस्य बलं अवश्यमपेक्ष्यते देवाश्च कृष्णपक्षे यमापीय तुष्टाः पुष्टाश्च भवंति वंशे च भगवदवतारः एतादृक् सौभाग्यमन्यथा कथं स्यादिति ॥ ५४३ ॥

ग्रंथांतरे रामं प्रार्थयते ध्यातव्यमिति स्पष्टं ॥ ५४४ ॥

कवयइति नरकात् भयं प्राप्नुवंतं जनं कृष्णं विना को नु हस्ते कुर्यात् नरकासुरेण बंदीकृतं स्त्रीजनं च कः करे कुर्यात् विवहेदित्यर्थः तादृशः कृष्ण एवेत्यर्थः ॥ ५४५ ॥

मृत्यूदर्कादिति मृत्युः संसारः उदर्कः उत्तरफलं यस्य तादृशादघात् पापात् मुग्धजनं अविद्वांसं त्रातुं कृष्णाद्विनाऽन्यो नास्ति यथा मरणप्रदात् अघासुरात् मुग्धजनं गोपशिशुजनं ॥ ५४६ ॥

यत्कृपालेशवशतो मंदोऽपि धिषणायते ॥
वंदे तं परमानंदकंदं श्रीनंदनंदनम् ॥ ५४७ ॥
मम नाथ भवान् जननी जनकः सहजः सुहृदो गुरवो द्रविणम् ॥
समुपेक्षत एष भवान्यदि मां वद यामि परं कमहं शरणम् ॥ ५४८ ॥
इयं स्वजननीमिति स्वयमिहात्महतां मत्कृतिं
दधल्लघुधियं पुनर्मयि महात्मतां चात्मनि ॥
वदेद्यदि महात्मनां सदसि योऽन्यदीयां पुमान्-
अलक्ष्मणतया पितुः पितृकुटुंबिनीमप्यसौ ॥ ५४९ ॥
यस्य श्रीकरहाटकाभिधमहाक्षेत्रे निवासो महा-
देवो यस्य पिताऽच्युतांघ्रिनिरतो माता च गीताह्वया ॥
सर्वस्वं रघुनंदनांघ्रियुगलं यस्यैहिकामुष्मिकं
ग्रंथेऽस्मिन्स निमित्तमात्रमभवत्पंतादिमो विठ्ठलः ॥ ५५० ॥
हृत्पुंडरीकांतरसन्निविष्टः श्रीरामचंद्रः कुलदैवतं मे ॥
यथा यथाप्रेरयदप्रमेयस्तथातथाऽवोचमिदं समग्रम् ॥ ५५१ ॥
शालिवाहनभूपालशकेऽश्वाश्वाश्वभूमिते [१७७५]
ग्रंथोऽयं ग्रथितः संतः पंतविठ्ठलशर्मणा ॥ ५५२ ॥

इति श्रीमद्राजाधिराजरघुनंदनसुंदरपदद्वंद्वारविंदमकरंदमिलिंदायमानमानसेन शांडिल्यकुलतिलकायमानेन पंतमहादेवनंदनेन गीतापराभिधानवाराणसीगर्भसमुद्भवेन ब्रह्मण्याग्रगण्यपदव्यारूढश्रीनिवासपंडितानिधिधर्मपरिषत्पुरुषप्रवरोज्ज्वलेन पंतविठ्ठलेन विरचितं सुश्लोकलाघवं समाप्तम्॥

यत्कृपेति स्पष्टं ॥ ५४७ ॥ ममेति स्पष्टं ॥ ५४८ ॥

इयमिति स्वस्य आत्मनः द्रव्यस्य तदुपलक्षितप्रतिष्ठादेश्च जननी माता उत्पादयित्री अलक्ष्मणः दरिद्रः अन्यदीयां कालिदासबाणादीनां संबंधिनीं कस्यचित् महाढ्यस्य पितृकुटुंबिनी माता ॥ ५४९ ॥ यस्येति स्पष्टं ॥ ५५० ॥

हृत्पुंडरीकेति स्पष्टं ॥ ५५१ ॥ शालिवाहनेति स्पष्टम् ॥ ५५२ ॥

इति श्रीमद्राजाधिराजरघुनंदनसुंदरपदद्वंद्वारविंदमिलिंदायमानमानसस्य शांडिल्यकुलतिलकायमानस्य पंतमहादेवनंदनस्य गीतापराभिधानवाराणसीगर्भसमुद्भवस्य ब्रह्मण्याग्रगण्यपदव्यारूढश्रीनिवासपंडितानिधिधर्मपरिषत्पुरुषप्रवरोज्ज्वलस्य पंतविठ्ठलस्य गुरोश्चरणशुश्रूषापरायणेन शिष्येण श्रुतलिखिता सभक्त्याख्या सुश्लोकलाघवव्याख्या समाप्ता.

शुद्धिपत्रम् ।*

पृष्ठं.	पंक्तिः.	अशुद्धं.	शुद्धं.	पृष्ठं.	पंक्तिः	अशुद्धं.	शुद्धं.
[illegible]	२४	गतस्तदत्र	गतस्तदत्र	२६	१७	मत्वात्	मतत्वात्
३	२६	प्रयच्छेतेति	प्रयच्छतेति	२८	१३	सोयंऽरा	सोऽयं रा
३	२१	श्रीगुरोरिति	श्रीगुरोरिति	२८	२१	वम्ल	वाम्ल
५	५	ताम्यामु	ताम्यामु	२९	८	स्वेव	स्वेष
६	१६	रक्षैयात्ज	रक्षैयाज्ज	२९	२१	यश्म	यस्य
६	२४	परार्धस्यापार	परार्धस्य पार	२९	२८	कुल्ये	कूल्ये
	१०	यत्तुवै	यत्तु वै	३२	१०	वृण्व	वृष्णि
	३	प्रभोमू	प्रभोर्भू	३३	३१	न स्व	यस्त्व
	२४	खं जनस्य	खंजनस्य	३६	२८	इमि भवति	इति भवसि
७	३१	तत्तुं	नत्तु	३७	१४	मैमितिक	मैमित्ति
७	१५	प्रत्युज्यते	प्रयुज्यते	३९	[illegible]	ऽमुद्र	मुद्रा
८	१६	इत्यत्रं	इत्यत्र	३९	३१	शांक्या	शांक्य
८	१६	श्रुति	श्रुतिः	४०	१८	मपिः	मपि
८	१६	मकारतु	मकारस्तु	४०	२१	मूत्व	मूत्वा
८	३२	रित्याच्चा	रित्याचा	४१	१६	म्यज	व्यक्य
९	२८	म स्माक	मस्माक	४२	२४	द्रुक्त	यद्रुक्त
९	३१	निर्धर्मकस्य	निर्धर्मकस्य	४५	१०	मामव	मानव
१०	३	साधम्	साधनम्	५४	२२	मामायाः	मायाः
१०	५	विराजयते	विराजते	५५	२१	वस्य	यस्य
१०	१५	स्त्रीत्वादिशुन्य	स्त्रीत्वादिशून्य	५६	३१	मश्नुत	मश्नुते
१०	१२	आग	अग	५७	१२	किमाः	किंनः
१२	४	मृणा	मृणां	५७	२२	सत्गुश्णः	सद्गुणः
१३	२८	धसितं	धस्थितं	५८	२१	योनित्या	योनित्य
१४	२९	मोमुण	मोगुण	५८	२९	क्रियामा	क्रियमा
१५	२०	महापस्प्रवंतो	महापस्पवेतो	५९	२८।२९	तस्माल्लब्धे	तस्मात्तल्लब्धे
१६	९	उद्रुप्	उद्रूप	५९	३१	वश्यति	पश्यति
१८	१६	यीस्मन्	यस्मिन्	६२	२३	तारिक	तारक
२२	२०	रवश्मी	रश्मी	६२	२५	मृद्व	मृदु द्रु
२३	३०	शब्द	शब्दे	६२	२७	अद्या	आद्या
२३	३१	काकारणे	काकारेण	६३	१४	रसाज्ञा	रसज्ञा
२४	२१	विशाषा	विशेषा	६३	२९	चिऽज्ज	चिज्ज
२४	२७	मेव	मवे	६४	२२	मर्धन्य	मूर्धन्य
२६	२८	त्राटके	आटके	६३	३३	लोन्कोनां	लोहानां
२५	१०	श्रुतो	श्रितो	६५	२०	कारण	करण

* हें शुद्धिपत्र रा॰ रा॰ गोविंद नारायण केळकर बी. ए. यांनीं तयार केलें याबद्दल आम्ही त्यांचे फार फार आभारी आहों.

पृष्ठं.	पंक्तिः.	अशुद्धं.	शुद्धं.
६५	२०	कुर्वेतिति	कुर्वेतीति
६५	२२	पमासां	पुंसां
६६	२९	व्यथा	यथा
६७	४	मागमा	मागंमा
६७	६	रसस्य	रसास्य
६७	१७	म	मा
६८	२	णिव्ये	णिज्जे
६८	६	मि घो	मिघो
६८	२१	तकि	निक
६८	१२	स्येव	स्येव
७१	१०	था । स्याः	था स्याः
७२	१०	श्रेष्ठः	श्रेष्ठः
७१	२८	पास्यो	पांस्यो
७५	[illegible]	ते मो	तेमो
७६	२	[illegible]	[illegible]
७६	१४।१५	मरा	म्रा
७६	१८	ऐश्व	ऐश्व
७६	२३	पिनी	विनी
७८	१४	पतरंत	प्रवतरंत
७९	८	कृष्णा	कृष्णा
७९	१६	भी क	भीक
७९	२३	जोस्य	जोस्य
७९	२४	भांडिरकमिति	भांडीरकमिति
७९	२६	संपति	संपत्ति
७९	२६	श्राघ	श्लाघ
८२	१४	निष्ट या	निष्टया
८३	५	पाच:	पाच्य:
८४	१४	सुदेव क	स्तदेवक
८४	२६	संपति	संपत्ति
८६	२४	बभारेवेति	बभौरेवेति
८७	१३	कांडातं	कांडांतं
८८	१०	तस्माद्वयोभावो	तस्माद्दूर्व भावो
८९	१६	एतावत्	एतावान्
९०	२३	सर्वदमव	सर्वशमव
९०	२९	इतिः	इति
९२	११	पूक्तं	युक्तं
९५	२१	पालिश	बालिश
९६	११	कथ इति	कथय इति
९७	५	धम्यात्मनाम	धम्यात्मना
९७	१९	अभ्युतिष्ठति	अ[illegible]
९७	२७	मत्तद्रसमनुगु-णाम्	तत्तद्रसानुगु-णान्
९७	[illegible]	सं	रसं
९७	२८	व्यंगं	व्यंग्यं
९९	६	श्लोकः	श्लोकः
९९	१९	पुङ्कं	पुङ्कं
९९	२६	शृगाररसोपेता	शृंगाररसोपेता
१००	१५	धृष्टेव्वेषु	धृष्टेष्वेषु
१०७	२३	शुत्वेति	श्रुत्वेति
१०८	१०	धनगारेषु	धमागारेषु
१०८	२६	प्रवर्तयति	प्रवर्तयंति
११२	२६	तनोति	तनोतीति
११२	३१	पार्वत्याः	पार्वत्याः
११३	१४	निर्ममौ	निर्ममे
११९	३	जपत्व	जपत्व
११५	४	ललमाद्	ललमा

समाप्ता.

[काव्येतिहास-संग्रहांतः]

१.

युवराजमहाकविविरचितं

द्वादशसर्गात्मकं वृत्तविशत्या निबद्धं

श्रीरामचरितमहाकाव्यं.

बी. ए. उपपदधारिणा मोडकोपाह्वेन

बल्लाळसूनुना जनार्दनेन

विषमपदटिप्पणीसमेतं

प्रकाशितं

तच्च पुण्यपत्तनस्थिते ज्ञानप्रकाशनाम्नि मुद्रायन्त्रालये शीसकीलकाक्षरैः

मुद्रितम्.

शालिवाहनशकभूपाब्दाः १८०७.

युवराजकविकृतं
रामचरितं.

प्रयते[1] केरलदेशे प्रथितं रराष्टि[2] कोटिलिंगपुरं ॥
श्रीमान् युवराजाख्यस्तत्रास्ते दीर्घदर्शिमुकुटमणिः ॥ १ ॥
कालीकृपाकटाक्षक्षपित[3]ाखिलकल्मषौघ[4]धिषणो[5]ऽयं ॥
रसिकशिरोमणि सुधियामानंदकरं करोति सत्काव्यं ॥ २ ॥

अस्ति त्रयाणां जगतां निदानं[6] । नारायणो नाम सुराधिनाथः ॥
विराजमानः फणिराजतल्पे । पीयूषभाना[7]विव कृष्णसारः[8] ॥ ३ ॥
सुवर्णचूर्णद्युतितुल्यकांत्या । समाश्रितः सागरकन्यया यः ॥
विभाति गारुत्मत[9]चारुदेहः । क्षणप्रभा[10]वानिव कालमेघः ॥ ४ ॥
या सत्वसंघानखिलान् प्रसूते । बिभर्त्ति मातेव च तानजस्रं ॥
तां पार्श्वसंस्थां धरणीं कटाक्षैः । प्रीणाति यः प्रेमरसाभिषिक्तैः ॥ ५ ॥
यस्योत्तमांगे[11] घनकेशपाशे । विराजति स्वर्णमयः किरीटः ॥
घनप्रतानैर्विहितोत्तरीये । स्तनंधयैः[12] सूर्य इवोदयाद्रौ ॥ ६ ॥
यस्याननं पद्ममिव प्रफुल्लं । वराटिकि[13]जल्कनिभोष्ठदंतं ॥
पक्ष्मोद्गतपक्षामिवाक्षियुग्मं । मधुव्रत[14]द्वंद्वमिवाधिशेते ॥ ७ ॥
करे शरच्चंद्रसमानकांतिर्विराजते यस्य स कंबुराजः[15] ॥
विकस्वरे[16] चारुविसप्रसूने[17] कलिंदजाया[18] इव राजहंसः ॥ ८ ॥
चक्रं सहस्रांशु[19]सहस्रशोभं । यस्यारिचक्रोन्मथनातिदक्षं ॥
मुदावहं मूर्त्तमिव स्वतेजः । कदापि नो मुंचति पंचशाखः[20] ॥ ९ ॥
यस्याप्रमेयस्य करप्रमेये । जगत्कटाहा बहवो महांतः ॥
पिचंडगर्भे[21] परिमांति चित्रं । हिरण्यगर्भस्य[22] दिनक्षयेषु ॥ १० ॥
यन्नाभिकेलीसरसीसरोजे । भृंगायमाणो भुवनस्य कर्त्ता ॥
गायन्मुहुर्वेदपदैर्मनोज्ञैः । प्रसादयत्यश्रममात्मयोनिं ॥ ११ ॥
चकास्ति यश्चंपककुड्मलस्य । प्रमुष्णताडंबरमंबरेण ॥

---

१ प्रयतं=पूत. २ रराष्टि=भृश राजते. ३ क्षपित=नाशित. ४ कल्मषं=पापं. ५ धिषणः=विद्वान्. ६ निदानं=आदिकारणं. ७ पीयूषभानुः=चंद्रः ८ कृष्णसारः=कलंकः ९ गारुत्मतं=रत्नविशेषं. १० क्षणप्रभा=विद्युत्. ११ उत्तमांगं=शिरः १२ स्तनंधयः=बालकः १३ वराटः=कमलबीजकोशः १४ मधुव्रतः=भ्रमरः १५ कंबुराजः=शंखश्रेष्ठः १६ विकस्वरं=विकसितं. १७ विसप्रसूनं=कमलं. १८ कलिंदजा=यमुनानदी. १९ सहस्रांशुः=सूर्यः २० पंचशाखः=हस्तः २१ पिचंडगर्भे=जठरे. २२ हिरण्यगर्भः=ब्रह्मा.

विवेष्टितः काननकृष्णवर्त्म[२३]ज्वालाभिरुद्धैरिव नीलशैलः ॥ १२ ॥
पदे यदीये यमिनां मनांसि । श्रियः करेणानिशलालयमाने ॥
विहाय सर्वान्विषयान्विलासमुशंति[२४] हंसा इव शारदाब्जे ॥ १३ ॥
यस्याग्रतो मूर्तमिवांतरंगं । कृतांजलिः कंजविलोचनस्य[२५] ॥
अभीष्टदिग्प्रापणजागरूको । वसत्यजस्रं विनतातनूजः[२६] ॥ १४ ॥
रसातलं यस्य तलं पदस्य । स्वयंभुवो[२७] मंदिरमुत्तमांगं ॥
विलोचने वासरयामिनीशौ[२८] । वदंति विज्ञानदृशः पुमांसः ॥ १५ ॥
अगोचरं लोचनचित्तवाचामविक्रियं विष्वग[२९]वस्थितं यं ॥
आत्मानमाद्यंतविहीनमेकमानंदरूपं मुनयो वदंति ॥ १६ ॥
यत्पादपद्मे सकृदाहितार्चा । नराः सुरेंद्रादिपदं प्रपद्य ॥
सदा रमंते सहनंदनादौ । विलासिनीभिर्विगतान्यचिंताः ॥ १७ ॥
यत्सेवया याति पुनः शरीरी । न जातु[३०] मातुर्जठरेशयत्वं ॥
यथा पुनर्नैव निवृत्तिमेति । तथा परब्रह्मणि लीयते सः ॥ १८ ॥
तमीश्वरं विश्वजनार्तिनाशं । पितामहाद्यास्त्रिदशाः कदाचित् ।
प्रापुर्दशग्रीवभुजोष्मतप्ता । महीरुहां मूलमिवातपार्ताः ॥ १९ ॥
शेषे शयानं तमशेषनाथं । ते योगनिद्रासहितं सुधाशाः[३१] ।
कृतप्रणामाः कमलायताक्षं । समस्तुवन्नस्तमलैर्वचोभिः ॥ २० ॥
नमोस्तु ते नाथ जगत्त्रयाणां । निदानभूताय निराश्रयाय ।
स्वमायया मोहयते समस्तान् । शरीरभाजो भवसिंधुमध्ये ॥ २१ ॥
सृजन्नशेषं निजमाययेदं । जगत् पुनस्त्वं परिपालयंश्च ।
विनाशयन् खेलसि वीतसंगो । मृदां चयैर्बाल इवालयादि ॥ २२ ॥
अपारसंसारसमुद्रमग्नान् । जनान् यदीयः सदयः कटाक्षः ॥
तरीरिव[३२] प्रापयते हि पारं । नमः परस्मै पुरुषाय तस्मै ॥ २३ ॥
इति स्तुतः सादरमादितेयै[३३]र्विमुक्तनिद्रो भगवान्मुकुंदः ॥
उत्थाय सद्यः स्थितवान् फणींद्रे । सुधाशनान्[३४] सस्मितमित्युवाच ॥ २४ ॥
प्रसादितोहं विबुधा मनोज्ञैः । स्तवैरमीभिः सुतरां भवद्भिः ॥
निदानमस्यागमनस्य सद्यो । निवेद्यतामद्य निरस्तशंकं ॥ २५ ॥
इत्युक्तवंतं भगवंतमेनं । जगत्त्रयीरक्षणजागरूकं ॥

---

२३ कृष्णवर्त्मा=अग्निः २४ उशंति=इच्छंति. २५ कंजं=कमलं. २६ विनतातनूजः=गरुडः २७ स्वयंभूः=ब्रह्मा. २८ वासरयामिनीशौ=सूर्यचंद्रौ. २९ विष्वक्=सर्वत्र. ३० जातु=कदाचित्. ३१ सुधाशाः=देवाः ३२ तरीः=नौका. ३३ आदितेयाः=देवाः ३४ सुधाशनाः=देवाः

विवक्षितां विश्वै[35]सुधाशनानामुवाच वाचं कलहंसवा[36]हः ॥ २६ ॥
शरीरभाजां भवतोंतरंगेष्ववस्थितस्याविदितं न किंचित् ॥
निवेद्यते नाथ तथाप्यवस्थाप्रवृत्तिरेषा खलु सप्रभूणां ॥ २७ ॥
पूर्वं भवान्नाथ हिरण्यपूर्वं । नृसिंहरूपः कशिपुं न्यहिंसीत् ॥
स रावणो नाम भवन्निदानीं । निशाचरः पीडयति त्रिलोकीं ॥ २८ ॥
महाशरीरो दशभिः शिरोभिर्विराजते विंशतिबाहुरेषः ॥
तरुप्रकांडैर्बहुभिश्च शृंगैः । शिलोच्चै[37]यः प्रोच्च इवांजनाभः ॥ २९ ॥
विलोकनत्रासितविश्वलोकः । स घोररूपो निशि[38]चारवीरः ॥
वरेण मे दृप्तै[39]मतिर्बलाढ्यो । जिगाय सर्वानपि हंत लोकान् ॥ ३० ॥
स कुंभकर्णप्रमुखैः समेतः । सहोदरैश्चेंद्रजिदादिपुत्रैः ॥
विजित्य युद्धे विबुधानशेषान् । धनानि दिव्यान्यखिलान्यहार्षीत् ॥ ३१ ॥
खगं[40]प्रधानादिव काद्रवेया[41] । निलीय तस्मान्नितरां निर्लिंपा[42]ः ॥
वसंति सर्वे वसुधाधराणां । गुहासु गूढं तमसा वृतासु ॥ ३२ ॥
प्रहस्त[43]मुख्यैर्बलवान् बलौघैः । प्रहृत्य वित्ताधिप[44]मस्तशंकं ॥
उपार्जितां विक्रमणेन लंकां । समुद्रसालां स किलाधिशेते ॥ ३३ ॥
अश्नंति हत्वा मनुजानजस्रं । पशूननुघ्नंति महीसुरांश्च ॥
विध्वंसयंति प्रसभं मखानप्यहो दशग्रीवभटा निशाटा[45]ः ॥ ३४ ॥
विच्छिन्नमूलं भुवि धर्मवृक्षं । विद्धि प्रभो संपतितुं प्रवृत्तं ॥
ऋते भवत्तः कतमे भवंति । जनास्तदुद्धारविधौ समर्थाः ॥ ३५ ॥
जगद्द्रुहां[46] सैन्यभरेण भुग्नां । वसुंधरां धारयितुं न शक्ताः ॥
विषं वमंतो विधुरैः शिरोभिर्भजंति तेनैव रुजं भुजंगाः ॥ ३६ ॥
पतिव्रतानामपि कामलीलाविनोदकौतूहलवान् दशास्यः ॥
निरस्तधर्मः स हरत्यनेकाः । समस्तलोकप्रभवाः सुनेत्राः ॥ ३७ ॥
विवर्द्धिते दुष्टजनप्रतापे । निजाश्रमे धर्मतरौ च मग्ने ॥
इदं भवन्नायकमप्यजस्रं । जगद्भृशं सीदति दीनबंधो ॥ ३८ ॥
निवेदितेयं जगतामवस्था । वयं च याताः शरणं भवंतं ॥
विचार्यतामुत्तरमत्र कार्यं । भवान् हि लोकत्रितयस्य नाथः ॥ ३९ ॥
एवं विरिंचेन[47] निवेदितार्थः । स विश्वदर्शी भगवानवोचत् ॥

---

१५ विश्वाः=सर्वे. ३६ कलहंसवाहः=ब्रह्मा. ३७ शिलोच्चयः=पर्वतः ३८ निशिचारः=राक्षसः ३९ दृप्तः=गर्वितः ४० खगप्रधानः=गरुडः ४१ काद्रवेयाः=सर्पाः ४२ निर्लिंपाः=देवाः. ४३ प्रहस्तः=रावणप्रधानः ४४ वित्ताधिपः=कुबेरः ४५ निशाटाः=राक्षसाः ४६ जगद्द्रुहां=राक्षसानां. ४७ विरिंचः=ब्रह्मा.

जाने यथोक्तं सकलं विषादेनालं प्रवृत्तोस्मि जगद्धिताय ॥ ४० ॥
अहं सुराः पंक्तिरथस्य राज्ञः । पुत्रत्वमादाय मनुष्यलोके ॥
हत्वा जगद्द्रोहिजनानशेषान् । धर्मस्थितिं साधुतरं करिष्ये ॥ ४१ ॥
साहाय्यकृत्याय तदा भवंतो । भवंतु मे योनिषु वानरीषु ॥
एवं समादिश्य स माधवस्तान् । गंतुं निजं मंदिरमन्वजानीत् ॥ ४२ ॥
ततः प्रहृष्टाः प्रणताश्च तस्माद् । गत्वा महीं प्राप्य महानुभावाः ॥
सर्वेप्यजायंत निजांशभागैर्वलीमुखानां वनितासु देवाः ॥ ४३ ॥
अथावनीपालकुलावतंसः । सखा सुरेंद्रस्य निषूदितारिः ॥
महारथः पंक्तिरथो महीशः । प्रशासिता चोत्तरकोसलानां ॥ ४४ ॥
तिस्रस्तनूजाः परिणीय राज्ञां । कौसल्यकैकेयकमागधानां ॥
अविश्रमं विश्वमनोहराभिस्ताभिः समं साधितधर्मकामः ॥ ४५ ॥
अनेकसत्कर्मविधायकोपि । सुताननालोकसुखानभिज्ञः ॥
स ऋष्यशृंगप्रमुखैः समेतः । संतानयागं मुनिभिश्चकार ॥ ४६ ॥
ते तापसास्तस्य महीपतेस्तं । महेंद्रतुल्यस्य महानुभावाः ॥
यथाविधि व्याहृतसारमंत्रा । निर्वर्त्तयामासुरनन्यचित्ताः ॥ ४७ ॥
होमावसाने हुतवाहकुंडात् । समुत्थितः कश्चन दिव्यमूर्तिः ॥
वहन् कराभ्यां परमान्नपूर्णं । हिरण्मयं भाजनमुग्रतेजाः ॥ ४८ ॥
संतानलाभाय महीपते त्वमेतद्भुंक्ष्वेति विभज्य राज्ञे ॥
दत्त्वान्नपात्रं पुरतो मुनीनामंतर्हितोभूत्पुरुषः स सद्यः ४९ ॥
विभज्य राजान्नमिदं चतुर्धा । भागानथ त्रीनपि वल्लभाभ्यः ॥
ददौ तिसृभ्यः पुनरत्र शिष्टं । भागं च मोदान्मगधात्मजायै ॥ ५० ॥
ता राजभार्याः परमान्नभागानास्वादयामासुरिमान् प्रहृष्टाः ॥
तदा विभक्तः स्वयमंतरासां । तैरन्नभागैः प्रविवेश विष्णुः ॥ ५१ ॥
ततः कियद्भिर्दिवसैश्च राजा । व्यलोकयद्गर्भवतीः स्वभार्याः ॥
अंतस्थितस्याखिललोकभर्तुस्तेजोमहिम्ना सुतरां ज्वलंतीः ॥ ५२ ॥
ता वैष्णवे धामनि वर्द्धमाने । क्रमेण तत्रातितरां विरेजुः ॥
पूर्वाचलोत्सेधनिगूढमूर्तावुदेष्यमाणे शशिनीव काष्ठाः ॥ ५३ ॥
सुवर्णपद्मप्रतिमप्रकाशं । स्वभावतस्तेन नृपेण तावत् ॥
अलक्षि तासां वदनं वधूनां । मध्यं दिवः प्राप्तमिवेंदुबिंबं ॥ ५४ ॥
विवर्द्धमानं प्रसमीक्ष्य मध्यं । तासां पुरा स्वाक्रमणेन नम्रं ॥

---

४८ पंक्तिरथः=दशरथः ४१ वलीमुखाः=वानराः ५० वधूभ्यः=पत्नीभ्यः ५१ धाम=तेजः ५२ काष्ठाः=दिशः

रोषादिव स्वाभिभवं विशंक्य । स्तनद्वयं नीलमुखं बभूव ॥ ५५ ॥
यथायथातीव बभूव तासां । शरीरसादोनुदिनं वधूनां ॥
तथातथा तत्परिरंभणादौ । मनः परां प्रीतिमवाप राज्ञः ॥ ५६ ॥
ततः समादिष्टविधानमार्गः । पुरोहितेनात्मभुवः सुतेन ॥
चकार कर्माणि यथाक्रमं स । क्षमापतिः पुंसवनादिकानि ॥ ५७ ॥
विवासितालंकरणानि तासामंगानि पश्यन्नतिमोहनानि ॥
अविंदतानंदममंदमंतः । स निर्गुणब्रह्मनिरीक्षयेव ॥ ५८ ॥
अलब्धमिष्टं यदि गर्भिणीनां । सुतस्य वैकल्यमिति प्रसिद्धिः ॥
चराचरात्मन्युदरं प्रविष्टे । हरौ पुनः कुत्र रुचिस्तु तासां ॥ ५९ ॥
अजस्य मानुष्यविडंबना चेद् । भवत्वमूषां त्वदयेभिलाषः ॥
अलब्धता तस्य कथं सहाये । बलद्विषो जाग्रति जीवनाथे ॥ ६० ॥
क्रमेण भूयः परिपूर्णभावं । गते तु गर्भे श्लथितांगयष्टीः ॥
अपश्यदासन्नसुषूतिकालाः । शरन्मुखे सारसिनीरिवैषः ॥ ६१ ॥
अथोच्चसंस्थेषु शुभे मुहूर्ते । कुजार्कशुक्रांगिरसासितेषु ॥
पुनर्वसुभ्यां सहिते च चंद्रे । प्रासूत सा कोसलराजकन्या ॥ ६२ ॥
ततःपरस्मिन्नहनि प्रसूता । बभूव कैकेय्यपि चारुगात्री ॥
अनंतरं सा मगधेंद्रपुत्री । यमौ कुमारौ सुषुवे सुमित्रा ॥ ६३ ॥
तेषां हरेरंशसमुद्भवानां । कुमारकाणामवतारकाले ॥
यथास्वधर्मस्थितभूतजालं । जगत्समस्तं समभूत्प्रहृष्टं ॥ ६४ ॥
गुणांबुराशेरुदितेषु राज्ञः । सुताभिधानेषु सुधाकरेषु ॥
अमंगलध्वांतमभून्निलीनं । निशाचरक्ष्माधरगव्हरेषु ॥ ६५ ॥
निवेद्यते येन कुमारजन्म । क्षितीश्वराणां स हि दानपात्रं ॥
अयं तु राजा सुतजन्महर्षादपूजयद् दृष्टिगतानशेषान् ॥ ६६ ॥
भविष्यता शत्रुकुलस्य देवा । वधेन मर्त्या निजरंजनेन ॥
भूभारभंगेन भुजंगमाश्च । प्रकर्षहर्षोत्सवमन्वभूवन् ॥ ६७ ॥
ततो वसिष्ठेन पुरोहितेन । प्रचोदितः पार्थिववंशकेतुः ॥
कुमारकाणामकरोदमीषां । स जातकर्म स्तनपानतः प्राक् ॥ ६८ ॥

---

५१ सादः=प्रसन्नता. ५४ परिरंभणं=आलिंगनं. ५५ आत्मभुवः सुतः=वसिष्ठः ५६ पुंसवनं=संस्कारविशेषः ५७ विवासितं=परित्यक्तं. ५८ बलद्विट्=इंद्रः ५९ कुजः=मंगलः ६० अंगिराः=बृहस्पतिः ६१ असितः=शनिः ६२ पुनर्वसुभ्यां=पुनर्वसुनक्षत्रं ताराद्वयात्मकमत एव द्विवचनं. ६३ यमौ=“आवळे जावळे” इति महाराष्ट्रभाषायां. ६४ सुधाकरः=चंद्रः ६५ क्ष्माधरः=पर्वतः ६६ केतुः=ध्वजः

तैरात्मशय्याशयनैर्जनन्यो । विरेजुरुद्यत्सवितृप्रकाशैः ॥
मनोभिरामैर्मणिभिर्ज्वलद्भिः । सुवर्णरेखा इव सुप्रकीर्णाः ॥ ६९ ॥
गुणैर्जनानां रमणाद्विपूर्णां । तथा विरामादपि विक्रमेण ॥
चक्रे स रूढार्थयुगानुसारादप्यग्रजं रामपदाभिधेयं ॥ ७० ॥
अनंतरं केकयकन्यकायाः सुतं स चक्रे भरताभिधानं ॥
यमाविमावप्यथ लक्ष्मणाख्यं । शत्रुघ्ननामानमपि क्षितीशः ॥ ७१ ॥
तैरात्मजैरात्मनोरथानां । समानरूपैः सुकृतेन लब्धैः ॥
रराज राजा हृदयानुमोदैश्चतुर्भिरर्थैरिव मूर्तिमद्भिः ॥ ७२ ॥
दिने दिने बालचतुष्टयी सा जगाम पोषं जगदीश्वरस्य ॥
प्रशस्तपात्रप्रतिपाद्यमाना । यथा प्रदातुः पुरुषस्य लक्ष्मीः ॥ ७३ ॥
स रामचंद्रः सजलाभ्रनीलः । स लक्ष्मणस्तद्बिसकंठिकाभः ॥
तडित्सवर्णावितरौ च तैः सा । बभौ पुरी वर्षनभस्थलीव ॥ ७४ ॥
कुमारकाणां वदनारविंदं । मनोभिरामं मनुजाधिराजः ॥
निमेषहीनं नयनद्वयेन । निपीय नित्यं न जगाम तृप्तिं ॥ ७५ ॥
न तादृशः पूर्णशशांकबिंबे । न तादृशः शारदपंकजे च ॥
तदाननालोकविधौ जनानां । बभूव यादृङ्मनसि प्रमोदः ॥ ७६ ॥
दिनेशवंश्यो दिनमासकार्याः । क्रियाः समस्ता अपि बालकानां ॥
यथाक्रमं तर्पितविश्वलोकश्चकार चक्रायुधविक्रमः सः ॥ ७७ ॥
उत्संगमारोप्य स लालयंस्तान् । वत्सान्मृदुस्मेरमुखानजस्रं ॥
अपुत्रभावोदितदुःखतप्तं । चिरादुपाल्हादयदात्मदेहं ॥ ७८ ॥
कुमारका जानुकरद्वयेन । क्षितौ चरंतः कतिचिद्दिनानि ॥
अहार्षुरंतःकरणं जनानां । मनोहराणां सकलं मनोज्ञं ॥ ७९ ॥
आलंब्य धात्रीकरपल्लवं ते । पादं न्यसंतो भुवि मंदमंदं ॥
विनावलंबं स्वयमेव भूयः । क्रमेण संचारपटुत्वमापुः ॥ ८० ॥
विना निदानं विहसन्मुखाब्जान् विचेयदंतांकुरकांतिकांतान् ॥
विलोकयन् विस्मयकुंतलांस्तान् । विभुर्वरिष्ठः कृतिनां बभूव ॥ ८१ ॥
अमात्यपुत्रैः सह ते वयस्यैः । संक्रीडमानाः सततं कुमाराः
प्रवर्द्धयंतः प्रमदं जनानां । क्रमेण कौमारदशां व्यतीयुः ॥ ८२ ॥
अथ स्वपुत्रान् धृतकाकपक्षान् । विधाय पूर्वाश्रमवर्तिनस्तान् ॥
न्ययुक्त विद्याभ्यसने विनीतान् । नृपः पुरोधश्चरणं प्रणीतान् ॥ ८३ ॥

---

१७ बिसकंठिकाभः=बलाकासदृशः ६८ निदानं=कारणं. ६९ काकपक्षाः= " झुलपें " इति महाराष्ट्रभाषायां.

अष्टादशस्वप्यवनीशपुत्रा विद्यासु वेदप्रमुखासु तेन ॥
प्रशिक्षितास्ते गुरुणा वरेण । विशिष्य शास्त्रेषु विनीतवेषाः ॥ ८४ ॥
गुरोरुदारादधिगम्य विद्याः । सांगाः समस्ता अपि बालकास्ते ॥
तदा बभूवुर्वयसैव बाला । न विद्यया विश्रुतसद्गुणौघाः ॥ ८५ ॥
शौर्यादिभिर्गुणगणैर्नृपतेः कुमारास्ते रंजिताखिलजगज्जनता बभूवुः ॥
तेषामपि प्रथमतां प्रथमस्तु भेजे । पर्यायवृत्तिरखिलेष्वपि शोभते हि ॥ ८६ ॥
अल्हादनामतितरामकरोज्जनानां । राकानिशाकर इव प्रियदर्शनोसौ ॥
तेनैव राममधुनापि जगत्त्रयेपि । श्रीरामचंद्र इति सर्वजना वदंति ॥ ८७ ॥
गांभीर्यधैर्यमतिनीतिपराक्रमौजःकीर्तिक्षमावगमरक्षणशिक्षणैः सः ॥
जिग्ये समुद्रहिमवद्भुजगेशजीवसुत्रामभित्रविधुभूमिहराजधर्मान् ॥ ८८ ॥
लोकोत्तरैर्गुणगणैर्गणनास्वगम्यैस्तारागणैरिव शशी सहितस्तु रामः ॥
ज्योत्स्नानिभेन यशसां निकरेण चक्रे । चित्रं जनौघमुपमानविराममेव ॥ ८९ ॥

गुणस्यूतैरेवं सततमनुरूपैरवरजै-
र्गुरोरंतर्मोदं गुरुतरमथावर्द्धयदयं ॥
स राजाप्येतेषां विरहमसहिष्णुः क्षणमपि ।
प्रहृष्टः साकेते सुखमवसदात्मीयनगरे ॥ ९० ॥
इति श्रीरामचरिते महाकाव्ये प्रथमः सर्गः ॥

अथ जातु जनाधिपं प्रपेदे । कुशिकानां कुलनंदनो महर्षिः ॥
निजकर्मविघातकर्तृकाणां । निधनार्थी निशिचारकंटकानां ॥ १ ॥
तमुपागतमासने मनोज्ञे । मुनिवर्यं विनिवेश्य भक्तिशाली ॥
विहितापचितिर्वसुंधरेशः । स्मितपूर्वं समुवाच वाचमेवं ॥ २ ॥
भवतां समुपागमादिदानीं । परिपूता नगरीयमस्मदीया ॥
महतां पदपद्मजं परागं । पवनानां पवनं ह्युपादिशंति ॥ ३ ॥
समयत्रयजैः कुलस्यभानोर्बहुभिः पुण्यचयैस्तवागमोयं ॥
कथमल्पवृषैर्नोपनीया । महतां संगतिरीदृगात्मनैव ॥ ४ ॥
अपि काननवासिनां जनानां । कुशलं कौशिकवंशरत्नदीप ॥
अपि चित्तमनाविलं समाधिष्वपि निर्विघ्नसमापिताः क्रियाश्च ॥ ५ ॥
भवदागमभात्रतः प्रसादं । हृदयं मे भृशमश्नुते तथापि ॥

---

७० राका=पूर्णिमा. ७१ अवगमः=ज्ञानं. ७२ भुजगेशः=शेषः ७३ जीवः=बृहस्पतिः ७४ सुत्रामा=इंद्रः ७५ मित्रः=रविः ७६ अजः=विष्णुः ७७ ज्योत्स्ना=चंद्रिका. ७८ निकरः=समूहः ७९ मनोज्ञं=सुंदरं. ८० अपचितिः=पूजा. ८१ पवनानां=पवित्राणां. ८२ वृषैः=पुण्यैः

श्रवणेंद्रियतर्पणे कृताशं । गुणलुब्धो न किमुत्तरोत्तरार्थी ॥ ६ ॥
सुकृतं खलु मे प्रधानहेतुर्भवदीयागमने मुने तथापि ॥
अपरो जनबोधनार्थमस्मिन् । नियतं कश्चन हेतुरस्ति बाह्यः ॥ ७ ॥
प्रमिताक्षरमेवमुच्चरंतं प्रहसन्नाह मुनिर्जनाधिनाथं ॥
दशनामृतदीधितिच्छवीनां प्रसरैः प्रस्फुरिताननांबुजन्मा ॥ ८ ॥
त्वयि गोप्तरि राजराजकल्पे जगति क्वापि भवत्यमंगलं न ॥
तपने तपति स्फुरन्मयूखे तिमिराणामुदयस्य का कथा स्यात् ॥ ९ ॥
भवदीययशःपयःपयोधेर्जगदानंद उदयेयिवानुदारः ॥
अत एव विधौ जना निराशा न हि कार्ये सति कारणेषु कामः ॥ १० ॥
गुणवारिधिमध्यवर्तिनस्ते जगतामेव तपोभिराविरासन् ॥
तनया जनपालनैकदक्षाः पुरुषस्येव परस्य बाहुदंडाः ॥ ११ ॥
अधुनैव भवंतमाप्तलभ्यं परिपूर्णं नृपते जना वदंति ॥
यदमी जनिताः कुमारकास्ते पुरुषार्था इव चारुमूर्तिमंतः ॥ १२ ॥
अवलोकयितुं भवंतमेवं गुणवंतं चिरमंतरुज्जजृंभे ॥
सुमहानभिलाष एष राजन् फलितोभूदधुनैव दैवयोगात् ॥ १३ ॥
भवदीक्षणजातकौतुकस्य क्षितिनाथागमने ममाधुना तु ॥
उदभूदिह कारणं कनीयः क्षणदाचारिजनप्रयुक्तडिंबः ॥ १४ ॥
यजनाय यदा यदा प्रवृत्ता वयमुत्पाद्य विधानसाधनानि ॥
द्रुतमेत्य तदा तदा निशाटा अपि विघ्नाय कृशानुदूषणाद्यैः ॥ १५ ॥
क्रतुविघ्नकृतस्तपोव्ययेन क्षपणीयास्तदपि त्वदाश्रयाः स्मः ॥
तपसैव सदा वयं धनाढ्या यदसाधुक्षपणेन चापि यूयं ॥ १६ ॥
खलवंशमहाटवीकृशानुस्तनयोयं तव देवरामचंद्रः ॥
जगतामवनाय जागरूको जयतीहावरजैः सहानुरूपैः ॥ १७ ॥
अमुमेव नियुंक्ष्व दुष्टशिक्षाविधये विश्रुतसद्गुणांबुराशे ॥
कथितेषु जनैरमुष्य राजन्नपदानेषु विशिष्य कौतुकं नः ॥ १८ ॥
शिशुरेष कथं निशाचराणां निधनायेति विभो न शंकनीयं ॥
शिशुरप्युदयन्मदान्महेभान् विनिहंतुं न हरिः कदाप्यशक्तः ॥ १९ ॥
अतिदुष्टदशाननादिरक्षःकुलमुन्मूलयितुं नितांतमिच्छोः ॥
अधुना मधुनाशनस्य मात्राः परिपश्यामि सुतेषु ते निलीनाः ॥ २० ॥

---

८३ अमृतदीधितिः=चंद्रः ८४ राजराजः=कुबेरः ८५ मयूखः=किरणः ८६ क्षणदा=रात्रिः ८७ डिंबः=उपद्रवः ८८ निशाटः=राक्षसः ८९ कृशानुः=अग्निः ९० अवरजः=अनुजः ९१ अपदानेषु=कर्मवृत्तेषु. ९२ मात्राः=अंशान्.

तनुभूविरहप्रसंगगर्भां नृपतिस्तस्य निशम्य वाचमेवं ॥
अतिवेलमवाप तापमंतः सविषादः सविषं यथान्नमश्नन् ॥ २१ ॥
हृदि धैर्यनिधेरमुष्य पूर्णोप्यभितापो न बहिः प्रकाशते स्म ॥
वडवानलतापितांतरोपि स्पृशतां शीतल एव सिंधुराजः ॥ २२ ॥
असतां दमनं कृतोश्च रक्षा प्रणयः प्रार्थक एष तापसेंद्रः ॥
अभियाचकलोकचितवृत्तेः परिपूर्तिश्च रवेः कुलस्य धर्मः ॥ २३ ॥
इति भूमिपतिः सुतप्रवासे कृतसंतापमपि प्रसक्त एव ॥
न मनः प्रतिकूलतामनैषीद्वचनं चेदमुवाच गाधिपुत्रं ॥ २४ ॥
पृथुकः परिशीलितो न युद्धेष्वकृतास्त्रः परकैतवानभिज्ञः ॥
तदपि त्वदनुग्रहेण मन्ये न भवेत्क्वाप्यमंगलं किलास्य ॥ २५ ॥
मुनिनाथ भवान् खलु प्रमाणं परिपाल्यः सततं त्वयैव बालः ॥
इति वाचमुदीर्य भूपतिस्तं मुनिहस्तेथ समर्पयांबभूव ॥ २६ ॥
मगधाधिपनंदिनीसुतो यः क्षणमप्यग्रजमंतरेण नास्ते ॥
तमपि प्रददौ तपोधनाय क्षितिनाथः सुतमेष लक्ष्मणाख्यं ॥ २७ ॥
परिगृह्य स रामलक्ष्मणौ तावनुरूपौ सहजौ सचापबाणौ ॥
अधिकाधिगमादथैकयाच्ञी मुदमत्यंतमवाप तापसेंद्रः ॥ २८ ॥
नृपतिं नमितारिराजचक्रं नतमूर्द्धानमथात्मपादपद्मे ॥
अनुगृह्य तमाशिषातिसाध्व्या प्रययौ गाधिसुतो निजाश्रमाय ॥ २९ ॥
अनुजग्मतुरादराद्विनीतौ सहजौ राघवलक्ष्मणौ मुनींद्रं ॥
नृपतेर्नयने च पुत्रकौ तावविनीते विनिमेषपक्ष्मजाले ॥ ३० ॥
अथ गाधिजमन्वितौ कुमारौ सितसौम्याविव सूर्यमुज्ज्वलंतं ॥
पुरवासिजनानुदश्रुनेत्रान् विदधानौ पुरतो निरीयतुस्तौ ॥ ३१ ॥
विषयानतिलंघ्य पत्तनान्यप्यवनीनाथसुतौ मुनीश्वरश्च ॥
प्रययुर्द्रुतमुज्ज्वलस्वरूपा अपधूमा इव पावकास्त्रयस्ते ॥ ३२ ॥
अथ वर्त्मनि तापसेन ताभ्यामुपदिष्टौ प्रयतेन सारमंत्रौ ॥
क्षुधया तृषया च नाभिभूतौ पृथुकावप्यनयोः प्रभावतस्तौ ॥ ३३ ॥
अतिलंघितनैकनीवृतस्ते गहनं काननमाविशन्नभीताः ॥
जनपाटनपाटवप्रसिद्धा वसतिं यत्र चकार ताटका सा ॥ ३४ ॥
उपलभ्य मनुष्यगंधमेषा पदवीं सत्वरमन्वियेष तेषां ॥
परपीडनजागरूकबुद्धेर्निशिचर्याश्च मुनीन्निघातयिष्यन् ॥ ३५ ॥

---

१३ तनुभूः=पुत्र. १४ पृथुकः=बालः १५ परिशीलितः=अभ्यस्तः १६ कैतवं=कपटं. १७ मुदं=हर्षं. १८ सितसौम्यौ=शुक्रबुधौ. १९ विषयान्=देशान्. २० नीवृतः=देशः

अथ घोरतराट्टहासकोलाहलवित्रासितविश्वसत्वसंघा ॥
गतिवेगपतत्समीपवृक्षा तरसा साभिपपात ताटका तान् ॥ ३६ ॥
घनमार्गविलंघनाग्रकायां ज्वलदंगारनिभोग्रवृत्तनेत्रां ॥
प्रबलोच्छ्रितधूम्रकेशपाशां शितदंष्ट्राविलसन्नृमांसखंडां ॥ ३७ ॥
अथ तामवलोक्य घोररूपामभियांतीमभियोद्यतैकबाहुं ॥
भयकंपितधीर्विधाय तस्यास्त्वरयामास रघूत्तमं महर्षिः ॥ ३८ ॥
पुरुषानदयं विनिघ्नतीनां न वधः स्याद् दुरिताय दुर्वधूनां ॥
इति तापसवाक्यतः स तस्या विजहावाशु वधे वधूत्वशंकां ॥ ३९ ॥
अधिरोपितसारशिंजिनीके स तु संधाय ततः शरं शरासे ॥
उरसि प्रणिधाय ताटकाया घनपाषाणकठोरघोररूपे ॥ ४० ॥
शरघातनिपीडिता ततः सा विगतासुः पृथिवीतले पपात ॥
मघवायुधपातलूनपक्षः शिखरीवोन्मथितातिकाटवीका ॥ ४१ ॥
रजनीचरमानिनीमथैनां विनिहत्याखिललोकघातशीलां ॥
पथिकैः सुगमं विधाय दावं प्रययुर्गाधिसुतादयस्त्रयस्ते ॥ ४२ ॥
धनुषि प्रसमीक्ष्य विस्मितात्मा निपुणत्वं पृथुकस्य राघवस्य ॥
मुनिरस्य निजांतरंगगुप्तानथ दिव्यास्त्रगणानुपादिशत्सः ॥ ४३ ॥
मुनिना तु समंत्रपूर्वदत्तान्यथ शस्त्राणि धृतादरेण तानि ॥
तनुमंति रघूत्तमस्य पार्श्वं समसेवंत तदा क्षणं समेत्य ॥ ४४ ॥
अधिगम्य मुनेरथास्त्रजालं विधिदैवप्रमुखं विशां वरिष्ठः ॥
विललास भृशं प्रसन्नभावं शरदः प्राप्य यथा निशीथिनीशः ॥ ४५ ॥
अतिलंघ्य सरिद्वनप्रदेशानथ तत्तच्चरितानि वर्णयंश्च ॥
मुनिराप निजाश्रमं सहाभ्यां विहितप्रत्युदयः स्वशिष्यवर्गैः ॥ ४६ ॥
समुपेत्य मुनिः स पर्णशालां निजशिष्यार्जितयज्ञसाधनाढ्यां ॥
नृपतेस्तनयौ यथा नगर्यां सुखयामास भृशं प्रसन्नभावः ॥ ४७ ॥
मुनयः परिवार्य राजपुत्रौ यजनायागमिनो मनोहरांगौ ॥
प्रपपुर्नयनैः कुतूहलोत्कैरविचंद्राविव भूतलं प्रयातौ ॥ ४८ ॥
अभिवंद्य महर्षिसत्तमांस्तान् विधिवद्राजसुतौ विनीतभावौ ॥
विरराजतुरत्युदारवीर्यौ प्रवणत्वं हि महत्सु शोभनाय ॥ ४९ ॥
अथ तां रजनीं सुखेन नीत्वा कृतसंध्यानियमः स तापसेंद्रः ॥

---

१ तरसा=वेगेन. २ अग्रकायः=शिरः ३ शितं=तीक्ष्णं. ४ शिंजिनी=ज्या. ५ मघवा=इंद्रः ६ दावं=वनं. ७ विशां=मनुष्याणां. ८ निशीथिनीशः=चंद्रः ९ प्रत्युदयः=प्रत्युद्गमः १० प्रवणत्वं=विनीतत्वं.

अवदन्नृपतेः कुमारकौ तौ यजनारंभविधिं विधातुकामः ॥ ५० ॥
निचितानि समस्तसाधनानि द्रुतमारभ्यत एव सप्ततंतुः ॥
भवदीयभुजाबलावलंबा वयमद्यैव भवाम सिद्धदीक्षाः ॥ ५१ ॥
धृतबाणशरासनौ भवंतावुटजद्वारि सदैव सज्जितौ स्तं ॥
रजनीचरपालिरागमिष्यत्यविलंबं प्रतिपाल्यतां कुमारौ ॥ ५२ ॥
इति स क्रतुरक्षणार्थमेतौ समुपादिश्य मुनिर्महीशपुत्रौ ॥
परिशुद्धमतिर्जगाम दीक्षां महितर्त्विग्जनवर्त्तितक्रियावान् ॥ ५३ ॥
ज्वलति ज्वलने महर्षिमुख्यैर्विधिवद्धोमविधौ विधीयमाने ॥
अथ तद्गतधूमसंचया द्राग् दिवि नक्तंचरपालिराविरासीत् ॥ ५४ ॥
वितता वियति क्षपाचराब्दाः शितदंष्ट्रा रुचिचंचलांचितांगाः ॥
रुधिरोच्चयवर्षमस्थिमालाकरकौघं विदधुः करालघोषाः ॥ ५५ ॥
वियति प्रसमीक्ष्य कालमेघप्रतिमं पुण्यजनौघमुन्नदंतं ॥
अपि लोहितपूरवर्षमुच्चैर्मुनयस्तत्र वितत्रसुर्नितांतं ॥ ५६ ॥
तदनु क्षितिपात्मजोपि रक्षःकुलमुद्वीक्ष्य रणेच्छुरात्तचापः ॥
प्रथमं हृदि कंपमाशु तेषां गुणघोषैर्निदधौ ततः शरांश्च ॥ ५७ ॥
पृथुचापधरो नवांबुदाभः शरजालैः प्रतिवर्षमादधानः ॥
रघुसूनुरुदाररक्तवर्षं शमयामास निशाचराब्दमुक्तं ॥ ५८ ॥
पिशिताशिषु तेषु यूथपौ यौ धृतमारीचसुबाहुनामधेयौ ॥
प्रथमं जलधिं निनाय बाणैरपरं तत्र यमस्य धाम रामः ॥ ५९ ॥
हतयूथपतिर्निशाचरालिः परिदुद्राव तदाशुगैर्निरस्ता ॥
दशसु क्षणतो दिशासु भिन्ना द्रुतवातूलविधूतकालिकेव ॥ ६० ॥
क्षपिते तदनु क्षपाचरौघे नृपपुत्रेण नितांतशक्तिभाजा ॥
अपविघ्नमनुष्यकर्मशेषं विधिवत्ते निरवर्तयन् मुनींद्राः ॥ ६१ ॥
तस्याथ साधुविहितावभृथाप्लवस्य प्रोज्झासितारिरनुजेन समं स रामः ॥
कर्मावसानसमये कुशिकस्य सूनोर्जग्राह पादकमलं जगदेकवीरः ॥ ६२ ॥
पादद्वये निपतितं नृपतेः कुमारमुत्थाप्य सानुजमसौ सुतरां प्रसन्नः ॥
कर्मानुरूपमचिरेण फलं लभस्वेत्यन्वग्रहीच्छिरसि दत्तकरारविंदः ॥ ६३ ॥
प्राप्तः पुनर्मुनिवरः कृतकृत्यभावं ताभ्यां समं सुरसमानपराक्रमाभ्यां ॥
आत्माश्रमे विषयमार्गनिवर्त्तितात्मा स्वैरं निवासमकरोत्कतिचिद्दिनानि ॥ ६४ ॥

---

११ निचितानि=संपादितानि. १२ सप्ततंतुः=यज्ञः १३ पालिः=समूहः १४ करका=वर्षोपलः १५ पुण्यजनः=राक्षसः १६ लोहितं=रक्तं. १७ धाम=गृहं. १८ आशुगः=बाणः १९ प्रोज्झासितः=हतः

तस्यावदानसदृशं प्रतिकर्तुकामस्तेजोनिधेस्तदनु कौशिकवंशदीपः ॥
आलोच्य तं परिणयोचितमेव कालं कन्यां जगाम मनसा जनकस्य राज्ञः ॥६५॥
गंतुं मुनिर्मिथिलराजपुरीमियेष यावत्तदीयतनयाममुना युयुक्षुः[20] ॥
आमंत्रितस्तदनु तेन मखाय तावत्सद्यः सतामनुगुणो विधिरिष्टसिद्धौ ॥ ६६ ॥
संप्रस्थितः सपदि[21] राजकुमारकाभ्यां संक्रंदन[22]प्रतिमबाहुपराक्रमाभ्यां ॥
सार्द्धं विदेहविषयान् हृदयेंद्रियाभ्यां देही यथा मुनिवरः स्मरसुंदराभ्यां ॥ ६७ ॥
ते गौतमाश्रमचरं वनमेत्य मार्गे स्निग्धच्छदद्रुमतलेषु निशि न्यवात्सुः ॥
यत्तापसेंद्रतपसश्च तदीयजायादोषस्य धाम च सुधाविषयोरिवाब्धिः ॥ ६८ ॥
शापेन भर्त्तुरमराधिपजारसंगाज्जातक्रुधः पृथुशिलामयमूर्त्तिमुच्चैः ॥
तत्र स्थितां क्वचन गौतमधर्मपत्नीं तस्मै न्यवेदयदयं रघुपुंगवाय ॥ ६९ ॥
तस्यांघ्रिपंकजरजःकणसाध्यमस्याः शापस्य मोक्षमपि तापसतो निशम्य ॥
रामश्चचार चरणं शनकैः शिलायां सद्यः स्वकं वपुरवाप च तापसी सा ॥ ७० ॥
निर्मुक्तनिष्ठुरपरिग्रह[23]पाशबंधः प्राप प्रियं मुनिवरस्य परिग्रह[24]मसौ ॥
तेपि प्रसन्नतदनुग्रहपात्रभूता जग्मुर्जवेन जनकाधिपराजधानीं ॥ ७१ ॥
आगंतुकं मुनिवरं जनको यथावदर्घ्यादिभिः सपदि पूजयति स्म विद्वान् ॥
इक्ष्वाकुवंशसुकृतावपि बालकौ तौ पृष्टो मुनिर्नृपतये कथयांबभूव ॥ ७२ ॥
अभ्यागतेन मुनिना नृपतिर्नितांतं दध्रे मुदं मुनिरपि क्षितिपेन तेन ॥
लोकत्रयांतरचरित्रवतां जनानामन्योन्यतोषणकराणि समागतानि[25] ॥ ७३ ॥
सभ्यैः परस्परमथांगिरसादिभिस्तैः संकीर्त्तितोज्ज्वलविचित्रपुराणवृत्तः
यज्ञे समापनमिते जनकाय रामं व्यज्ञापयत्स विशिखासन[26]दर्शनोत्कं[27] ॥ ७४ ॥
क्वासौ शिशुः क्व किल तद्धनुरैंदुचूडं[28] येन क्षितीशतनया बहवो निरस्ताः ॥
वज्रस्य भेदनविधौ कुसुमाग्रधारा भूयात्कथं नु कठिनांतरभेदनस्य ॥ ७५ ॥
इत्थं विचिंत्य नृपतिं विमनायमानं दृष्ट्वा मुनिः सकलतत्वविदां वरिष्ठः ॥
तत्ताडकेतदवदानकथाभिरेनं सद्यः सतां प्रवरमुन्मनसं चकार ॥ ७६ ॥
तस्याज्ञया तदनु किंकरसंघनीतं जग्राह पाणिकमलेन धनुः कुमारः ॥
लीलावशेन च मुहुर्मुहुरुल्ललन् ज्यां सज्यं चकार नृपतिं परितोषयन् सः ॥७७॥
तेनातिमात्रपरिकृष्टमनूनसारं त्रैयंबकं धनुरहो तरसा विभग्नं ॥
कोलाहलस्तदनु तत्परिभंगजन्मा लोकत्रयांतरमपूरयदत्युदारः ॥ ७८ ॥
हृष्टस्तदा भृशमसौ मिथिलाधिनाथश्चक्रे मतिं निजसुताप्रतिपादनाय ॥

---

२० युयुक्षुः=योजयितुमिच्छुः २१ सपदि=सत्वरं. २२ संक्रंदनः=इंद्रः २३ परिग्रहः=शापः २४ परिग्रहः=पत्नी. २५ समागतानि=समागमाः २६ विशिखासनं=धनुष्यं. २७ उत्कः=उत्कंठितः २८ ऐंदुचूडं=शैवं.

आनेतुमप्यधिपमुत्तरकोसलानां स प्राहिणोदथ पुरोहितमेव धन्यः ॥ ७९ ॥
गत्वा जवेन समुपेत्य ककुत्स्थवंश्यं विज्ञाप्य वाचिकै[२९]मसौ बहुमानपूर्वं ॥
निन्ये विदेहविषयान् सहदारपुत्रं तं सैन्यभारपरिकंपितभूमिचक्रं ॥ ८० ॥
अभ्येयिवांसमथ सूर्यकुलप्रदीपमभ्यर्चितं दशरथं जनको यथावत् ॥
पुत्रीचतुष्टयमिदं तनयैश्चतुर्भिर्दत्तं द्रुदा परिगृहीतुमयाचतैषः ॥ ८१ ॥
कन्यामयोनिजनुषं[३०] रघुपुंगवाय स्वामौरसीमथ सुतामपि लक्ष्मणाय ॥
द्वाभ्यां कुशध्वज[३१]सुते भरताय तस्मै सौमित्रये च समकल्पयत प्रजेशः ॥ ८२ ॥
चक्रुस्ततः परिणयं विधिना कुमारास्तासां क्रमान्निजपुरोहितचोदितेन ॥
रात्रींदुसंगम इवातितराममीषामन्योन्यशोभनकरः स बभूव योगः ॥ ८३ ॥
पुत्रैः समं दशरथः कृतदारयोगैर्नीत्वा स कानिचिदहानि सुतानिकेते[३२] ॥
संप्रस्थितः सहपुरोहितमात्मगेहं सीरध्वजेन बहुकल्पितपारिबर्हः ॥ ८४ ॥
अथ नृपमनुयांतं मैथिलं मार्गमध्ये दशरथनरपालः तं निवर्त्य प्रयातः ॥
तप[३३]तपनसहस्रद्योत[३४]वद्दुर्निरीक्षं स खलु किमपि तेजः स्वाग्रभागे ददर्श ॥ ८५ ॥

क्रोधाग्नौ निजतातनिग्रहकथाधाय्या[३५]समुद्दीपिते ।
जुह्वा[३६] हंत जुहाव यः परशुना राजन्यवंशाहुतिं ॥
उन्मीलद्गुरुचापभंजनरवप्रोत्थापितस्तत्क्षणं ।
मध्येमार्गमसावदृश्यत मुनिस्तेजोनिधिर्भार्गवः ॥ ८६ ॥
एकेनाखिलराजलोकदहनं तेजः कुठाराभिधं ।
बिभ्रत्पाणितलेन निर्भरतरज्वालावलीभासुरं ॥
अन्येनाखिलपापकर्षणचणां[३७] रुद्राक्षमालामपि ।
ब्रह्मक्षत्रियधार्मिको मुनिवरः प्राप्तो नृपस्यांतिकं[३८] ॥ ८७ ॥

ब्रह्मन्नर्घ्यं पाद्यमित्याद्युदीर्य प्रत्युद्यांतं भूमिनाथं विहाय ॥
रामो यत्र त्र्यक्षकोदंडहंता गत्वा तत्र क्रोधनोसौ बभाषे ॥ ८८ ॥

रे रे बालक कालकाल[३९]धनुषो भंगस्त्वया भावितो ।
नन्वारोपय वैष्णवं धनुरिदं द्रक्ष्यामि ते विक्रमं ॥
नोचेत्त्वां गुरुचापभंगकरणव्यक्तापराधं जवात् ।
कुर्वे सर्वमहीशवंशदहनक्रूरे कुठारातिथिं ॥ ८९ ॥
उक्त्वैवं धनुरार्पयद्भृगुपतीरामो गृहीत्वा द्रुतं ।

---

२९ वाचिकं="निरोप" इतिमहाराष्ट्रभाषायां. ३० जनुः=जन्म. ३१ कुशध्वजः=जनकभ्राता. ३२ निकेते=गृहे. ३३ तपः=ग्रीष्मः ३४ सहस्रद्योतः=सूर्यः ३५ धाय्या=सामिधेनीऋक् या समिधामाधाने पठ्यते. ३६ जुह्वा=स्रुचा. ३७ चणा=निपुणा. ३८ अंतिकं=समीपं. ३९ कालकालः=शिवः

सज्जीकृत्य सलीलयैव विशिखं[40] संधाय कर्षन् गुणं ॥
ब्रह्मन् कुत्र सृजामि सायकमिमं नैव प्रहार्यो भवान् ।
विप्रत्वेन पुरोगतोपि न शरो मोघो[41] ममेत्यब्रवीत् ॥ ९० ॥
तदनु मुनिवरेण त्रसुना तत्र रामे स्वगतिहतिसमर्थं वैष्णवं वीक्ष्य वीर्यं ॥
सकरुणपदमेष प्रार्थ्यमानो दयालुः शरमय तपसार्त्तं[42] लोकमाहंतुमैच्छत् ॥ ९१ ॥
दृष्ट्वाद्भुतं तदपि कर्म कुमारकस्य तुष्टो मुनिः सपदि नष्टमदातिरेकः ॥
आशीर्भिरेनमनुगृह्य कृतप्रणामं साधीयसीभिरय साधयति स्म शांतः ॥ ९२ ॥
याते तत्र मुनीश्वरे दशरथो गाढं समाश्लिष्य तं ।
पुत्रं जैत्रममंस्त निर्गतमिव क्रूरस्य मृत्योर्मुखात् ॥
तुष्टः कष्टदशाव्यतिक्रमणतः प्राप स्वकं मंदिरं ।
सत्रा[43] पुत्रकलत्रमित्रनिवहैः सुत्रामबंधुर्[44]नृपः ॥ ९३ ॥
शरणगतजनत्राश्वारुतापूर्णगात्रा विदितसकलशास्त्रा वीरभावातिमात्राः ॥
चिरतरमथ पित्रा चिंत्यमानाश्च मात्रा रमितनिजकलत्रा रेजिरे राजपुत्राः ॥ ९४ ॥
॥ इति श्रीरामचरिते महाकाव्ये द्वितीयः सर्गः ॥ २ ॥

अथाधिगम्य क्षितीपालनंदनामयोनिजामंगज[45]शास्त्रकोविदैः[46] ॥
अरीरमत्तामरविंदलोचनां चिराय रामश्चरणानतप्रियः ॥ १ ॥
अशेषकर्त्रा निजशिल्पनैपुणीपरीक्षणार्थं कमला[47]शिवादयः ॥
पुरा व्यरच्यंत हि दिव्ययोषितो व्यधायि भूयः कुशलेन या ध्रुवं ॥ २ ॥
मनुष्यनारीजनतापि यौवतं[48] दिवौकसां श्रेष्ठतमं वदंति यत् ॥
तदद्य धात्रा विपरीतमाहितं बतेति शोचंति सुराश्च यत्कृतो ॥ ३ ॥
विधुं यदास्यं च विधाय वेधसा न्यधायिषातामनयोर्विषामृते ॥
तदेव रूपं हृदि दृश्यते तयोः कलंकदंतच्छदकैतवेन हि ॥ ४ ॥
जगज्जिगीषोर्मदनस्य साधनैयदंगमाधायि विरिंचिना ध्रुवं ॥
चकास्ति यल्लोचनयोः पृषत्कता[49] भ्रुवोर्धनुष्टं कुचयो रथांगता[50] ॥ ५ ॥
यदीययोः कांचनपद्मकोशयोरुरोजनाम्नोरविकासतोचिता ॥
समीपवर्त्ती सततं मुखाह्वयः सुधानिधिः[51] सुंदरहासचंद्रिकः ॥ ६ ॥
विलासवापी खलु विश्वमोहिनी यदीयनाभिः सुषमामृता[52]ऽतनोः ॥

---

४० विशिखः=बाण. ४१ मोघः=विफलः ४२ आर्त्तं=प्राप्तं. ४३ सत्रा=सह. ४४ सुत्रामबंधुः=इंद्रमित्रः ४५ अंगजः=मदनः ४६ कोविदः=निपुणः ४७ कमला=लक्ष्मी. ४८ यौवतं=युवतीसमूहः ४९ पृषत्कता=बाणता. ५० रथांगता=चक्रता, चक्रवाकता च. ५१ सुधानिधिः=चंद्रः ५२ सुषमा=शोभा.

कुचद्वयं रोमलताप्रवर्ति तत्सरोजकोशद्वयमेकनालजं ॥ ७ ॥
श्रियं दधानं करभातिशायिनीं यदीयमूरुद्वयमात्तमार्दवं ॥
करं करींद्रस्य करोति कर्कशं कुतः प्रकारादुपमानमात्मनः ॥ ८ ॥
जिगाय रंभा[५३] मरुदंगसंगमे[५४] सवेपथुं[५५] स्वोरु[५६]गुणेन सुंदरी ॥
निशम्य वार्तामिति जातमत्सरा न यत्र रंभा रमणीशिखामणिः ॥ ९ ॥
सुखस्वनैः साधुसुवर्णहंसकै[५७]रलंकृतं यत्पदमल्पितांबुजं ॥
अजस्रमेतद्गतिमश्नुते परां परंतु पंकोत्कर एव तिष्ठति ॥ १० ॥
सदा परश्रीकरमेव कांचनं यदंगसंगेषु तथात्वमुज्झति ॥
तदेव गृण्हाति तदा तदत्र यन्न कांचनं नांचति कांचनश्रियं ॥ ११ ॥
यशो यदीयं यमशासना[५८]लयक्ष्माधर[५९]स्पर्द्धनमाचचार यत् ॥
ततः किमासीदिति लोकचिंतनं तदीय[६०]दुर्वर्णतयैव शाम्यते ॥ १२ ॥
यदंतरासाद्य पतिप्रचोदिता सरस्वती वादयतीव वल्लकीं[६१] ॥
तथाहि सर्वे स्वकृतेषु वत्सलाः स्वरस्तदीयश्च गिरीह पंचमः ॥ १३ ॥
अवाङ्मुखं वाङ्मुखनिर्जितं यया ययौ वनं यौवनमन्यपुष्टकं ॥
किमाव्हयत्यात्मनि गूहने मुहुर्भयेन तत्रापि तमोमयीं कुहूं[६२] ॥ १४ ॥
तया समेतः सपुरं पुरंदरः पुरंदरक्ष्माधर[६३]सुंदरं भुवः ॥
समाससाद स्मरकेलिकौतुकी समासं[६४]आनंदविधायि संपदां ॥ १५ ॥
प्रियः प्रियायाः प्रथमोपयोजने[६५] प्रयस्तवा[६६]नप्यभवत् प्रहृष्टधीः ॥
रसैकसारे रसिकस्य वस्तुनि प्रयाति चेतः प्रमदं[६७] हि दुर्लभे ॥ १६ ॥
उपेत्य केलीगृहमुज्ज्वलोज्ज्वलं बभाज शय्यातलमच्छकोमलं ॥
स काल[६८]धौताततनुदुग्धपूर्णतत्कटाहमध्यास्थितनूतनाज्यवत् ॥ १७ ॥
अथेषदंकूरितचारुयौवनां गुणोत्करक्षोभितविश्वयौवनां ॥
नरेंद्रसूनुर्निजकेलिमंदिरे समाजुहाव स्वयमंबुजेक्षणां ॥ १८ ॥
न पारयामास चिराय सा व्हिया बहिः स्थितांतस्थितयासुमालयं ॥
यदा पुनः सेवकदापि साभवत् तदा न हूति[६९]र्दयितस्य निष्फला ॥ १९ ॥
प्रवेशितायास्तु कथंचिदालयं सखीभिरन्यत्र विलोभनादिभिः ॥

---

५३ रंभा=कदली अप्सराश्च. ५४ मरुत्=वायुर्देवो वा. ५५ वेपथुः=कंपः ५६ ऊरुः=सक्थि विपुलो वा. ५७ हंसकः=पक्षिविशेषः पादभूषणं च. ५८ यमशासनः=शिवः ५९ क्षमाधरः=पर्वतः ६० दुर्वर्णता=रजतता, दुष्टवर्णता च. ६१ वल्लकी=वीणा. ६२ कुहूः=कोकिलारावोऽमावस्या च. ६३ पुरंदरक्ष्माधरः=महेंद्रपर्वतः ६४ समासं=स्थानं. ६५ उपयोजनं=संगमः ६६ प्रयस्तवान्=यत्नं कुर्वन्. ६७ प्रमदः=हर्षः ६८ कालधौतं=रजतं. ६९ हूतिः=आव्हानं.

समीक्ष्य कांतं सपदि श्रितह्रियः कपाटपृष्ठः शरणं नतभ्रुवः ॥ २० ॥
धरः परप्रेरितलोचनस्तया दृशः कणेनैव किमप्यचुंबि सः ॥
निवर्तिताक्षः स च वीक्ष्य सिष्मिये प्रतीक्षितं येन तदेव चेष्टितं ॥ २१ ॥
तदक्षिणी तामरसे यदि स्फुटे न सह्यतां तस्य मुखेंदुदर्शनं ॥
अनौचितीयं यदसंमुखः शनैरलोकि ताभ्यामयमंतरांतरा ॥ २२ ॥
चिराय धन्या प्रतिहारदंडिका[७०]कपाटपृष्ठश्च ततस्तदाश्रयात् ॥
अनेहसा[७१]भूद् बहुनैव धन्यता तदंगसंगाच्छयनस्य तस्य वा ॥ २३ ॥
शयालुभावं गमितापि तल्पके प्रियाभिमुख्यं न बभाज सा ह्रिया ॥
नृपस्तु निद्रामभिनीय तद्वशादपापराधः स्फुटमालिलिंग तां ॥ २४ ॥
प्रियस्य तस्याः प्रथमांगसंगमे सुधारसे मग्नमिवास मानसं ॥
अमंदमंदाक्ष[७२]भयाक्ष[७३]वारितं तदुत्थमानंदमियं न चाध्यगात् ॥ २५ ॥
त्रपानुभावादपदूयदंतरां[७४] विहाय केलीशयनं विनिर्यतीं ॥
स्वबाहुवल्लीवलयेनवारितामशीशयत्तामयमात्तसाहसः ॥ २६ ॥
इतस्तव ह्रीभयमप्यपास्यतां य एष ते प्रीणनतत्परः परं ॥
इति प्रियेण ब्रुवतावलोकितं करांगुलिमध्यगतं मृदुस्मितं ॥ २७ ॥
मुहुर्मुहुश्चाटुशतानि वर्षतः प्रियस्य भूयः[७५] प्रमदाय साभवत् ॥
भयत्रपामन्मथबालखेलनाविलासरंगं दधती कलेवरं ॥ २८ ॥
यदा विभिद्य ह्रियमात्मकुंठनीं मनोभुवा किंचिदुदंचितं शिरः ॥
ह्रदि प्रियाया विनिवेशितस्तदा करः प्रियस्याकृत तत्सहायतां ॥ २९ ॥
नताननाया निटिलं[७६] नतभ्रुवः कलां विधोश्चुंबति तन्मुखांबुजे ॥
अवज्ञयेव प्रतिपक्षसंश्रये कराब्जमस्या निरुरोध तन्मुहुः ॥ ३० ॥
क्रमेण तत्तत्परिशीलना[७७]दिना नृपेण तस्या भयमापि दूरतां ॥
कुमारकेणापि तदा विशंकिता मनोभुवेषज्जयता बत ह्रियः ॥ ३१ ॥
सरोजयोस्त्वच्छ्रवणावतंसयोः सुगंधिता कीदृगिति क्षमाभृता ॥
तदंतिकप्रापितवक्त्रवारुहा[७८] प्रतार्य साचुंबि कपोलभूतले ॥ ३२ ॥
किमत्रजातं तव चुंबितेलिके[७९] कपोलयोर्वा कलवाणि[८०] भण्यतां ॥
इतो[८१]तिरिक्तं भविता न तेधरे न चोदितो मंद्रिरि मा स्म विश्वसीः ॥ ३३ ॥
इतीश्वरेणेंगितसारवेदिना क्षितेस्तदर्धानुमतावगामिना ॥

---

७० प्रतिहारदंडिका=द्वारदारुविशेषः ७१ अनेहसा=कालेन. ७२ मंदाक्षं=लज्जा. ७३ अक्षः=इंद्रियं. ७४ अपदूयदंतरां=संतप्यमानांतःकरणां. ७५ भूयः=अतिशयेन. ७६ निटिलं=भालं. ७७ परिशीलनं=अभ्यासः ७८ वारुहं=कमलं. ७९ अलिकं=भालं. ८० कलवाणि=मधुरभाषिणि. ८१ इतः=अतःपरं.

विचुंब्य तत्पल्लवकोमलाधरं भृशं ममज्जे प्रमदाभिधांबुधौ ॥ ३४ ॥
मनः समाधाय मनोज्ञशीलया बलादुपात्रामि चिरं विलोकितुं ॥
उपाचरद्भिन्नममुष्य तत्क्षणात् स्मितप्रदानात् पतिरेव साहसी ॥ ३५ ॥
कुचद्वयस्योपरि कर्कशात्मनो निधातुकामे करपद्ममीश्वरे ॥
निपीडनं तस्य विशंक्य वल्लभा किमत्र हस्तौ परितस्तरे निजौ ॥ ३६ ॥
असंमुखोहं परिरभ्यतामिति प्रियेण साचीकृतमाननं निजं ॥
अपारयत्सा न तथापि तत्कृतौ विलोक्य तद्विघ्नमुपांतभित्तिगं ॥ ३७ ॥
करं कृशांग्याः परिगृह्य पार्थिवः स्ववक्षसा योजयति स्म कोमलं ॥
द्रुतं द्रवीभूय तदा तदास्थिताः प्रसर्तुरारात् घुसृणस्य रेणवः ॥ ३८ ॥
प्रसह्य तस्याः पिबता रदच्छदं तदंतरायाचरणोद्यते करे ॥
निरंशुकीकृत्य कुचद्वयं जवात् समालिलिंगे सुदृढं महीभृता ॥ ३९ ॥
यदत्र किंचित् त्रपया नतास्यया निजेच्छयारंभि तया समीहितं ॥
तदर्थमर्थित्वमवाप चेत् प्रियस्तदेव सद्यः समकोचि सुभ्रुवा ॥ ४० ॥
ममाद्य माभूत् पतिकेलिवामतेत्यहःसु तस्या हृदि ये समाश्रयः ॥
निशासु मंदाक्षपिशाचहुंकृतीर्निशम्य भीतैरिव तैः पलायितं ॥ ४१ ॥
क्षमाभृतश्चाटुसुधाभिषेचनात् क्रमेण तस्या हृदि कामपादपः ॥
अपि त्रपारूपनिदाघपौरुषं मनागनादृत्य पुपोष पोषणं ॥ ४२ ॥
निपीडयामास नृपस्य चुंबतो निजाधरेणाधरमंगना शनैः ॥
तथा मनागुन्नमितस्तनी च सा बभूव पत्युः परिरंभविभ्रमे ॥ ४३ ॥
क्रमेण सा बाह्यरतेषु वामतां विहाय संजातरसा यदाभवत् ॥
नृपोपि तावत्खलु नीविमोचने करं करेणुप्रचरो व्यचीचरत् ॥ ४४ ॥
स निद्रया मुद्रितचेतसः शनैर्विमुच्य तस्या दृढनीविबंधनं ॥
प्रबोध्य चाह स्तनकंपनैरिमां कथं तवेयं गलितेति सस्मितं ॥ ४५ ॥
अथ ह्रिया संकुचितांगवल्लरी पयःसु तैलप्रतिवत् प्रसृत्वरा ॥
ससंभ्रमोद्वेगनिबद्धनीविका प्रियप्रमोदार्णवसेतुमच्छिनत् ॥ ४६ ॥
कुचद्वयांते निहितोपि तत्करस्तया न धूतः परमत्र गाढितः ॥
विशंक्य नीविस्वमोचनं ततः सुमर्द आसीत्तदमुष्य तत्कुचः ॥ ४७ ॥
निधाय तस्याः पुरतः स दर्पणं विलोकयंस्तत्प्रतिबिंबमुल्बणं ॥

---

८१ साचीकृतं=तिर्यक्कृतं. ८३ तत्कृतौ=परिरंभणे. ८४ आरात्=समीपे. ८५ घुसृणं=कुंकुमं. ८६ अंतरायः=विघ्नं. ८७ वामता=प्रतिकूलता. ८८ समाश्रयः=संकल्पाः ८९ पादपः=वृक्षः ९० निदाघः=ग्रीष्मः ९१ करेणुप्रचरः=मंदगतिः ९२ तैलप्रतिवत्=तैललेशवत्. ९३ उल्बणं=व्यक्तं.

विमुच्यते नीविरसाविति ब्रुवन् हसन्मुखस्तज्जघनेऽकरोत्करं ॥ ४८ ॥
तदूरुकांडे सविलासमर्पितः [९४]शयः शयानेन सहानयामुना ॥
स्फुटं तदीयेन जवादुदंचता विधूततां वेपथुनैव यापितः ॥ ४९ ॥
सरोजदृष्टेरुरसि स्वमाननं निधाय तस्याः सुचिरं चुचुंब सः ॥
हृदि स्थितं मन्मथ[९५]जातवेदसं प्रदीपयिष्यन्निव फूत्कृतानिलैः ॥ ५० ॥
तथा हि चक्रे चटुभिर्मनोहरैः प्रवृत्तिभिश्च प्रणयी निजप्रियां ॥
यथा सरागा मदनोत्सवेष्वसौ न भीषिता च त्रपयातिधूर्त्तया ॥ ५१ ॥
निरस्तदीपे निबिडे तमोभरैरुदर्चिरिं[९६]द्रोपलमंडिते गृहे ॥
निवेश्य कांतां शयने महीपतिश्चकार [९७]तच्चैलविमोक्षमादिमं ॥ ५२ ॥
सहाभिलाषं सभयं सकौतुकं सपीडनं सातिसुखं समूर्छनं ॥
सवेपथुश्वासनिदाघसंभ्रमं स[९८]वामतं चानुबभूव सा रतं ॥ ५३ ॥
विधाय तस्या रतमादिमं पतिः स्मयन्निमामाह नताननांबुजां ॥
कथं त्वयाऽऽसे[९९]चनकांगि लुप्यते त्रपा न संप्रत्यपि दृष्टपारया ॥ ५४ ॥
रतक्रियामो[१००]दभृते विकस्वरे सति त्वदीये हृदयाब्जको[१]रके ॥
कुतस्त्रपा नश्यति न त्वदाननक्षपा[२]करादर्शनकारिका[३]लिका ॥ ५५ ॥
चिरं परि[४]ण्या परिशीलिताप्यसौ जहाति न ह्रीभरमस्य केलिषु ॥
इति त्वया मानिनि मा स्म भूयतः स्फुटं सखीभिः परिहास्यमानया ॥ ५६॥
इति प्रिये वादिनि वेदि[५]कोदरी स्मितप्रभासुंदरमास्यमंडलं ॥
वितन्वती किंचिदचीकरद् दृशौ नृपस्य पंचामृतसारपारणां ॥ ५७ ॥
न पारयेहं भवदंतिकाश्रये त्वयैव मत्पार्श्वमुपेष्यतामिति ॥
जुहाव कांतं मुहुरंघ्रिणैव सा विलज्जिता भूमिविलेखनच्छ[६]लात् ॥ ५८ ॥
ततो निजोत्संगतले निवेश्य तामुपेत्य पार्श्वं कमितानताननां ॥
प्रतिप्र[७]तीकेक्षणचुंबनादिभिश्चकार दक्षः परिशील्य निस्त्रपां ॥ ५९ ॥
स लालयित्वा चिरमंकपंजरे बबंध तस्या हृदि हा[८]र्दमीदृशं ॥
यदेति नापद्यपि संपदि क्षयं वनेपि नाकेपि यतोनुगच्छति ॥ ६० ॥
अधिप्रभातं दयितस्य मंदिराद्विनिर्यती सा सहसा व्यहस्यत ॥
विलोकत स्वर्णघटे कलां नवां विधोरिति स्पष्टवचोभिरालिभिः ॥ ६१ ॥
प्रियास्यतांबूलरसारुणे दृशौ सखीजने पश्यति सस्मितं वधूः ॥

---

९४ शयः=हस्तः ९५ जातवेदसं=अग्निं. ९६ इंद्रोपलः=इंद्रनीलमणिः ९७ चैलं=वस्त्रं. ९८ सवामतं=सप्रातिकूल्यं. ९९ आसेचनकांगि=यस्य दर्शनेन तृप्तिर्न तादृश्यांगि. १०० आमोदः=हर्षः १ कोरकः=कुड्मलः २ क्षपाकरः=चंद्रः ३ कालिका=मेघपंक्तिः ४ परिण्या=पत्या. ५ वेदिकोदरी=कृशोदरी. ६ छलः=मिषं. ७ प्रतीकः=अवयवः ८ हार्दं=प्रेम.

स्फुटं कराभ्यामलकावतंसितप्रसूनरेणोरपराधमभ्यधात् ॥ ६२ ॥
विनीतिभाजैव विनेतुरंतिकं तयाभिसस्रे न कदाचनान्यथा ॥
तया च तस्याजनि तत्र निस्तुला प्रवर्धमाना प्रियता नतभ्रुवि ॥ ६३ ॥
अजस्रमस्यां रसभागपि क्षितेः सहस्रनेत्रः सुहितत्वमाप न ॥
निमेषकालोपि वियोगवासितो विकल्पितस्तेन सकल्पकल्पतः ॥ ६४ ॥
विबत्यमुष्मिन् रदनच्छदं मृदु न्यषेधि यत् कुंचितया तया भ्रुवा ॥
रराज राजीवशरासनस्य तत् पतिं प्रति स्वायुधदंडवक्रणा ॥ ६५ ॥
प्रियामुखेंदोरमृतं धयंन्नयं चिराय कांतो न विरंतुमैहत ॥
अतो रुषेव प्रमदापि पाणिजैरमुष्य पार्श्वे विरराद कोमलैः ॥ ६६ ॥
ललाटमौलौ करमेककं वरश्चकार तस्याश्चिबुकेपि चापरं ॥
उभावभातामभितः सुधाकरं परं ग्रसंती इव पंकजे हठात् ॥ ६७ ॥
निवेशिते चुंबनलीलयामुना करे शिरस्यंबुधिमेखलाभुवः ॥
निजा मुखेनांबुरुहातपत्रिणा स्फुटीकृतेवाननसार्वभौमता ॥ ६८ ॥
निधाय मध्ये चिबुकस्य तर्जनीं स तोलयामास शनैर्मृगीदृशः ॥
स्मितामृतं स्यंदय वक्त्रचंदिरादितीव लील्यात्प्रहितः स्वचक्षुषा ॥ ६९ ॥
महीभृतां यः परिहाप्य धीरतामचीकरत् तान् करदानमात्मनः ॥
स एष दृष्ट्वा तदुरोजभूभृतौ विमुक्तधैर्ये करदत्वमेयिवान् ॥ ७० ॥
समुद्रकांचीदुहितुः स्तनद्वयं समुद्घृणामधिपो नखक्षतैः ॥
स मुद्रयामास तदा तदाबभौ समुद्रुतंस्वर्णघटीव विद्रुमैः ॥ ७१ ॥
उरोजसीम्नि छुरितं वितन्वति क्षितीश्वरे सा कृतमंदसीत्कृतं ॥
चुचुंब तस्याधरमप्यनेन तत्सुखात् समारब्धविधेर्व्यरम्यत ॥ ७२ ॥
दुकूलमाकर्षति वल्लभे सती निलीय तस्यैव तनौ हृणीयया ॥
निदाघतोयोदयगाढसंगतैरदःप्रतीकैरखिलांगमावृणोत् ॥ ७३ ॥
परास्तपारावतकूजितैरुते रते नितांतं पतिकर्णयोरपि ॥
ववर्ष पीयूषरसं रसात्मजा न केवलं तद्रसनेऽधरार्पणात् ॥ ७४ ॥
पपौ विशंकं वसुधासुता सुधां तदाननात् तृप्तमिनस्य मानसं ॥
असंगतिश्चेतसि शृण्वतामिदं निरस्यते तद्धृदया पृथक्तया ॥ ७५ ॥
चिराय चेतोभवकेलिसागरे तरंगलीलामनुभूय दंपती ॥

---

९ सुहितत्वं=तृप्तिः १० धयन्=पिबन्. ११ पाणिजं=नखं. १२ विरराद=विलिलेख. १३ चिबुकं=हनुवटीति महाराष्ट्र भाषायां. १४ अंबुधिमेखलाभुवः=सीतायाः १५ चंदिरः=चंद्रः १६ समुत्=सहर्षः १७ मुद्रयामास=अंकयामास. १८ समुद्रुतं=विलीनं. १९ छुरितं=व्रणं. २० हृणीया=लज्जा.

विलोचनोन्मेषविलोपरोपणक्षमं श्रमं तौ सुतरामवापतुः ॥ ७६ ॥
अखर्वनिश्वासपरंपराकिरामसंकुचत्स्वेदकणांकिताननां ॥
मुहुः कृताचुंबनमंतरांतरा स वीजयामास चिरं जलार्द्रया ॥ ७७ ॥
रतश्रमस्विन्नकपोलमंडलं विलोकयंती मुखमस्य सुंदरी ॥
निजाधरे विद्रुमभासि तद्रदैः कृतं यदागस्तदवागमत् स्फुटं ॥ ७८ ॥
विलोक्य वक्त्रं करदर्पणे निजं स्मरक्रियामाचरति क्षितीश्वरे ॥
विलोचनप्रांतचरत्कनीनिकं मुखं मृदुस्मेरमनामि कांतया ॥ ७९ ॥
ददर्श पश्यन्नपि तत्कलेवरं चुचुंब चुंबन्नपि तन्मुखांबुजं ॥
अजस्रमालिंगितवानपि प्रियः स्तनोपपीडं मुहुरालिलिंग तां ॥ ८० ॥
रतश्रमालस्यभृतो महीभृतो निदाघपूरप्रशमे निदानतां ॥
दधे दधानैरपि कोष्णतामहो तदीयनासापथिकैः समीरणैः ॥ ८१ ॥
श्रमापनोदाय शशांककोमलं तदंगमात्मोरसि सन्निधाय सः ॥
असिस्वदत्तन्मृदुतां यदा तदा चुकोप ताभ्यां पुनरप्यनन्यजः ॥ ८२ ॥
रसातिरेकस्तरसातिवेलतां गतो नतांग्याः श्रितकांतवक्षसः ॥
विनेतुमेनां पुरुषायिते रते मनोभुवा देशिकभावमापितः ॥ ८३ ॥
यथेष्टमस्यामपशंकमत्रपं रतक्रियाविक्रमभाजि भूपतेः ॥
चिराय चूतायुधपीडनासहं कृतार्थतामानि बभूव मानसं ॥ ८४ ॥
विदग्धवेश्यास्वपि विद्यते न या प्रकाशिता सा रतिचातुरी तया ॥
सदैव सारस्य सरस्वतामुना सहासिकां यां सुमतिः प्रतीच्छति ॥ ८५ ॥
चिराय भावं परिगृह्य पौरुषं श्रमातिरेकादलसाखिलेंद्रिया ॥
अगादुरस्येव वरस्य सुंदरी शयालुतां शीतलितैतदंतरा ॥ ८६ ॥
मुखाब्जमीषन्मुकुलीकृतेक्षणं मुहुर्मुहुश्चुंबति वल्लभे वधूः ॥
प्रपन्नसंज्ञा तदनु त्रपाबलाद् विहाय शय्यामपि सावसत् क्षणं ॥ ८७ ॥
विकीर्णमालाकबरं कचोत्करं विभिन्नहारस्फुरितं पयोधरं ॥
अपि श्रमांभःसुभगं मुखांबुजं निरीक्ष्य तृप्तिं ययतुर्न तद्दृशौ ॥ ८८ ॥
उदूढसंमोदमथो यथापुरं प्रियस्य पार्श्वे शयितापि सुंदरी ॥
विचिंत्य सा केवलमात्मसाहसं प्रियाननं प्रेक्षितुमक्षमाभवत् ॥ ८९ ॥
अतिश्रमार्त्तौ चिरकालखेलनात् परस्पराश्लेषसमर्पितांगकौ ॥

---

२१ जलार्द्रा=जलसिक्तव्यजनं. २२ निदाघः=घर्मः २३ निदानता=हेतुता. २४ कोष्णता=ईषदुष्णता. २५ अनन्यजः=मदनः २६ देशिकभावः=गुरुत्वं. २७ सरस्वता=समुद्रेण. २८ सहासिका=सहवासः २९ प्रतीच्छति=करोति. ३० शीतलितैतदंतरा=शीतलिमेतस्य अंतरं यया सा.

सुखस्य रूपांतरमेव मूर्छत[31]श्चिरस्य निद्रामथ गच्छतः स्म तौ ॥ ९० ॥
प्रभातकाले प्रथमप्रबुद्धया विचुंब्यमाने स्फुटमानने तया ॥
प्रबुद्धवानप्ययमप्रबुद्धवच्चिराय शेते स्म सुखानुभावुकः ॥ ९१ ॥
विहाय शय्यां कथमप्युदंचति प्रभाकरे केलिगृहाद्विनिर्यती ॥
नृपेण पश्चादुपगम्य सत्वरं निवर्त्य सा द्वारि विचुंबिता चिरं ॥ ९२ ॥
विलोलकेशावलिकीर्णमाल्यकं कृशांगरागं करजव्रणांकितं ॥
बभूव तस्याः परिमर्दविश्लथं मुदे सखीनां वपुरह्नर्[32]मुखं ॥ ९३ ॥
वियुक्तिरानश्यककर्मकालिकी तयोरभूत्केवलमेकभावयोः ॥
अवापतुस्तावत एव दंपती नवं नवं प्रीतिभरं समागमे ॥ ९४ ॥
मिथः कृतस्वैरकथारसामृतैः पुराणकाव्यादिविलोकनैरपि ॥
सुजातसंगीतमुखाभिरप्युभौ कलाभिरेतौ दिवसानि निन्यतुः ॥ ९५ ॥
इत्थं तयोर्विहरतोरितरेतरेण स्वच्छंदमेव गणरात्रमतीतमासीत् ॥
उद्वेलमन्मथविलासजलाशयोद्यद्वीचीवशंवदहृदंबुरुहोरजस्रं ॥ ९६ ॥
आरामे रमणीयपादपलतानैरंतरीबंधुरे ।
सानंदं सरसीषु सार[33]सवनीसौरभ्यरम्यास्वपि ॥
क्रीडाशैलशिरस्सु शेखरशिलासंस्तंभितांभोधरे- ।
ष्वन्यत्रापि मनोहरेषु स तया रेमे यथावांछितं ॥ ९७ ॥
इति श्रीरामचरितकाव्ये तृतीयः सर्गः ॥ ३ ॥

तदनु भूदनुभू[34]रिपुनायकं सहितमाहितमा[35]नयानया ॥
सरसमार[36]समानमुपास्त तं कृतरसा तरसा ततिरार्तवी[37] ॥ १ ॥
प्रथममास मधु[38]र्मधुपांगनामधुरगाननिदानसमृद्धिमान् ॥
प्रमदकोकिलकोमलका[39]कलीविलसितालसिताखिलमानसः ॥ २ ॥
स कृतमालतमालवनावलिस्फुटसमीरसमीरणमैक्षत ॥
अतिरसेन रसेन[40]सुतो मधुं विमततामततामतिभीषणः ॥ ३ ॥
चपलपल्लवचंपकपंजरी पथिकमानसपल्वलकुंजरी ॥
विलसति स्म विलासवती दवानलसमा लसमानशिखावलिः ॥ ४ ॥
सुकृतभागयमेकतमः परं वनतरुस्तबकेषु विकासिषु ॥
अनुबभूव नयोमलिनात्मकभ्रमरपामरपातकृतां व्यथां ॥ ५ ॥

---

३१ मूर्च्छतः=वर्धमानस्य. ३२ अहर्मुखं=प्रातःकालः ३३ सारसं=कमलं. ३४ भूदनभूरिपुनायकः=भूमींद्रः ३५ आहितमानया=कृतादनया. ३६ मारः=मदनः ३७ आर्तवी=ऋतुसंबंधिनी. ३८ मधुः=वसंतः ३९ काकली=शब्दः ४० रसेनः=पृथ्वीपतिः

अचिरशैशिरविक्रमशोषिता कमलिनी करहाटकशे[41]षिता ॥
अजनि तत्र नवीनदलोल्लसद्विमलकोमलकोरकभूषिता ॥ ६ ॥
प्रवसति प्रणयावसथे[42] कथं श्वसिति[43] बालवधूरिति दुःखिता ॥
उचितमेतदिह स्फुटितांबुजा वननदी न न दीर्घमसिश्वसत् ॥ ७ ॥
नवरसाल[44]दलावलिपावके भ्रमदलिव्रजधूमसमाविले ॥
परभृताहुतिमाधित माधवः सुनयनाऽऽनयनाय विलासिनां ॥ ८ ॥
कलकलः कलकंठमुखोद्गतः श्रवणगोचरभावमनायि यैः ॥
निजवधप्रसितै[45]स्स्य चमूकृतध्वनिरमानि रमातनयस्य तैः ॥ ९ ॥
विधृतनैकविधागम[46]वेदिताः सुमनसः[47] खलु माधव[48]पोषिताः ॥
पदमकुर्वत यामियमुन्मधुद्रवसुधा वसुधासुरभूरभूत् ॥ १० ॥
निजविलोचननीरुह[49]हार्पणादतिरसास्तिमितैरिह कैर्जनैः ॥
कुसुमबाणसखेन[50] सुखासितं विपिनमापि न मानमनेहसा[51] ॥ ११ ॥
तरुणपल्लवताम्रपुटे स्थितं मकरकेतनलिंग[52]मिवालिनं ॥
अभिषिषेच मरंदरसामृतैर्नवलता बलतापन[53]रत्नभं ॥ १२ ॥
बहलसौरभरंजितदिङ्मुखा बकुलशाखिलताप्रतिकामिनः ॥
अतनुताऽऽगतषट्पदपेशलस्वनमिता नमिता वरवर्णिनीः ॥ १३ ॥
सुरभिलानिलसंहितै[54]र्वेपथू[55] वनलता वनिता च महोद्यमं ॥
विदधतुर्युगपत् सकलं जगद्वशयितुं शायितुं दयितेन च ॥ १४ ॥
महिषपत्रकलत्रहरि[56]द्भवं मरुतमाशु निपीय वियोगिनः ॥
तदनुमेलन एव निरायतं श्वसितमासितमात्मनि तत्यजुः ॥ १५ ॥
इति मधौ वनसीमनि जृंभिते प्रियतमासहितः स तु तच्छ्रियं ॥
अनुभवन्नतिपेशल[57]तानिधिश्चिरमतोऽरमतोदितकौतुकः ॥ १६ ॥
भ्रमरगीतगानलयीभवत्परभृतानक[58]नादिनि कानने ॥
मलयमारुतचारुतमाधुत[59]व्रतति[60]संततिसंभृततांडवे ॥ १७ ॥
इतर[61]पुष्टवधूमुखखंडितस्खलितपल्लवमंडितभूतले ॥
सकलदिक्तटगाहिसुगंधितावमनवामनवागमशोभिते ॥ १८ ॥

---

४१ करहाटकशेषिता=कंदावशिष्टा. ४२ प्रणयावसथः=प्रियः ४३ श्वसिति=जीवति. ४४ रसालः=आम्रः ४५ प्रसितः=आसक्तः *रमातनयः=मदनः ४६ आगमः=शास्त्रं वसंतश्च. ४७ सुमनसः=देवाः पुष्पाणि च. ४८ माधवः=विष्णुर्वसंतश्च. ४९ नीरुहं=कमलं. ५० कुसुमबाणसखः=वसंतः ५१ अनेहसा=कालेन. ५२ लिंगं=चिन्हं. ५३ बलतापनः=इंद्रः ५४ संहितः=कृतः ५५ वेपथुः=कंपः ५६ महिषपत्रककलत्रहरित्=दक्षिणादिक्. ५७ पेशलता=सौंदर्यं. ५८ आनकः=दुंदुभिः ५९ धुतः=कंपितः ६० व्रततिः=वल्ली. ६१ इतरपुष्टः=कोकिल

निजसखोदयदर्पितमन्मथद्विगुणिताधरपानरसावुभौ ॥
करण[62]संचयनिर्वृति[63]मीपतुश्चिरतरं रतरंहसि निःस्पृहौ ॥ १९ ॥
अशुचि[64]ता यदि केलिवने कथं शुचिरसौ विहरिष्यति भूपतिः ॥
तदुपयातु भवानिति किं ततः शुचि[65]रवाचि रवाचि[66]तैषटपदैः ॥ २० ॥
भजतिकल्प[67]मिनैः प्रतिपद्य यं सदृशतामदसीयभुजोष्मणः ॥
उदभवत् स शुचिः पुरतस्ततो नरपतेरपते जितविद्विषः ॥ २१ ॥
अजनि तस्य पुरः खलु माधवः सुमनसां[69]मुदयस्य विधायकः ॥
प्रियतमावियुजां किमतः शुचिं गद[70]मिमं दममन्यत [illegible] ॥ २२ ॥
अवरनोऽपि यदि प्रबलो भवेत् परिभवाय नृणामिति दर्शयन् ॥
अधिकजृंभणभाजि ततः शुचेः सपदि संपदि संकुचितो मधुः ॥ २३ ॥
विपिनराजिवधूकचभारतामुपगतोऽय कपीत[illegible]पादपः ॥
मरकताप[illegible]णसमैः [illegible]सत्कुसुमंध[71]यैः ॥ २४ ॥
अबिभरुः कलिका नवमल्लिका जलधिनोपहृ[72]ता इव मुक्तिकाः ॥
प्रसभमत्र निपीय निजोष्मणा भुवि गता विगता विदधत्यपः ॥ २५ ॥
तपऋ[73]तौ तपनोऽपि निजातपैरविरतं तपति स्म जगत्त्रयं ॥
अपि ततिः पततां तृषिता भृशं रुदितमादितमानितवारिदा ॥ २६ ॥
अजनि चित्रमिदं मदनोष्मणा विहितसंज्वरमब्जदृशां हि यत् ॥
उरसिजद्वयमूष्मभृतो भृशं वरतनोरतनोदतिनिर्वृतिं ॥ २७ ॥
वसु[74]मतीमपि माध[75]ववल्लभां विरहितामभुना ह्यतपत्तपः ॥
मृगदृशः पुनरिष्टवियोगजज्वरवतीर[76]वतीति तु का कथा ॥ २८ ॥
दिनमुखेष्वपि दिक्षु सुदुःसहं किरति तत्र रवौ किरणव्रजं ॥
सलिलखेलनमेव ततः प्रियैः सततमातत मानवतीजनः ॥ २९ ॥
नरवरोऽपि निषेवितुमागतं परिसरोपवनोपहितश्रियं ॥
सदकरोदतुमेनमुदारधीरसदृशः स दृशः पदवीं नयन् ॥ ३० ॥
मलयज[77]द्रवसारविलेपनद्विगुणशीतलभावसुगंधिना ॥
विधृतमोदमरंस्त स संततं स्तनयुगेन युगेव मृगीदृशः ॥ ३१ ॥
परिलसत्तृणशून्य[78]मताल्लिका[79]परिमलावहमारुतसेवितः ॥

---

६२ करणसंचयः=इंद्रियसमूहः ६३ निर्वृतिः=सुखं. ६४ अशुचिता=ग्रीष्माभावता अपवित्रता च. ६५ शुचिः=ग्रीष्मः ६६ रवाचितः=शब्दयुक्तः ६७ भजतिकल्पं=ईषद् भजति. ६८ इनः=सूर्यः ६९ सुमनसां=देवानां पुष्पाणां च. ७० गदः=रोगः यादव विशेषश्च. ७१ कुसुमंधयः=भ्रमरः ७२ उपहृताः=उपायनीकृताः ७३ तपऋतुः=ग्रीष्मः ७४ वसुमती=पृथ्वी. ७५ माधवः=वसंतः कृष्णश्च. ७६ अवति=रक्षति. ७७ मलयजं=चंदनं. ७८ तृणशून्यं=मल्लिका. ७९ मताल्लिका=प्रशस्ता.

व्यहरदेष वनेषु सरःसु वा सह तया हतया मदनेषुभिः ॥ ३२ ॥
तदनु तस्य पुरोभुवि भूपतेरखिलतापनिवारणपेशलैः ॥
उदभवन्महिमा महितो जनैरमृतोरमृतोदयकारिणः ॥ ३३ ॥
अभिनवैरुदजृंभि नभःस्थले जलधरैरुपगूढतडिद्गुणैः ॥
नरपतेर्नगरीबहिरंगणे करिवरैरिव रैमयभूषणैः ॥ ३४ ॥
मघवकार्मुकमंडितमंबरे मुदिरजालमुदीक्ष्य शिखंडिनैः ॥
[illegible]रसिका इव पिछिकाभरमुदारमुदा परितेनिरे ॥ ३५ ॥
हरिणनाभि[illegible]रूपया कृतरुचिर्नवकुंकुमरेखया ॥
हृदि नृणामधिकं ज[illegible]रुदावलिर्मुदमरादमराधिपचापिनी ॥ ३६ ॥
अभिनवाभ्रलसद्विसकं[illegible]का कपटकैशिकभूषितमल्लिका ॥
जलदकालविभूतिवधू[illegible]य [illegible]नतापशमं नृणां ॥ ३७ ॥
प्रबलमारुतवेगसमीरिता सकलदिक्षु जवेन विसारिणी ॥
घनततिर्धरणीभवनोपरि प्रवितता विततान वितानभां ॥ ३८ ॥
पतितमभ्रमुखादुदबिंदुभिः पथिकलोचनवारिकणैः समं ॥
अवनिरेणुरपि प्रमदारुषा व्युपरता परतापविधायिनी ॥ ३९ ॥
दिनकराय घनैः स्थगितात्मने कथयितुं किमु वारिजाविक्लवं ॥
सपदि हंसगणो दिवमुद्ययावसरसः सरसः कलुषोदकात् ॥ ४० ॥
अगमयद्वनिता बहुदूरगं प्रियतमं बत मानससमुत्सुका ॥
पतगपंक्तिमपि त्वरितं सुधासमसितामसितांबुधरावलिः ॥ ४१ ॥
तडिदसिक्षतवारिदवारणच्युतशिरस्थलमौक्तिकसन्निभाः ॥
अलमकुर्वत निर्जिततारकप्रकरकाः करकाः पृथिवीतलं ॥ ४२ ॥
श्रवणदुःसहशब्दविजृंभितं नवघनं नलिकाभमवेक्ष्य खे ॥
दिविषदां मृगयाभिवितर्कयद् विकुलमाकुलमायतलीनतां ॥ ४३ ॥
चिरपिपासितचातकमंडलीगलबिलाध्वनि यद् गलितं पयः ॥
तदिदमेव जलेषु पयोमुचाममृततामृततामनयन्निजां ॥ ४४ ॥
मदनकुंतममन्यत केतकीमुकुलमत्र निशाततशिखं जनः ॥
हृदयकृंतनलभ्रमयोगिनामिचपलं च पलं भ्रमरं ततः ॥ ४५ ॥

---

८० पेशलः=दक्षः ८१ रैमयं=सौवर्णं. ८२ मघवकार्मुकं=इंद्रधनुः ८३ मुदिरः=मेघः ८४ शिखंडिनः=मयूराः ८५ मुदा=हर्षेण. ८६ बिसकंठिका=बलाका. ८७ अतनुः=मदनः अनल्पश्च. ८८ वितानं="छत" इति महाराष्ट्र भाषायां. ८९ मानसं=मनः सरोवरविशेषं च. ९० करकाः=वर्षोपलाः ९१ दिविषदां=देवानां. ९२ विकुलं=पक्षिकुलं. ९३ अयोगिनां=विरहिणां. ९४ पलं=मांसं. * कैशिकं=केशानां समूहः

उपगतैरशरीरनिषंगतामुदितसौरभरंजितदिङ्मुखैः ॥
अभिनवस्तबकैरिह वीरुधामनवमा नवमालतिका बभौ ॥ ४६ ॥
निखिलतापनिवारिणि वारिणि स्रवति सर्वत एव विहायसः ॥
अतिशयं परितापमदीधरद्वरवधूरवधूतवरा ननु ॥ ४७ ॥
तिमिरकांतितिरस्करणत्विषं वियति वीक्ष्य वियोगवती घनं ॥
सपदि चेतसि जीवितमस्फुरन्मृदुरवा दुरवापममन्यत ॥ ४८ ॥
नियमिनां मनसेव न केवलं वसुधया समवाप्यपरागिता ॥
अहिमरोचिरदर्शनकारिणा घनचयेन च येन वृतं नभः ॥ ४९ ॥
उपगता बत वायसपेयतामुपचिता घनवारिभिरापगाः ॥
प्रतिपयोधि ययुस्तटपातनाकलुषिता लुषितांबुजकाननाः ॥ ५० ॥
सकलसस्यसमृद्धिसमेतया नववनोदयशोभितया द्विधा ॥
अजनि सा जनचेतसि त्वष्टता वसुधया सुधयापि न यादृशी ॥ ५१ ॥
इति विहायसि दत्तपयोधरामृतुविभूतिमुदीक्ष्य मुदा ददौ ॥
जनकजापि पयोधरमात्मनः प्रियतमाय तमालसमत्विषे ॥ ५२ ॥
स्फुटकदंबकदंबसमीरणप्रमुदितः प्रियया सह प[illegible]ः ॥
निशमयन्नपि चंद्रकि[illegible]प्रसरणान् स र[illegible] ऋतुमन्वभूत् ॥ ५३ ॥
नवघने धृतिभि[illegible]थकेकिनी सपदि यत्र भा[illegible]ष्यति शोकिनी ॥
शरदमक्षिभि[illegible]तेरिमामुपपुरं पपुरंकुरितां[illegible]नाः ॥ ५४ ॥
प्रथममेव रु[illegible] पयोधरान् मृगदृशा[illegible]व [illegible]वनपूर्णता ॥
शरदसौ [illegible]मपि बिभ्रतो [illegible]निभृतां नि[illegible]भृतांबरमुद्यतः ॥ ५५ ॥
विमलवर्षज[illegible]चिराप्लुतं [illegible]विगमितांबुदकर्दममंबरं ॥
परिदधुः [illegible]रदा हरिदंगना धवलितं वलितं स्फुट[illegible]तारकैः ॥ ५६ ॥
अनतितीव्र[illegible]ण करेण यः सकललोकमरंजयदंजसा ॥
नृप इवाभिन[illegible] रविराबभौ भृशमयं शमयन् जडतां नृणां ॥ ५७ ॥
विमलचंद्रवि[illegible]रचंद्रिका विशदकंचुकगुप्तकलेवराः ॥
उपययुर्मदनस्य सहायतां रजनयो जनयोधनकर्मणि ॥ ५८ ॥

---

९५ अशरीरनिषंगः=मदनेषुधिः ९६ वीरुधां=लतानां. ९७ विहायसः=आकाशात्. ९८ वरवधूः=सुंदरी. ९९ अवधूतवरा=त्यक्तप्रिया. १०० अपरागता=विषयशून्यता, परागराहित्यं, कृष्णवर्णत्वं च. १ लुषितं=हृतं २ वनं=कमलं उदकं च. ३ कदंबकदंबः=कदंबवृक्षसमूहः ४ चंद्रकिणां=मयूराणां. ५ धृतिः=संतोषः ६ पयोधरः=मेघः स्तनश्च ७ अंबरं=आकाशं वस्त्रंच. ८ उद्यतः=आविर्भूतान्. ९ वलितं=व्याप्तं. १० करः=किरणः [illegible]भारश्च

दिवि मुनिर्ददृशे कलशोद्भवः कलुषतामपहाय बभौ पयः ॥
मृदु ययुः प्रकटीकृतसैकता भुवनपावनपाथस आपगाः ॥ ५९ ॥
कुसुमसायकसायकरूपतां दधाति ये मुकुलाः सरसीरुहां ॥
सरसि तैरसितैरथ जृंभितं सरसिते रसितैरलियोषितां ॥ ६० ॥
परिमलातिशयानुभवादरस्तिमितसंगतभृंगकुरंगभृत् ॥
कमलमुल्लसितं सितमन्वगाद्धिमकरं मकरंदरसामृतं ॥ ६१ ॥
जनितकोकनदानि जलाशये शरदि कोकनदानि चकाशिरे ॥
युवसु योजितकामशिलीमुखाः समुदिता मुदिताश्च शिलीमुखाः ॥ ६२ ॥
कमलमेव सदा त्वदि कुर्वतां धवलपक्षसमाश्रयसुश्रियां ॥
अभिजलाशयमंबरमार्गतो निपततां पततां कुलमाबभौ ॥ ६३ ॥
तत इतः परिबभ्रमुरुन्मदाः कमलकोशलसन्मधुलोलुपाः ॥
अमृतलालसयेव सुरासुराः सकलहं कलहंसमधुव्रताः ॥ ६४ ॥
मदविक... मरालविलासिनीमृदुरवे सति मौनमुपेयुषीः ॥
कलयति स्म ...ननः किल कोकिनीः कुमुदिनीमुदि नीरजिनीरिव ॥ ६५ ॥
शरदि पुष्पवती... पद्मिनीं न विजहुर्विमला अपि ते द्विजाः ॥
यदतिरंजनमत्र शरीरिणां मनसि... तेन ...सितं न विवेकिता ॥ ६६ ॥
कुमुदकोरकतारकितां ... भुवं विमलतारककोरकितां ... ॥
अकलयत् परिवृत्तगुणे ... नृपः स शरदाऽऽशरदावदनेलैः ॥ ६७ ॥
मदनवारणवीरमदस्रुतेः ...पैशुन...ध्रमशेखरयद्वधूः ॥
विषमपत्रमहीरुहसंभवं ...प्रसवमासवमोदि...षट्पदं ॥ ... ॥
नरपतिः शरदंगनया कृतं निजवनांतमुदीक्ष्य मुद... ॥
दयितया सह रंतुमथात्मनश्चरणचारणचारु चका...तत् ॥ ६९ ॥
प्रचुरसस्यपचेलिममंजरीकपिशितामचलामवलोकयन् ॥
व्यचरदेष चिरं विपिनांतिके भृशरसं शरसंहित...के ॥ ७० ॥
क्षणमसौ मुमुदे कणिकांचलग्रहणचुंचुभिरंचितचं...भिः ॥
शुकवधूनिकरैरथ निर्गलद्रुतकपोतकपोतकुलैरपि ॥ ७१ ॥

---

११ कलशोद्भवः=अगस्त्यनाम्नी तारा. १२ पाथः=उदकं १३ आसितः=नीलः १४ सरसितं=सुंदरं. १५ अलियो...षितां=मृगांगनानां. १६ अन्वगात्=अनुचकार. १७ कोकनदः=चक्रवाकशब्दः १८ कोक...दानि=कमलानि १९ शिलीमुखः=बाणः २० शिलीमुखः=भ्रमरः २१ पततां=पक्षिणां २२ म...तः=भ्रमरः २३ मरालः=हंस. २४ पुष्पवती=पुष्पयुक्ता रजःस्वला च. २५ द्विजः=ब्राह्मण... ...क्षी च. २६ तेन=रंजनेन. २७ सितः=बद्धः २८ आशरदावदवानलः=राक्षसवडवानलः २... विषमपत्रमहीरुहसंभवं=सप्तपर्णवृक्षोद्भवं. ३० प्रसवं=पुष्पं. ३१ आसवं=मकरंदः ३२ अचला=भूमिः ३३ शरः=उदकं तृणविशेषं च. ३४ कपोतकुलं=शिशुसमूहः

कलयता कलमावनकामिनीकलमनोहरगानममन्यत ॥
नृपतिना निजगृह्यकसारिका वितनुतां तनुतां वचसामिति ॥ ७२ ॥
शरदमभ्युपगम्य शरक्षतैरवयवैरिव शोणितवर्षिणीं ॥
निजदृशा स निपीय [35]जपावलिं सुममितामममितामदधान्मुदं ॥ ७३ ॥
निशि निशाकरनिर्मलचंद्रिकाधवलसैकतभूमिषु भूमिजां ॥
अरमयत्स हि तल्पमुपाश्रितो रचितमांचितमंबुरुहच्छदैः ॥ ७४ ॥
अनुभवंतामिति प्रियया समं जनमहोत्सवहेतुमृतुश्रियं ॥
नृपमुपासितुमाप हिमागमः शमितकामितकार्यमथ द्विषां ॥ ७५ ॥
निजपतेरुदयेषु विवस्वतः प्रमुदिता इव भूरि दिगंगनाः ॥
प्रसृमरैः परितो हिमरेणुभिः पुलकजालकजातरुचो बभुः ॥ ७६ ॥
अनुगते तुहिनत्रसरेणुभिस्तनुमतां तनुकंपिनि मारुते ॥
मृगदृशां न कुचद्वयमुच्चकैरुरसि कै रसिकैरधिरोपितं ॥ ७७ ॥
उषसि यत्कमलच्छदसंस्थितं तुहिनशीकरजालमदृश्यत ॥
भ्रमकरं निजशोषणचिंतनादजनि तज्जनितस्य तदश्रुणः ॥ ७८ ॥
विरहिणी तरुणीव दिने दिने कृशतरा कृशमर्मरनिस्वना ॥
कमलिनी करुणापदमादधौ हिमहता महतामपि मानसं ॥ ७९ ॥
तुहिनसंततितुंदिलदिङ्मुखे दिनमुखे ददृशे दिननायकः ॥
जडिमभारनिपीडनकातरो धवलकंबलकंचुकवानिव ॥ ८० ॥
सततसीत्कृतशिक्षणदक्षिणैर्विरचिते सति बिंबफलत्विषि ॥
अधरसीमनि हैमनमारुतैर[36]रुषि का [37]रुषि कामुकमत्यजत् ॥ ८१ ॥
हिमकरोपि च तापकरोऽभवत् स समयः सरसीरुहदैन्यकृत् ॥
युवजने युवतीविरहव्यथाप्रविधुरे विधुरेव न केवलं ॥ ८२ ॥
[38]सहसि तत्र समृद्धिमुपागते शरणमेककमेव शरीरिणां ॥
न दहनो न रविः स्मरदीपितस्वरमणीरमणीयकलेवरं ॥ ८३ ॥
इति विभाति विभावितशीतले सहसह[39]स्ये सहस्यथ मैथिली ॥
जितक*रीरशरीरमरीरमत् स्वकमिता कमितारमवामतां ॥ ८४ ॥
अथ ययावृतुरंतिकमंतिमः क्षितिपतेः प्रसितो[40] वरिवस्यया[41] ॥
अनुसृतः सृति[42]मग्रजसेवितां चपलमुत्पलमुत्[43]प्रतिरोधिनीं ॥ ८५ ॥
शिशिर एष समेत्य शशित्विषां सुमनसामथ कुंडलताजुषां ॥

---

३५ जपा="जास्वंद" इति महाराष्ट्रभाषायां. ३६ अरुषि=व्रणे. ३७ रुषि=कोपे. ३८ सहसि=मार्गशीर्षे. ३९ सहस्यः=पौषः ४० प्रसितः=उत्सुकः ४१ वरिवस्यया=शुश्रूषया. ४२ सृतिः=मार्गः ४३ मुत्=हर्षः* करीरं=पुष्पविशेषं.

अचिरनष्टहिमागम[४४]कीकसभ्रमकृताम्कृताधिकसंपदं ॥ ८६ ॥
प्रसवयोर्नवयोर्लवलीलताप्रभवयोरुभयोः शिशिरश्रियः ॥
अवहदेकतरः [४५]सितगंडतामधरभा[४६]धरभावमथापरः ॥ ८७ ॥
इयमहो प्रकृतिर्मलिनात्मनां विपदि यत् परिहाय पयोजिनीं ॥
स्फुट[४७]लवंकमशिश्रयदश्रमध्वनिकरो निकरो मधुपायिनां ॥ ८८ ॥
जडिमवर्षिणि तत्र जगत्त्रयं नयति कंपमकंपितमानसः ॥
रतिपतिः स्म जयाय विजृंभणामतिकरोति करोद्यतकार्मुकः ॥ ८९ ॥
रजतचूर्णरुचः स्फुटशाबरप्रसवरेणुकणाः पवनाहताः ॥
स्मरयशःशकला इव संलसद्द्रुमवनीमवनीमववव्रिरे ॥ ९० ॥
उषसि [४८]हंसमुदीक्ष्य [४९]हिमानिकाविपुल[५०]वागुरया परियंत्रितं ॥
उपवनानि किमश्रु शुचाऽमुचंस्तुहिनगाहि[५१]नगावलिपल्लवैः ॥ ९१ ॥
निरगमन्न विलासगृहोदराद्युवजनास्तदुरस्थलतांगनाः ॥
कुसुमबाणशराश्च तदीयतो हृदयतोऽ[५२]दयतोदनतत्पराः ॥ ९२ ॥
सुखमरंस्त सुरेश्वरसन्निभो रघुपतिर्मणिसौधतलेनिशं ॥
शिशिरचोदितमन्मथकर्मणामसहकः सह कन्यकया भुवः ॥ ९३ ॥
इत्यमृतून् स ददर्श वनांते स[५३]प्रमदः सह[५४]सालसमूहे ॥
अप्यमुना न वचोविषयो यः स [५५]प्रमदः सहसालसमूहे ॥ ९४ ॥
अंकुरयन्नथ चूतलतानां [५६]जातम[५७]हास्त वनानि [५८]वसंतः ॥
यस्य जना विदधत्यबलाभि[५९]र्जातमहाः स्तवनानि [६०]वसंतः ॥ ९५ ॥
वीक्ष्य दधार वधूः शुचि[६१]मुद्यन्मारविधा मनसा कमितारं ॥
तेन च न स्वनितैरलियूनामारवि धाम न साक[६२]मितारं ॥ ९६ ॥
नील[६३]गलेथ मुदं दिवि वेगादापततो [६४]वि[६५]रलं [६६]घनतोऽयात् ॥
आप्लवमप्यवनिश्च यवमानादपि [६७]ततोऽविरलं [६८]घनतोयात् ॥ ९७ ॥
चारु चचार सरःसु विराजत्का[*]कलिका कलहंस[६९]महेलौ ॥

---

४४ कीकसं=अस्थि. ४५ सितगंडः=शुभ्रगल्लः. ४६ भा=शोभा. ४७ लवंकं=वृक्षविशेषं. ४८ हंस=सूर्यः मरालश्च. ४९ हिमानिका=हिमसमूहः ५० वागुरा=मृगबंधनी. ५१ नगः= वृक्षः ५२ अदयतोदनं=निर्दयताडनं. ५३ सप्रमदः=सस्त्रीकः ५४ सालः=वृक्षविशेषः ५५ प्रमदः=हर्षः ५६ जातं=समूहं. ५७ अहास्त=अगमत्. ५८ वसंतः=ऋतुविशेष :५९ जातमहाः=जातानंदाः ६० वसंत=निवसंतः ६१ उद्यन्मारविधा वधूः शुचिं वीक्ष्य मनसा कमितारं पतिं दधार. ६२ तेन साकं अलियूनां स्वनितैः आरवि धाम अरं न इता इति न. ६३ नीलगलः=नीलकंठः (मयूरः) ६४ विः=पक्षी. ६५ अलं=पर्याप्तं. ६६ घनतः=मेघात्. ६७ ततः=मेघात्. ६८ घनतोयात्=निबिडजलात्. * काकलिका=मधुरस्वरः ६९ महेला=स्त्री.

कामुकयोर्न जहार नटीभिः का कलिका कलहं समहेला[*] ॥ ९८ ॥
शीतरुजं समये च परस्मिन् बाहुलतो[७०] रसिका शमयंती ॥
पत्युरशेत न नित्यमनृत्यद् बाहुलतोरसि का शमयंती[७१] ॥ ९९ ॥
शीतकणाः श्रियमप्रतिबद्धाः सौरभया[७२] सरसामुदमार्जन् ॥
केऽपि जना लवलीलतयोद्यत्सौरभया सरसा मुदमार्जन्[७३] ॥ १०० ॥
हृष्टः पिकः कृतरवस्तरवः शिरीषाः पुष्पं दधुर्मुमुदिरे मुदिरे मयूराः ॥
रेजे विकासिकमलं † कमलं तुषारो वायुर्लसल्लवलिकावलि काननं च ॥१०१॥
इत्थं[७४] संततमार्तवी क्रमगतिप्रत्यग्रमा धुर्यया-
दारामस्य महीरुहास्तु कलिकाः प्रत्यग्रमाधुर्यया ॥
रेमे तत्र नृपश्चिरं दयितया प्रत्यग्रमाधुर्यया ।
लावण्यस्य यया कृता जगति सा प्रत्यग्रमा धुर्यया ॥ १०२ ॥
इति श्रीरामचरिते महाकाव्ये चतुर्थः सर्गः ॥ ४ ॥

अध्यासितं तदनु मन्मथबांधवेन कालेन काननमुदीक्ष्य कुतूहलिन्या ॥
वैदेहराजसुतया सहितोऽयमारादाराममार[७५] तरसा नृपतेः कुमारः ॥ १ ॥
उद्यान[७६]सीमनि चिरं स रिरंसमानः[७७] प्रस्यातुमैहत यदा नरदेवसूनुः ॥
सख्यं गताः कतिपये सरसाः पुमांसः सत्रा[७८] वधूभिरनुजग्मुरमुं तदैव ॥ २ ॥
कंदर्प एव कमनीयकलेवरोऽसावभ्यागतः सहरतिर्निजदर्शनोत्कः ॥
इत्थं विशंकितमना इव मोदमानः पुष्टिं चकार परमां विपिने वसंतः ॥ ३ ॥
स्वावासकाननमुपेयुषि रामचंद्रे नीराजनाय[७९] निखिलाधिपतेरमुष्य ॥
दीपावलीव मधुना[८०] विधिना प्रयुक्ता चांपेयकुड्मलततिः सुतरां चकाशे ॥४॥
मंदानिलो मलयकंदरगर्भजातः सद्यस्तनं[८१] परिमलं परिपीय धात्र्याः[८२] ॥
मुग्धः कुमार इव पूरितवंशकांडः स्वच्छंदमत्र विपिने सुचिरं चचार ॥ ५ ॥

---

* विराजत्काकलिका कलहंसमहेला सरःसु चारु चचार । नटीभिः समहेला का कलिका कामुकयोः कलहं न जहार । ७० बाहुलतो=कार्त्तिकात्. ७१ (अन्वयः) बाहुलतः परस्मिन् समये का रसिका शीतरुजं शमयंती शं अयंती च अनृत्यद् बाहुलता सती नित्यं पत्युः उरसि न अशेत । ७२ सौरभया=सूर्यप्रभया. ७३ (अन्वयः) सौरभया सूर्यकांत्या अप्रतिबद्धाः शीतकणाः सरसां श्रियमुदमार्जन् । केऽपि सरसा जना उद्यत्सौरभया लवलीलतया मुदमार्जन् आनंदं प्राप्तवंतः । ७४ (अन्वयः) इत्थं आर्तवी रमा क्रमगतिप्रत्यक् विपरीता सती संततं आरामस्य धुरि अयात् महीरुहास्तु यया प्रत्यग्रं कलिकाः आधुः । नृपस्तत्र प्रत्यग्रमाधुर्यया दयितया सह चिरं रेमे । लावण्यस्य धुर्यया यया सा रमा जगति प्रत्यकृता तिरस्कृता । ७५ आर=जगाम. ७६ उद्यानं=उपवनं. ७७ रिरंसमानः=रंतुमिच्छुः ७८ सत्रा=सह. ७९ नीराजना=“ ओंवाळणें ” इति महाराष्ट्र भाषायां. ८० मधुना=वसंतेन. ८१ सद्यस्तनं=तत्कालोद्भवं सद्यः स्तनं च. ८२ धात्री=उपमाता पृथ्वी च. † कमलं=कं उदकं अलं पर्याप्तं.

सद्यः प्ररोहसुभगैः स्तबकप्रवालैरक्लिष्टकांतिभिरशोकतरुप्रसूतैः ॥
काश्मीरपंकजनितैः कुचपत्रलेखैर्वेश्यांगनेव विरराज वनांतभूमिः ॥ ६ ॥
शीर्णं पुरा शिशिरदुःसहपौरुषेण प्रत्यग्रतां गमयति स्म वनं वसंतः ॥
वेनस्य दुष्टचरितेन विनष्टचारं पृथ्वीतलं पृथुरिव प्रथितप्रभावः ॥ ७ ॥
आमोदिनी सुमनसः पुरुषस्य योगादाबिभ्रती तिलकमुल्बणगंधसारं ॥
आरामवीथिरधिकं सरसेव योषा केषान्न चेतसि चकार विहारवांछां ॥ ८ ॥
स्कंधात् प्रभृत्युपचितैः कनकप्रकाशैर्गुच्छैः कृतच्छविरराजत राजवृक्षः ॥
तस्मै दशाननविनाशमपेक्षमाणैर्दत्तो बलिः सुरजनैरिव रत्नसानुः ॥ ९ ॥
कल्लोलिनीषु कमलानि विकस्वराणि भ्रेजुर्भ्रमद्भ्रमरमेचकितोदराणि ॥
आलोकितुं मनुजभर्तुररण्यलीलां तासामिव प्रकटितानि विलोचनानि ॥ १० ॥
कालुष्यहारिवचसः कलिकाकदंबमालक्ष्य कोकिलगणः सहकारवल्ल्याः ॥
प्रीतिं परामुपजगाम यथा हि लोकः सान्निध्यमात्मनि गिरामधिदेवतायाः ॥ ११ ॥
दृष्ट्वा वनं बहलपुष्परसालसालं बुद्धिर्न कस्य भवति स्म रसालसाऽलं ॥
आविश्चकार समजोऽपि तदा पशूनां भावं मनोभवकृतं दयितानुवर्ती ॥ १२ ॥
नीरंध्रशाद्वलपरिशोभिनि निम्नगानां तीरे निषद्य कृतचर्वितचर्वणानां ॥
आघ्राणचुंबनकरः सततं मृगीणामुत्थापनार्थमुदयुक्त कुरंगसार्थः ॥ १३ ॥
सौगंध्यपुष्कलितपुष्करपुष्करायां क्रीडद्द्वयं द्विरदयोरथ पुष्करिण्यां ॥
तत्पुष्करैररकृत पुष्करसंगृहीतैर्व्यत्युक्षणं यदिह दुष्करमन्यसत्त्वैः ॥ १४ ॥
अंगस्पृशि प्रणयिनि प्रबलानुरागं चुंकारमंकुरयति स्म रथांगकन्या ॥
श्वेतच्छदश्च विधुतच्छदचामरेण प्रासेवत प्रियतमां सुरतश्रमार्तां ॥ १५ ॥
उद्दीपितं वनमिति क्षितिपालकेतुः सत्कर्तुमैहत समेत्य समीकृतेशैः ॥
संभावना भवति माधवसंश्रयाणां केषां न कुत्र न कदा न कुतो न लोके ॥ १६ ॥
उद्यानपालकजनैरुपदिष्टवर्त्मा सद्यः कृतप्रणमनैः सदयावलोकः ॥
अंतर्विवेश विपिनस्य विशामधीशः शृंगारयोनिरपि चेतसि तावदस्य ॥ १७ ॥
तस्मिन् विशत्युपवनीमवनींद्रसूनौ कार्यद्वये युगपदेव बभूव वायोः ॥

---

८३ प्रत्यग्रता=नूतनता. ८४ वेनः=राजविशेषः ८५ पृथुः=राजविशेषः (वेनपुत्रः) ८६ आमोदः=सुवासः संतोषश्च. ८७ सुमनसः=पुष्पस्य सुंदरचित्तस्य. ८८ पुरुषः=नरः पंनागवृक्षश्च. ८९ तिलकः=पुष्पविशेषः "टिळा" इति महाराष्ट्र शब्दश्च. ९० गंधसारं=चंदनवृक्षं विलेपन श्रेष्ठं च. ९१ राजवृक्षः="बहावा" इति महाराष्ट्र भाषायां. ९२ बलिः=उपहारः ९३ रत्नसानुः=मेरुः ९४ कल्लोलिनीषु=नदीषु. ९५ मेचकितं=कृष्णीकृतं ९६ समजः=समूहः ९७ सार्थः=समूहः. * सौगंध्येन व्याप्तानि जलानि यैस्तादृशानि कमलानि यस्यां यद्वा सौगंध्य व्याप्तानि कमलानि येषु तादृशानि जलानि यस्यां इति. ९८ पुष्करिण्यां=सरस्यां ९९ पुष्करैः=जलैः १०० पुष्करः=शुंडाग्रं. १ व्यत्युक्षणं=परस्पराभ्युक्षणं. २ श्वेतच्छदः=हंसः ३ समीकृतेशः=तुलितशक्रः ४ विशां=प्रजानां. ५ शृंगारयोनिः=मदनः

वल्लीवधूकुसुमवासविमोचने च श्रांतिच्छिदि व्यजनकर्मणि चाधिकारः ॥ १८ ॥
तस्मिन् निरंतरतरच्छदपादपालीसंरुद्धभास्करकरप्रकरप्रसारे ॥
ज्योतिर्मयेन वपुषा वसुधाधिपस्य क्षीणं तमिस्रमभवच्चिरलब्धवासं ॥ १९ ॥
संदर्शितानधिकृतैरपि पारिजातान् मंदेतरप्रसवभूतिविभूषितांगान् ॥
पश्यन्नसौ विटपिनः परिरब्धवल्लीनुद्यतकुतूहलमतिः सुचिरं चचार ॥ २० ॥
साकं विदेहतनयापि सखीजनेन प्राणेशमार्गमनुसृत्य पयोजमृद्वी ॥
आगामिनो गहनकाननधावनस्य प्रागेव शीलितुमिव प्रचचार बाला ॥ २१ ॥
नीरंध्रपल्लवशिफानिभृतप्रकांडं सायंतनाभ्रसमशोभमशोकसालं ॥
देवः पुरोभुवि ददर्श स दर्शनीयं कामस्य दूष्यमिव रक्तपटीनिबद्धं ॥ २२ ॥
यः संपदा सुमनसां निजनामवाच्यं कांतावियोगविधुरं जनमातनोति ॥
ऐक्ष्वाक एष नृपतिः कमनीयशोभमैक्षिष्ट तं कुरवकद्रुममग्रदेशे ॥ २३ ॥
दृष्ट्वा नृपस्तमबलाकुचकुंभसंगमभ्यर्थयंतमिव षट्पदकाकुनादैः ॥
स्मित्वा मनागनुचरदयितामुखेंदौ व्यापारयद्वलितकंधरमाक्षिकोणं ॥ २४ ॥
कैवर्तवृत्तिमवलंब्य मनोभवेन क्षिप्तं वने बडिशमग्रलगद्द्विरेफं ॥
अंतर्विसारमखिलस्य जिघृक्षुणेति शंकां चकार स निरीक्ष्य पलाशपुष्पं ॥ २५ ॥
चामीकराभमपि चंपकमुग्रगंधं दूरोज्झितं मधुकरैर्मृदितान्यपुष्पैः ॥
आलोक्य भूपतिरचिंतयदंतरेवं क्रूरत्वमेव कुरुते नरमप्रधृष्यं ॥ २६ ॥
पंचायुधस्य शरपंचकमीक्षणाभ्यां प्रत्येकमस्य वपुषोपि न चित्तभीतिः ॥
भेत्तुं पुरेव हृदयं न हि तस्य शक्तिर्यत्प्रेयसी सहचरी प्रमदा कुलश्रीः ॥ २७ ॥
आलंबितं द्विजकुलेन विरोचमानं बालातपद्युतिमुषा नवपल्लवेन ॥
आम्रातकं प्रतिननंद वसंतलक्ष्म्यास्ताम्राधरं मुखमिवं प्रकटं प्रजेशः ॥ २८ ॥
संभावनीयमभिरूपजनेन मूर्ध्ना पुष्टं रसैरुपचितैरुदयत्परार्थं ॥
हृद्यं कवेरिव वचः कलधौतवर्णं पृथ्वीपतिर्निरवर्वर्णत कर्णिकारं ॥ २९ ॥
सज्जन्मधुव्रतमषीकृतमध्यशोभं तिग्मांशुवंशतिलकस्तिलकं विलोक्य ॥
कस्तूरिकाकृतविशेषविशेषकाढ्यस्वप्रेयसीवदनदर्शनमोदमादात् ॥ ३० ॥
पुष्पं दधाति पुरुषोयमतः परं किं चित्रं भुवीति परिहासमिवादधाना ॥
आशंकि दाशरथिना दशनायमानैराविर्भवद्भिरतिमुक्तलता प्रसूनैः ॥ ३१ ॥
वक्षोरुहः किमु वनालिविलासवत्याः कंदर्पदारकरपंकजकंदुकः किं ॥

---

६ सालं=वृक्षं ७ दूष्य=" तंबू " इति महाराष्ट्र भाषायां. ८ कैवर्तः=धीवरः ९ बडिशः=" गळ " इति महाराष्ट्र भाषायां. १० अंतर्विसारं=अंतःकरणरूपं मत्स्यं. ११ चामीकरं=सुवर्णं. १२ आम्रातकं=अंबाडा इति महाराष्ट्र भाषायां. १३ अभिरूपः=विद्वान्.) १४ अववर्णत=अपश्यत्. १५ पुरुषः=पुंनागवृक्षः (उंडीण इति महाराष्ट्र शब्दः) १६ कंदर्पदारा:=रतिः

शंकामिति क्षितिभृता वहता तदानीं जंबीरजं फलमलोकि विपाकपिंगं ॥ ३२ ॥
छन्नं छदेन शिथिलं फलमेतदाप्तुं मंदं परिभ्रमति पश्य मधुव्रतोऽयं ॥
इत्थं प्रिये वदति सस्मितमुत्पलाक्षी वक्षोजकंकटपटं दृढमामुमोच ॥ ३३ ॥
खर्जूरसाररचितः कमलायुधस्य स्वच्छः §पतद्ग्रह इव प्रतिभासते यत् ॥
धत्तूरमैक्षत स तद् भ्रमरेण पूर्णं भुक्तोज्झितक्रमुकलेशविलासभाजा ॥ ३४ ॥
तत्तद्द्रुमानथ विलोक्य विलोक्य मंदं पत्न्या समं कुसुमकोमलगात्रयष्ट्या ॥
उद्यानभूवरतनोरिव नाभिरंध्रं पद्माकरं परमशोभनमाप भूपः ॥ ३५ ॥
विद्वज्जनस्य हृदयैरिव नष्टपंकैर्मुक्तापरागनिकरैरिव शुभ्रवर्णैः ॥
माधुर्यवद्भिरमृतैरिव वारिपूरैः पूर्णं हिमांशुकिरणैरिव शीतशीतैः ॥ ३६ ॥
पर्यंतभित्तिगतनूतनपद्मरागज्योतिष्मतानपरिवेषविशेषरम्यं ॥
आताम्रगैरिकपरिष्कृतनेमिभागं शीतांशुमंडलमिवोल्लिखितं धरायां ॥ ३७ ॥
लाक्षारसेन पुरवासिविलासिनीनां संक्रामितेन चरणैरुपलक्षिताभिः ॥
स्वच्छप्रभस्फाटिकसंचयसंचिताभिः सोपानवीथिभिरलंकृतमुज्ज्वलाभिः ॥ ३८ ॥
आकर्षतेव तलमंशुमतः करेण संसर्गतः स्वपयसामपि निर्मलत्वात् ॥
आलोककस्य विदुषोऽपि जनस्य चित्ते निम्नत्वमात्मगतमप्रतिभासयंतं ॥ ३९ ॥
बालानिलागमविजृंभितवीचिमालं नीलारविंदललितं लसमानफेनं ॥
सभ्रूविलासमनुवर्तितनेत्रपद्मं वक्त्रं सहासमिव वारविलासिनीनां ॥ ४० ॥
नालावधिस्फुटितनीरजकोरकाणां व्याजेन सादरमिलद्भ्रमरद्वयानां ॥
आदर्शभावमवलंब्य नभश्चरीणां गृण्हानमश्रममिवाप्सरसां मुखानि ॥ ४१ ॥
शोभाभिभूतहिमवालुकवालुकेन छायाजुषा सविधरोपितपादपेन ॥
तीरेण राजितमतीरयता विमोक्तुं बंदीकृतं निजगुणैर्हृदयं जनानां ॥ ४२ ॥
हस्तं हरेरिव रथांगनिवासभूतं चित्तं मुनेरिव चिराय गृहीतहंसं ॥
सैभैरवं शिर इवानिमिषावलंबं संग्रामचत्वरमिव प्रचलत्कबंधं ॥ ४३ ॥
संप्राप्य तं रघुपतिश्चिरमीक्षमाणः पंचेंद्रियाण्यपि तदीयगुणैरतार्प्सीत् ॥
कूले च तस्य कमनीयरसालमूले नीलाश्मजालनिचिते निषसाद जोषं ॥ ४४ ॥
छायेव भर्तुरनुचेष्टितमाकलय्य क्षोणीसुतापि तदुपांतमलंचकार ॥
आबध्नती सुमनसां स्वयमार्जितानां लीलापयोरुहमृणालगुणेन मालां ॥४५॥
आलीजनैरथ समं सविधे सुमानामादानकेलिरसभाजि वयस्यवर्गे ॥

---

१७ जंबीरं=" निंबू " इति महाराष्ट्र भाषायां. १८ कंकटपटं=कंचुकी. १९ क्रमुकं= पूगीफलं. २० पंकः=कर्दमः पातकं च. २१ हिमवालुः=कर्पूरः २२ अतीरयता=अपार यता. २३ हंसः=मरालः आत्मा च २४ अनिमिषाः=देवाः मत्स्याश्च. २५ कबंधः=उदकं शिरोरहितं कलेवरं च. * रजत सारं § पिकदाणी इति महाराष्ट्रभाषायां.

आलिंगनादिविहितप्रतिमध्यविघ्नमाह स्म तां समधुरस्मितसुंदरास्यः ॥ ४६ ॥
पश्य प्रिये विपिनसीम्नि विजृंभमाणामृद्धिं मधोरिषुममोघतमां स्मरस्य ॥
अन्यादृशं मम मनः कुरुते किलैषा त्वन्नेत्रवृत्तिरिव भिन्नजनांतरंगा ॥ ४७ ॥
अस्याः कथं नु कथयाम्यनुभावमुच्चैर्येन त्रिलोचनविलोचनसंहृतोऽपि ॥
उज्जीवितः कृतजगज्जयकौतुकश्रीरुज्जृंभते सुमुखि संप्रति पुष्पकेतुः ॥ ४८ ॥
द्वेधा विभक्ततनुरत्र वसंतलक्ष्मीरेषा लतासु विटपिष्वपि सन्निधत्ते ॥
पश्य त्वदंगमनसोरिव यौवनश्रीस्तत्सुंदरि त्वमिव रम्यतरा वनालिः ॥ ४९ ॥
एते द्रुमाः स्फुटितकुड्मलभृंगीलीलाविकस्वरमृदुस्वरगीतिभेदैः ॥
वैतालिका इव रतेः परिणायकस्य[२६] व्यामोहयंति भुवनं वरवाणिरूपे ॥ ५० ॥
भित्वा भुवं भुवनतः पवनाशनानाम्[२७] अंतश्चिराय निबिडस्तिमिरप्रकांडः ॥
वैभाकरीमिव विभामपिधित्सुरुच्चै[२८]रुत्तिष्ठति स्फुटतमालकुलच्छलेन ॥ ५१ ॥
लुब्धान् विजित्य नृपतीन् प्रसभं हृतायाः पित्रा स्वयं सुमुखि नः प्रणयान्निबद्धः ॥
धम्मिल्लभार इव सागरमेखलायाः संमोदमेष वितनोति तमालसालः ॥ ५२ ॥
माकंद[२९]कंदलरसायनमंदितानामाकर्ण्यते कलरवः कलकंठ[३०]यूनां ॥
वल्लीगृहोदरवसद्वनदेवतानां प्रेंखद्विपंचि[३१]भवपंचममूर्च्छनेव ॥ ५३ ॥
किंचिद्वचः किरसि चेदधुना कृशांगि संकोचयिष्यति पिकः स्वगिरं जवेन ॥
कस्तादृशो जगति येन विजेतुरग्रे त्यक्त्वा त्रपां निजगुणाः प्रकटीक्रियंते ॥५४॥
उत्सारितः परिसरप्रसरद्द्विजालीपक्षोदितेन मरुता नवविद्रुमश्रीः ॥
आकाशवीथिवनिताकुचकुंकुमत्वमालंबते विकचवंजुल[३२]रेणुराशिः ॥ ५५ ॥
व्याप्तं दिशासु मृदुकेसर[३३]केसरोत्थं दृष्ट्वा परागपटलं तुहिनर्तुबुध्द्या ॥
पीतांबवृत इवैष चकास्ति चूतः पुष्पैर्निरंतरभवैरविचार[३४]शून्यः ॥ ५६ ॥
आलोलभृंगतरुणीजनपानभूमिरालोकयतां कमलगंधिनि गंधसारः[३५] ॥
साधारणादखिलशाखिषु पुष्पगंधादन्योऽपि कश्चिदमुकं विशिनष्टि गंधः ॥५७॥
उद्वर्तितः सरसपेषणपूर्वमस्य मज्जा[३६] निमज्जयति चित्तमपीश्वराणां ॥
आल्हादनामनि सरस्वति[३७] सारसाक्षि क्वैतादृशस्तरुरशेषजनोपकारी ॥ ५८ ॥
अत्रत्यचंदनतरुष्ववलंबनाय सर्पंति ये क्षितिपनंदिनि सर्पशावाः ॥
सौवर्णवेदि रुचिनिर्मितचंचला[३८]भिः संभीषिताः सपदि ते विमुखीभवंति ॥ ५९ ॥
पक्वैरियं निजफलैः प्रतिपर्वजातैर्बिंबीलता विपिनसीमनि लंबमाना ॥

---

२६ परिणायकः=पतिः २७ पवनाशनः=सर्पः २८ अपिधित्सुः=तिरोधानं कर्तुमिच्छुः २९ माकंदकंदलः=चूतांकुरः ३० कलकंठः=कोकिलः ३१ विपंचिः=वीणा. ३२ वंजुलः= अशोकः ३३ केसरः=बकुलः ३४ विचारशून्यः=विचारयुक्तः पक्षिसंचारयुक्तश्च. ३५ गंधसारः=चंदनः ३६ मज्जा=सारः ३७ सरस्वति=सागरे. ३८ चंचला=विद्युत्.

शोभाममुष्य वितनोति तवांगयष्टेर्माणिक्यखंडरचिता महतीव माला ॥ ६० ॥
चेष्टा लतासु ललितासु विलासिनीनां पोस्फूर्यते क्षितिरुहेष्वपि पूरुषाणां ॥
अन्योन्ययुक्तिर्[३९]नयोरधुना जनानां मन्ये मनस्त्वरयति प्रसभं रताय ॥ ६१ ॥
लक्ष्मीमिमामिह मधोरवरोधभूतां निर्ध्यायतो[४०] मम निरंकुशकौतुकस्य ॥
चित्तं विभेत्तुमधुना मदनः संनिधे सख्युः प्रियाय कतमे वद नोत्सहंते ॥६२॥
नारीगुणैरसि रतिस्त्वमतस्त्वदीये कामः करोति मयि कार्मुककौशलं तत् ॥
बाल्यात् परे वयसि यत्त्वयि दत्तदृष्टौ लक्षीकृताखिलयुवा समपीपदत्[४१] सः ॥६३॥
उच्चावचाः सुमुखि संप्रति चित्तयोनेर्बाणा भवंति बहवः सुलभा वनेऽस्मिन् ॥
द्वेधा स लक्षयति मामिह जातमेकमासन्नमन्यदिति भामिनि भावयस्व ॥ ६४ ॥
निर्माय ते वपुरिदं कुसुमस्य सारैः शेषं शरार्थमददान्मदनाय वेधाः ॥
तत्तादृशेन वपुषाऽग मदंगमेत्संवर्मय स्मरशराः प्रतियांतु मोघाः ॥ ६५ ॥
सख्यः सरोजमुखि संप्रति दूरदेशे साकं चरंति रसिकैस्तपसे यतस्त्वं ॥
नेदिष्टमेतदपि पश्य निकुंजमस्मिन् कंदर्पदर्पशमनं करवाव किंचित् ॥ ६६ ॥
एतल्लतागृहसनीडी[४२]कृतस्वनीडाः पारावताः परमसुंदरि तावकीनं ॥
कर्णामृतं सुरतकूजितमाकलय्य स्वां हुंकृतिं शिथिलयंतु निरूढलज्जाः ॥६७॥
निर्भिन्ननीरजरजःप्रकरप्रसंगादुद्गंधयस्तनुतुरंगनिदानभूताः ॥
मंदानिला मधुरवाणि रतक्लमोत्थं घर्मोदभारमपनेतुमलं क्षमंते ॥ ६८ ॥
इत्थं निशम्य दयितस्य वचः प्रियं तत् स्मित्वा मनागनुजगाद मुदा मृगाक्षी ॥
मुग्धोऽपि कांत जितचैत्ररथे[४३]ऽत्र गत्वा नो विक्रियेत कतमः पुरुषोंगना वा ॥६९॥
नित्यप्रपुष्टधरणीरुहवल्लिजालं त्वष्टद्विरेफपरपुष्टनिनादरम्यं ॥
सौवर्गयौवत[४४]रहस्यकलाविलासस्थानं वनं तदतिशय्य विराजतीदं ॥ ७० ॥
आयातमत्र कुलमप्सरसां यदि स्यान्मन्येत नाम न तृणाय शिरांसि मेरोः ॥
पुण्यातिरेकनिजसात्कृतदेवभावैः पुंभिः समं विजरिहर्ति[४५] सदैव यत्र ॥ ७१ ॥
धीरे भवत्यपि मनोभववैभवेन क्षीणे भवत्यमितरूपगुणाभिरामे ॥
का नाम कांत कथयस्व कथा वधूनां स्वाभाविकं भवति यत्र हि कातरत्वं ॥७२॥
कंदर्पसायकनिपीडितचित्तवृत्तिः सूक्तिस्रजं सृजसि यन्मयि सद्गुणाढ्यां ॥
प्रत्यर्पयामि तदिमां कुसुमस्रजं ते वाचा भवंतमनुवर्त्तितुमीश्वरः कः ॥ ७३ ॥
इत्यूचिषी जनकजा दयितस्य कंठे चिक्षेप तां सरभसं कुसुमस्य मालां ॥
एतावती शरतती रसिवल्लभेन क्षिप्ता मयि स्फुटमितीव निवेदयंती ॥ ७४ ॥

---

३९ युक्तिः=योगः ४० निर्ध्यायतः=पश्यतः ४१ समपीपदत्=संपादयामास. ४२ सनीडं=समीपं. ४३ चैत्ररथं=कुबेरोद्यानं. ४४ सौवर्गयौवतं=स्वर्गांगनासमूहः ४५ विजरिहर्ति=अतिशयेन विहरति.

कांताकरेण गलसीमनि बद्धमाले तस्मिन् मनोभवगतिर्द्विगुणीबभूव ॥
आश्लिष्य तामथ जवेन कुचोपपीडं निन्ये निकुंजगृहमेव समीपवर्ति ॥ ७५ ॥
तत्रांतरे तरुणपल्लवसंगतानां प्रत्यग्रविभ्रमवतां प्रमदाजनानां ॥
कामोदयेन चलतां विविधा बभूवुश्चेष्टा मरुद्धतिजुषामिव गुल्मिनीनां ॥ ७६ ॥
काचित् प्रियेण सहिता सहकारवल्लीबालप्रवालरचिते शयने निविष्टा ॥
तत्पाणिजाग्रमृदुकृष्टशिरस्यभारा रेमे चिरं रहसि नर्मकथाप्रसंगैः ॥ ७७ ॥
अग्रे विलोक्य रमणं रमणीयगात्री हस्तापचेयमपि कांचनपुष्पमन्या ॥
नो चक्षमे यदपचेतुमुदीतलज्जा तच्चित्तपंकजममुष्य जहार सद्यः ॥ ७८ ॥
रामां रिरंजयिषता रसिकेन यूना विश्राणितेषु विकचद्रुमकुड्मलेषु ॥
सा केवलं न हि रराज विलोकयंत्या नेत्रद्वयांचलमपि प्रसभं सपत्न्याः ॥ ७९ ॥
अंतर्निकुंजमधितिष्ठति रंतुकामे कांते वधूरविदतीव गता सखीभ्यः ॥
अन्विष्यमाणकुसुमा सविलासमत्र प्राप्यामुना परिरराम चिराय काचित् ॥ ८० ॥
अंतर्हितग्रहणकेलिमिषेण कश्चिल्लीनो लतासु वनितापि गवेषमाणा ॥
तत्रागता सपदि वांछितमेव लेभे सापि न्यवर्तत सखीस्तदवीक्षिणीर्[४८] ॥ ८१ ॥
अंगुष्ठमात्रतलभूमितलावलंबां तुंगप्रसूनविनिवेशितपाणिपद्मां ।
योषामुपेत्य परिरंभरसेन कश्चिन्माभून्निपात इति तां जगृहे कराभ्यां ॥८२॥
उत्तानिताननमुदक्षमुदीक्षमाणा लक्ष्मीं तरोरुपरिजां क्षणमायताक्षी ।
सद्यः पतद्भिरदसीयरजोभिरंधा मंतूयतापि[४९] दयितेन मुहुश्चुचुंबे ॥ ८३ ॥
क्षिप्त्वा स्वयं मृगदृशः कुसुमं मुखेंदौ लग्नं परागमथ जातरुषोपनेतुं ।
प्राप्यांतिकं विधमता मुखमारुतेन तत्सौरभानुभवसौख्यमलंभि यूना ॥८४॥
वर्णेन निर्जितसुवर्णगुणं सपत्न्याः कर्णावतंसयति कामिनि कार्णिकारं ।
अन्यापदेशवचनैरतिसूचितेर्ष्यैरन्या तदीयमपि कर्णमलंचकार ॥ ८५ ॥
रत्यामधःशयनमेव पणं भणंतौ पुष्पैः परस्परमभिप्रहितैः सलीलं ।
कांचिद्विजित्वरतुरयापजितेन यूना साकूतसुस्मितमलोकि मुखं सखीनां ॥८६॥
व्याजेन दोषमभिनीय परागपाताज्जातं दृशोः स्वलितचारुपदं चलंती ।
विभ्रम्य काचन निवेश विदग्धनारी सख्याः पुरः कमितुरंकमजानतीव ॥८७॥
इत्यादिभिर्बहुविधैर्वनकेलिभेदैर्विभ्रम्य ताः श्रमपयःकणभूषितांगाः ।
योषाः समं प्रियतमैश्चितपुष्पभाराः प्रापुर्यतो रघुपतिर्दयिता च तस्य ॥८८ ॥
यावत्सुमानि तरुणैरुपहर्तुकामैरासाद्यते स्म सविधं न सहप्रियाभिः[५०] ।
तावत्पुरेव तरुमूलमनूषतुस्तौ बालानिलेन सुरतश्रममस्तयंतौ ॥ ८९ ॥

४६ पल्लवः=विटः किसलयं च. ४७ शिरस्यभारः=केशपाशः. ४८ तदवीक्षिणी=तस्य अवीक्षिणी. ४९ मंतूयता=अपराधं कुर्वता. ५० उपहर्तुकामैः=उपहारं कर्तुमिच्छुभिः

तानग्रतो विनिहितप्रसवोपहारान् दृष्ट्वा ननंद नृपतिः स्मितसुंदरास्यः ।
तत्पुष्पसंचयमपि स्वयमेव भूयः कांताकचप्रकरभूषणमाततान ॥ ९० ॥
रेजुर्नृपेण निहिताः प्रमदोत्तमायाः केशेषु ताः सुमनसः प्रविकीर्णशोभाः ॥
सूर्यात्मजासलिलवेणिषु विस्फुरंत्यो व्यूहाभवंत्य इव कोमलशुक्तिपंक्त्यः ॥९१॥
भूयोपि तत्र भुवनैकमनोहरांगौ तौ दंपती सहचरैः सह सप्रमोदं ॥
वक्राभिधानपरिहासकथाप्रधानैरारेमतुश्चिरतरं बहुनर्मभेदैः ॥ ९२ ॥
तेषां वने विहरतामिह माधवश्रीशय्यागृहे जनितशंबरवैरिवीरे ॥
कस्मै जनाय न चुकोप निसर्गवामश्चित्तं च कस्य न बिभेद शरैः स[51] तीक्ष्णैः॥९३॥
इत्थं रामश्चिरतरमसौ सार्द्धमुर्वीशपुत्र्या ।
तस्मिन्नुद्यत्प्रसरमदने काननांते विहृत्य ॥
अस्तक्षोणीधरपरिसरं लंबमाने दिनेशे ।
प्रत्यावृत्तः सपदि सदनं प्राप कामातुरः स्वं ॥ ९४ ॥
याते तस्मिन्नथ नरपतौ वासतेयीं[52] स्वकायां ।
सर्वे स्वं स्वं निवसनमनुप्रस्थिताः कामिनस्ते ॥
तुंगं शृंगं चरमधरणीधारिणः सोधिरोढुं ।
रूढोत्साहः पतिरपि रुचां संचुकोच स्वपादं ॥ ९५ ॥
इति श्रीरामचरिते महाकाव्ये पंचमः सर्गः ॥

अथावलोक्य स्वयमंबुजाक्ष्या रिरंसुमेनं रविरात्मवंश्यं ॥
तत्प्रीतिमाधित्सुरिवास्तमेष्यन्नुपास्तशृंगं[53] भगवानुपास्त ॥ १ ॥
निःशेषदिक्पालकलात्रिभूतेरस्यैव दृष्ट्वा दयितानुरागं ॥
दिशोपि जाताः सहसा सरागाः स्वस्वामिभावोचितवृत्तिरेषा ॥ २ ॥
शिखाग्रलग्नैः शिशिरेतरांशोरारेजुरारामनगाः करौघैः ॥
कौसुंभकौशेयकृतैरभीक्ष्णमुष्णीषपट्टैरिव सावतंसाः ॥ ३ ॥
सायान्हशीतेन समीरणेन पतत्रिणः कंपितपत्रचूडाः ॥
आकाशमार्गेऽभिकुलायं[54] सालं मंदं विचेलुर्मधुरं रुवंतः ॥ ४ ॥
दिनांतरज्जद्द्युमणिप्रभाभिश्छन्नासु सर्वत्र हरित्स्वरोदीत् ॥
निजामजानन् निलयद्रुशाखां का केति पृच्छन्निव काकलोकः ॥ ५ ॥
पत्यौ निजे खेलति पश्चिमाशावक्षोजशैले विवृतातिरागे[55] ॥
द्रागब्जिनी द्रष्टुमिवासमर्था न्यमीलयत्पंकजमात्मनेत्रं ॥ ६ ॥

---

५१ सः=कामः ५२ वासतेयी=गृहं. ५३ उपास्तशृंगं=अस्तपर्वतसमीपदेशं. ५४ कुलायं=नीडं. ५५ रागः=रक्तिमा प्रीतिश्च.

आरुह्य तुंगं चरमाद्रिशृंगं तत्रत्यमाणिक्यरुचेव रक्तः ॥
आकुंचयन् [५६]पादसहस्रमाशु [५७]पाथोधिमध्ये पतितः [५८]पतंगः ॥ ७ ॥
रत्नाकरोत्संगतरंगरंगे त्वंगत्क्षणं बिंबमशीतरश्मेः ॥
लीलाचलद्दोर्वलयाग्रभास्वन्माणिक्यशोभामभजत् प्रतीच्याः ॥ ८ ॥
अस्तंगते भास्वति संकुचंती सरोजमालामवलोक्य तस्य ॥
सौहार्दखेदादिव नेत्रयुग्मं मिमील संध्याविधिकैतवेन ॥ ९ ॥
सद्यस्त्रिलोकीजनवंदनीयां संध्यामुपास्थाय स राघवेंदुः ॥
सुधावलेपोज्ज्वलमभ्रगंगाकूलंकषं हर्म्यतलं प्रपेदे ॥ १० ॥
तत्रासने चारुणि सन्निविष्टः [५९]सत्रा दुहित्रा मिथिलाधिपस्य ॥
नितांतशोणीकृतदिग्विभागां निरीक्ष्य संध्यामयमित्युवाच ॥ ११ ॥
विलोक्यतां विश्वविलासिनीनामनुत्तमे चित्तहरं जनानां ॥
महोमहत्वं महनीयशीले विलासलोलेन विलोचनेन ॥ १२ ॥
शंकेतरां शोणितसिंधुपूरं संध्यामहःसंचयमंचितांगि ॥
[६०]परोष्णीगतिभंगिभंगं[६१] [६२]वीप्संतमंते वियदंडभांडं ॥ १३ ॥
कराभिघातेन कठोरधामा जनस्य पीडां जनयन् वृथैव ॥
कृतानुतापः कलुषं प्रमार्ष्टुं पुण्ये पयोधौ पतति स्म मन्ये ॥ १४ ॥
[६३]पतद्ग्रहत्वेन कृतात्पतंगः पत्न्या जलेशस्य दिशा विहस्य ॥
तांबूलरज्जन्मुखसीधु[६४]दानादारक्तबिंबोजनि युक्तमेतत् ॥ १५ ॥
मन्ये जघन्यस्य[*] महीधरस्य शृंगाणि कालायसनिर्मितानि ॥
आसन्नवैरोचनदीप्तिदीप्तान्यासन्नमून्येव हि लोहितानि ॥ १६ ॥
आदाय लक्ष्मीमरविंदिनीनामस्तं गतोर्कः किल चोरभर्ता+ ॥
निपात्य तं दिग्वरुणस्य सिंधौ संध्यामिषात्तामियमाददाति ॥ १७ ॥
अभ्यर्णवाभ्यर्णमशीतधाम्न[६५]स्तीव्रातपैर्जाततृषः पिपासोः ॥
दिग्चक्रवालस्य विसार्यमाणा संध्येति संज्ञां लभते रसज्ञा ॥ १८ ॥
अस्ताद्रिपद्माकरचक्र[६६]चक्रे तत्कालविज्ञातपतंगपाते ॥
सद्यो दिदीपे विरहानलः किं तज्ज्वालया शोणति वारुणीयं ॥ १९ ॥
रुचेरपाकृष्य रविः स्विकस्याश्चक्रेषु चक्रे पृथुतापभारं ॥
ददौ पुनस्तां [६७]दमुनस्यतस्ते[६८] तपंति नक्तं न च तस्य भेदः ॥ २० ॥

---

५६ पादः=किरणः चरणश्च ५७ पाथोधिः=जलधिः ५८ पतंगः=सूर्यः ५९ सत्रा=सह. ६० परोष्णी=" वडवागूळ " इति महाराष्ट्रभाषायां. ६१ भंगः=वीचिः ६२ वीप्संत=व्याप्तुमिच्छंतं. ६३ पतद्ग्रहः=पतनग्रहः पात्रविशेषश्च (पिकदाणी.) ६४ सीधु=मद्यं. * जघन्यस्य=पाश्चिमस्य. ६५ अशीतधाम्नः=सूर्यस्य. ६६ चक्रचक्रं=चक्रवाकसमूहः ६७ दमुनासि=अग्नौ. ६८ ते=चक्रवाकाः + चोरभर्ता=जारः

हंसैः[६९] खगाना[७०]मधिपः किलायं चिराय संडीय परिश्रमार्त्तैः ॥
पपात मध्येजलधीति जाने सांकूजिनं[७१] पक्षिगणः करोति ॥ २१ ॥
विधाय संगं वरुणस्य दारैर्दिशा सरक्तांबरया विशिष्य ॥
संध्याकुमारीं सविता ससर्ज ध्रुवं तदल्पायुरसौ बभूव ॥ २२ ॥
समंततः पश्यत[७२]मां तमिस्रं सुमध्यमे संप्रति जृंभमाणं ॥
विकस्वरेंदीवरकुड्मलौघादुदंचदुच्चैरिव कांतिजालं ॥ २३ ॥
कल्हारवापीकलिकाकरंडमुद्घाटय संध्या मृदुवातयंत्रैः ॥
तत्र स्थितं भृंगकुरंगना[७३]भिमादाय योषेव नु लिंपति स्वं ॥ २४ ॥
निर्वर्ण्य वर्णेन समान[७४]मैनं बिंबेन बिंबं च्युतमस्तशृंगात् ॥
भ्रमेण द्रष्टुं बलिपुष्ट[७५]लोकः समापतत्याशु तमिस्ररूपः ॥ २५ ॥
नेदं तमः किंतु कलिंदकन्या दिवा[७६] निरस्ते पितरि स्वकीये ॥
क्रोधादिवैनां[७७] ग्रसितुं प्रवृत्ता समंततः सत्वरमुत्पतंती ॥ २६ ॥
अब्धौ मृतेऽर्के हरितः[७८] स्वनाथे संध्यानलं प्रापुरिवानुमर्तुं ॥
तद्दाहजन्मा तनुते रजन्यास्तमस्विनीत्वं तरसैव धूम्या[७९] ॥ २७ ॥
शीतालवः शीतकरांशुमर्शाद् भीता इवैताः ककुभो[८०] विदूरात् ॥
आच्छादनायाददते विशालं तमोमयं नीलनिचोल[८१]चेलं ॥ २८ ॥
अनेन भिन्नांजनमेचकेन[८२] कृत्वाक्षिलेपं खलु पेचकेन[८३] ॥
विश्वे पदार्था विषयीक्रियंते देहानुसारं बलमौषधानां ॥ २९ ॥
व्यक्तीभवंतं दिवि पश्य बाले तारासमूहं तमसावृतायां ॥
रूपांतराक्रांतनिजाश्रयत्वे रूपाश्रयं वस्तु सुलक्ष्यमाहुः ॥ ३० ॥
रत्नं निजं नीरनिधौ नियत्या[८४] निपातितं द्यौ[८५] बहुशः शुशोच ॥
तस्या दिवो नेत्रपयःपृषंति[८६] तारापदेशात्प्रकटीभवंति ॥ ३१ ॥
दिनं दिनेशस्य करैः कठोरैः संतापितायाः सरणेः सुराणां ॥
मिषेण तारामयमौक्तिकानां प्रस्वेदबिंदुप्रकरा भवंति ॥ ३२ ॥
न्यस्तानि लक्ष्मीकमितुः[८७] पदत्वात्पुष्पाणि कल्पद्रुमजानि देवैः
दामानि[८८] यद्वा दिवि कीकसानां[८९] शंभोः कचत्वान्नतु भान्य[९०]मूनि ॥ ३३ ॥

---

६९ हंसः=पक्षिविशेषः सूर्यश्च. ७० खगः=पक्षी ग्रहश्च. ७१ सांकूजिनं=अतिशयारावं. ७२ पश्यतमां=अतिशयेन पश्य. ७३ कुरंगनाभिः=कस्तूरिका. ७४ ऐनं=सूर्यसंबंधि. ७५ बलिपुष्टः=काकः ७६ दिवा=आकाशेन. ७७ एनां=दिवं. ७८ हरितः=दिशः ७९ धूम्या=धूमसमूहः ८० ककुभः=दिशः ८१ निचोलः=कंचुकः ८२ मेचकं=कृष्णं. ८३ पेचकः=उलूकः ८४ नियत्या=दैवेन. ८५ द्यौः=द्यौः ८६ पृषंति=बिंदवः ८७ लक्ष्मीकमितुः=विष्णोः ८८ दामानि=मालाः ८९ कीकसानां=अस्थ्नां. ९० भानि=तारकाः

सहस्रपादं वृषभं प्रचार्य क्षेत्रं नभो नाम विकृष्य कालः ॥
कृषीवलः कर्दमिते तमोभिर्वपत्यमुष्मिन्नु[11]डुबीजजालं ॥ २४ ॥
स्फुटीभवत्कैरवकोरकाणां क्षपामुखे पुष्करं[12]पुष्करिण्याः ॥
बिंबानि दृष्ट्वा विमलांबुपूरे ताराधिपं तत्र तनोति लोकः ॥ २५ ॥
उत्थाय संध्याकपटेन सिंधोरागंतुमालोक्य रुचाम[13]धीशं ॥
दत्तार्चनस्तारकतंडुलौघैः प्रत्युज्जगाम ज्वलनः किमौर्व[14]: ॥ २६ ॥
व्यक्तीभवत्तारतमिस्रमिश्रमशांतसांध्यप्रभमंबुजाक्षि ॥
मुदे ममोदेति रतांततांतत्वदाननश्रीधरमंतरिक्षं ॥ २७ ॥
तारावलीराजतबिंदुराजत्पितृप्रभू[15]भासुरपत्रपा[16]श्यः ॥
वियद्द्विपस्तिष्ठति धारयिष्यन् सुधाकरं मध्यमणिं सुनीलः ॥ २८ ॥
कालेन वैशा[17]खधरं विधाय प्रभाकरं बिंबममंथि सिंधुः
जज्ञे ततस्तारकरत्नकूटं तमिस्रनामापि च कालकूटं ॥ २९ ॥
रत्नाचलश्चेद्वियदीपसंध्यं किं भासुरास्तत्र सुरा न ताराः ॥
इदं तमश्चाप्यभियुक्तमेभिर्जानीमहे दानववीरसैन्यं ॥ ४० ॥
सुवर्णशा[18]रीः कपटेन भानां विहायसि द्यूतपटे वितत्य ॥
विक्रीडितुं शीतमयूखमक्षं गृहीतुकामा इव भांति काष्ठाः ॥ ४१ ॥
संध्याप्रवालस्तिमिरच्छदौघो यस्तारकैः कोरकितो बभूव ॥
नभस्तरोरस्य न वक्ति को वा जनिष्यमाणं फलमिंदुबिंबं ॥ ४२ ॥
निधाय तेजो निजमुष्णतेजाः संध्यांगनायां जनयांबभूव ॥
निशाकुमारीं नितरां तदेषा वियोगभाजां विशिनष्टि तापं ॥ ४३ ॥
संध्यावधूसार[99]संबंधुयोगे जाता निशा नाम कुमारिकेयं ॥
रथांगवक्षोरुहनेत्रनिर्यत्पयो[100] धयंती[1] परिपोषमेति ॥ ४४ ॥
निशीथिनी नीलतमःप्रवेणी कुमारिका कैरवकुड्मलाक्षी ॥
पीयूषभासा[2] परिणेष्यमाणा तारावलीमालिकयांचति खं ॥ ४५ ॥
इत्यत्र[3] सूक्तिस्रजमंबुजाक्ष्यै संध्यागुणौघग्रथितां ददाने ॥
आपांडुरः शक्रदिशि प्रकाशः क्षीरोदधेः पूर इवोज्जगाम ॥ ४६ ॥
रा[4]मांतरंगप्रमदप्रदाता ताराधिपेन प्रहितो जवेन ॥

---

११ उडु=नक्षत्रं. १२ पुष्करपुष्करिण्याः=देवनद्याः १३ रुचामधीशं=सूर्यं. १४ और्वोज्वलनः=वडवानलः १५ पितृप्रसूः=सायंसंध्या. १६ पत्रपाश्यः=ललाटभूषणं. १७ वैशाखधरः=मंथनदंड. १८ शारी="सोंगटी" इतिभाषायां. ११ सारसबंधुः=सूर्यः १०० पयः=उदकं दुग्धं च. १ धयंती=पिबती. २ पीयूषभासा=चंद्रेण. ३ अत्र=रामे. ४ रामांतरंगं=रामस्य स्त्रीणां च अंतरंगं.

उत्पत्य च प्रागिगिरितो मरीचिस्तोमो हनूमानिव नाकमांचत् ॥ ४७ ॥
दृष्ट्वा मुखं दर्शितहासमैंद्याः प्रियः प्रियां तां पुनरप्युवाच ॥
निपीय तत्सूक्तिसुधामतृप्ता भूयस्तृषेवास्य चुचुंब याऽस्यं ॥ ४८ ॥
सलीलमालोलय लोचनांतं प्राति प्रतीचीतरदिग्विभागं ॥
पूर्वाचलाग्रस्फुटलोध्ररेणुरम्या रुचः प्रेरयतीह चंद्रः ॥ ४९ ॥
सायं स्मरार्तैः सममात्मकांतैः प्रक्रीडितानां प्रथमाद्रिकुंजे ॥
आशामुखोयं शबरांगनानां श्वेतायते नर्मविलासहासैः ॥ ५० ॥
यथायथोदंचति कांतिरिंदोरनूदयंती हरिगोचराशां ॥
तथातथापैति तमिस्रजालं मायेव साक्षात्परचित्प्रकाशात् ॥ ५१ ॥
अर्द्धोर्द्धदृष्टामृतरोचिरंगं मुग्धे पुरस्तादुदयस्य शृंगं ॥
आलोक्यतमास्यमिवादिधृष्टेर्दिगंबरीभूतपिशंगदंष्ट्रं ॥ ५२ ॥
+उस्रैरुदस्रीकृतविप्रयुक्तैर्विस्त्रंसयन्नाशु तमिस्रबंधं ॥
*उल्लोलसंक्रांतविलोलमूर्तिरुद्याति सिंधोरुडुचक्रवर्ती ॥ ५३ ॥
पीयूषसारस्त्राविणा करेण विधाय संमार्जनमोषधीशः ॥
विलोपयत्येष दिवः शरीरे प्रायेण तारामयसिध्मजालं ॥ ५४ ॥
स्वच्छंदखेलत्प्रथमाद्रिमस्तवास्तव्यहस्तींद्रकरैरुदस्तः ॥
प्रत्यग्रमाणिक्यशिलामयः किमुज्जृंभते संप्रति गंडशैलः ॥ ५५ ॥
संध्याग्निसंतप्तनभःशरावे तारालिफेनानुमितद्रुताज्ये ॥
निधाय कालः पचतींदुपिष्टं निवेशितं प्राग्लवणोदपूरे ॥ ५६ ॥
कालेन पक्वस्तमसः कदाचिदाहारदानाय शशांकपूपः ॥
जग्राह सद्यस्तम एव सोयं वैधी विचित्रा भवति प्रवृत्तिः ॥ ५७ ॥
लीलां भुजंगोन्मददानशीलां वामामनःक्षोभकरीं वहंतीं ॥
सत्कीर्तिभास्वत्कृतगोकुलस्य मूर्तिर्विधोः कंसमुदं न कुर्यात ॥ ५८ ॥
स्वर्वर्तिकैवर्तवरैरदृश्यैरुद्रश्मिजालप्रतिमुक्तमूर्तिः ॥
उत्कृष्यमाणो जलधेर्जनौघैः शंखः शशांकः समशंकि शंके ॥ ५९ ॥

---

५ प्रागिगिरिः=पूर्वाद्रिः महेंद्रपर्वतश्च. ६ प्रतीचीतरदिक्=पूर्वा. ७ हरिगोचराशाः= पूर्वा. ८ आदिधृष्टिः=आदिवराहः ९ दिगंबरीभूतं=व्यक्तीभूतं. १० उडुचक्रवर्ती=चंद्रः ११ ओषधीशः=चंद्रःवैद्यश्च. १२ सिध्मजालं=" शिबें " इति महाराष्ट्रभाषायां. १३ मस्त= शिरः १४ गंडशैलः=महोपलः १५ तमसः=अंधकारस्य राहोश्च. १६ भुजंगः=सर्पः जारश्च. १७ दानं=अर्पणं खंडनं च. १८ वामा=स्त्री. १९ सत्कीर्तिना भास्वता सूर्येण कृतं गोकुलं किरणसमूहो यस्य सत्कीर्त्या भूषितं गोकुलं व्रजो येन. २० कंसमुदं=कं पुरुषं सहर्षं पक्षे कंसस्य आनंदं. २१ मुक्तमूर्तिः=आबद्धमूर्तिः. + उस्रैः=किरणैः. * उल्लोलाः= महोर्मयः.

वृंदारकस्त्रैणविलासधाम्नि व्योम्नि ध्रुवं पूगफलानि भानि ॥
बिंबं सुधांशोरपि चूर्णपूर्णं जानामि खैर्जूरमयं[22] करंडं ॥ ६० ॥
हृतांधकस्या[23]शुभलोपकर्तु[24]र्गौरीकृताशस्य[25] धृतामृतस्य[26] ॥
चंद्रस्य शंभोश्च विशेषमूहे परं स्मरोज्जीवननाशनाभ्यां ॥ ६१ ॥
तमालनीलानि तमांसि कामं पीत्वापि सैत्यं[27] न जहाति चंद्रः ॥
स्वच्छामहो तच्छविमंबुराशिरापीय धत्ते घनवर्णमर्णः ॥ ६२ ॥
विधोर्धाम्नी[28] भुवनत्रयीयं तथा ममाप्यस्तु तदाह्वयस्य ॥
इतीव तन्मूलविधायि चूर्णं ज्योत्स्नामयं विक्षिपतीह चंद्रः ॥ ६३ ॥
राजंति सर्वा हरितः सितांशोरंशुप्रतानैरभितोनुलिप्ताः ॥
ज्वलद्वियोगज्वलनप्रतापे भस्मायमानैरिव चक्रदेहैः ॥ ६४ ॥
क्षीरोदपूरादतिपीय दुग्धं माधुर्यनिर्धूतसुधं सुधांशुः ॥
वमत्यनंतर्मितमेतदाशु ज्योत्स्नामयं तेन सिताः किलाशाः ॥ ६५ ॥
छायासु भांति छदनांतरालैरंतःप्रविष्टान्यवनीरुहाणां ॥
शशांकरोचिःशकलानि शंके भुवं गताः सांबुधरा बलाकाः ॥ ६६ ॥
हृष्यच्चकोरद्विजनादमंत्रैः पूतं पयोधेरिव पूर्णमद्भिः ॥
उद्यच्छति द्यौरुडुराजकुंभं स्मरं जगज्जैत्रमिवाभिषेक्तुं ॥ ६७ ॥
अयं किल प्रेयसि पश्य धत्ते मध्येवपुर्मेचकिमा[29]नमिंदुः ॥
अमुष्य लोके कविभिः क्रियंते बहुप्रकाराणि विकल्पनानि ॥ ६८ ॥
*वस्वौकसारावनितामुखेंदुसौहार्दसंभावितचुंबनेन ॥
संक्रांतमिंदौ तनुते तदीयं कस्तूरिकाचित्रक[30]मंकशंकां ॥ ६९ ॥
व्याकोशमाकाशसरित्समुत्थं विशंक्य पंकेरुहमिंदुबिंबं ॥
उड्डीय भृंगावलिरत्र सक्ता युक्तं कुरंगस्य कथं प्रसक्तिः ॥ ७० ॥
प्रसाधिनीभिः प्रतिसार्यमिंदौ नीतेप्सरोभिः करदर्पणत्वं ॥
सवर्णतागूढमुखानुबिंबे बिंबं विशंके स्फुटमंकमक्ष्णोः ॥ ७१ ॥
ये राहुमाशीविषै[31]माममनंति जानंति ते नूनमनेन+ लग्नं ॥
पुनः पुनः प्रत्यवसीयमाने[32] चिरेण सांद्रं विषमंकमिंदौ ॥ ७२ ॥
भिन्नः स्वदेशोदिततालपक्षभ्रमद्रशैक[33]क्षुण्णै[34]र्दंतकुंतैः ॥

२२ खर्जूरमयं=रजतमयं. २३ हतोंधकासुरो येन पक्षे नाशितोंधकारो येन. २४ अशुभस्य लोपं करोतीति पक्षे आशु भानां नक्षत्राणां लोपं करोतीति. २५ गौर्या कृता आशा येन पक्षे गौरीकृताः धवलिताः दिशा येन. २६ धृतो अमृतः चंद्रो येन पक्षे धृतं अमृतं येन. २७ सैत्यं=शुभ्रत्वं. २८ विधोः=विष्णोः २९ मेचकिमानं=कृष्णत्वं. ३० चित्रकं=तिलकं. ३१ आशीविषः=सर्पः. ३२ प्रत्यवसीयमाने=भक्ष्यमाणे. ३३ शकः=हस्ती. ३४ क्षुतः=तीक्ष्णः. * वस्वौकसारा=देवनगरी. + अनेन=राहुणा.

क्षणं सुधांशुः स्ववदस्रसिक्तः सद्यः पुना रूढकिणाङ्कमध्यः ॥ ७३ ॥
पुरा पयोधौ सहवासकाले विषे च पीयूषरसे च लब्धे ॥
धत्ते जडोऽयं हृदि तत्र पूर्वं परं करेण स्तुतमातनोति ॥ ७४ ॥
पूर्वाद्रिणोपह्नियमाणमेणं [३५]सूर्योढमागंतुमनु स्वमिंदुः ॥
आस्वाद्य कुक्षिंभरिरास तस्मिन् स्वच्छे स एव स्फुटतामुपैति ॥ ७५ ॥
सहोदरी चंद्रमसः किल श्रीरमुं समुद्यंतममुक्तरागा ॥
जहाति नाश्लिष्य न याति सोऽयं कथं कलंकं [३६]तदवामवृत्तिः ॥ ७६ ॥
मन्ये रथं मान्मथमिंदुबिंबं यत्रेक्ष्यते लक्षणकैतवेन ॥
त्रिनेत्रनेत्रज्वलनावलीढः श्यामायमानः स किलाधिरूढः ॥ ७७ ॥
प्राप्नोति चेत्साधु सुधामरीचिर्म[३७]रुत्वदाशामहिलामुखत्वं ॥
श्रयत्ययं च श्रवणावतंसश्यामारविंदश्रियमं[३८]करंकुः ॥ ७८ ॥
अंतर्निलीय क्षणमंबुराशेः [३९]प्रतिक्षपं यः समुपैति सोयं ॥
बिभर्ति मध्यं वडवाग्निकीलानिर्दग्धनि[४०]र्वाणमिवातिनीलं ॥ ७९ ॥
किरीटिना शैवकिरीटवासी कोदंडदंडेन कृतव्रणः प्राक् ॥
अद्याप्ययं तत्किणबद्धमध्यां बिभर्ति मूर्तिं विमलां विशिष्टां ॥ ८० ॥
विजित्य लोकानसकृत्समस्तान् सांद्रीकृतः [४१]सारससायकेन ॥
अयं यशोराशिरमुत्र शंके शैवाभियोगात्पतितः कलंकः ॥ ८१ ॥
यस्यावलंबः पदमेव विष्णोर्यश्चाधिपत्यं वहाति द्विजानां ॥
[४२]नाभोगभोज्यो हरिणाधिरूढः सोयं गरुत्मानिव राजतींदुः ॥ ८२ ॥
हृत्वाऽमरीणामपि मानपंकमंके निधायाभिपतत्ययं नः ॥
इतीव दृष्ट्वा सकलंकमेनं स्त्रियस्त्यजंति स्वयमद्य मानं ॥ ८३ ॥
[४३]यांति स्म याऽतिस्मयमाहितांतर्लेपावलेपा वनिता न कांतं ॥
साऽऽभिसाराभिरुचिं प्रतीमं दृश्ये सदृश्ये सति का न चंद्रे ॥ ८४ ॥
मुग्धेक्षणामानसमानशंकुमुद्धर्तुमिंदोरयमेव कालः ॥
उद्भिद्य यत्कुड्मलमुत्पलिन्यास्तत्र स्थितं भृंगमपाकरोति ॥ ८५ ॥
[४४]कुमुद्वतीनां [४५]कुसुमेषुगंधो द्विधाभवत्यद्य पुनर्द्विधा सः ॥
विकस्वरत्वादतिकांतिमत्वात्तन्मित्रमैत्र्या शरशैत्य[४६]तश्च ॥ ८६ ॥

---

३५ सूर्योढः=सायं प्राप्तोऽतिथिः. ३६ तदवामवृत्तिः=तस्यामनुकूलवृत्तिः ३७ मरुत्वदाशा=पूर्वा. ३८ रंकु=हरिणः. ३९ प्रतिक्षपं=प्रतिनिशं. ४० निर्वाणः=शांतः ४१ सारससायकः=मदनः ४२ नाभोगः=देवः सर्पश्च. ४३ (अन्वयः) या अभिसारा वनिता आहितांतर्लेपावलेपा (गर्वयुक्ता) सती अतिस्मयं कांतं न यातिस्म का सा सदृश्ये=सत्+ऋश्ये (विद्यमानमृगे) चंद्रे दृश्ये सति इमं प्रति अभिरुचिं न आर (ऋश्यः=मृगः.) ४४ कुमुद्वतीनां=कैरविणीनां. ४५ कुसुमेषुगंधः=पुष्पवासः मदनगर्वश्च. ४६ शैत्यं=शीतत्वं तीक्ष्णत्वं च.

कर्पूरसारप्रतिमप्रभाभिः स्वभाभिरालिप्य [47]विभावरीशः ॥
करोति देहे किमु कैरविण्या [48]विशेषकं पुष्पलगद्द्विरेफैः ॥ ८७ ॥
दोषाकरोद्भावितमप्यदोषमामोदमाबिभ्रति कैरवाणि ॥
[49]संसिद्धि[50]रादेरनुसारिणीति [51]व्याहार[52]मारादपयापयंति ॥ ८८ ॥
श्रिताभ्रतापिच्छलताग्रतारा[53]गंधोलिपालीगृह[54]सिक्थकुंभात् ॥
विधोर्मधुश्च्योतितमंकरंध्रैरास्वाद्य माद्यंति रुचं चकोराः ॥ ८९ ॥
आलंबितव्योमतमालशाखात्सुधानिधेः सिक्थकपुंजपिंडात् ॥
व्याधेन केनापि कृतांकरंध्रादाश्च्योतदासीन्मधु चंद्रिकाख्यं ॥ ९० ॥
हंसैरिव क्षीरनिलीनमंभः करांबितं चंद्रिकया हिमांभः ॥
पृथक्कृतन्वद्भिरिवेंदुकांतैरुत्स्रावितं पश्य पयःप्रवाहं ॥ ९१ ॥
शशांककांतैर्विगलत्कबंधैर्निरस्तनीहारमिवाहितं यत् ॥
तदेव शुद्धं करजालमिंदोश्चकोरचंचूमहमातनोति ॥ ९२ ॥
प्रदुह्य दैवेन सहस्रगोर्गाः संध्यानले दुग्धमपाचि यत्तत् ॥
तेनैव संक्रामितमभ्रभांडे ज्योत्स्ना ध्रुवं तन्नवनीतमिंदुः ॥ ९३ ॥
शुक्लेव शुक्लांशुकराभिषेकादेषा निशा नः प्रतिभाति चित्ते ॥
तथापि केषामपि कालरात्रीभवत्ययोगज्वलनेंधनानां ॥ ९४ ॥
आमोदवद्भिः सरसैर्मरुद्भिरालिंगिता स्वच्छतरांबरांता ॥
एषाप्सरोभिः स्फुरतारहारा सोमानना साम्यमुपैति रात्रिः ॥ ९५ ॥
संध्याचूडैरनिबिडतमस्तैस्[55]ताम्रचूडैरुडूनि ।
प्रासूयंत स्फुटमधिवियद्ब्रह्मांडमंडानि यानि ॥
दृष्ट्वा तानि ध्रुवमुपगतः सैंधवादंतरीपा-
[56]द्ग्रासं ग्रासं चरति परितः कश्चिदेणांकहूणः ॥ ९६ ॥
ग्रावाणं गमयन्नयं भगवतस्त्रैलोक्यमाक्रामतः ।
साधर्म्यं पदपंकजस्य विगलत्स्वच्छोदकस्य स्वकं ॥
एतामप्युपलालयेत सुभगां कांतः किमित्यंकुर-
च्छंकापंकिलचेतसा गिरिजया शप्तः किमासीज्जडः ॥ ९७ ॥
अंगेषु पश्य हरिणं[57] हरिणाक्षि धत्ते सर्वेष्वयं न खलु जात्वपि मध्यभागे ॥
चित्रं तथापि हरिणांकितमेव मध्यमुद्घोषयंति सुधियोऽपि जगत्यमुष्य ॥ ९८ ॥

---

४७ विभावरीशः=चंद्रः ४८ विशेषकं=तिलकं. ४९ संसिद्धिः=प्रकृतिः ५० आदेः=कारणस्य. ५१ व्याहारः=उक्तिः ५२ आरात्=दूरे. ५३ गंधोलिः=मधुमक्षिका. ५४ सिक्थ=" मेण " इति भाषायां. ५५ ताम्रचूडः=कुक्कुटः. ५६ अंतरीपं=द्वीपं. ५७ हरिणं=धावल्यं.

इत्थं तन्मुखचंद्रतो विगलितामास्वाद्य वाक्चंद्रिकां ।
श्रोत्रद्वंद्वपुटेन सा शशिमुखी नेत्रद्वयेनेतरां ॥
आनंदानुभवानुभावमपि यच्चक्रे दृशोर्मीलनं ।
तद्व्यक्तं निजगाद भेदमनयोर्माधुर्यसंपद्धृतं ॥ ९९ ॥
॥ इति श्रीरामचरिते महाकाव्ये षष्ठः सर्गः ॥ ६ ॥

भर्तुस्तां गिरमथ भावितार्थसारामाकर्ण्य श्रवणमनोज्ञवर्णबंधां ॥
तामेव श्रियमधिकृत्य शीतभानोः सानंदं किमपि जगाद सारसाक्षी ॥ १ ॥
आलोकैरमृतरुचः सुधारसार्द्रैराविष्टं प्रियतम पश्य विष्टपांतं ॥
भावत्कैरिव धवलैर्यशःप्रवाहैः केषां नो जनयति चेतसि प्रमोदं ॥ २ ॥
आनीताः स्फुरदमृतांशुरश्मिजालैर्धावल्यं भृशतरमुज्ज्वलाः सरस्यः ॥
श्रीभर्तुः शयनगृहस्य वारिराशेः साधर्म्यादिव विकचोत्पलैः स्मयंते ॥ ३ ॥
सावर्ण्यं निजगरुता+ गतां शितांशोराभाभिः सरसिजिनीषु चक्रवाकीं ॥
दृष्ट्वारान्निजवनिताभ्रमेण मंदं पश्यासौ सरसमुपैति राजहंसः ॥ ४ ॥
ताटाके तनुतरभंगनृत्तरंगे संक्रांतं सितरुचिबिंबमंबुपूरे ॥
आलोक्य स्फुरितमृणालखंडशंकी स्वे चंचू क्षिपति ततो रथांगनामा ॥ ५ ॥
संस्पृष्टा रजतरजःसमानकांत्या कौमुद्या कलितमहेंद्रनीलहृद्या ॥
बाहीकौ विलसति कुट्टिमस्थलीयं कापोतं सुललितरूपमुद्वहंती ॥ ६ ॥
आदर्शप्रतिमविलासधामभित्तिस्थूलाश्मस्फुरदनुबिंबकैतवेन ॥
एष त्वद्वदनजितः सुधामयूखः सेवार्थं सविधमुपैति तावकीनं ॥ ७ ॥
आमूलं विशदसुधाविलेपशुभ्राः प्रासादाः प्रसृमरसांद्रचंद्रिकायां ॥
भिद्यंते किमपि न पश्य जीवनाथ क्षीराब्धेरुदरशया इवोरुशंखाः ॥ ८ ॥
वासंतीकुसुमनिरंतरालकेशाः सत्क्षौमस्थगिततनूः सरोरुहाक्षीः ॥
संकेतस्थलमुपसेदुषीरिदानीं जानंति स्फुटतरसौरभात् पुमांसः ॥ ९ ॥
बभ्राम त्रिजगति या तु यातुनारी ध्वांतात्मा सति परलोकभाजि मित्रे ॥
सैव त्वां वशयितुमद्य चंद्रिकाख्या संभूता ललिततनुः स्फुटीकृताशा॥१०॥
निर्जेतुं निखिलजगत्सु मानुषाणि श्रीपुत्रे[६२] चरति यदैव शीतरश्मिः ॥
संचारे सुखमिव कर्तुमस्य भूमौ कौशेयं किरति सितं स्वभाच्छलेन ॥११॥
अत्यच्छैरमृतमयूखरश्मिजालैराक्रांते क्षितिवियदंतरालभागे ॥
कृष्णत्वं न खलु गतं वियोगभाजां वक्त्रेभ्यो विधुविषदृक्षुधोऽनुभावः॥१२॥

---

५८ आलोकैः=प्रकाशैः ५९ बाहीका=बाहेभेवा. ६० सविधं=समीपं. ६१ यातुनारी=राक्षसी. ६२ श्रीपुत्रे=कामे. + गरुता=पक्षेण.

स्वच्छांभःप्रसरनिभाभिरिंदुभाभिस्त्रिस्रोतः श्रियमुपयाति भूतलेऽस्मिन् ॥
त्रस्यंतः प्रतितरुमूलमाश्रयंत श्यामांभोरुहसुषमास्तमिस्रखंडाः ॥ १३ ॥
उद्गच्छत्यमृतनिधिः शशांक एष स्वैः पादैर्जगदिदमाप्लुतं वितन्वन् ॥
इत्यंभोनिधिरपि तादृशः स्वतोयैराप्लावं जगति विधित्सुरुत्समिंधे ॥ १४ ॥
यो देहं दहति वियोगिनां मयूखैरात्मीयैः समुचितमस्य मित्रभूयं[63] ॥
मन्यंते शशिनममी तथाप्यजस्रं तच्चित्रं मनसि तनोति नोऽतिमात्रं ॥१५॥
केषांचित्तुरगवधूमुखानिलार्चिः[64] पीयूषस्रुतिलहरी तथा परेषां ॥
एकासौ सममुभयेषु भाति भिन्ना माहात्म्यं किमु कथयामि चंद्रिकायाः ॥१६॥
आकाशे प्रवहवशात्परिभ्रमत्सु ज्योतिःषु स्फुटमधरैरथोमिदुरेव[65] ॥
यं देवः पिबति दिवस्पतिः सरागं यत्राहुः स्थितममृतं च लब्धवर्णाः ॥१७॥
मानेन क्षुभितहृदां मनस्विनीनामानीतौ[66] चतुरसखीः प्रियप्रयुक्ताः ॥
नैष्फल्यं नयति चकोरकामिनीनां हुंकारः सरसनिपीतचंद्रिकाणां ॥ १८ ॥
माभूत्तं प्रणयरुषा मिथः परांचावित्याज्ञापयति युवां प्रसूनधन्वा ॥
एवं किं कथयितुमत्र दंपतिभ्यामायाति प्रतिसदनेषु चंद्रिकेयं ॥ १९ ॥
एतस्मिन्नपि समये शशांकरोचिःसंकोचीकृततिमिरौघनिर्मलाशे ॥
अंधत्वं तरुणजनेषु तीव्रमंतः संमूर्छत्कुसुमशरेषु वर्द्धते हि ॥ २० ॥
मर्यादामतिगमिते महार्णवेपि ज्योत्स्नाभिः क इव पुनः क्षमेत लोकः ॥
इत्यंतर्विशदशरीरबोधितेव प्रेयांसं मिषाति[67] जनेऽप्युपैति योषा ॥ २१ ॥
झंकारः कुमुदसुधारसांधभृंगीसंघानां सरसि निशम्यते मनोज्ञः ॥
विश्वेषां विजयनकेलिषु स्मरस्य ज्याघातध्वनिरिव जातकौतुकस्य ॥ २२ ॥
आहार्यश्रियमवलंब्यतारजालैस्तारेशं मुकुटपदे च धारयंती ॥
नृत्यंतीमिव रजनीं नटीं प्रतीमो गानश्रीर्विलसति नाथ कालकंठी ॥ २३ ॥
सुंदर्यामिह सुकुमारचंद्रपादैः शर्वर्यां शयनगृहांगणेषु योषाः ॥
प्रालेयव्यतिकरशीतलैः शयानाः प्रेयोभिः सह सुरतश्रमं मृजंति ॥ २४ ॥
किं वाचा बहुविधया विभावरीयं वासंती भवति नृणां महोत्सवाय ॥
एकैको गुणमहिमा विभाव्यमानः कंदर्पज्वलनसमिंधनं विधत्ते ॥ २५ ॥
इत्यार्द्रस्मितसहचारिणीं गिरं तां [68]सध्रीचीवदनसरोजसारमाध्वीं ॥
आस्वाद्य श्रुतियुगलेन जातमोदो धात्रीशस्त्वरितमना बभूव रंतुं ॥ २६ ॥
भूयोऽसौ भुवनपतिस्तदातनं यत् तत्कृत्यं सपदि तया सहैव कृत्वा ॥
संतुष्टः सरससजाधिकावसाने संक्रीडासमुचितमाविवेश सौधं ॥ २७ ॥

---

६३ मित्रभूयं=सूर्यत्वं. ६४ तुरगवधूमुखानिलः=वडवानलः ६५ अधरः=अधःस्थायी अधरोष्ठश्च. ६६ आनीतौ=आनयने. ६७ मिषति=पश्यति. ६८ सध्रीची=सहचरी.

तत्राथ प्रियतमया तया समेतः सामोदं शयनमलंचकार देवः
जालांतःप्रसृतसुधाकरांशुजालप्रत्यग्रास्तरणविशेषलोभनीयं ॥ २८ ॥
दंपत्योः कृतपरिरंभयोस्तदानीमंगेषु प्रसृतमभात् सितांशुरोचिः ॥
एकत्वं परमुभयोः शरीरयष्ट्योरानेतुं विहित इवात्र वज्रलेपः ॥ २९ ॥
माधुर्ये दशनदुकूलमिंदुभासामासंगादधिकमिवागमत्तदीयं ॥
संस्कारो मधुररसेषु यः सिताभिर्हेतुः स्यादतिशयने स ताः सिता हि ॥३०॥
कांतायाः कटितटतः करेण भर्तुः कौशेयं विशदतरं निराकृतं यत् ॥
न ज्ञातं तदपि तया चिरं विराजच्चंद्रांशुप्रकरपरिच्छदावृतांग्या ॥ ३१ ॥
क्रीडित्वा चिरमथ मन्मथानुभावादुन्मत्ताविव महिलामहीपतिश्च ॥
आमर्दश्लथसुकुमारगात्रयष्टी आयासं भृशतरमापतुर्युवानौ ॥ ३२ ॥
रत्यंतश्रमविवशीकृताखिलांगौ शय्यायामिह शयितौ शशिप्रभायां ॥
उन्मीलत्कुमुदसुगंधसारवाही मंदाभिर्गतिभिरुभौ मरुत्सिषेवे ॥ ३३ ॥
अंगेषु स्फुटमभिसारितेन मंदं पीयूषद्रवशिशिरेण शीतलांशुः ॥
दंपत्योः सुरतपरिश्रमेण जातं स्वेदांभः सपदि करेण संममार्ज ॥ ३४ ॥
संसक्ता वपुषि तयोस्तुषारधाम्नः सा कांतिः स्फुटमनुभूतकामकेल्योः ॥
आनंदामृतलहरीनितांतमंतः संपूर्णा बहिरिव निर्गता चकाशे ॥ ३५ ॥
संल्लापैरतिसरसैरथो मिथस्तावाश्लेषाद्युपजनितांतरांतरायैः ॥
सामोदं कतिषुचन क्षणेषु यातेष्वाविष्टौ मृदुमृदु निद्रया ह्यभूतां ॥ ३६ ॥
व्यत्यस्तीकृतभुजकल्पितोपधानं प्रस्तोष्ठं व्यतिमिलितोरु मीलिताक्षं ॥
अत्यंतास्थिरपरिरंभगूढभेदं तद् द्वंद्वं स्वपनरसे चिरं ममज्ज ॥ ३७ ॥
एवं तौ परमसुखप्रसूतिहेतौ निद्रायां विहितविगाहनौ विलोक्य ॥
ईर्ष्यंती किमु विषयांतराय गंतुं प्रारेभे रजनिरभिख्यवाद्धिमांशुः ॥ ३८ ॥
आशांताश्रितमसृणेंदुमंडलीकस्ताराणां प्रविरलताविधानचुंचुः ॥
आकूजद्द्विजकुलघोषभूषितो यः स ब्राह्मस्तदनु मुहूर्त आससाद ॥ ३९ ॥
कालेऽस्मिन् कमलभवस्य वल्लभा सा वाग्देवी सरसममुष्य सेवनार्थं ॥
सूतानां नृपसुतबोधनोत्सुकानां जिह्वासु व्यधित जवेन सन्निधानं ॥ ४० ॥
कांतायाः कुचकलशीयुगांतराले सानंदं सुरतपरिश्रमेण सुप्तं ॥
नष्टायां निशि नृपतिं प्रबोधयंती सताली तदनु वचःसुधामसूत ॥ ४१ ॥
राजेंद्रप्रवर जय प्रभातवेलामासन्नद्युमणिमयूखदर्शनीयां ॥
साफल्यं नयतु भवान् सरोरुहश्रीचोराभ्यां चटुलविलोचनांचलाभ्यां ॥४२॥

---

६९ सिताभिः=शर्कराभिः ७० सिताः=शर्कराः शुभ्राश्च. ७१ विषयांतरं=अन्यो देशः. ७२ चुंचुः=निपुणः. ७३ सूतानां=वैतालिकानां. ७४ व्यधित=अकृत. ७५ द्युमणिः=सूर्यः.

निद्राणं कमलकुलं निशि प्रबोधं प्रापय्य स्फुटसुरभिः प्रभातवायुः ॥
प्रासादं प्रविशति ते गवाक्षमार्गैस्त्वन्नेत्रद्वयकमलप्रबोधनोत्कः ॥ ४३ ॥
निःशेषं सरसिरुहं मया निशायां निःश्रीकं कृतमवगम्य निश्चिकीर्षुः ॥
उत्तिष्ठत्ययमिति देववक्त्रपद्मं दृष्ट्वा ते सभय इवास्तमेति चंद्रः ॥ ४४ ॥
अस्ताद्रेर्गतवति गव्हरं गभीरं तारेशद्विरदरिपौ ततो जजृंभे ॥
आलीनैरखिलगुहातलेषु पूर्वं ध्वांतेभैः क इव चरंति नावकाशे ॥ ४५ ॥
पालेयद्युतिकिरणैः पयःप्रवाहैः संपूर्णं भुवनकटाहमाकलय्य ॥
आलेढि द्रुतमभितः प्रणेतरींदौ दूरस्थे तिमिरमिषाद्बिडालैलोकः ॥ ४६ ॥
अंभोधेः सविधमगादयं द्विजेंद्रः सिष्णासुर्विधृतसितांशुकोऽधुना यत् ॥
तस्मात द्रुतमिति विद्रवि द्रुमाग्राद्वक्तीव द्विजकुलमाकुलं द्विजेभ्यः॥ ४७ ॥
सावित्रं रुचिनिकरं पुरा निजांगे निक्षिप्तं प्रतिवितरीतुमागतेन ॥
आरुण्यं क्षणमधुनानलेन नूनं नीयंते निजशिखया दिशां मुखानि ॥४८॥
द्वित्रेषु द्युमणिकरेषु शेखरत्वं प्राप्तेषु प्रथमगिरिः प्रयाति सोऽयं ॥
किंजल्कप्रतिमकपर्दभूषितानां मूर्तानामगदुहितुस्तुलामसूनां ॥ ४९ ॥
पौरस्त्यक्षितिधरमूर्ध्नि सन्निकर्षात् संशातं करकरवालमंशुमाली ॥
उद्यम्य च्छितममुना तमस्तमालं प्रत्यूषच्छविदहनेंधनीकरोति ॥ ५० ॥
नृत्यंत्यामरुणरुचौ तमः पिधानं निर्धूय प्रथमगिरेरधित्यकायां ॥
उद्योतद्युमणिमणिप्रदीपिकायामुद्ग्रीवं कमलमुपैति सम्यकत्वं ॥ ५१ ॥
क्रीडित्वा चिरममलत्विषो दिशोऽमूस्तारालीकपटतदीयपाणिजांकाः ॥
स्वात्मानं सपदि पिधाय शेरते किं प्रत्यूषारुणवसनैरिनात् प्रभीताः ॥५२॥
शीतांशोः शिशिरतरे करप्रवाहे निर्मग्ना निरुपमजाड्यपीड्यमानाः ॥
एतर्हि द्युमणिमणीमयीं हसंतीं सेवंते किमु ककुभः समुज्ज्वलंतीं ॥ ५३ ॥
आलस्यश्वसनविलासवीतनिद्रप्रत्यग्रच्छदनपुटांजलिप्रलीनैः ॥
आरामद्रुमततयस्तुषारतोयैरायाते किरणवतेऽर्घ्यमाहरंति ॥ ५४ ॥
उद्गच्छद्दिनमणिशोणितं पुरस्ताद्वर्षीयः शशधरकांतिपांडु पश्चात् ॥
अन्यत्र प्रचलतमिस्रनीलमेतद् दिकचक्रं घटितमिवाश्मभिर्विचित्रैः ॥ ५५ ॥
दुर्वारस्मरवशतः कृतश्रमाणां पाश्चात्यप्रहरमुखेद्य निद्रितानां ॥
श्रूयंते श्रवणकटूनि कामुकानां बिभ्राणाः स्फुटरटितानि ताम्रचूडाः ॥५६॥

---

७६ सुरभिः=सुगंधयुक्तः ७७ द्विरदरिपुः=सिंहः. ७८ प्रालेयद्युतिः=चंद्रः ७९ बिडालः=मार्जारः. * विद्रवि=चंचलं. ८० द्विजकुल=पक्षिकुलं. ८१ वितरीतुं=दातुं. ८२ प्रथमगिरिः=पूर्वाचलः ८३ अगदुहिता=पार्वती. ८४ अगदुहितुरसूनां=शिवस्य. ८५ अमलत्विषा=चंद्रेण ८६ इनः=सूर्यः. ८७ एतर्हि=इदानीं. ८८ हसंती="शेगडी" इति महाराष्ट्रभाषायां. ८९ ककुभः=दिशः. ९० आलस्यश्वसनः=मंदवायुः. ९१ वर्षीयः=वृद्धः.

सुत्राम्णो[१२] दिशि दिशति स्वपादमर्के तल्लाक्षारसमिलितेव सा नितांतं ॥
लौहित्यं व्रजति विलोक्यतामिदानीं त्वादृक्षा जगति जना न संविशंति[१३] ॥५७॥
लब्ध्वासौ हरिमहिषीहरिःप्रकामं वस्वीशाद्[१४] वसुनिकरं[१५] धृतानुरागा ॥
चुंबंतं मुखमथ तं च रंजयंती वैयात्यं[१६] प्रथयति बंधकीव[१७] योषा ॥ ५८ ॥
अंधत्वं यदजनि नैशिकैस्तमोभिर्लोकानां द्रुतमपकृष्य तत्कराग्रैः ॥
औलूके[१८] नयनपुटे निधाय गाढं गोपायत्ययमधुना जगत्प्रदीपः ॥ ५९ ॥
बालोयं गिरिशिखरेषु चारयन् गाः[१९] त्रैलोक्यं तिमिरभरेण दुष्टमेतत् ॥
नैर्मल्यं नयति रविर्विषप्रवाहैः कालिंदीजलमिव कालियस्य कृष्णः ॥ ६० ॥
कौल्याग्नौ द्विजकुलनादमंत्रवादैरुद्दीप्ते तिमिरतिलाहुतिं विधाय ॥
मूर्छालान् विरहपिशाचिकागृहीतानुद्बोधं गमयति भास्करो रथांगान् ॥६१॥
आयातं जगति जगत्प्रभो प्रभातं कोकानां मनसि मदश्च रागमिश्रः ॥
उन्निद्रा अपि च भवंति पंकजिन्यः सामोदाः प्रियकरसंगमात् स्त्रियश्च ॥६२॥
संकेतान्निजसदनं प्रति प्रयातास्त्रस्यंति प्रतिपदमद्य वारनार्यः ॥
चंद्रांशुप्रवसनजृंभितं तमिस्रं भिंदानेष्वपि किरणेषु तीव्रभानोः ॥ ६३ ॥
दृश्यंते बहिरबलाः प्रियांगसंगव्यालुप्तस्तनतटबाल्हिक[२०]श्रियोऽपि ॥
आलीढा रविकिरणैर्जपानिकाशैः सर्वांगे पुनरपि तैरिवानुलिप्ताः ॥ ६४ ॥
धर्मस्य च्यवनधिया प्रवर्त्यमानः कांतायाः सजलदृशा निवर्त्यमानः ॥
निर्यातुं निजरतिमंदिरादिदानीमारंभस्तडिदिव हंत भाति यूनां ॥ ६५ ॥
कामिन्यः कलितवियुक्तिखेदजानां वामिन्यः सपदि विलोचनोदकानां ॥
मृज्यंते स्फुटमधुना करेण कांतैर्व्यज्यंते तदिह तुलाः सरोजिनीनां ॥६६॥
उद्भिन्नच्छदनकपाटपद्मवल्ली निर्गच्छद्भ्रमरनिनादकैतवेन ॥
संपर्के प्रियसवितुः करेण लब्ध्वा संभ्रांता मणितवतीव[१] पद्मवाटी ॥ ६७ ॥
आलीढं रविरुचिजिव्हया पुरस्तादापीतं मधुकरपोतकेन पश्चात् ॥
मैरेयं सरसिजिनीमुखांबुजस्थं चक्राव्हाः सह गृहिणीभिरापिबंति ॥ ६८ ॥
दिक्चक्रं निशि पिशिताशिभिश्चरद्भिः[२] संमर्दात् क्षतमिति मन्महे महेंद्र ॥
यत्प्रायः क्षतजविलिप्तगात्रमेतत्पश्यामो दिनमुखदीप्तिकैतवेन ॥ ६९ ॥
पूर्वाद्रेस्तटभुवि पूर्वमेव धात्रा खात्वा किं निहितमहर्महीज[३]बीजं ॥
उद्भिद्य क्षितिमधुना तदंकुरोयं निर्गच्छत्यरुणकिशोर[४]पत्रचित्रः ॥ ७० ॥

---

१२ सुत्राम्णः=इंद्रस्य. १३ संविशंति=निद्रां गच्छंति. १४ वस्वीशात्=कुबेरात् सूर्याच्च १५ वसुनिकरं=किरणसमूहं धनसमूहं च. १६ वैयात्यं=धाष्टर्यं (अन्यदा भूषणं पुंसां क्षमा लज्जेव योषितां पराक्रमः परिभवे वैयात्यं सुरतेष्वपि ॥ १ ॥) १७ बंधकी=जारिणी. १८ औलूकः=उलूकसंबंधी. १९ गाः=किरणान् धेनूंश्च. १०० बाल्हिकं=कुंकुमं. १ मणितं=रतिकूजितं. २ पिशिताशिभिः=राक्षसैः ३ महीजः=वृक्षः. ४ किशोरः=बालः.

सिंदूरद्रवरुचिसुंदरेण भानोरिंदूरस्थलशितिमाभिपातुकेन ॥
किं दूरप्रसरवता करेण गुंजासंजातद्युतिरिव नाद्य पश्चिमाद्रिः ॥ ७१ ॥
उद्भ्राम्यत्परमकरो गिरींद्रयोगान्मुक्तानामयनमयं मयूखमाली ॥
लक्ष्मीं तां सृजति कथं न पद्मसंस्थां यस्यै तु स्पृहयति संततं रथांगी॥७२॥
निष्णातैरिह निजकर्मसु द्विजेंद्रैः सुस्नातैः करयुगलेन कल्प्यमानैः ॥
अंभोभिः सह भगवानुदंचति द्यामंभोजस्तबकनिबंधमोक्षबंधुः ॥ ७३ ॥

आरूढाः प्रथमाद्रिशृंगमधिकोत्तुंगं रथांगप्रिया ।
ग्रीवामंगलतंतवः कतिपये भानोरमी भानवः ॥
अंचंतो गगनांचलं चिरवियोगोत्कंठितस्वर्णदी-
सौवर्णांबुजवाटिकानुनयनं कुर्वंति खर्वेतरे ॥ ७४ ॥
प्राक्प्रत्यक्धरणीधरेंद्रशिरसोरुत्संसतां प्राप्तयोः ।
सूर्याचंद्रमसोरतंद्रमहसोरुच्चैरनुच्चैरपि ॥
कोकस्त्रैणसमोदनर्तनकलाकालक्रियामानकृत् ।
तालद्वंद्वमिहोद्वहन्निव विटः कालोयमालोक्यते ॥ ७५ ॥
लौहित्यादुदयत्यपश्चिमदिशस्तर्कोऽयमर्कोदये ।
सानंदं बलभेदनस्य वलभीमध्येषु बद्धासिकाः ॥
हस्तांभोरुहसंभृतैः सरभसं तन्वंति तन्वंगिकाः ।
काश्मीरद्रवमिश्रितांबुभिरिनैस्याघ्यं विहस्येति नः ॥ ७६ ॥
तुल्येपि व्यसने वियोगजनिते तुल्येपि कांतापदे ।
त्यक्त्वान्या हरितः[12] सरोरुहवनीसौरभ्यसौलभ्यदः ॥
एकामेव निरंकुशोदितरुचिः प्राचीं मरीचीपति-
श्चुंबत्येष भृशं तथाप्यघृणितां लोके न रूढा रवेः ॥ ७७ ॥
पद्मामोदं हरिरिव करस्पर्शमात्रेण कुर्वन् ।
मैत्राभावं जगति जनयंस्तद्वदेव प्रकामं ॥
तादृक्षोऽयं पुनरपि लसत्पुष्करेभं विलुंप-
न्नंतर्मोदं जनयति नृणां ज्योतिषां चक्रवर्ती ॥ ७८ ॥
धृत्वा गर्भं दिनकरमयं सर्वलोकोपकारं ।
काष्ठा श्रेष्ठा सकलहरितां वृत्रशत्रोः कलत्रं ॥

---

५ शितिमा=कालिमा. ६ उद्भ्राम्यंतः परमाः करा यस्य। पक्षे परा मकरा यस्मिन्. ७ मुक्तानां=मोक्षं गतानां मौक्तिकानां च। ८ अयनं=अध्वा स्थानं च। ९ लक्ष्मीं=शोभां रमां च। १० रथांगी=चक्रवाकः विष्णुश्च. ११ इन=सूर्यः १२ हरितः=दिशः १३ अघृणिता=निर्दयता किरणरहितता च. १४ पद्मामोदं=लक्ष्मीहर्षं कमलसुगंधश्च. १५ वृत्रः=राक्षसविशेषः अंधकारश्च. १६ काष्ठा=दिशा.

अत्यासन्ने प्रसवसमये रक्तसिक्तांबरांता ।
हंतोदंचाद्विहगविरुतैः क्रंदतीवातिवेलं ॥ ७९ ॥
अभ्यर्ण[17]स्थितिमाप्तवत्युडुपतौ नश्यद्रुचिर्निद्रिता ।
कष्टं कैरविणी तथापि गृहिणीमाहुः सतीमस्य तां ॥
आश्वस्ता नलिनी तुषारकिरणोऽप्याश्वस्त[18] एवात्र नो ।
विश्वे[19]स्तद्गृहिणीगृहित्वविषये विश्वस्त इत्यद्भुतं ॥ ८० ॥
उद्यत्कर्कशकार्कवाकव[20]रवत्रस्यत्कुलाया[21]न्मुख-
ध्वांक्षाराति[22]पतत्रिपत्र[23]जमरुत्संभेदमेदस्विना ॥
स्वावासे[24]ऽप्यधुनातनेन पवनेनोद्भिन्नतां प्रापिते ।
व्यासेधप्रतिषेध[25]तोऽस्ति जगतां धातुर्नु धातुक्षय[26]ः ॥ ८१ ॥
रंभादित्रिदशेंद्रयौवतपरीरंभाद्रिसंभेदन[27]-
क्रीडाविभ्रमविच्युतः कुचतटीकस्तूरिकाकर्दमः ॥
छायाकैतवतस्ततस्तत इह क्षोणितले भासते ।
पूरः कुंकुमपंकजोऽपि च तथा बालातपच्छद्मना ॥ ८२ ॥
संगं दिवा किमु समीक्ष्य सरोजबंधोः संगं दिवैव तनुते बत चक्रवाकः ॥
एकः करोति यदि कर्म विगर्हितं वा लोके भवंति बहवस्तदनुव्रजंतः ॥ ८३ ॥
क्षुद्बाधाविधुरद्विरेफनिवहद्वंद्वांकणे पंकजे ।
सातंका शशलांछने च विमुखी जीर्णे पतत्यर्णवे ॥
मुक्ताशंकमुपैति चेदपि भवानद्यापि निद्रारसं ।
स्वस्थानात् पतितांगनेव विवशा लक्ष्मीः कथं वर्तते ॥ ८४ ॥
प्रातः संमार्जतीनां प्रतिपुरमजिरं मुग्ध मुग्धेक्षणानां ।
हंत स्वांतभ्रमोयं रविरुचिरचितः पश्यतां हासहेतुः ॥
संमृष्टेऽपि प्रदेशे पुनरपि तरसा रक्तसिक्तत्वबुद्ध्या ।
संमार्गं कुर्वते ताः कथमिह रुधिरं जातमित्यद्भुतिन्यः ॥ ८५ ॥
शोभामंगलसाधनं दिनमुखे लोकेन यः कीर्यते ।
संमृष्टेषु पुरांगणेषु सुमनस्तोमो[28] निकामोज्ज्वलः ॥
एतस्मिन् फलपूर[29]बीजनिकरभ्रांत्या नितांतारुणे ।
संप्राप्तेषु शुकेषु पंजरशुका निर्गंतुमद्युंजते ॥ ८६ ॥

---

१७ अभ्यर्ण=समीपं. १८ आश्वस्तः=आशु+अस्तः १९ विश्वः=सर्वः २० कार्कवाकव=कुक्कुटसंबंधी २१ कुलायः=नीडं. २२ ध्वांक्षाराति=उलूकः २३ पत्रं=पक्षः २४ स्वावासे=कमले. २५ व्यासेधप्रतिषेधः=पीडापरिहारः २६ धातुक्षयः=शक्तिक्षयः. २७ अद्रिसंभेदनः=इंद्रः. २८ स्तोमः=समूहः २९ फलपूरं=मातुलिंगं (महाळुंग).

अतिपरुषनिनादैराव्हयंतः स्ववर्ग्यानुषसि विगतनिद्रा वायसाः संचरंति ॥
रविकरकरवालैः खंड्यमानस्य खंडास्तमस इति जनानां बुद्धिमुत्पादयंतः ॥८७॥

पलायत कुलायतः पतगपंक्तिरेकापि का ।
न संप्रति बिसं प्रति प्रसरति क्व हंसोऽपि न ॥
उदंचति सदंचिते सकलकोकलोकोत्सवे ।
हरत्यपि दुरत्ययं तिमिरमत्र हृष्टं जगत् ॥ ८८ ॥

समुद्यातः सद्यस्तदिह भवदीयान्वयगुरो
रुपस्थानं कर्तुं व्रज विजहिहि निद्रामनुचितां ॥
ज्वलन्नेष प्रातः शुभशकुनसंपादनकृते ।
कृतो द्वारप्रांते विलसतितरां दीपनिकरः ॥ ८९ ॥

उदंचत्येतस्मिन् शतमखविरिंचादिविबुधे- ।
रकिंचिन्नयंचंत्या निजमनसि तंद्र्या परिणुते ॥
विमुंच त्वं चैनं कुचकलशमंचान्निमिकुल-
च्छलक्षीरोदन्वत्प्रभवनवमंदारकलिके ॥ ९० ॥

प्रपंचे वैरिंचे जयतु तव सौभाग्यमहिमा ।
कलंकं मायासीदुरुदुरितमापाद्य कमितुः ॥
क्षणादेनं क्षोणीदुहितरहितध्वांतमिहिरं ।
जहीहि प्राक्संध्यानियमविषये सोढविरहा ॥ ९१ ॥

इत्थं सूतप्रसूतां वरगिरमुपकर्ण्यायमर्णोरुहाक्षी ।
वक्षोजद्वंद्वसंदानितमथ शिथिलीकृत्य गात्रं कथंचित् ॥
कर्तुं संध्याम्मवंध्यां निजरतिभवनान्निर्गतः स्वर्गवापी- ।
सारस्य श्रीहरायाः परिसरमसरत्सारवेदी सरय्वाः ॥ ९२ ॥

स्नात्वा पुण्येय वारिण्युरुतरलहरीसौरवे सौरवेस्मिन् ।
नित्यानुष्ठाननिष्ठानियमितहृदयः सादरं मेदुरश्रीः ॥
कृत्वा कर्माण्यशेषाण्यथ शुचितमया कांतया कांतशोभं ।
प्रासादं सप्रसादस्मितमधुरमुखः प्राप भूयोऽपि भूपः ॥ ९३ ॥

इति स वनितामेतां जातां कुले निमिजन्मना-
मधिगतगुणश्रेणीमेणीविलोलविलोचनां ॥
उदितमदनातंकः स्वांके सदापरिलालय- ।

---

१० अर्णोरुहं=कमलं. ११ सारवे=आरवसहिते १२ सारवे=सरयूसंबंधिनि.

अरमत समा नन्हीः मन्हीकृताखिलशात्रवः ॥ ९४ ॥
इति श्रीरामचरिते महाकाव्ये सप्तमः सर्गः ॥ ७ ॥

अथ राजा दशरथो जरसा जीर्णतां गतः ।
इयेष तनये रामे निधातुं जगतीभरं ॥ १ ॥
पुरोहितं समाहूय वसिष्ठं ब्रह्मनिष्ठितं ॥
उवाच वाचमुत्कृष्टां नृपः करकृतांजलिः ॥ २ ॥
चिरेण जगतीभारं करेण धृतवानहं ॥
जरया परयेदानीं चलितात्मा न हि क्षमे ॥ ३ ॥
पश्य मां वश्यमाधातुं जरा नारीव निर्जरा ॥
शनैराहितसान्निध्या सर्वांगेष्वपि चुंबति ॥ ४ ॥
वशीकृते मयि मुने जरया जगतीरसः ॥
क्रमेण क्षीयते भक्त्या हृदीव दुरितं सतां ॥ ५ ॥
चंचलेऽतिवयस्त्वेन भुजे मम कृतस्थितिः ॥
पातोन्मुखो जगद्भारः प्रत्नस्तंभ इवालयः ॥ ६ ॥
तदहं राज्यमाधाय रामे रमयतां वरे ॥
भवादृशानामास्थातुं वृत्तिमिच्छामि सत्तमां ॥ ७ ॥
राज्याभिषेकं रामस्य प्रजाहर्षप्रवर्द्धनं ॥
निर्वर्तयितुमर्हंति भवंतः कृत्यवेदिनः ॥ ८ ॥
इत्युक्तवंतं राजर्षिमृषिर्ब्रह्मांगसंभवः ॥
प्रीत्या प्रत्याह मृदुलस्मितांशुस्नपिताधरः ॥ ९ ॥
मुदं तनोति मे राजन्निदं तव मनीषितं ॥
पूर्वानुसारिणी वृत्तिः सर्वं निर्वृतिकारिणी ॥ १० ॥
एतद्वंशप्रसूतानां भूभुजां भुजशालिनां ॥
आर्षी वर्षीयसां वृत्ती राजन्निक्ष्वाकुवीक्षिता ॥ ११ ॥
जर्जरोपि जगद्भारं भवान् धारयितुं क्षमः ॥
किं पुनस्ते वयस्त्वे तच्छ्रेयो मार्गश्रमोचितं ॥ १२ ॥
किं च बालोयमिति ते सुते माभूदनादरः ॥
विश्वाधिकेऽप्यविश्वासः प्रायः पित्रोः स्वपुत्रके ॥ १३ ॥
धर्तुं क्षमस्त्रिलोकीं च रामो रामगुणान्वितः ॥

---

३३ समाः=संवत्सरान्. ३४ प्रत्नः=पुरातनः. ३५ आलयः=गृहं. ३६ निर्वृतिः=सुखं.
३७ वर्षीयसां=वृद्धानां. ३८ वीक्षिता=दर्शिता.

किं पुनस्तव वीर्येण स्थेयसीं[९] पृथिवीमिमां ॥ १४ ॥
लोके कस्तादृशो यस्तान् सुबाहुप्रमुखान् बहून् ॥
हत्वा निशिचरान् दृप्तान् सप्ततंतुं[१०]मपालयत् ॥ १५ ॥
किं च स्वपादरजसा मुनेर्दारान् शिलामयान् ॥
मोचयामास यः शापात् सोऽयं नूनममानुषः ॥ १६ ॥
किं वर्णयामस्तद्वीर्यं सुरैरपि दुरानमं ॥
नमयामास तच्चापं यो बभंज च लीलया ॥ १७ ॥
सर्वलक्षणसंपन्ना लक्ष्मीरिव मधुद्विषः ॥
स्वयंभवा भुवः कन्या धन्या यस्य सधर्मिणी ॥ १८ ॥
अर्जुनो[११] निर्जिताशेषरावणद्रावणौषधं ॥
हतो येन[१२] जितोऽनेन[१३] मार्गरोधी स भार्गवः[१४] ॥ १९ ॥
तदस्य वीर्यविक्रीतां वधूमिव वसुंधरां ॥
अवेहि राजन्नखिलां येन त्वमसि सुप्रजाः ॥ २० ॥
विलंबनं वृथा सूनोरभिषेकविधौ विभो ॥
प्रतीक्षंते प्रजाः सर्वा यमेव परमोत्सवं ॥ २१ ॥
आज्ञापयामि भवतो ह्याज्ञयादैव भूपते ॥
तत्संभारार्जनं कर्तुं सुमंत्रादीन् सुमंत्रिणः ॥ २२ ॥
इत्युक्त्वा नृपतेराज्ञामाधिगम्य मुनीश्वरः ॥
संप्रीतहृदयः सर्वान् न्ययुंक्त नृपमंत्रिणः ॥ २३ ॥
ते तु प्रहृष्टमनसः श्रुत्वा राजनियोजनं ॥
अभिषेकस्य संभारान् संपादयितुमुद्यताः ॥ २४ ॥
विज्ञायोपक्रमं राज्ञः पौरा जानपदास्तदा ॥
माद्यंति स्म मुदा सर्वे वारिदस्येव बर्हिणः ॥ २५ ॥
ततः संभृतसंभारं जगत्संतोषपोषणं ॥
उद्घुष्यमाणं सर्वत्र श्रुत्वा तदभिषेचनं ॥ २६ ॥
आसन्ने च मुहूर्तस्य दिने दैवेन चोदिता ॥
मंथरा नाम कैकेयीमिदं दासी वचोऽब्रवीत् ॥ २७ ॥
किमिदं न श्रुतं देवि प्रियस्तव महीपतिः ॥
सपत्नीतनये रामे श्रियमाधातुमिच्छति ॥ २८ ॥

---

९ स्थेयसीं=अतिस्थिरां. १० सप्ततंतुः=यज्ञः ११ अर्जुनः=कार्तवीर्यः १२ येन=परशुरामेण. १३ अनेन=रामेण. १४ भार्गवः=परशुरामः

पश्य सुंदरि निःशंकं पक्षपातं क्षमापतेः ॥
किं ते न पुत्रो राज्यार्हः सुताः पितृधने समाः ॥ २९ ॥
रामाधीने क्षमाचक्रे प्रेमापेते च पार्थिवे ॥
हा कष्टं राजपत्नीति नामशेषा भविष्यसि ॥ ३० ॥
समृद्धं पदमासाद्य प्रजाभिरनुसेवितः ॥
सपत्नीनयनानंदं स कौसल्यां सहसे कथं ॥ ३१ ॥
किमिदानीमुदासीना पश्यसि श्रेय आत्मनः ॥
काले स्वार्थमसंपाद्य लोकः शोकाय कल्पते ॥ ३२ ॥
किं सुखं भुवि नारीणां पुत्रस्याभ्युदयात्परं ॥
तव तद् दुर्लभं मन्ये यस्यां न स्नेहितः पतिः ॥ ३३ ॥
मयि प्रेमाधिको राजा मयैव रमतेऽनिशं ॥
इति मिथ्यैव मे मुग्धे मिथः कथयसे मुहुः ॥ ३४ ॥
सौभाग्यं यदि तत्प्राहुः कांतो येन नियंत्रितः ॥
अनन्याकृष्टहृदयः प्राप्नोति प्रेम निस्तुलं ॥ ३५ ॥
तदिदानीमनुष्ठेयं शृणु सुंदरि वच्मि ते ॥
मा शंकया मामीर्ष्यंतीं त्वयि स्नेहोऽत्र कारणं ॥ ३६ ॥
उभयं साधनीयं ते सुभगा यदि सांप्रतं ॥
वने निवासो रामस्य भरतस्याभिषेचनं ॥ ३७ ॥
इत्यादिभेदसंवादैरभेदप्रेमपुत्रयोः ॥
कंपयामास कैकेय्याः कथंचिन्मंथरा मनः ॥ ३८ ॥
मंथरामंत्रमंथानमथ्यमाने मनोंबुधौ ॥
कालकूटमिवामर्षः प्रादुरासीन्मृगीदृशः ॥३९ ॥
निष्ठुरे भूमिपृष्ठे सा शयाना शयनालये ॥
अवेष्टत रुषा विद्धा वातच्छिन्नेव मल्लिका ॥ ४० ॥
अथागतो महीनाथस्तां विलोक्य तथाविधां ॥
किमेतदिति संभ्रांतः सांत्वयामास सामभिः ॥ ४१ ॥
ततः पृष्टा निजेष्टं सा जगाद जगदीश्वरं ॥
आकर्ण्य कर्णवंतो न सहंते यदरुंतुदं ॥ ४२ ॥
पूर्वमुर्वीभृता तेन दत्तं यच्च वरद्वयं ॥
अयाचिष्ट तदप्येषा निराकरणशंकया ॥ ४३ ॥

---

१५ कर्ता—करिष्यतिः.

निशम्य वांछितं तस्यास्तादृशं हरिणीदृशः ॥
प्रत्युवाच शनैरेनां सत्यसंधो महीपतिः ॥ ४४ ॥
इंदुसुंदरमेतत्ते मुखं सुखकरं मम ॥
कथमेवंविधां वाणीं प्रसूते शोककारिणीं ॥ ४५ ॥
आल्हादिनी मनोवृत्तेश्चंद्राद्रूप्या तु चंद्रिका ॥
असांप्रतमिदं मन्ये वदनं ते विषोपमं ॥ ४६ ॥
जाने सुंदरि ते रामे वात्सल्यं भरतादपि ॥
इदानीमीदृशं जातं मनः केन तवानघे ॥ ४७ ॥
क्षणं सहे न रामस्य वियोगं गुणवारिधेः ॥
भवदाननचंद्रस्येवातिस्नेहेन यंत्रितः ॥ ४८ ॥
प्रार्थये भवतीमेतदेकमेव वरानने ॥
अप्रियं सर्वलोकानामस्माकमपि माकृथाः ॥ ४९ ॥
प्रियस्तव ममाप्येष प्रजारंजनतत्परः ॥
दुष्प्रवेशे महारण्ये हा कथं त्यज्यते सुतः ॥ ५० ॥
गते वयसि मे दिष्ट्या लब्धः सूनुर्गुणाधिकः ॥
प्रवासे तस्य नः प्राणाः प्रयास्यंति न संशयः ॥ ५१ ॥
तत्प्रसीद वरारोहे मा मा मज्जय सुंदरि ॥
अपारे शोकरूपेस्मिन्नकूपारे कृपानिधे ॥ ५२ ॥
इत्यादि विविधं राजा जल्पन्नप्यातिविव्हलः ॥
न निवर्तयितुं कांतां शशाक क्रूरनिश्चयात् ॥ ५३ ॥
निराकर्तुमशक्तस्तद्वचः सत्येन यंत्रितः ॥
अशेत व्याकुलो राजा विफलीभूतयाचनः ॥ ५४ ॥
चिंताकल्लोलसंताने स मग्नः शोकसागरे ॥
जाग्रदेव त्रियामां तां कल्पकल्पामजीगमत् ॥ ५५ ॥
प्रभाते राममाहूय कैकेयी क्रूरनिश्चया ॥
आदेशमवदद्राज्ञो मौनानुमितिनिश्चितं ॥ ५६ ॥
शृणु पुत्र महाभाग पिता तव महीपतिः ॥
शास्ति त्वां वनवासाय भरतं राज्यगुप्तये ॥ ५७ ॥
इदानीमेव तद्राज्ञः शासनं कुरु माचिरं ॥
शुभोदर्का भविष्यंति पितुरिच्छानुवर्तिनः ॥ ५८ ॥
उषित्वा कानने तावन्नव पंच च वत्सरान् ॥

---

४४ सत्यसंधः=सत्यप्रतिज्ञः ४७ अकूपारे=सागरे. ४८ गुप्तये=रक्षणाय.

अधिगच्छ पुना राज्यं गच्छ भद्राणि संतु ते ॥ ५९ ॥
इत्युक्तं पितुरादेशं तथा केकयकन्यया ॥
अनुग्रहोऽयमिति सा प्रीत्या जग्राह राघवः ॥ ६० ॥
ततः प्रदक्षिणीकृत्य पितरौ प्रीतिसंयुतः ॥
नमस्कृत्य मुहुर्धीरो जगाम रघुनंदनः ॥ ६१ ॥
व्रजंतमनुवव्राज साश्रुणा चक्षुषैव तं ॥
इच्छन्नपि स सर्वांगैः शोकवेगालसो नृपः ॥ ६२ ॥
विहाय पितरं वृद्धं गच्छसि त्वं कुतः सुत ॥
इत्यादि मुहुरुत्कंठं विललाप महीपतिः ॥ ६३ ॥
रामोपि वनवासाय जिगांसुश्चापबाणवान् ॥
कौसल्यासविधं प्राप्य तस्याः प्रणंस्त पादयोः ॥ ६४ ॥
विज्ञाप्य जनकादेशं सद्यो विधुरमानसां ॥
मुंचतीं बाष्पमत्युष्णं रुदंतीं कुररीमिव ॥ ६५ ॥
विपरीतो विधिर्हा हा किमत्र करवामहे ॥
विलपंतीमिति मुहुर्निर्गासंतीं सह स्वयं ॥ ६६ ॥
अनुनीय कथंचित्तामनुमान्य च मातरं ॥
आलिंगितस्तया गाढमाघ्रातश्च पुनः पुनः ॥ ६७ ॥
कृतस्वस्त्ययनाचारस्तथैव च सुमित्रया ॥
स्नपितः प्रणतो बाष्पैर्निर्गलद्भिर्निरर्गलं ॥ ६८ ॥
निवारितेनापि मुहुर्लक्ष्मणेन च सीतया ॥
अन्वीयमानः काकुत्स्थः प्रस्थातुमुपचक्रमे ॥ ६९ ॥
सुमंत्रानीतमारुह्य रथं स रथिनां वरः ॥
निर्ययौ सह सर्वेषां बाष्पैः साकेतवासिनां ॥ ७० ॥
हाहाकारेण पौराणां योऽभूत्कोलाहलस्तदा ॥
स एव पित्रोर्मूर्छायां हालाहल इवाभवत् ॥ ७१ ॥
निर्मीलितमहाराजा पुरी नीरामचंद्रका ॥
न रेजे सिंहिकापुत्रग्रस्तमित्रमिवांबरं ॥ ७२ ॥
शपंतो मंथरां केचित्केपि केकयनंदिनीं ॥
दैवमेवापरे पौरास्तमन्वयुरिनान्वयं ॥ ७३ ॥
राघवस्तु रथेनैव सीतालक्ष्मणसंयुतः ॥

४९ जिगांसुः=गंतुमिच्छुः. ५० सविधं=समीपं. ५१ प्रणस्त=अनमत. ५२ साकेतं=अयोध्या. ५३ सिंहिकापुत्रः=राहुः ५४ इनान्वयं=सूर्यवंश्यं.

गंगातीरमुपागम्य मुनिवेषमधारत ॥ ७४ ॥
बिभ्रती कृतनिश्वासं कर्कशं वल्कलं वधूः ॥
प्रथमं हृदये भर्तुः सूचीखननमाचरत् ॥ ७५ ॥
अनुव्रजंतीं जनतामतिसंधाय तत्र सः ॥
सुमंत्रं च निवर्त्यागात् सीतासौमित्रिसंगतः ॥ ७६ ॥
गुहमालोक्य दयितं निषादकुलनायकं ॥
नीतया तेन नावा तां ततार सुरनिम्नगां ॥ ७७ ॥
कियद्दूरमनुप्राप्तः प्रीतिभाजा गुहेन सः ॥
शबरीभिर्गलच्चारुकबरीभिर्विलोकितः ॥ ७८ ॥
आलोच्य सुकुमारांगीं वधूमात्मानुगामिनीं ॥
निश्वसन्नितरां मार्गे दुर्गमे शर्करादिभिः ॥ ७९ ॥
चिरं चरणचारेण चरंश्चारुकलेवरः ॥
करुणारसमध्वन्यैरत्यंतमनुभावयन् ॥ ८० ॥
आससाद ससादांगः सीतासोदरसंयुतः ॥
विचित्रकूटं रत्नौघैश्चित्रकूटं महीधरं ॥ ८१ ॥
भरद्वाजमृषिं तत्र दृष्ट्वा तेन सुसत्कृतः ॥
उवास शासनादस्य सुखं सभ्रातृवल्लभः ॥ ८२ ॥
नानाविधाद्भुतालोककौतुकोत्फुल्लचेतसा ॥
रेमे स रामया रामः सादरं सोदरार्चितः ॥ ८३ ॥
ततो राजा गते रामे सुतापायसुतापितः ॥
आसन्नमुनिशापानुभूतिकालममन्यत ॥ ८४ ॥
हा राम राम क्वासीति विलपन् विह्वलेंद्रियः ॥
मिमील नयनं राजा पुनरुन्मेषवर्जितं ॥ ८५ ॥
वर्णितेन सुधर्मायामप्सरोभिरनारतं ॥
यशसा निजपुत्रस्य मुमुदे स सवासवः ॥ ८६ ॥
दिदृक्षयेव देवानां पत्युः सख्युर्दिवं गते ॥
राज्ञि संज्ञाविहीनासीत् क्षणं सुप्तेव सा पुरी ॥ ८७ ॥
हाहाकारविना भूतो न कश्चिदपि तत्पदे ॥
शोकांधकूपे पतितो निर्वाणे नृपदीपके ॥ ८८ ॥
ततो वसिष्ठप्रमुखा मुनयो मंत्रिभिः सह ॥

---

५५ जनता=जनसमूहः. ५६ अतिसंधाय=वंचयित्वा. ५७ निम्नगा=नदी. ५८ शर्करा=वालुका. ५९ ससादांग=सखेदांगः

आनिन्युर्मातुलकुलाद्भरतं पुरतो गतं ॥ ८९ ॥
कारयित्वा च राज्ञस्तं शेषकृत्यान्यशेषतः ॥
शासितुं जगतीचक्रं चोदयामासुरंजसा ॥ ९० ॥
अनिच्छन् सोऽपि राज्याय शत्रुघ्नेन समन्वितः ॥
आनेतुमुत्सुको रामं दीनः काननमन्वगात् ॥ ९१ ॥
मुनिभिर्ब्रह्मपुत्राद्यैः सुमंत्राद्यैश्च मंत्रिभिः ॥
द्विविधैरपि संपूर्णः पौरैर्जानपदैर्जनैः ॥ ९२ ॥
वैधव्यमात्रफलदां सर्वसंतापकारिणीं ॥
मातुश्चेष्टामनुस्मृत्य क्रोधशोकविदीर्णधीः ॥९३ ॥
चतुरंगबलोपेतस्तीर्त्वा सुरनदीं जवात् ॥
चित्रकूटमनुप्राप्य ददर्श भरतोऽग्रजं ॥ ९४ ॥
नमस्कृत्य पदे तस्य लक्ष्मणेनाभिवंदितः ॥
वार्तां व्यजिज्ञपत्पैत्रीं गद्गदस्खलिताक्षरं ॥ ९५ ॥
आकर्ण्य रामः शोकार्तोऽमुंचन्नश्रु सलक्ष्मणः ॥
जलदानादिकं तस्य सश्रद्धमकरोत्पितुः ॥ ९६ ॥
आर्यो बिभर्तु भूभारं शाधि नो राज्यमागतः ॥
सर्वे वयंतु भवतः प्रत्यावर्तनकांक्षिणः ॥ ९७ ॥
अनुमन्ये न तां चेष्टां मातुरातुरिताखिलां ॥
यया रोषः समुत्पन्नो दहत्यंतर्विषं यथा ॥ ९८ ॥
साकेतं साकमेवाहं भवता गंतुमुत्सहे ॥
अन्यथा लक्ष्मणस्येव वृत्तिं कल्पय मे प्रभो ॥ ९९ ॥
इत्युदीर्य मुहुः पादे पतंतं सहजं नृपः ॥
बोधयामास विविधैर्वचनैर्वदतां वरः ॥ १०० ॥
कर्तव्यः पितुरादेशस्त्वया वत्स मयापि च ॥
एतत्कुलव्रतं नः स्यादेष धर्मो हि शाश्वतः ॥ १०१ ॥
न मन्ये दूषणं मातुर्विधेरिच्छैव तादृशी ॥
समखेदामिदानीं तु पश्य तां जननीजनैः ॥ १०२ ॥
तद्गच्छ सत्यमाधातुं पितुर्वाचमवैव प्रजाः ॥
करिष्यामि तव प्रीतिमहं च समयावधौ ॥ १०३ ॥
इत्युक्तः कथमप्येष रामेणानुमतिं गतः ॥
ययाचे पादुके चास्य प्रमाणं राज्यपालने ॥ १०४ ॥

---

९० पुरतः—पूर्वं. ९१ अव=रक्ष.

रामोपि प्रीतये तस्य प्रदायोपानहौ निजे ॥
प्रेम्णा गाढमुपाश्लिष्य विससर्ज सहोदरं ॥ १०५ ॥
अभिवंद्य वसिष्ठादीन् मातॄरपि शुचातुरः ॥
अनुनीय च तान्मंदं न्यवर्तयत राघवः ॥ १०६ ॥
भरतोपि शिरस्येव निधायाग्रजपादुके ॥
सानुजः सानुगो मंदं साश्रुनेत्रो न्यवर्तत ॥ १०७ ॥
न जगाम पुनर्धीमानयोध्यां सत्यसंगरः ॥
नंदिग्रामे वसन् भ्रातुः प्रत्यैक्षत समागमं ॥ १०८ ॥
मुनिवेषधरस्तत्र यथारामस्तथैव सः ॥
शशास पृथिवीं कृत्स्नां प्रमाणीकृत्य पादुके ॥ १०९ ॥
भारतं वीर्यमालंब्य स्थिरे साकेतमंदिरे ॥
ऊषुर्नरेंद्रपत्न्यस्ताः कोसलेंद्रसुतादयः ॥ ११० ॥
रघुपतिरपि तावत्सोदरे सन्निवृत्ते ।
सह सहजवधूभ्यां कानिचिद्वासराणि ॥
पुनरपि च जनानामागतिं शंकमानो-
प्यतिरुचिरतरेस्मिंश्चित्रकूटे न्यवात्सीत् ॥ १११ ॥
इति श्रीरामचरिते महाकाव्येऽष्टमः सर्गः ॥ ८ ॥

चित्रतां तदनु चित्रकूटगां दर्शयन्मधुरदर्शनो नृपः ॥
कांतया मृदुपदांतया चिरं संचचार जितपंचसायकः ॥ १ ॥
सानुषु स्थगितभानुषु द्रुमैरुच्चपल्लवसमुच्चयांचितैः ॥
राघवः स गतलाघवश्चरन्नूचिवानमृतमोच्चिवाक् प्रियां ॥ २ ॥
मैथिलि क्षपितशैथिलि क्षणं पर्वतं कलय सर्वतः शुभं ॥
तुंगभावगतशृंगभासुरं सुंदरांगि जितमंदराचलं ॥ ३ ॥
दूरवाहिझरहारवानसौ भाति भूकुच इवातिभूषितः ॥
छद्मना विमलपद्मरागभूरोचिषामधिकरोचिकुंकुमैः ॥ ४ ॥
अत्र देवैः शतपत्रलोचनाश्चित्रधातुकृतचित्रकांचिताः ॥
वल्लभैरमृतपल्लवैः कृते शेरते हि शयने रतेच्छया ॥ ५ ॥
कंदराशयितसुंदराननामंजुगानरसपानमंदितं ॥
स्तब्धकर्णमिह लब्धकंटकं हारिणं कलय हारिणं गणं ॥ ६ ॥
सिद्धवृंदमिह बद्धविभ्रमं यौवतेन सह नव्यतेजसा ॥

---

६२ उपानहौ=पादुके. ६३ शतपत्रलोचनाः=स्त्रियः ६४ चित्रकः=तिलकः.

क्रीडनान्य[६५]तनुपीडनान्मुहुर्विह्वलं भजति बह्वलंकृतं ॥ ७ ॥
अत्र भानुमणिचित्र[६६]भानुभिः सुग्रहं विपिनमुग्र[६७]हेतिभिः ॥
रक्षति क्वचिदपि क्षतिं विना पुष्पवद्विटपिनिष्पतद्रसः ॥ ८ ॥
नीलवेणि घनजालवेष्टनादंजनाभमिह कंजनाभवत् ॥
कूटमेतदपकूटमक्ष्य[६८]तामश्रमं विबुधविश्रमप्रदं ॥ ९ ॥
सौरभाजनितसौरभांचितैः सौरसै[६९]र्मुदितसारसैरिह ॥
कुर्वते सुमुखि कुर्वते सुखं वापिका न वनवापिका दृशं ॥ १० ॥
मानसं युवति मानसंपदा दूषितं विबुधयोषितामिह ॥
सानुतापमथ सानुमारुतास्तन्वते कुसुमधन्वतेजनाः[७०] ॥ ११ ॥
हेलया हृतदुकूलया रते लोलया[७१] महितशीलया प्रियैः ॥
बालयाऽपि बहुलीलयाऽत्र न ह्रीयते परमधीयते मदः ॥ १२ ॥
अग्रपाणिभिरुदग्रपाटनाद्विप्रयोगिभिरिह प्रयोगितैः[७२] ॥
वारिदाः शिशिरवारिदायिनोप्यापयंति परितापमंततः ॥ १३ ॥
कामिनीवदनयामिनीकरैर्मेखलासु कृतशेखरै[७३]रास्विह ॥
आगतः प्रवहवेग[७४]तः शशी लक्षणे[७५]न यदि लक्ष्यते जनैः ॥ १४ ॥
अत्र जीर्णतरुपत्रजीविनस्तापसाः शमितपापसंचयाः ॥
दुष्टजंतुमपि दृष्टमंतिके नंदयंति करमंदमर्शनैः ॥ १५ ॥
सर्वदा मदनगर्वदा इदं वस्तुसा[७६]रमृतवस्तु सादरं ॥
नंदनं विबुधनंदनं यथा वासयंति च विलासयंति च ॥ १६ ॥
नक्तमोषधिनिषिक्तमेष यद्रोचिरावहति रोचितांबरं ॥
तत्तनोति सुरपत्तनोदरे सत्प्रदीप इव सत्प्रकाशतां ॥ १७ ॥
भीरु पश्य धृतचारु[७७]विद्रुमो वारिराशिरिव भूरिभंग[७८]वान् ॥
संचरत्क[७९]मलसंचयः श्रयत्येष भूमिपरिवेषतां गिरिः ॥ १८ ॥
भिन्नकांतिरग[८०]भिन्नवाश्मभिर्गंडशैलमिव मंडलं विधोः ॥
अंकरोपितकलंकशोभितं कोप्ययं हसति रूप्यनिर्मितः ॥ १९ ॥
स्यंदमानमिह मंदमंभसां बिंदुजालमिदमिंदुकांततः ॥
कामदेवसितचामरश्रियं काममुद्वहति वामलोचने ॥ २० ॥

---

६५ अतनुः=कामः ६६ चित्रभानुः=अग्निः. ६७ हेतिः=ज्वाला. ६८ एक्ष्यतां=प्रेक्ष्यतां. ६९ सारसैः=कमलैः ७० तेजनाः=उद्दीपकाः ७१ लोला=सतृष्णा. ७२ प्रयोगिताः=उत्साहिताः. ७३ शेखराः=शिरोभूषणानि. ७४ प्रवहवेगः=बहिर्गमनवेगः ७५ लक्षणं=कलंकः ७६ वस्तुसारं=अयमुत्कर्षपर्वतः. ७७ धृताचारवो वयो यैस्तादृशा द्रुमा यस्मिन् ७८ भूरिभंगवान्=सुवर्णखंडवान् बहुतरंगवांश्च. ७९ कमलं=मृगः जलं च. ८० अगभिन्नवाश्मा=इंद्रनीलमणिः.

अन्यपुष्टकुलकन्यकाश्रिते वन्यभूमिरुहि विन्यसेक्षणे ॥
धन्यता च लघु[८१] जन्यतां तयोर्मन्यसे न पुनरन्यसेवनं ॥ २१ ॥
मध्यचारिणमशुद्धवार्मुचां[८२] मत्तवारणमधित्यकास्विह ॥
षट्पदा विगतपुष्पलालसा जानते सुमुखि दानसौरभात् ॥ २२ ॥
भूरिकोकपरिवारितश्चलत्पुंडरीकततिरंडजाश्रितः[८३] ॥
अद्रिराश्मगुणमुद्रिता नदीर्नित्यमेष जनयत्यनेकशः ॥ २३ ॥
जानकीह लसमानकीचकात् काननेषु पवमानपूरितात् ॥
मानयस्व मृदुगानमुद्धतं येन यौवतममानमानसं ॥ २४ ॥
अस्य सानुषु निरस्य विग्रहं स्वर्गताः सपदि निर्गताः पुनः
अप्सरोभिरिह लिप्सवो रतिं योगिनो दधति भोगिनो व्रतं ॥ २५ ॥
निर्मलस्फटिकनिर्मितस्थलेष्वस्य मूर्ध्नि मिहिरस्य[८४] वाजिनः ॥
अभ्रमादनिशमभ्रगाः स्वयं प्रव्हया लिहति जिव्हया मुहुः ॥ २६ ॥
सिंधुराज[८५]भवसिंधुरा[८६]वलंदंतघातकिणदंतुराकृतिः ॥
रोचमानबहुलोचनं गिरिर्वासवं नयति हासकर्मतां ॥ २७ ॥
अस्य शृंगमचलस्य संगता कांतमंगजनितांतमंदिता ॥
सापराधमपि वा पराङ्मुखी कोपलंभयति कोपलांछनं ॥ २८ ॥
अग्रभूषु निरवग्रहोदिता भूरुहस्तु करभोरु निस्तुलाः ॥
स्पष्टमेव सुरविष्टपेषु[८७] ये संति तानधरयंति पादपान् ॥ २९ ॥
ऊल्लसत्प्रचुरपल्लवच्छर्दिः[८८]पुंजसंवृतनिकुंजवासिनः ॥
सन्निधावपि लसन्निहांशुभिर्न क्षिणोति पशुपक्षिणो रविः ॥ ३० ॥
सार्यमिदुभणितोयनिम्नगाशीतलं शिखरभूतलं गिरेः ॥
वृष्टिहीनमपि घृष्टि[८९]भीरवेः शुष्टि[९०]मेति न हि पुष्टिमद्वनं ॥ ३१ ॥
वज्रपाणिरिव वज्र[९१]तेजसा वृत्र[९२]माशु निजसत्र[९३]रोधिनं ॥
एष भूभृदधिदोष[९४]मुच्चकैरुद्धिनत्ति सुमरु[९५]द्विराश्रितः ॥ ३२ ॥
कुंजलीनबहुकुंजरीकुलं मंजरीनिकरपिंजरीकृतं ॥
लोकरम्यमवलोकयादराद् गोत्र[९६]मंबुजसगोत्रया[९७] दृशा ॥ ३३ ॥
सूरवाजिकुलदूरजृंभितव्हेषितश्रवणरोधिता मुहुः ॥

---

८१ लघु=क्षिप्रं. ८२ अशुद्धाः=नीलाः. ८३ पुंडरीकः=व्याघ्रः. पुंडरीकं=कमलं. ८४ मिहिरस्य वाजिनः=सूर्यस्याश्वाः. ८५ सिंधुराजः=समुद्रः. ८६ सिंधुरः=गजः. ८७ विष्टपेषु=भुवनेषु. ८८ छर्दिःपुंजः=पत्रसमूहः. ८९ घृष्टिः=किरणः. १० शुष्टिः=शोषः. ११ वज्रं=हीरकः इंद्रायुधं च. १२ वृत्रः=अंधकारः राक्षसविशेषश्च. १३ सत्रं=वनं यज्ञश्च. १४ अधिदोषं=रात्रौ अधिकदोषं च १५ मरुत्=वायुर्देवश्च. १६ गोत्रः=पर्वतः. १७ सगोत्रा=तुल्या.

वासरेषु सविकासनिस्वनाः स्वैरितां जहति [98]सैरिभा इह ॥ ३४ ॥
अंकगावनिरपंकस[99]त्ववान् वक्रवेणि धृत[100]चक्रवारिजः ॥
एष साधयति शेषशायितां लीलया च व[1]नमालयांचितः ॥ ३५ ॥
ग्रस्तपश्चिमपदस्तरस्विना [2]वाहसेन बहुसाहसो द्विपः ॥
अग्रभागचरदुग्रकेसरी स्पष्टमेष बत कष्टमश्नुते ॥ ३६ ॥
मत्तभृंगकुलमत्त[3]काशिनीनृत्तरंगसुमहत्तरद्रुमः ॥
उत्तमांगि मम चित्तकौतुकं दत्त एष गिरिसत्तमो [4]भृशं ॥ ३७ ॥
वल्लिकापिहितप[5]ल्लिकाजुषां [6]झिल्लिकाकुलमतल्लिकारवैः ॥
चित्रमंतरितमत्र सुभ्रुवां नर्मसीमप[7]रिकर्मसीत्कृतं ॥ ३८ ॥
यश्चकोरनिचयश्च लक्षणे नित्यवासकृदथित्यकासु सः ॥
दृष्टमेघमपि [8]दिष्टिमेत्य न क्लांतिमेति शशिकांतिलोपजां ॥ ३९ ॥
या सरोषमुदवासयत् प्रियं दूरनिःस्वनमयूरकैरियं ॥
तर्जिता तमथ वर्जिता रुषा मानिनी सविधमानिनीषति ॥ ४० ॥
सर्वथा कनकपर्वतादयं निर्विशेष इति निर्विवादकं ॥
उर्वशीमुखसुपर्वयोषितः शर्वरीशमुखि [9]निर्विशंत्यमुं ॥ ४१ ॥
रम्यमेनमुपगम्य मे न हृत्प्राज्यभोगमपि राज्यमिच्छति ॥
केकयान्वयपताकया तया केवलं कुशलमेव लंभितं ॥ ४२ ॥
एवमत्र नरदेवनंदने वाचमुद्गमति सा च [10]मुद्वती ॥
तद्गिरौ सततव[11]ल्गिरोहिषे रंतुमैहत चिरं तु मैथिली ॥ ४३ ॥
शांतसंज्वरमुपांतसद्रुमच्छायया तदनु जायया समं ॥
शीतलं बहुशिलातलं गतः सादरं स निषसाद राघवः ॥ ४४ ॥
तत्र निर्गतविचित्रभारतीगुंफया सपरिरंभया चिरं ॥
रामया परिरराम पार्थिवः कामकेलिरसधामचेतसा ॥ ४५ ॥
अंकसीमनि विशंकमीश्वरः संगमय्य पुनरंगमात्मनः ॥
स क्षमादुहितुरक्षमश्रमात् सस्विदश्चिरमासिस्वदत्सुखं ॥ ४६ ॥
निद्रया विहितमुद्रया दृशोः स्पष्टमत्र [12]यंति नष्टसंज्ञतां ॥
काकरूपमथ [13]पाकशासनिः प्राप्य तत्सविधमाप्य तस्थिवान् ॥ ४७ ॥

---

९८ सैरिभः=महिषः ९९ सत्वं=प्राणी-सत्वगुणश्च. १०० चक्रः=चक्रवाकः रथांगं च. १ वनमाला=वनस्य पंक्तिः आपादलंबिनी मालाच २ वाहसः=अजगरः ३ काशिनी=स्त्री. ४ भृशं=अतिशयं. ५ पल्लिका=गृहं. ६ झिल्लिका=" राळ " इति महाराष्ट्रभाषायां (कीटविशेषः) ७ परिकर्म=संस्कारः ८ दिष्टः=कालः ९ निर्विशंति=भुंजते (निवेशो भृतिभोगयोः). १० मुद्वती=हर्षवती. ११ रोहिषः=मृगविशेषः १२ यंति=गच्छति. १३ पाकशासनिः=जयंतः

देह[14]वंतमिव मोहबंधनं चक्षुषः सकलदिक्षु संचरत् ॥
सा विलोक्य तरसा विदेहजा भीषणं शकुनमीषदत्रसत् ॥ ४८ ॥
शक्रजः स खलु वक्रतुंडवद्विग्रहो व्यलिखदुग्रमुत्प्लुतः ॥
तत्पयोधरमनल्पपीनतावाहिनं वृ[15]षे इवाहिपंजरं ॥ ४९ ॥
तेन दारुणतमेन दारिता सा रुरोद मृगचारुलोचना ॥
नैव तत्र पतिदैवता पतिं प्रत्यबोधयत कृत्यबोधिनी ॥ ५० ॥
अश्रु तद्गलितमश्रुतस्वनं सुप्तमात्मभुजगुप्तविष्टपं ॥
सन्निपत्य हृदि तन्निरर्गलं नष्टनिद्रमतनिष्ट भूपतिं ॥ ५१ ॥
ईदृशमिथ मृगीदृशो दशामाकलय्य बत काकनिर्मितां ॥
भूपतिः सपदि कोपतीव्रतामागतः प्रकटरा[16]गिदृक्तटः ॥ ५२ ॥
पार्श्वतः सतृणमाश्वथ स्वयं संप्रगृह्य धृतकंप्रताधरः ॥
मंत्रयन् विशिखमंत्रमादराल्लक्षितं तमनु चिक्षिपे नृपः ॥ ५३ ॥
दृष्ट्वा शरं ज्वलितमाशु समापतंतं भीतः सुतः सुरपतेस्तरसा दधावे ॥
बाणोऽपि तं चपलमेव पलायमानं सौकेतवीसु[17]तमिवानुजगाम पूर्वं ॥ ५४ ॥
ब्रह्मेंद्रशंकरमुखानखिलानमर्त्यान् गत्वाप्यलब्धशरणः पुनरेष काकः ॥
आशिश्रिये प्रणतपालकमेनमेव प्रागंबरीषमिव चक्रभयान्महर्षिः[18] ॥ ५५ ॥
तस्यैकलोचनविलोपनकर्मणैव स्वं सायकं सफलतामनयन्नरेंद्रः ॥
प्रीतश्च तं व्यसृजदंघ्रियुगावनम्रं पादश्रयेण महतां प्रतिघा[19]प्रशांतिः ॥ ५६ ॥
तस्मिन् गते प्रियतमां परिरभ्य गाढमाशिश्वसत् खगदुराक्रमजातपीडां ॥
सोपद्रवोऽयमिति रम्यमपि प्रदेशं देवस्तमुज्झितुमचीकमत द्रुतं च ॥ ५७ ॥
भूयो भूपालमौलिः सह सहजनुषा[20] दक्षिणो दक्षिणस्या—
माशायां प्रस्थितोऽभून्निजहृदयवशस्वांतया कांतया च ॥
मध्ये मध्ये महर्षीन् महितगुणगणानातिथेयानुपास्य ॥
प्राविक्षत् पर्णशालां बहुमुनिसहितां संभृतामोदमत्रेः ॥ ५८ ॥
नत्वा तत्पादपद्मं चिरतरममुना सत्कृतः प्रेमपूर्वं ।
तत्पत्नीप्रीतिदत्ताभरणभरितया जायया जातमोदः ॥
तत्रोषित्वा त्रियामामुषसि पुनरगाद्दुर्गमं दंडकाख्यं ।
कांतारं कांतमूर्तिर्मुनिजननयनैरन्वितो रामचंद्रः ॥ ५९ ॥
प्रविशति ततः सत्वश्रेणीशरण्यमरण्यकं ॥
नरपतिसुते कश्चित् क्रव्या[21]त् कठोरतराकृतिः ॥

---

१४ देहवत्=मूर्तिमत् १५ वृषः=मूषकः १६ रागः=रक्तिमा. १७ सौकेतवीसुतः=ताडका-पुत्रः १८ महर्षिः=दुर्वासाः १९ प्रतिघा=रोषः. २० सहजनुषा=भ्रात्रा. २१ क्रव्यात्=राक्षसः

गिरिरिव रवेर्विंध्यः संध्यापयोधरधूम्ररुक् ॥
त्वरितमदसीयाध्वानं तं निरुध्य वितस्थिवान् ॥ ६० ॥
सोभिद्रुत्य विदेहराजतनयामंकेन धृत्वा हठा-
दुत्पित्सुर्गगनं प्रहृष्टमनसा ताभ्यां निरुद्धः शरैः ॥
त्यक्त्वा तामथ तौ प्रगृह्य तरसा दोर्भ्यां वहन् स्कंधयो
र्गंतुं प्राक्रमत क्षणेन नृवरौ चिच्छेदतुस्तद्भुजौ ॥ ६१ ॥
बाहुच्छेदेन बाहूद्भव[22]तिलककृतेनास्तसारः क्षपाटः[23] ।
क्षोणीपृष्ठे पपात क्षुभितवनतरुः कृत्तपक्षाद्रितुल्यः ॥
तौ चैनं तत्र गर्ते गदितनिजपुरावृत्तमस्यैव वाचा ।
निक्षिप्य च्छादयामासतुरयमपि च स्वर्गतो दिव्यमूर्तिः ॥ ६२ ॥
तदनु जनकपुत्र्या संहितैः[24] सैंहिकेयो[25]दुदितमिव शशांकं वक्त्रबिंबं वहंत्या ॥
उटजमभिजगाम प्रीतिमानेष रामः कलितदुरितभंगं सानुजः शारभंगं[26] ॥ ६३ ॥
कुलपतिरथ दृष्ट्वा राघवं मोदशाली जननफलमयासीत् सोपि तं तापसेंद्रं ॥
जगति खलु जनानां पुण्यपूरैकधाम्नां पृथगिह पुरुषार्थः कोपि नान्योन्ययोगात्
तदनु स मुनिवर्यः सिद्धयोगप्रभावः परमपदमयासीत् स्वेच्छयोत्सृज्य देहं ॥
अपि विषयविरक्तो यः पुराभूदनीदृग्रघुतनयनिरीक्षामात्रकांक्षानिरुद्धः ॥ ६५ ॥
अतिशयबहुमानाश्चर्यवैवश्यधुर्यं हृदयमथ दधानस्तद्दिशो[27] निर्जिहानः[28] ॥
निशिचरकृतपीडां बोधितस्तापसेंद्रैरवनिपतिरमीषां तद्वधं प्रत्यजानीत् ॥ ६६ ॥
अगमदथ महर्षेराश्रमं पीतसिंधोरनु स वनमृषीणां पूरितं वेदघोषैः ॥
अजिरचरकुरंगीबालकोत्पातलीलाविहसितवटुलोकं विश्वरम्यं नरेंद्रः ॥ ६७ ॥
पदकमलमनंसीत्तापसेंद्रस्य तस्य क्षितितलगमितेन स्वेन मूर्ध्ना महीशः ॥
उदयति दिवि गच्छत्यच्छतामंबु यस्मिन् प्रकृतिमगमदद्रिर्यन्नियोगेन विंध्यः ॥ ६८ ॥
शिरसि च करपद्मं हस्तयोः शस्त्रजालं रिपुजनविजयाय प्रादितास्मै मुनींद्रः ॥
पतिरपि मनुजानां पाकशासनीयान् शरशरधिशरासानाप्य देदीप्यते स्म ॥ ६९ ॥
गोदावर्याः सभार्यस्तदनु तटभुवि प्राप्य तस्यैव वाचा ॥
रम्यायां पंचवट्यां रचितनिलयनः सोदरेणादरेण ।
रेमे तत्रावनींद्रश्चिरममितसुखं विस्मरन्नप्ययोध्यां ॥
पुष्पान्निष्पाववल्लीदलनसुरभिलैर्मारुतैः सेव्यमानः ॥ ७० ॥
कुंजेषु गुंजदलिनीकुलमंजुलेषु ज्योत्स्नावितानसरसेष्वपि सैकतेषु ॥

---

२२ बाहूद्भवतिलकः=रामः २३ क्षपाटः=राक्षसः २४ संहितः=सहितः २५ सैंहिकेयः=राहुः २६ शारभंगः=शरभंगऋषेरयं शारभंगः २७ तद्दिशः=तस्याः दिशायाः २८ निर्जिहानः=निर्गच्छन्.

उन्निद्रपंकजवनेषु च पल्वलेषु स्वैरं नृपाश्चिरमरंस्त समं महिष्या ॥ ७१ ॥
वने तस्मिन्नेवं खलु विहरतस्तस्य नृपते-
र्ऋषींद्राणामंतः प्रमदमनिशं कंदलयतः ॥
अविज्ञातप्रायाः प्रययुरधिकद्वादशसमा
मनोवृत्तिः कालं ह्रसयति परं द्राघयति च ॥ ७२ ॥
इति श्रीरामचरिते महाकाव्ये नवमः सर्गः ॥ ९ ॥

अथैकदा तत्र वने यदृच्छया समागता शूर्पणखेति विश्रुता ॥
निशाचरी निस्तुलरूपसंपदं ददर्श रामं दयितासमन्वितं ॥ १ ॥
विलोकयंती वपुरस्य सुंदरं विकस्वरांभोरुहकोमलाननं ॥
कुतूहलावेशविलोलमानसा विचिंतयामास चिरं तदाशिरी ॥ २ ॥
क एष धन्यः कमनीयतानिधिर्वनं प्रविष्टो वनितासमन्वितः ॥
अदृष्टपूर्वं खलु रूपमीदृशं दृशोः सुधां सिंचति मामकीनयोः ॥ ३ ॥
न सृष्टिरेषा द्रुहिणस्य निश्चितं न तादृशी तस्य विधाननैपुणी ॥
विरिंचिसर्गेषु विशिष्टमंगजं वदंति सर्वे स च दृष्ट एव मे ॥ ४ ॥
अथेश्वरः स्रष्टुमदः कलेवरं कदाचिदासीत्कमलासनो यदि ॥
अतर्कितोपानतमेव तद्भवेन्न तावता तं बहु मन्महे वयं ॥ ५ ॥
निपीय पीयूषरसं नृभिर्यथा विरज्यते स्वादुषु चान्यवस्तुषु ॥
तथैव कामादिकलेवरस्मृतौ ममाधुना दृष्टिरुपैति निस्पृहां ॥ ६ ॥
अनुत्तमश्चित्तज एव सुंदरेष्विति श्रुतिः संप्रति नैव सांप्रतं ॥
समासभेदादथ वा प्रवर्त्ततामयं हि जागर्तितरां तदुत्तमः ॥ ७ ॥
वपुः किमेतस्य वपुःकिमाननं त्वदाननं लोचनमस्य लोचनं ॥
इति क्रमादंगविचारणाविधावुदाहृतिः सर्वममुष्य केवलं ॥ ८ ॥
अदःप्रतीकेषु वसंति ये गुणाः पृथग्यथावत् कथयामि तान्कथं ॥
इति ह्रिया दुर्मुखमप्यहो मुहुः प्रवर्तयंते हृदयं त एव मे ॥ ९ ॥
तमांसि मूर्तानि तमालमंजरीरजांसि वास्तोष्पतिरत्नजानि च ॥
विलोकयंत्याः कचभारमस्य मे यथार्थबुद्धिं प्रतिरोद्धुमीशते ॥ १० ॥
अगाधशृंगाररसप्रवाहिनीमजस्रविभ्रांतसुवृत्ततारकां ॥
विचित्रमेतद्दृशमेव दीर्घिकां विगाह्य चेतो मम मज्जति स्फुटं ॥ ११ ॥
गुणीकृता येन शिलीमुखावलिः सरोजधन्वा स हि सांप्रतं पुनः ॥

---

२९ आशरी=राक्षसी ३० अंगजः=मदनः ३१ अदःप्रतीकेषु=अमुष्यांगेषु. ३२ वास्तोष्पतिरत्नजानि=इंद्रनीलजातानि. ३३ तारका=नौका-नेत्रकनीनिका च.

धनुर्गुणीकृत्य गुणं च धन्वयन्नमुष्य नेत्रभ्रुमिषेण जृंभते ॥ १२ ॥
अमुष्य किं दर्शनमात्रसंक्रमीरदच्छदे राजति रक्तिमा भृशं ॥
यदेनमालोक्य मदीयमानसं सरागभावं सहसैव गच्छति ॥ १३ ॥
प्रवाललक्ष्मीमधरेण बिभ्रता रदावलिश्छादितमूर्तिरस्य या ॥
अवैमि तामाननगुच्छसंभृताममंदकुंदोद्भवकुड्मलावलिं ॥ १४ ॥
प्रवर्तते चुंबितुमस्य या वधूः कपोलयोर्निर्मलदर्पणश्रियोः ॥
अवज्ञया स्त्रीमुखचुंबने मुहुर्निवर्तयेताननमंजसैव सा ॥ १५ ॥
मृदुस्मयश्रीमयभस्मभाषितं मुखं चलद्भ्रूयुगनागभूषितं ॥
कथं न यच्छत्यमृतं[34] स्वसेविनां कथं न गच्छत्यनिशं च सोमतां[35] ॥ १६ ॥
अमुष्य माभूदतुलत्वगर्वितं मुखस्य यद्भाति शशांक ईदृशः ॥
इदं यदि स्यादधरश्रियांचितं तदा शशांकोप्यधरश्रियांचितः ॥ १७ ॥
इयं विशाला ललितास्य कंधरा विलासिनीबाहुलतार्पणोचिता ॥
विना विभूषाभिरनूनशोभया विनोदयत्येव मनो ममाधिकं ॥ १८ ॥
निधाय सारस्य यथार्थसंचयं हृदालये तत्परिगुप्तये पुनः ॥
कपाटमिंद्रोपलनिर्मितं महच्चकार वक्षस्थलकैतवाद्विधिः ॥ १९ ॥
अमुष्य या वक्षसि लब्धसंगमा कुचद्वयी सैव कुचद्वयी मता ॥
अनीदृशी साभर एव योषितामधन्यभावः सकलेषु दुःसहः ॥ २० ॥
अमुष्य बाहू अतिदीर्घपीवरौ लसद्दशार्धांगुलिहस्तशेखरौ ॥
अधोमुखौ पंचमुखाविवोरगौ विराजतो विश्ववधूमनोहरौ ॥ २१ ॥
उभौ फणींद्रौ मुखचंद्रमंडलं ग्रहीतुकामावभितः समुद्गतौ ॥
सुपर्णतुंडोपमनासिकाभिया निवर्तितौ किं भुजतामवापतुः ॥ २२ ॥
अगण्य लावण्यमयी विनिर्गता मुखेंदुबिंबादपरा कलिंदजा[36]
अधःस्रवंती क्रमशः कृशा नु सा विलोक्यते रोमलतापदेशतः ॥ २३ ॥
विभाति बोधिद्रुम[37]पत्रमित्रतां वहन्नमुष्योदर एष सुंदरः ॥
ककुद्मती[38] चास्य कुरंगराजवद्विशालरूपा सुतरां विराजते ॥ २४ ॥
कटिप्रदेशस्थितमस्य वल्कलं न वल्कलत्वादवहेलनास्पदं ॥
स्वभावतश्चारुषु वस्तुषु स्थितं निकृष्टमप्युज्ज्वलभावमश्नुते ॥ २५ ॥
अहो अमुष्योरुयुगं मनोहरं समाश्रयंती पुरुषायितेषु यत् ॥
सुधाभिषेकादिव निर्वृतिं परामुपैति योषिद् बहुपुण्यपूरणी ॥ २६ ॥
अमोचि मोचौ[39]रुचिरंजसामुना[40] न्यवारि वा वारणचारुहस्तता ॥

३४ अमृतं=पीयूषं मोक्षश्च. ३५ सोमता=चंद्रत्वं शिवत्वं च ३६ कलिंदजा=यमुना.
३७ बोधिद्रुमः=पिप्पलवृक्षः ३८ ककुद्मती=कटिः ३९ मोचा=कदली. ४० अमुना=उरुणा.

अकारि भूयः करभस्य गर्हणं व्यतारि मोहश्च वधूजने मुहुः ॥
अजस्रमूर्वोरनयोः सुवृत्तता[४१] चकास्ति सर्वत्र विलोमतापि[४२] च ॥
विरुद्धमेतत्कथमत्र संगतं मनो ममैवं वितनोति विस्मयं ॥ २८ ॥
सुराधिपग्रावसमुद्गवल्गुनी[४३] न फल्गुनी कांतिभिरस्य जानुनी ॥
श्रियाकृतानंगनिषंगशंकिके न जंघिके किं सकलातिलंघिके ॥ २९ ॥
इदं पदं तामरसस्य गर्हणं वधूजने कामरसस्य वर्षणं ॥
स्वभावसिद्धारुणभावभासुरं विभाति बद्धाखिललोकमानसं ॥ ३० ॥
चिराय कृत्वा समरं सरोरुहैरमुष्य पादौ विजयित्वमापतुः ॥
नखेंदुखंडावलिकैतवस्फुरज्जयोत्थकीर्तिव्रजभूषिताविमौ ॥ ३१ ॥
कचादुपारभ्य पदांतमीदृशं न दोषलेशस्पृगदः[४४] कलेवरं ॥
गुणैश्च तैस्तैः परिपूर्णमुज्ज्वलं विभाति विश्वातिशयं विशेषतः ॥ ३२ ॥
विलोकयंतीममुमत्र कानने यदृच्छया कल्पितसन्निधिं नरं ॥
मनोभवस्त्यक्तदयं दुनोति मां बलादविज्ञातकुलादिकामपि ॥ ३३ ॥
विजेतुमेनां सुमनोभिराशुगैरशक्नुवन्मां सुमनोनिवारिणीं ॥
अहो जिगीषत्यमुनाधुनात्मभूरिहेति[४५] मन्ये सुमनः समावृते ॥ ३४ ॥
इयं वधूरस्य समीपवर्तिनी कृतातिपुण्या कमनीषु मन्महे ॥
यदस्य रागास्पदतामुपेयुषी सुदुर्लभा मृच्छति जन्मनः फलं ॥ ३५ ॥
अमुष्य वक्षोभुवि मीलितेक्षणा चिरं शयाना पुरुषायितेष्वसौ ॥
निरंकुशानंदमुपैति मूर्च्छनामहो विधातुर्मयि दारुणं मनः ॥ ३६ ॥
ममैष कार्यः पतिरेव सर्वथा भवत्वमुष्याश्च पतिर्ममाग्रजः ॥
स्थिता यदस्मास्वधि विष्टपत्रयी यतो नृणां रत्नविशेषभाजिता ॥ ३७ ॥
पतिः पुरा मे परलोकमेयिवानयं च दिष्टादिह दृष्टिगोचरः ॥
मनोनुकूलं दयितं विचिन्वती भवामि को वा पुनरत्र संशयः ॥ ३८ ॥
नरेषु नागेषु सुरेषु वा भवत्वसौ प्रसूतः प्रमदाजनोत्सवः ॥
प्रसह्य संपादितकामचारिणां न रक्षसां जातिविचारणाविधिः ॥ ३९ ॥
असौ मनुष्यो यदि मामकीमिमां निरीक्ष्य मूर्तिं नृषु भीतिकारिणीं ॥
भयातिरेकादपि पंचतां व्रजेदहो ममैवं विफलो मनोरथः ॥ ४० ॥
तदस्य सामीप्यमनेन वर्ष्मणा[४६] सहोपगम्यं न हि कामितासये ॥
हठोऽपि कार्यः पुनरत्र सांत्वनैरसाधनीये सति कार्यवस्तुनि ॥ ४१ ॥

---

४१ सुवृत्तता=वर्तुलत्वं शोभनवर्तनं च. ४२ विलोमता=रोमरहितत्वं विपरीतजन्मत्वं च. ४३ सुराधिपग्रावसमुद्गः=इंद्रनीलपुटः ४४ अदःकलेवरं=अमुष्य शरीरं. ४५ आत्मभूः=मदनः ४६ वर्ष्म=देहः

तनुं तनूकृत्य मनुष्यमानिनीसमानमेतस्य समेत्य सन्निधिं ॥
वचोभिरादृत्य मुहुर्मनोहरैर्वशे तदीयं हृदयं च तत्वतः ॥ ४२ ॥
अथैवमंतःकृतनिश्चया सती निजं महावर्ष्म विहाय *वर्ष्म सा ॥
मनुष्यनारीसदृशं कलेवरं समाददाना ललिताकृतिर्बभौ ॥ ४३ ॥
मुखेन पूर्णामृतदीधितिद्युतिः कुचेन सौवर्णघटोपमच्छविः ॥
विशालरूपा जघनेन चारुणा विडंबयंती करिहस्तमूरुणा ॥ ४४ ॥
पदद्वयेन स्फुटपंकजश्रियं तडित्प्रभां चांगगुणेन बिभ्रती ॥
विलासवीक्षासमकालकंदलत्स्मितप्रकाशस्नपितास्यमंजरी ॥ ४५ ॥
मुहुर्मुहुर्हीरसमग्रजृंभिता शनैःशनैरर्पितपादपंकजा ॥
प्रियासमेतस्य विशामधीशितुः समीपमेषा वनिता समासदत् ॥ ४६ ॥
विलोक्य तामेष महीपतिर्वने सुदुर्गमे त्वत्र समागतां वधूं ॥
सविस्मयव्रीडापरकृष्टमानसः स्मयन्नथैनामवदन्महामतिः ॥ ४७ ॥
जगत्त्रयीयौवतमौलिमालिके विलासिनि त्वं कतमासि बालिके ॥
मनस्त्वदालोकनतो ममाचिरादभूतपूर्वां मुदमुद्वहत्यहो ॥ ४८ ॥
त्वमिंदिरा किं किमु नंदिनी गिरेः किमुर्वशी सर्वसुरांगनामणिः ॥
इहागतिस्ते बहुकंटके वने कुतो मम ब्रूहि कुतूहलात्मनः ॥ ४९ ॥
निशम्य वाणीममृतस्य वर्षिणीं नृपस्य वक्त्रांबुजसौरभीमिव ॥
अवारणीयस्फुटकामवैकृता जगाद लुप्ताक्षरमंतरांतरा ॥ ५० ॥
अहं महाभाग निशाचरान्वये प्रसूतिभाग्विश्रवसस्तपोनिधेः ॥
अवेहि मे भ्रातरमग्रजं जगत्त्रयप्रतीतोरुबलं दशाननं ॥ ५१ ॥
दृशोः किरंतीममृतस्य कंदलान् विलोकयंती तव रूपसंपदं ॥
अनाविषि त्वत्संविधं मनोभुवा प्रसह्य कौतूहलसाह्यशालिना ॥ ५२ ॥
भवानविज्ञातकुलादिको मया यदेतदेव प्रथमं दुनोति मां ॥
इहोदिता चेत् करुणा तवाधुना पुनश्च मे तृप्यतु नाभसेंद्रियं [४९] ॥ ५३ ॥
इतीरयित्वा विरतां निशाचरीमबूबुधत्तां नृपतिर्निजां कथां ॥
कुलं च नामापि च सर्वमात्मनो वने निवासस्य च कारणं तथा ॥ ५४ ॥
अवोचदेनं वनिता प्रसन्नधीरहो विधिस्ते प्रतिकूलतां जहौ ॥
यदत्र नौ संगतिरीदृशश्च मे मनोविकारो भवति स्म सांप्रतं ॥ ५५ ॥
परेतभावं गतवान् पुरैव मे पतिर्नियत्या प्रतिकूलचारया ॥
तदादिखिन्ना विचरामि सर्वतः पतिंवरा भ्रातुरनुज्ञया समं ॥ ५६ ॥

---

* वर्ष्म=देहः ४७ महावर्ष्म=महाप्रमाणं ४८ कंदलान्=अंकुरान् ४९ नाभसेंद्रियं=श्रोत्रेंद्रियं.

गवेषमाणा त्रिषु विष्टपेष्वपि स्वयं परिभ्राम्य पतिं मनःप्रियं ॥
अलब्धविश्रांतिरिहाधुना पुनर्भवंतमासाद्य भजामि विश्रमं ॥ ५७ ॥
भवंति भूमौ प्रतिदेशमापगाः सरांसि कूपाश्च सदंबुपूरिताः ॥
तथापि कालांबुदमेव केवलं प्रपद्य हि प्रीतिमुपैति चातकी ॥ ५८ ॥
यथा गिरीशो गिरिराजकन्यया यथा पुलोम्नः सुतया पुरंदरः ॥
यथा च रत्या मदनस्तथा भवान् पतिर्भवन्मे रमतां मया समं ॥ ५९ ॥
वृथा किमर्थं विपिने मुनेर्व्रतं प्रपद्यमानो भृशमद्य खिद्यसे ॥
सहायमस्मानवलंब्य संगरे विजित्य शत्रूनुपभुंक्ष्व मेदिनीं ॥ ६० ॥
सहोदरो मे जगदेकनायकः स ते सहायत्वमुपैति सर्वतः ॥
वदंति लोकोत्तरलोकबंधुतां नृणां हि सद्यःफलदां मनीषिणः ॥ ६१ ॥
न केवलं शर्म तवैहिकं मम प्रतिग्रहे स्यादपि पारलौकिकं ॥
प्रपन्नदीनावनजातमुच्चकैः प्रचक्षते पुण्यममुत्र शर्मदं ॥ ६२ ॥
अदर्शयन्मह्यमिहैक आत्मभूर्[50] भवंतमीदृग्रमणीयविग्रहं ॥
परस्तु निर्धूतदयं दुनोति मां मधुच्छलक्ष्वेड[51]सखैः शिलीमुखैः ॥ ६३ ॥
गिरः किरंत्यामिति यातुयोषिति क्षमातनूजा क्षमया विवर्जिता ॥
निरीक्ष्य भर्तुर्निभृतस्मयं मुखं जहास दंतांशुविभूषिताधरा ॥ ६४ ॥
स्मितं तदस्या दुहितुर्महीभृतो निशाचरीचेतसि दृष्टिमार्गतः ॥
चकार गत्वा धमनं मुहुर्मुहुः प्रकृष्टकोपानलकील[52]बोधने ॥ ६५ ॥
ज्वलंतमंतः क्रुधमेव पावकं नृपस्य वक्त्रेंदुविलोकजृंभितैः ॥
नियम्यमानं प्रियतारसोदयैः स वाचमूचे दधतीं निशाचरीं ॥ ६६ ॥
अयि त्रिलोकीवनिताजनोत्तमे त्वयोदितं यत्स्पृहणीयमेव तत् ॥
उपेक्षते कः स्वयमेव संगतं जगत्त्रये बांधवरत्नमीदृशं ॥ ६७ ॥
अहं पुनः सुंदरि शासनाद्गुरोर्व्रतं चरामि स्फुटमत्र कानने ॥
सुखानुभूतेः खलु काल एष नो व्रतं हि सर्वेंद्रियतापनं विदुः ॥ ६८ ॥
सधर्मिणीयं मम नित्यसंगता वनेऽपि शुश्रूषितुमागता सती ॥
कथं नु वा कार्यमिदं तितिक्षते स्त्रियः सपत्नी खलु कर्णिसायकैः[53] ॥ ६९ ॥
अशक्यमस्माभिरतस्त्वदीप्सितं विधातुमेतद्विधुकोमलानने ॥
निरीक्षितव्या नृभिरात्मनो दशा यथेष्टवृत्तिर्न हि शस्यते जनैः ॥ ७० ॥
इति ब्रुवाणं रजनीचरांगना जगाद भूयोऽपि नृपं निजेप्सितं ॥
अहं भवंतं शरणं गता भवानिमामिवैनां वितनोतु मामिति ॥ ७१ ॥

---

५० आत्मभूः=ब्रह्मा मदनश्च ५१ क्ष्वेडं=विषं. ५२ कीलः=ज्वाला. ५३ कर्णिसायकः=बाणविशेषः.

उवाच तामेव विचिंत्य भूपतिः पुनश्च निर्बंधवतीं निशाचरीं ॥
शृणु त्वमंभोरुहचारुलोचने वदाम्युपायं तव कामितातये ॥ ७२ ॥
ममानुरूपः सहजोस्ति कश्चन श्रिया कदर्थीकृतमत्स्यकेतनः ॥
इतो विदूरे विपिने स वर्तते ममैव नित्यं वरिवैस्यपोत्सुकः ॥ ७३ ॥
उपेहि तं लोकहितं समीहितं स ते महासुंदरि संविधास्यति ॥
प्रियावियोगव्यथितोधुना ह्ययं बुभुक्षितो नाश्नाति लब्धमोदनं ॥ ७४ ॥
यथा मयेयं रमते यथासुखं तथामुना त्वं च रमस्व संततं ॥
तया च सापत्न्यमसह्यवेदनं प्रपत्स्यसे सुंदरि नान्यथा समं ॥ ७५ ॥
शरीरभेदः परमावयोस्तथाप्यहो जनः पश्यति नैव तद्विदां ॥
कथं मयि स्यान्न च तत्र ते रतिः समप्रतीतिः समरागकारिणी ॥ ७६ ॥
इति क्षितीशे वचनस्रजं सृजत्यरोचतास्यै स च मागधीसुतः॥
ययौ च तस्यांतिकमंतरुत्सका मनीषितात्रिर्वचसैव वाग्मिनां ॥ ७७ ॥
उपेत्य सा लक्ष्मणमेक्ष्य भामिनी समानरूपादिकमग्रजेन तं ॥
नितांतहृष्टा निजमिष्टमंगजप्रचोदिता प्रार्थयते स्म पार्थिवं ॥ ७८ ॥
अहो महाकष्टमिदं ममाधुना गतस्य शुश्रूषितुमग्रजं वने ॥
इति स्वयं तेन निरासि मानिनी पुनश्च रामांतिकमेव सागमत् ॥ ७९ ॥
न मां प्रगृण्हाति शठस्तवानुजस्त्वमेव भर्ता भव मे गुणांबुधे ॥
इति ब्रुवाणां नृपतिः पुनश्च तामुवाच मंदस्मितसुंदराननः ॥ ८० ॥
धिगस्य तां बुद्धिमसारवेदिनीमुपेक्षते यो भवतीमुपागतां ॥
अहो नृणां दुर्ग्रहमेव मानसं न चानुमेयं गुणतोपि नाकृतेः ॥ ८१ ॥
इदं पुनः श्रावय साधु मद्वचस्तवाग्रजः शास्ति भवंतमीदृशं ॥
न कामुकीमर्हसि हातुमंगनामनन्यनाथां शरणागतामिति ॥ ८२ ॥
निवेदितायामिति मद्गिरि त्वया स नूनमिष्टं तव पूरयिष्यति ॥
अवश्यकर्तव्यमुदीरितं गुरोः प्रयाहि तत् त्वरमस्तु चिंतितं ॥ ८३ ॥
इतीरिता सा पुनरेत्य लक्ष्मणं बभाण वाणीमुदितां महीभृता ॥
निशम्य सोप्याह नृपस्य चित्तवित् किमप्यधिक्षिप्य कुलं पलाशिनां ॥८४॥
श्रुतेरतिक्रम्य नियोगमुत्तमं निशाचरीजातिरियं प्रवर्तते ॥
सदैव रूक्षाचरणैकचेतसो न शुद्धिरस्या मनसोपि विद्यते ॥ ८५ ॥
विवाहयोग्या न हि जातिरीदृशी सदा सदाचारवतां शरीरिणां ॥
महानन्नैर्मानुषराक्षसीकृतं विशिष्य दांपत्यमहो विगर्हितं ॥ ८६ ॥

---

७३ वरिवस्या=शुश्रूषा. ७५ मागधीसुतः=सुमित्रासुतः लक्ष्मणः ७६ एक्ष्य=दृष्ट्वा.
७७ पलाशिनां=राक्षसानां.

त्वमंगने तत्र च नष्टभर्तृका पुमांसमन्यं प्रतिपत्तुमिच्छसि ॥
अहो चरित्रं तव धिग्धिगीदृशं विदन्निदं त्वां कतमो ग्रहीष्यति ॥ ८७ ॥
यदग्रजः शास्ति न धर्मसंहितं तदग्रहीतव्यमसंशयं मम ॥
अये दुराचारिणि न ग्रहोचिता किं मम प्रत्युत निग्रहोचिता ॥ ८८ ॥
इतीदमाकर्ण्य वचस्तदीरितं सुदुःश्रवं विश्रवसस्तनूजया ॥
स सत्वरोदित्वरकोपपावकस्फुलिंगशंकाकरवर्णमीरितः* ॥ ८९ ॥
किमात्थ रे बालिश कालचोदितस्त्वमस्मदग्रे वदसीदृशं वचः ॥
समस्तमर्त्यामरमृत्युकारिणं न रावणं वेत्सि किमग्रजं मम ॥ ९० ॥
दशामशेषामनरण्यभूपतेर्न किं विजानासि कुलोद्भवस्य ते ॥
अनात्मवेदित्वमहो दुरात्मनस्तवेदमाचित्ससि नो यदप्रियं ॥ ९१ ॥
मदीहितन्यक्करणस्यकर्मणः फलं पुनर्नैव विलंब्य भोक्ष्यसे ।
इतीरयंती रजनीचरांगना क्रुधा ज्वलंती निजरूपमाददे ॥ ९२ ॥
मूर्तिं मूर्तिमतीमिव क्रुधमसावादाय नैसर्गिकीं ।
मर्त्यामर्त्यमनोविकारजननीमुत्तुंगशैलोपमां ॥
तस्थौ तस्य कुमारकस्य पुरतो व्यादाय च स्वं मुखं ।
वज्राकारनितांतघोरविलसंहतावक्रदंतुरं ॥ ९३ ॥
तामालोक्य क्षितिपतिसुतस्तादृशीमग्रदेशे ।
कालांभोदप्रतिमवपुषं कालरात्रीमिवोच्चैः ॥
पूर्वन्यस्ताच्चरणयुगलान्नैव किंचिच्चकंपे ।
भीतिं दत्ते किमिव भुवने तादृशां धैर्यभाजां ॥ ९४ ॥

इति श्रीरामचरिते महाकाव्ये दशमः सर्गः ॥ १० ॥

अथ सा तरसा नरदेवसुतं परिगृह्य करेण करालमुखी ॥
कृतघोरतरस्वनिता वनिता दिवमाशु जगाम निकामरुषा ॥ १ ॥
अनया चपलं प्रपलायितया धृतलक्ष्मणया पैलभक्षणया ॥
मरुदीरितनूतनकालिकया सतडिद्गुणयेव रराज नभः ॥ २ ॥
अवहेलित एव मनीषिजनैर्वनितावध इत्युचितप्रमतिः ॥
असिना निचकर्त निरस्तदयं स्वयमुच्छ्रितत्तच्छ्रुतिनासमयं ॥ ३ ॥
निशितासिहता पिशिताशिहता भृशवेदनया विससर्ज नृपं ॥
मुहुरुच्चतरं रुदती च ततो गगनाद्गिरिशृंगमिव न्यपतत् ॥ ४ ॥

---

५८ स्वर्क=कुत्सिता त्वं. ५१ पलं=मांसं. ६० निशितासिहता=तीक्ष्णखड्गताडिता. * ई-रितः=उक्तः.

परितः स्रवदस्रविमिश्रतनुर्दिवसांतपयोधरपालिनिभं ॥
मुखमुन्मुखचेतनभीतिकरं दधती भुवि सा लुठति स्म चिरं ॥ ५ ॥
उपकर्ण्य तदीयमथोच्चरवं किमिति भ्रमति क्षितिपे प्रियया ॥
सहसा स ससार सहासिरमुं मगधाधिपतेर्दुहितुस्तनयः ॥ ६ ॥
इतरेतरमुद्गृणतोरुभयोरदसीयविचेष्टितमेवं[६१] तयोः ॥
ददृशे पुरतः पिशिताशिपतेः सहजा[६२] धृतविग्रहयोग्रमुखी[६३] ॥ ७ ॥
विकृताकृतिभीषितसत्वकुलामथ तामवलोक्य नितांतभिया ॥
अपि देवरि पश्यति संभ्रमिणी जगृहे रमणं जनकस्य सुता ॥ ८ ॥
अयि राम विलोकय दुर्विनयं सहजस्य तवातितरां कुमतेः ।
अचिरेण लभध्वममुष्य विधेः फलमप्रतिकार्यमनात्मविदः ॥ ९ ॥
खरदूषणमुख्यनराशकुलं सविधे वसतीह ममानुचरं ॥
न हि तत्सहते परिभूतिमिमां यदशेषमिदं ग्रसितुं क्षमते ॥ १० ॥
इति घोरतरं प्रणिगद्य मुहुः क्षणतः क्षणदाचरयोषिदसौ ॥
प्रजगाम ततः खचरारिजनैः सह यत्र खरः खरमूर्तिधरः ॥ ११ ॥
उपसृत्य तदीयसमीपमसौ निजवृत्तमशेषमथाकथयत् ॥
पुरतः करुणस्वनितध्वनितं परतः प्रसमीक्षण[६४]सामिगतं ॥ १२ ॥
तदनु क्षुभितं निशिचारबलं जलधिप्रतिमं चलति स्म भृशं ॥
दधदुज्ज्वलितां क्रुधमुग्रतरां हृदि वाडवपावकहेति[६५]मिव ॥ १३ ॥
कर[६६]शृंगलसत्करवालिकया गतिवेगपतत्पतगालिकया ॥
निजविग्रहनिर्जितकालिकया रजनीचरपामरपालिकया ॥ १४ ॥
अहमित्यहमित्यवलिप्तधिया मनुजः स इति व्यतिलुप्तभिया ॥
अभिराम[६७]मधावि मृधा[६८]य तया पृथुलारवतर्जितगर्जितया ॥ १५ ॥
अवलोक्य पुरः खलिनीं[६९] बलिनीमभियाभियतीं भिको[७०]ऽथ भुवः ॥
अनुजार्पितदारभरः स्वकरे सशरं सशरासमविज्यमधात् ॥ १६ ॥
उपरुध्य ततो रघुनाथममी तरसा तरसाशनपाशजनाः[७१] ॥
गिरिशृंगशिलातरुभिर्गुरुभिर्युयुधुर्विविधैरपि शस्त्रगणैः ॥ १७ ॥
स हि तत्प्रहितानि च तानि शरैरखमर्द्य धनुर्गलितैर्नृपतिः ॥
अमरारिकुलान्यमरातिपटुर्यमराजपुरीमनयत्क्षणतः ॥ १८ ॥

---

६१ अदसीयविचेष्टितं=अमुष्या विचेष्टितं. ६२ सहजा=भगिनी. ६३ धृतविग्रहयोग्रमुखी=धृतं विग्रं विगतनासं अत एव हय इवोग्रं मुखं यया. ६४ प्रसमीक्षणसामिगतं=विचारणे जुगुप्सितं. ६५ हेतिः=ज्वाला. ६६ करशृंगं=कराग्रं. ६७ अभिरामं=रामाभिमुखं. ६८ मृधाय=युद्धाय. ६९ खलिनी=खलसमूहः. ७० आभिकः=कामुकः ७१ तरसाशनपाशजनाः=कुत्सिताः राक्षसाः.

अधिकोपवशादथ चापधरास्त्रिशिरःखरदूषणरात्रिचराः ॥
अभिनम्गुरमुं बलदृप्तधियः समदद्विरदा इव केसरिणं ॥ १९ ॥
अयि तिष्ठ नराधम दुष्टमते क्षणमत्र पुरोभुवि नः समरे ॥
अविचार्य यदाचरितं भवता फलमाप्नुहि तस्य विधेरधुना ॥ २० ॥
इति वीरवचः प्रलपंत इमे श्रुतिदुःसहनिस्वनभिन्नदिशः ॥
विषदिग्धमुखान् शतकोटिसखान् ववृषुर्विशिखानतिशातशिखान् ॥ २१ ॥
अवलोक्य निशाचरयूथपतीनवनीपतिरप्यतिरुष्टमतिः ॥
अवगंतुमदःकरवीर्यमसौ सुचिरं समयुध्यदमीभिरमा* ॥ २२ ॥
रणमूर्द्धनि तेन नृपेण ततो दृढमाशुगसंततिरुन्मुमुचे ॥
स्थिरबंधनमप्यपरे मुमुचुर्निजतद्धृतमाशुगमाशु तदा ॥ २३ ॥
विनिहत्य निशाचरसंघमिमं स निवृत्य निजाश्रममाप नृपः ॥
अकरोच्च हृदि व्यसनाकुलिते प्रमदं प्रमदाननमौलिमणेः ॥ २४ ॥
विजयश्रियमाप्य नृपः शुशुभे विपिनं च तदा गतकंटकतां ॥
मुनयः प्रशशंसुरमुष्य यशो विहगाश्च पलाशिकुलस्य पर्म ॥ २५ ॥
दिवि देवगणा दधुरुन्मदतां निहतः परिपंथिजनो न इति ॥
भुवि फेरुगणा ययुरुन्मदतां बहु नः प्रतिपन्नमिहान्नमिति ॥ २६ ॥
नृपतिः स यथापुरमत्र वने वसति स्म सहोदरदारयुतः ॥
भुवनत्रयविक्रवशांतिविधेर्विहितं मुखमित्युदितप्रमदः ॥ २७ ॥
अथ शूर्पणखा हतबंधुजना व्यथमानमना विजगाम ततः ॥
सहनाथ निजाय निवेदयितुं दशवक्त्रभृते खलु वृत्तमिदं ॥ २८ ॥
लवणांबुधिपूरमहापरिखां परिखेलदखर्वसुपर्वरिपुं ॥
मखति स्म मुखेन विखेन पुरीमनुजा मनुजाशकुलाधिपतेः ॥ २९ ॥
सदसि स्थितमग्रजमग्रगतःस्वबभूजैनर्नमकपरीसंक ॥
समुपेत्य दशास्यमशार्स्थमसावपरैरपशंकमुवाच वचः ॥ ३० ॥
अवलोकय राक्षसराजविभो जनमीदृशमेनमधप्रदशं ॥
न हि वेत्ति भवान्नपचारबलो व्यसनं महदागतमप्यधुना ॥ ३१ ॥
निहतः स खरः सबलः समरे मनुजेन दुरासदवीर्यभृता ॥
अवशोषितमेनमवेहि जनं वसतां वचनात्तव तत्र वने ॥ ३२ ॥
रघुराजकुलप्रभवो नृपतिः पितृशासनतस्तदुपेत्य वनं ॥

---

७२ शतकोटिः=वज्रं. ७३ शातं=तीक्ष्णं. ७४ फेरुः=जंबुकः ७५ मुखं=आरंभः ७६ सुपर्वरिपुः=राक्षसः ७७ मखति=गच्छति. ७८ विखेन=विगतेंद्रियेण. ७९ पर्म=क्रीडा. ८० असौ=शूर्पणखा. ८१ चारः=" हेर " इति महाराष्ट्र भाषायां. * अमा=सह.

प्रियया सहितः सहजानुसृतः स हि तत्र वसत्यृषिवृत्तिधरः ॥ ३३ ॥
भुवनत्रयमोहनमूर्तिमिमामबलामुपहर्तुमना भवतः ॥
अहमभ्यपसरं बत तत्सविधं प्रतिपन्नमतः सकलं व्यसनं ॥ ३४ ॥
यदि रक्षितुरस्ति विचारबलं न हि शत्रुरुदंचति कुत्रचन ॥
सति दूरतरेपि दिनाधिपतौ जगतो न तमिस्रभराभिभवः ॥ ३५ ॥
परिपीय मुहुर्वरुणस्य सुतां वनिताजनमध्यगतः सततं ॥
न हि पश्यसि मूर्द्धगतं विमतं ह ह ह प्रभुता तव किंफलिनी ॥ ३६ ॥
किममीभिरहो तव बाहुभरैर्न बिभेति यतः प्रतिपक्षजनः ॥
क नु संप्रति मत्प्रियनाशकरः करवालवरः स करालतरः ॥ ३७ ॥
प्रतिकर्तुममुष्य यदि क्षमसे ननु तद्गृहिणीकुचकुड्मलयोः ॥
तरसा करदत्वमुपेहि न चेत्क्रमतो नृपतेश्चरणांबुजयोः ॥ ३८ ॥
इति तद्वचनं निशमय्य ततः परुषं पुरुषादवरस्य हृदि ॥
नृपतिं प्रति कोपरसो ववृधे वनितां प्रति कामरसश्च समं ॥ ३९ ॥
भ्रमयन्नथ रूक्षतराक्षिकुलं भ्रुकुटीविकटं विदधच्च मुखं ॥
उपकर्णयति त्रिदशारिजने सगभीरमुवाच नराशपतिः ॥ ४० ॥
अवगम्य समस्तजगत्यधिपं दशकंठमकुंठमरातिषु यः ॥
विकृतामकृतैवमहो भगिनीं क स जीवति धूर्तमतिर्मनुजः ॥ ४१ ॥
अधुनैव खरादिपदप्रहतां पदवीमनुसार्य च तौ मनुजौ ॥
विदधामि तदीयवधूहरणं विधिरेष खलुप्रतिकार इह ॥ ४२ ॥
इत्युक्त्वा रथमास्थितो दशमुखः प्रस्थातुमैच्छद्द्रुतं ॥
हस्तांदोलितचंद्रहासलतया विभ्राजमानो भृशं ॥
द्रक्ष्यामि त्रिजगन्मनोहरगुणस्वर्मंडनामंगना-
मित्यंतः परिजृंभमाणवपुषा कामेन कामं हतः ॥ ४३ ॥
साटोपं निहते निजप्रियतमे संग्रामभूमौ मया ॥
साशोकेन यथाकथंचन किमु प्राणान् परित्यक्ष्यति ॥
तेनात्र च्छलनीतिरेव फलिनीत्यालोच्य साकं कृत-
प्रस्थानान् स निषिध्य राक्षसभटानेको रथेनागमत् ॥ ४४ ॥
मारीचं मुनिवृत्तिधारिणमसावासाद्य मायाविनं ॥
कार्ये तत्र सहायतां कलयितुं संचोदयामास तं ॥
सोपि ज्ञातपराक्रमो रघुपतेः प्राक्कौशिकीये मखे ॥

---

८२ वरुणस्य सुता=मदिरा. ८१ विमतः=शत्रुः ८३ चंद्रहासलता=खड्गलता. ८५ छल:
=कपट.

भीतस्ततःप्रतिकूलकर्मणि भृशं वाचं समाचष्ट तं ॥ ४५ ॥
अश्रांतं रमते त्रयी भगवती यत्कंठनालीगृहे ॥
स ब्रह्मा प्रपितामहः स च पिता विज्ञानभूर्विश्रवाः
हा कष्टं मतिरीदृश्यस्य भवतो नातेयमेतादृशी ॥
दृष्टं देहभृतामदूरविपदां प्रज्ञा विपर्येति यत् ॥ ४६ ॥
यच्चेतश्चलति स्वयं सदसतोः साधारणं कर्मणो-
र्विज्ञानं पुरुषस्य तत्र परतो व्यावृत्तिसंपादकं ॥
किंचैषा सरणिर्विगर्हिततमा वीर्योष्मभाजां नृणां
ये प्रत्यक्षमरीन्निहत्य समरे गृह्णंति तत्संपदः ॥ ४७ ॥
संसर्गादसतां विनश्यति नृपः स्वार्थैकनिष्ठात्मनां ॥
तत्कालश्रवणामृताक्षरमुचः पथ्यं न पश्यंति ये ॥
हंत त्वत्सचिवेषु कोऽपि न जनस्त्वामीदृशे कर्मणि ॥
व्यासक्तं विरुणद्धि यंत्रितमतिः स्नेहाभिधानैर्गुणैः ॥ ४८ ॥
जानीते न भवानमुष्य नृपतेरस्त्रस्य वीर्यं मह-
द्विश्वामित्रमखोपघातसमये व्यक्तं यदासीन्मम ॥
रामो नूनममानुषस्तदमुना वीरेण वैरं तव
श्रेयः पुष्यति नैव किंतु नियतं नाशाय कल्पिष्यते ॥ ४९ ॥
येनाराध्य गिरीशमुग्रतपसा जित्वा समस्तं जग-
च्चक्रे श्रीर्निजबाहुसंचयमहासौधाग्रसंचारिणी ॥
स त्वं मोहवशेन साहसपरश्चंद्रांशुकल्पं यशः
कर्तुं नार्हसि दुष्कलं कमठिनं विज्ञोऽसि किं कथ्यते ॥ ५० ॥
इत्थं पथ्यमुदीरितं दशमुखः सौकेतवर्षिसूनुना ॥
नो जग्राह मुमूर्षुरातुर इव श्रेयस्करं भेषजं ॥
किंतु क्रोधवशंवदेन मनसा जग्राह निग्राहक-
स्तं सद्यस्त्रिदशेंद्रकुंजरशिरोमर्माविधं सायकं ॥ ५१ ॥
को मां शास्ति जगत्त्रयीपरिवृढं[६७] स्थिरत्वाग्रतो निर्भयं
यस्यादेशमशेषदैवतगणा वांछंति कर्तुं मुदा ॥
त्वामेवं प्रतिकूलभाषिणमिव च्छित्त्वासिना निर्दयं
पात्रिभ्यो विभजामि सत्वरमिति प्रत्याह चैनं पुनः ॥ ५२ ॥
दृष्ट्वा तं दशकंठमात्मनिधनप्रारंभसंरंभिणं ॥
मारीचो मृतिभीतिकंपितमतिश्चिंतापरोऽभूत्क्षणं ॥

६६ सौकेतवर्षिसूनुः=मारीचः ६७ परिवृढः=नायकः

सद्यस्तस्य विधेयतामुपगतश्चैनं वचः प्रोचिवान् ॥
कर्तव्यं किमिह प्रभो ननु मया तत्तावदादिश्यतां ॥ ५३ ॥
मायावैभवमाश्रितेन भवता तौ दंपती संप्रति
व्यामोह्य प्रसभं प्रियापरिसराद् दूरापवाह्यो नृपः।
यावद् गूढमुपेत्य तत्रभवतीं हृत्वा गमिष्यामि ता-
मित्यादिश्य सहैव तेन सहसा संप्रस्थितो रावणः ॥ ५४ ॥
मारीचस्तु परप्रतारणकलादक्षः स रक्षःपतौ
पश्यत्येव दधार कांचनमयीं कांचित् कुरंगाकृतिं ॥
सान्द्रानतबिंदुभिर्विलसितां वैदूर्यभास्वत्खुरां
माहेंद्रोपलजालमंजुलगलां माणिक्यखंडेक्षणां ॥ ५५ ॥
तं दृष्ट्वा कमनीयकांतिसुभगं वातायुमत्यद्भुतं
हस्तप्राप्तममंस्त राक्षसपतिः संकल्पमंतःस्थितं ॥
सोपि स्वैरमितस्ततश्च विचरन् वन्यैर्मृगैरन्वितः
सीताराघवयोः पुरोभुवि गतश्चिक्रीड चित्राकृतिः ॥ ५६ ॥
तिष्ठन् कुत्रचिदुत्पतन् कुहचन स्वैरं क्वचित्संचरन्
लीनः क्वापि लतासु कुत्रचिदथ प्राप्तः प्रकाशात्मतां ॥
आजिघ्रन् कुहचित्तृणानि शयितः कुत्रापि धावन् क्वचित् ॥
प्रत्यक्षं स तयोरखेलदखिलव्यामोहिभिर्विभ्रमैः ॥ ५७ ॥
उन्मीलत्कलधौतबिंदुसुषमाकल्माषकायत्विषं
तं गांगेयमयं विलोक्य हरिणं वैदेहराजात्मजा ॥
निर्मर्यादविजृंभमाणकुतुकस्रोतस्तरंगाकुल-
स्वांता कांतमिदं जगाद मृदुलस्मेराननांभोरुहा ॥ ५८ ॥
पश्य त्वं प्रिय कश्चिदेष हरिणः प्रत्यक्षमक्ष्णोः फलं ॥
बिभ्राणस्तनुमद्भुतमन्विव पुरश्चित्राभिधानो रसः ॥
कांतारं निजकांतिभिर्वितनुते विद्युल्लताभास्वरं ॥
यस्येदं कमनीयकांचनमयं गात्रं दरीदृश्यते ॥ ५९ ॥
इच्छापादपदोहदं नयनयोराकर्षमंत्राक्षरं ॥
पश्यंत्याः पुरतश्चलंतमतुलं वातायुमेतादृशं ॥
हस्तांभोरुहकल्पितैर्नवतृणग्रासैः स्वयं पोषिता-
नप्येणानपहाय केवलममुं वांच्छत्यहो मे मनः ॥ ६० ॥

८८ प्रतारणं=वंचनं ८९ वातायुः=मृगः ९० कलधौतं=रजतं. ९१ गांगेयमयं=सुवर्ण-मयं ९२ दरीदृश्यते=भूयोतिशयेनच दृश्यते. ९३ एणान्=मृगान्. * कुहचन=क्वचित्.

इत्युक्ते प्रियया प्रियस्तु तदभिप्रायं विदित्वाब्रवी-
त्सारंगः किमसौ सरोजनयने पुष्णाति कौतूहलं ॥
तद् गृण्हामि सजीवमेनमधुना लीलार्थमेष त्वया ॥
हस्तांभोरुहलालनादहमिव प्राप्नोतु धन्यां दशां ॥ ६१ ॥
इत्यादाय शरासनं रघुपती रक्षार्थमस्याः पुन-
स्तत्रादिश्य च लक्ष्मणं निरगमद् द्राक् पर्णशालांगणात् ॥
मार्गे मार्गमथोपगम्य च वने तद्ग्राहबद्धोद्यमो
बभ्राम क्षणदृष्टनष्टहरिणंभ्रामुह्यमानश्चिरं ॥ ६२ ॥
आकृष्टो नृपतिर्विदूरममुना मायामृगेन स्वयं
श्रांतस्तस्य च वीक्ष्य दार्ढ्यमतुलं रक्षश्छलाशंकया ॥
अंतःक्रोधवशादधिज्यमकरोत् कोदंडदंडं निजं
संधायैकमथाशुगं शितशिखं चिक्षेप चैनं प्रति ॥ ६३ ॥
विद्धो मूर्द्धनि सायकेन स खलु त्यक्त्वा तनुं हारिणीं
द्रष्टुर्मानसहारिणीं पलभुजामुत्सर्गसिद्धां दधौ ॥
हा हा लक्ष्मण पाहि मां निशिचराः खादंति हा जानकी-
त्याक्रन्दन्नथ राघवस्वरसमं दुष्टः स नष्टोऽभवत् ॥ ६४ ॥
श्रुत्वा तद्रुदितं विदेहदुहिता रक्षोभिरुत्पादितं
भर्तुः संकटमेव शंकितवती संभ्रांतचित्ता भृशं ॥
गच्छ त्वं द्रुतमेव लक्ष्मण धनुष्पाणिः सकाशं गुरो-
रेकाकी स हि सीदतीह गहने रक्षोभिरित्याह तं ॥ ६५ ॥
माभूत्ते त्वदि संभ्रमः कृतमिदं मायाविभिर्यातुभि-
र्न ह्यार्यस्य मुखात् कदाचिदुदयत्येतादृगार्तस्वरः ॥
यद्बाणावलिवाडवानलशिखा शक्नोति विश्वं जगद्
दग्धुं तस्य पराभवः कथमिति प्रत्यादिशल्लक्ष्मणः ॥ ६६ ॥
भूयोपि व्यथमानमानसतया तं प्रेरयंती मुहुः
प्रत्याख्यातिमुपेयुषी च किमपि क्रोधाविला मैथिली ॥
प्रोवाच श्रुतिदुःसहं शठ तव क्रूरं मनः केवलं
यन्न भ्रातुरिदं निशम्य रुदितं कारुण्यमालंबते ॥ ६७ ॥
व्यापन्ने विपिनेत्र राक्षसगणैस्तस्मिन् नरेंद्रात्मजे
रंतुं वांच्छसि किं मया शठमते दुष्पापमेतत्त्वया ॥
सद्यस्ते पुरतो यथाकथमपि त्यक्ष्यामि वै जीवितं
किं प्राणैर्मम तं विना प्रियतमं किंवा सुखैश्चापरैः ॥ ६८ ॥

इत्थं वाणीं कृपाणीमिव परुषतरामेष शृण्वन्नमुष्याः
स्थातुं तत्रासमर्थः क्षणमपि सहजस्याज्ञया यंत्रितोपि ॥
दुर्वारो दैवयोगः खलु बहुभिरलं भाषितैरत्र देवाः
पांतु त्वामित्युदीर्य द्रुततरमगमल्लक्ष्मणो रामपार्श्वं ॥ ६९ ॥
इति श्रीरामचरिते महाकाव्ये एकादशः सर्गः

नीतेथ रामे हरिणेन दूरं निर्यापिते गोप्तरि लक्ष्मणे च ॥
रामासमेतं रजनीचरेंद्रो रामाश्रमं त्वरमाससाद ॥ १ ॥
इदं मदीयं वपुरुग्रमग्रे विलोक्य सा भीतिमुपैति बाला ॥
इत्यंतरालोच्य दधार सद्यः स भिक्षुवेषं सितभस्मभूषं ॥ २ ॥
कमंडलुं दंडमपि त्रिपुंड्रं दधद्दुकूलं च कषायरक्तं ॥
रराज रुद्राक्षमयाक्षमालाविभूषितस्तस्करमस्करी* सः ॥ ३ ॥
विदेहकन्याचरणारविंदविन्यासधन्यांगणरेणुजालां ॥
पदे पदे पल्लवितानुरागः स पर्णशालामविशद्दशास्यः ॥ ४ ॥
परस्य दारा इति साधुजातः पतिव्रतामौलिरिति प्रवृद्धः ॥
मनोभवस्तस्य बभूव तस्यां दुरात्मनामेष खलु स्वभावः ॥ ५ ॥
अनार्यकार्याचरणप्रवृत्तः परोक्षवीर्यो रघुनंदनस्य ॥
दधौ पतंगस्य दशां दशास्यः कृशानुकीलाकलिकां लिलिक्षोः ॥ ६ ॥
तत्राश्रमे तामथ विस्फुरंतीं स कांतिभारं मुहुरुत्किरंतीं ॥
प्राणेशवार्तानुपलंभनार्तामेकाकिनीमाकलयांचकार ॥ ७ ॥
नेत्राणि रात्रिचरनायकस्य प्रतीक्षमाणानि पुरेव तस्याः ॥
अंगेष्वहंपूर्विकया निपेतुर्भृंगा लताया इव पुष्पितायाः ॥ ८ ॥
वेणीषु तस्यास्तपनात्मजातावेणीषु मग्नाः प्रथमं दृशस्ताः ॥
प्रसह्य ताभिः किल नीयमानाः प्रमोदसिंधोरुदरं प्रविष्टाः ॥ ९ ॥
बद्धेव तत्केशगुणेन गाढं दृष्टिस्तदीया न चिरं चचाल ॥
तां चंद्रहासि प्रसभं तदास्यं छित्वेव तद्बंधमथाचकर्ष ॥ १० ॥
याः स्तारकास्तस्य जये सुराणां न तारकेशं गणयांबभूवुः ॥
आगस्तदुन्मार्ष्टुमिवालिलिंगुस्ताः सादरं तन्मुखतारकेशं ॥ ११ ॥
आबाल्यतः शीलित एव तस्य विलोचनानामधरेण संगः ॥
अतः किमासीदधरे मृगाक्ष्यास्तेषामसाधारण एव योगः ॥ १२ ॥

---

* मस्करी=यतिः. १४ कृशानुकीला=अग्निज्वाला. १५ चंद्रहासि=चंद्रवत् हासि खड्ग च.

निपीय पीयूषरसप्रवाहं तदास्यनाम्नः किल शीतधाम्नः[96] ॥
स्वस्था इव स्वर्णगिरौ विहर्तुं तदूदृष्टयस्तत्कुचयुग्ममापुः ॥ १३ ॥
अगण्यलावण्यमयापगायां तस्यां परिभ्रम्य तदीयदृष्टिः ॥
भृंगीव तुंगं कुचपद्मकोशमाशिश्रिये कोमलपत्रचित्रं ॥ १४ ॥
स्थित्वा चिरं तत्कुचकुड्मलाग्रे न लब्धमाध्वीकरसेव तस्मात् ॥
उत्पत्य भूयोऽपि मुखारविंदं जगाम सा नित्यविकासशीलं ॥ १५ ॥
निकृष्यमाणाथ बलात्कुचाभ्यामुत्कृष्यमाणा वदनेंदुना च ॥
मुहुः पतंती मुहुरुत्पतंती चक्रे चिरं कंदुकविभ्रमं सा ॥ १६ ॥
मृद्दी मुखेस्याः प्रसभं निपातात् पीडा विधेरार्जितमात्मपापं ॥
दृक् तस्य निष्कर्तुमिवातितुंगात् पपात तस्याः कुचशैलशृंगात ॥ १७ ॥
अगोचरीभूतचरीममुष्या[97] मध्यस्थलीमेत्य वलित्रिमार्गी ॥
चिरं परिभ्रम्य किमु श्रमार्त्ता सा नाभिकूपं पुनराससाद ॥ १८ ॥
कांतिच्छटाकैतवपूरपूर्णे नाभिह्रदे तत्र मुहुर्विहृत्य ॥
बाला इव स्वं परिमार्ष्टुकामा वासस्तदीयं जगृहुर्दृशस्ताः ॥ १९ ॥
तस्या नितंबोरुयुगे नितांतं छन्ने दुकूलैः स्फुटलब्धियोगं[98] ॥
अन्वेषमन्वेषमचारिषुः किं वहिर्दुकूलं बहुकालमेताः ॥ २० ॥
मन्ये न धन्यास्मि यदेतदस्या न लभ्यते व्यक्तमितीव खेदात् ॥
दृशां ततिर्दाशमुखी पतंती जगाम तत्पादयुगेन योगं ॥ २१ ॥
आकेशमापादमनेकशेषं तस्याः प्रतीकं[99] परिपीय दृग्भिः ॥
मुहुर्मुहुर्मूर्छितमन्मथोसौ निशाचरेंद्रो मनसेदमाह ॥ २२ ॥
अहोतरां मानुषपोतकस्य लोकोत्तरः कश्चन पुण्यपूरः ॥
एतादृशीमेणकिशोरनेत्रामेनामसौ येन किलानुभुंक्ते ॥ २३ ॥
या कांतिरस्या वपुषीह दृष्टा सा दुर्लभा स्वर्ललनाकुलेऽपि ॥
बहुप्रयासार्जितमात्मपुण्यं क्षिण्वंति येनैव फलेन संतः ॥ २४ ॥
आस्ते पुरा कुत्र नु वासनैषा दुग्धांबुधौ शिल्पयतो विधातुः ॥
दारेषु वा हैमवतेषु वा स्वे सृष्टावमुष्याः स्वयमस्फुरद्या ॥ २५ ॥
वेणीयमेणीनयनोत्तमाया माया स्वयं मूर्तिमतीव भाति ॥
सदा समाश्रित्य तमोगुणं या व्यामोहयत्येव समस्तलोकान् ॥ २६ ॥
महांधकारो [100]मिहिरेंदुभीतः स्थित्वा तपस्यन् गिरिगव्हरेषु ॥
केशावलीभूय कुशेशयाक्ष्याः प्रायोखिलाशाविषयत्वमेति ॥ २७ ॥

---

९६ शीतधाम्नः=चंद्रस्य ९७ अगोचरीभूतचरीं=पूर्वं अगोचरीभूतां ९८ योगं=उपायं
९९ प्रतीकं=अंगं. १०० मिहिरेंदुभीतः=सूर्यचंद्रभीतः

तमोगुणत्वं भजतीति युक्तं व्यक्तं हि तत्केशतमस्यमुष्याः ॥
असत्त्वमित्येव भवत्यसत्यं यदत्र वक्रत्वमुखो गुणौघः ॥ २८ ॥
सूते पुरा पुष्पवतोः स्रवंतीं सूर्यो लसत्कृष्णतयैव भव्यां ॥
मानादिवेंदुर्मुखमीदृशीं तां सूतेऽधुना केशमिषादमुष्याः ॥ २९ ॥
एषा च सा च स्फुटभंगिकांते वेणीस्वरूपे यमुने इह द्वे ॥
तस्यां मुकुंदः किल पर्यसीदस्यां पुनः क्रीडति तत्तनूजः ॥ ३० ॥
प्रादात्किमिंद्रः सुहितः सुधानां मालां स्वनीलाश्मकृतामुष्यै ॥
एतन्मुखत्वे शशिनः पुनः सा यद्भाति मूर्धन्यलकच्छलेन ॥ ३१ ॥
नित्यं ललाटेन निजोपरिस्थादभ्यस्तमस्याः किमु कुंतलौघात् ॥
चातुर्यमेतच्छितनीलकंठो विज्ञायते येन शितिः कलापः ॥ ३२ ॥
मध्ये ललाटं मनुजब्रुवेण यत्कल्पितं धातुरसेन शिल्पं ॥
अस्या मुखेंदोः खलु जातमात्रं तच्चित्रकं पुत्रकमेव विद्मः ॥ ३३ ॥
जागर्ति बाणोऽयमनन्यजस्य फालस्तु बालेंदुसखः सुमुख्याः ॥
मन्ये जगद्यौवनभेदलग्नं विशेषकं शोणितबिंदुमत्र ॥ ३४ ॥
विशेषकं वीक्ष्य शशांकधीरं विनिर्गतौ कर्णबिलाज्जिघृक्षू ॥
कालाविमौ व्यालशिशू मृगाक्ष्या भ्रूसंज्ञया योजयते जनौघः ॥ ३५ ॥
मुखस्य तन्व्याः समवायिहेतौ चंद्रे कृते तत्परिवेषचक्रं ॥
द्वेधा विधाय प्रसभं स वेधाश्चक्रे भ्रुवौ नेत्ररुचातिनीलौ ॥ ३६ ॥
स्मारं धनुर्व्यक्तमिदं सुदत्या युग्मं भ्रुवो राजति सद्गुणाढ्यं ॥
कटाक्षनाराचविमोक्षणे यद्विलोक्यते कुट्टमिवातिभुग्नं ॥ ३७ ॥
भालस्थलीबालशशांकमूले संक्रांतयोरुत्तरपक्ष्मपंक्त्योः ॥
भ्रूभावमस्या भजतः स्वरूपे तद्योगपद्योदितकेलिलौल्ये ॥ ३८ ॥
जित्वा सरोजादिसमस्तमानौ दर्पादथान्योन्यजिगीषयास्याः ॥
किमाभिमुख्येन मिथः पतंती नेत्रे चकास्तश्चपलेक्षणायाः ॥ ३९ ॥
दृशौ कुरंगीनयनस्य कुल्ये परं न शृंगाररसस्य चास्याः ॥
मध्ये तयोर्भाति कनीनिकाख्यं लीलामरुत्कंपितमुत्पलं यत् ॥ ४० ॥
अस्याः सपत्रा क्रियते स्म दृष्टिः पक्ष्मावलिभ्यां परमेष्ठिना यत् ॥
पत्रीभवंती तदियं स्मरस्य चित्तं सपत्रीं कुरुते जनस्य ॥ ४१ ॥

---

१ असत्वं=अद्रव्यं. २ पुष्पवतोः=सूर्याचंद्रमसोः ३ स्रवंतीं=नदीं (यमुनां). ४ तत्तनूजः=कामः ५ सुहितः=तृप्तः ६ नीलकंठः=शिवः मयूरश्च ७ शितिः=धवलो मेचकश्च. ८ कलापः=चंद्रः बर्हं च. ९ मनुजब्रुवेण=कुत्सितमनुष्येण. १० अनन्यजः=मदनः ११ विशेषकं=तिलकं. १२ शशांकधीरं=शशांक इति धियं राति तं. १३ कुल्ये=सदृशौ अल्पसरितौ च. १४ परं=केवलं. १५ कनीनिका=तारका नेत्रस्य. १६ सपत्रा कुरुते=अति व्यथयति.

विधिः पुरास्याः कृतकेशसृष्टिः किंतद्द्युतिध्वांतविमुग्धदृष्टिः ॥
अस्वस्थधीरुत्पलै[17]मास्थदंतःपत्रं बहिष्केसरमक्षिदेशे ॥ ४२ ॥
यथामुना सीदति लोचनेन तथा न लोकः कमलादिबाणैः ॥
निजाग्रजाग्रत्तमकर्णमेतद् दुरुद्धरः कार्णि[18]शरः स्मरस्य ॥ ४३ ॥
उत्तारितौ दर्पकतत्प्रियाभ्यां केतोः कृतेस्याः श्रुतिकूपकाभ्यां ॥
वि[19]सारिणौ तावनुभीतिकंपी वै[20]सारिणौ किं नयने नतांग्याः ॥ ४४ ॥
नासौ[21]दसीया श्रयति श्रियं यां नासादनीया तिलपुष्पकैः सा ॥
आकारसाम्येपि गुणः पदार्थं भिनत्ति पूर्णेंदुक*रीषयोर्वा[22] ॥ ४५ ॥
तिलप्रसूनादपि कोमलेयं नासा नतांग्याः प्रथितोयमर्थः ॥
जघ[23]न्यवृत्तिश्रितपूर्वशब्दं यद्बन्धपुष्पं हि प[24]दं तदीयं ॥ ४६ ॥
अधीरदृष्टेरधरोयमीष्टे बालारुणीयं किरणं विजेतुं ॥
तल्लेशसंदर्शनमात्रजातम्लानः प्रवालः पुनरस्य कः स्यात् ॥ ४७ ॥
संध्याघनस्यैव विवर्तमोष्ठं शंके मृगाक्ष्या न तु विद्रुमादेः ॥
धत्ते मृतं यन्निभृतं निजांतर्व्यक्तं कदाचित्समये किलैषः ॥ ४८ ॥
बिभर्ति वन्यं मृगमोषधीशो नैवौषधिं मामिति रोषतः किं ॥
अस्या मुखे तद्द्विषि संश्रयंती निजं फलं बिंबलतोपजह्रे ॥ ४९ ॥
आदाय पीयूषरसं सुधांशोः संध्याशिखिप्रत्यहपाकरक्तं ॥
तेनैव नूनं विधिरंबुजाक्ष्याश्चक्रेऽधरं चारुतरस्वरूपं ॥ ५० ॥
बंधूकमुद्बंध्य जपामपास्यन् विद्रावयन् विद्रुममप्यशंकं ॥
अध्यास्त एष स्वयमोष्ठभागो मुखेंदुसिंहासनमेकवीरः ॥ ५१ ॥
पत्युर्मुखस्यानिशमोषधीनामंतस्थितत्वादधरोऽयमस्याः ॥
सिद्धौषधं मन्मथनिर्मिताधिव्याधिप्रतीकारविधौ विशंके ॥ ५२ ॥
किंचित्समाकुंचितसृ[25]क्कमध्यः सौभाग्यसंदोहमहांबुराशिः ॥
नेत्राणि मे संप्रति संधिनोति[26] कदा रसज्ञामधरस्तरुण्याः ॥ ५३ ॥
माधुर्यनिर्भासितगो[27]स्तनीकं मार्दव्यनिर्धूतनवप्रवालं ॥
अस्या निपीयाधरमेकवारं त्यक्ष्यामि चेज्जीवितमस्मि धन्यः ॥ ५४ ॥
समुद्रजाताः सुहृदः सुधांशोर्भुक्तास्तमेवास्यमुदीतमस्याः ॥
प्रेमातिरेकात् परिरभ्य नित्यं वसंति दंतावलिकैतवेन ॥ ५५ ॥
रोषेण रुद्रः स्मरकीर्तिमालामचूर्णयत्प्रागमितप्रकाशां ॥

---

१७ आस्थत्=अकरोत्. १८ कर्णिशरः=बाणविशेषः. १९ विसारिणौ=प्रसरणशीलौ. २० वैसारिणौ=मत्स्यौ. २१अदसीया=अमुष्याः. *करीषः=वाटोळी गोंवरी. २२वा=इव. २३जघन्या=नीचा. २४पदं=वाचकं. २५सृक्कः=ओष्ठप्रांतः. २६धिनोति=प्रीणयति २७गोस्तनी=द्राक्षा.

तत्र स्खलित्वा पतितैः किमस्याः सृष्टा रदाः स्थूलकणप्रकांडैः ॥ ५६ ॥
मदस्रुतिर्मन्मथवारणस्य ज्योत्स्नांकुरश्चंद्रमसो मुखस्य ॥
सौभाग्यपीयूषसरित्तरंगः स्मितं मनोहारि जयत्यमुष्याः ॥ ५७ ॥
अश्रांतमंधंकरणी जनानां दंताग्रनग्नंकरणी[२८] क्रियास्याः ॥
चित्रं तथाप्युज्झति नैव साम्यं जोत्स्नाभिराद्यं करणी मुखेंदोः ॥ ५८ ॥
अयं विशेषः परमद्भुतांग्याः कपोलभित्तेर्मुकुरस्य भित्तेः[२९] ॥
गृह्णाति रूपं यदि तत्परेषामेषा तु चेतांसि निरस्तदोषा ॥ ५९ ॥
कालेन बालो विजितः सुधांशुर्वक्त्रेण वृद्धश्च वराननायाः ॥
का ख्यातिरत्रेति कपोलभागस्तं मध्यमं लक्ष्यते[३०] जयस्य ॥ ६० ॥
कर्णोऽयमर्णोजविलोचनायाः[३१] स्वर्णारविंदेन च तंसनीयः ॥
निर्णूयते कैरिव वर्णरूपैर्निर्णीयते[३२] वा कथमस्य लक्ष्मीः ॥ ६१ ॥
अस्याः स्फुटं मन्मथतन्महिष्योः केलीतटाकौ श्रुतिरंध्रभागौ ॥
तदीयतीरोपवनीनिबद्धे किं कर्णपाशौ च सुवर्णदोले ॥ ६२ ॥
एतद्भुजाकोटिकृतेः[३३] पुरस्तादुद्राव्य कर्णे[३४] शतपर्णयोनिः[३५] ॥
न सम्यगासीदिति कुंडलेन किं योजयामास मृषा विशंकी ॥ ६३ ॥
किंचिन्नमत्कोमलमध्यभागं क्रियासु भर्तुः करलालनीयं ॥
आवाप[३६]लीलामधरांकुरस्य बिभर्ति तन्व्याश्चिबुकं मनोज्ञं ॥ ६४ ॥
इदं सुदत्याः सुकृतैकलभ्यं लेखाधि[३७]रूढाधरमध्यभागं ॥
अनेकविद्याधरमास्यबिंबं साक्षादिह स्वर्ग इवावतीर्णः ॥ ६५ ॥
अब्जे[३८] उभे च श्रितपुष्कर[३९]ांते दिनेश्वरालोकविवर्द्धितांगे ॥
अस्या मुखस्य श्रियमाप्तुकामे व्यक्तं भजेते वरदौ हरीशौ ॥ ६६ ॥
एतन्मुखस्पर्द्धितया शशांकः शंके कलंकेन मलीमसश्रीः ॥
महीयसा स्पर्द्धनमाचरंतः के नाम लोके न कलंकवंतः ॥ ६७ ॥
कृपाविहीनं कमलां[४०]भिभूतौ मुग्धेक्षणाया मुखमाकलय्य ॥
तत्रासयत्[४१] सापि मुकुंदकांता तत्किंवदंती चपलेति तस्याः ॥ ६८ ॥
विलोक्य धात्रा विजितं मुखेन स्ववासपंकेरुहमप्यमुष्याः ॥
क्रोधेन किं कुंडलनास्य चक्रे नवप्रभामंडलकैतवेन ॥ ६९ ॥

---

२८ दंताग्रनग्नंकरणी क्रिया=स्मितं. २९ भित्तं=खंडं. ३० लक्षयते=लक्षं करोति. ३१ अर्णोजं=कमलं. ३२ वर्णरूपैः=वर्णैः रूपैः प्रशस्तैर्वर्णैर्वा. ३३ भुजाकोटी=भुजयोरग्रे ज्योतिःशास्त्रप्रसिद्धौ भुजा कोटिश्च. ३४ कर्णः=श्रोत्रं ज्योतिःशास्त्रप्रसिद्धं कर्णंच. ३५ शतपर्णयोनिः=ब्रह्मा. ३६ आवापः=आलवालः ३७ लेखा=रेषा देवाश्च. ३८ अब्जं=चंद्रं कमलं च. ३९ पुष्करं=आकाशं जलं च. ४० कमलं कमला च. ४१ भयं चलनं च प्राप.

भ्रूवैजयंती लसद[42]क्षिमीनध्वजं चलत्कुंडलचक्रयुग्मं ॥
नासाग्रभूषामणिहेति[43] चित्रं मन्ये रथं मान्मथमास्यमस्याः ॥ ७० ॥
अस्या मुखं रत्नमयं विशंके यदिंद्रनीलायितकृष्णतारं ॥
राजत्कपोलस्फटिकं रदालीमुक्ताफलं विद्रुमदंत[44]चेलं ॥ ७१ ॥
सत्पत्रवल्लिस्फुटगंड[45]मस्या वक्त्रं विराजत्तिलकै[46]श्रिताम्रं ॥
उद्यद्द्विज[47]श्रेणिरुचि स्मरस्य क्रीडावनं भूरिसुमा[48]भिरामं ॥ ७२ ॥
वाग्भंगिभेदैर्बहुभिः किमेभिः प्राप्येतरैस्तद्गुणपूरवारैः[49] ॥
आसांत्यकक्ष्यो जगदीक्षणानामानंद एवाननमायताक्ष्याः ॥ ७३ ॥
निजांकवाणीकरपद्मवीणाक्वाणानुपादाय निधाय कंबौ ॥
तेनैव नूनं विततान तन्व्या विधिः शिरोधि[50] विशदत्रिरेखं ॥ ७४ ॥
यः शंखभावाद् भवति प्रधानं मनोजपूजाविधिसाधनेषु ॥
कंठः स नास्याः परिपूर्यते किं सारस्वतैः[51] साधुरसप्रवाहैः ॥ ७५ ॥
कंदर्पगंधद्विरदेंद्रबंधः कंठस्थले मंगलसूत्रबंधः ॥
आभाति सौभाग्यविशेषलब्धसाम्राज्यभोगोचितपट्टबंधः ॥ ७६ ॥
अस्याः कुचौ किं नवहेमकुंभौ किं पद्मकोशाविति नेत्रभाजां ॥
संदेहदानेन हि संदिहाते[52] संदेहलेशोऽपि न विद्यते नः ॥ ७७ ॥
एतत्कुचस्पर्द्धिगतर्द्धिताऽलंभिया चलोदग्रकुटाग्रमागात् ॥
प्रपातपातात्प्रयतं पुनस्तत्प्रयाति सायुज्यमिवेदमीयं ॥ ७८ ॥
विलीनगांगेयघटीदमीयस्तनोपमानं क्रियते कथं वा ॥
अंतर्विसारा खलु सा विगंधाप्येतौ तु सारौ च सगंधसारौ ॥ ७९ ॥
मुदा सदेदं कुचचक्रवाकद्वंद्वं परं राजदनंतरत्नं ॥
विधौ मुखाख्ये सविधस्थितेऽपि वियोगभाङ् नैव न चित्रमेतत् ॥ ८० ॥
रोमावलीदंडधरः कुलालस्तारुण्यनामा तपनीयपंकैः ॥
कृतप्रभाचक्रपरिभ्रमः किं चक्रे कृशांग्याः कुचकुंभयुग्मं ॥ ८१ ॥
लावण्यसिंधोरुदितौ मृगाक्ष्याः सुजातपत्रावलिराजमानौ ॥
मन्ये कुचौ मित्रकरोपसंगादाभोगभाजावरविंदकोशौ ॥ ८२ ॥
नतभ्रुवो विभ्रमचंक्रमेषु स्तनौ चलच्चूचुकतां दधानौ ॥

---

४२ अक्षिमीनध्वजं=अक्षिरूपौ मीनौ लांछनं यस्य. ४३ हेतिः=कांतिः शस्त्रं च. ४४ दंतचेलं=ओष्ठः ४५ गंडः=कपोलः वृक्षविशेषश्च. ४६ तिलकः=विशेषको वृक्षविशेषश्च. ४७ द्विजाः=दंताः पक्षिणश्च. ४८ सुमं=पुष्पं, सुमा=शोभना शोभा. ४९ वारः=समूहः. ५० शिरोधिः=ग्रीवा. ५१ सारस्वतं=सरस्वती (नदी वाणी च) संबंधी. ५२ संदिहाते=संवर्द्धेते संदेहं कुर्वाते च

अभ्यस्यतो द्रष्टुरिवोपदेष्टुं गुरू शिरःकंपनमात्मनैव ॥ ८३ ॥
सहैव जातौ सततं सहैव पीनौ स्तनौ मीनविलोचनायाः ॥
अहो सुहृद्भावमपास्य दूरं परस्परं पीडयतः किमन्यत् ॥ ८४ ॥
अन्योन्ययोग्यायतपीवभावौ बाहू इमौ बाहुजवंशजायाः ॥
पयोधरक्ष्माधरपार्श्वजाते दूरप्रवाहे इव निम्नगे द्वे ॥ ८५ ॥
अग्रस्थितश्रीकरपुष्करत्वादस्या भुजौ लब्धमृणालभावौ ॥
प्रकाशयेते निजवल्लभस्य कंठावलंबेषु सकंटकत्वं ॥ ८६ ॥
कुशेशयेभ्यः करभागमुष्याः शयस्तथैव द्रुमपल्लवेभ्यः ॥
उदीर्यते तत्कर इत्यशेषैरंत्यस्य लोपादयवोपचारात् ॥ ८७ ॥
पाणिद्वयं पंकजलोचनायाः शाणभ्रमं चेतसि नस्तनोति ॥
शोणश्रियं बिभ्रदिदं जपादिबाणप्रकाषादिव मन्मथस्य ॥ ८८ ॥
नखेंदुखंडावलिमंडिताभिः पंचायुधः पंचभिरंगुलीभिः ॥
अस्याः समस्तं जयतीह लोकं मुधापवादः कमलादिकेषु ॥ ८९ ॥
निसर्गरक्ता निभृतांतरालाः स्निग्धत्विषः कोमलभावरम्याः ॥
नखेंदुभासांगुल्योगनायाः स्फुटं हसंतीव नवप्रवालान् ॥ ९० ॥
विलासिनीलोकजयप्रशस्तिवर्णावलीवोल्लिखिता विधात्रा ॥
विराजते लोमलता नतांग्या मध्यस्थलीकांचनपट्टिकायां ॥ ९१ ॥
पृथुस्तनेभ्यः पृथुरोमदृष्टेरस्याः सरस्यानतनाभिनाम्नः ॥
स्वकेतुमादातुमिवांतरास्यल्लोमावलीश्यामलदामकामः ॥ ९२ ॥
त्रिदामाभिर्हेममयैरमुष्या बद्धानि मध्ये मकरध्वजेन ॥
अपि त्रिलोकीजनमानसानि प्रत्येकमित्येव वयं प्रतीमः ॥ ९३ ॥
नाभीसरस्तीरविहारभूमेरुत्तुंगवक्षस्थलमारुरुक्षोः ॥
निःश्रेणिकाश्रेणिरिवांगयोने वलित्रयी भाति विलासवत्याः ॥ ९४ ॥
अस्योदरस्य श्रियि लोलभावः स्वपल्लवानामिति सर्वलोकान् ॥
बोधिद्रुमत्वादवबोधयंतं नानेतरां तं चलपत्रवंतं ॥ ९५ ॥
मध्यं विधेः सृष्टवतो मृगाक्ष्याः स्रष्टुं पुनर्द्वे न पृथक् प्रयासः
भूतस्य भूतेशकचस्य पुष्पं शृंगं च तुंगं शशिलांछनस्य ॥ ९६ ॥
अविद्यमानं यदि मध्यमस्याः कथं नु तिष्ठत्ययमूर्ध्वकायः ॥
देवस्य बंदीकृतशंबरवैर्जानामि वै तादृशमिंद्रजालं ॥ ९७ ॥
कांतिप्रवाहे कमलेक्षणाया गंभीरमावर्तमवैमि नाभिं ॥
विशत्यमुत्रोडुपसत्सखोपि यः सोयमंतःशय एव नूनं ॥ ९८ ॥
पृथ्वीसुतायाः खलु युक्तमस्याः पृथ्वी नितांतं जघनस्थली यत् ॥

इदं पुनः केन महीति शब्दः स्पृशत्यदःस्पर्शिनि मुख्यवृत्त्या ॥ ९९ ॥
कोविदमालिंगति कोमलांग्याः श्रोणीतटं शारदसैकतश्रि ॥
हस्तांघ्रिनेत्रास्यसरोजराजिर्यस्यां लसत्यूर्मिमती च वेणी ॥ १०० ॥
आक्रम्य रम्या जघनस्थलीयं ममाधुना चेतसि कातराक्ष्याः ॥
अमोचनीयानपि नाकैलोकैः प्राणानहो मोचयते मुहुर्मां ॥ १०१ ॥
मोचायुगं मन्मथराजधानीद्वारस्थलीमंगलसाधनं यत् ॥
तदेव जानामि दुकूलगुप्तमूरुद्वयं चारुतरं तरुण्याः ॥ १०२ ॥
आरभ्य रंभामिदमूरुयष्टेः स्रष्टुं समामिष्टमनाप्यस्रष्टः ॥
स्रष्टा करस्थेन विपाटय भूयष्टेकेन शंके त्वचि तां निरास्थत् ॥ १०३ ॥
हस्तावमानादखिलद्विपानां दानांबुधारामवगृण्हतास्याः ॥
सुगंधितामूरुयुगेन नीतः स्मराभिधानो जयति द्विपेंद्रः ॥ १०४ ॥
सव्येतरं सव्यमिवायताक्ष्याः सव्यं च सव्येतरवद्विभाति ॥
अष्ठीवतोः सुष्ठुतरांगभाजो निष्ठीवतो निस्तुलकांतिपूरं ॥ १०५ ॥
अधोमुखौ किं निहितौ निषंगौ जंघे इमे पंकजसायकस्य ॥
तत्कालतन्निर्गलितांबुजास्त्रश्रियं दधाते चरणौ यदस्याः ॥ १०६ ॥
व्याकोशतादत्तमुखत्वलुप्तशाताग्रभावस्य भवत्यमुष्याः ॥
जंघायुगं केतककोरकस्य श्रियः सतीधर्मविलोपनाय ॥ १०७ ॥
अमंदरागं दधतस्तरुण्या बाहीकभागः पदपंकजस्य ॥
जयत्यसौ कर्परमादिमस्य कूर्मस्य धर्तुः किल मंदरागं ॥ १०८ ॥
शंके पदं शंकरमायताक्ष्या गौर्या रुचेराश्रयतां गतं यत् ॥
नखावलीकैतवकुल्यमालं प्रपन्नलेखं प्रतिभासतेऽलं ॥ १०९ ॥
स्थित्वा चिरं वारिणि कंठदघ्ने यत्सेवितोऽभूत् कमलेन हंसः ॥
जाने ततस्तत्पदभावमस्याः प्राप्याधुना हंसगतिं प्रयाति ॥ ११० ॥
अस्याः पदं कोकनदं विकासि श्रियः पदं च प्रथितं तदेव ॥
तस्या महाभाग्यमिदं यदेत्साम्यं जनाः श्लिष्टगिरो वदेयुः ॥ १११ ॥
मग्नेव सिंदूरपरागपुंजे या श्रीरदःपादसरोजलग्ना ॥
प्रसाधनासाधनमग्रतोऽस्या यावद्द्रवो दीप इवाहिमांशोः ॥ ११२ ॥
क्षंतव्यमेतत्तव दासवर्गे यन्मेपराद्धं कमलेऽब्वितीव ॥
प्रत्येकमस्याः पदयोः सदारो नम्रः सुधांशुर्नखकैतवेन ॥ ११३ ॥
आकेशिकादाच नखेंदुबिंबादेवं गुणैरेव निबद्धमस्याः ॥
विजृंभते कांतिभरेण गात्रं सौदामिनीदुर्मदनिःसहेन ॥ ११४ ॥

---

५३ नाकः=स्वर्गः ५४ मोचा=कदली, ५५. अगः=पर्वतः

वर्णः शिखाया वरवर्णिनीनां सहस्रवर्णादधिकः सुवर्णात् ॥
किमेतदर्णोरुहकार्णिकानामवर्णदाने यदि लब्धवर्णः ॥ ११५ ॥
अस्या वपुर्वर्णविचारणायामेतावदेव प्रतिपत्तुमीशे ॥
विधाय सौरूप्यकथादरिद्रामसौ परिद्रावयते हरिद्रां ॥ ११६ ॥
जगद्दृशां विस्मयकामधेनुः कामार्णवोद्वेल्लनशीतभानुः ॥
गच्छद्गतागामिवधूविधानां साधारणी सृष्टिरियं न धातुः ॥ ११७ ॥
अतिप्रयासेन विधाय वेधा लोकोत्तरं रत्नविशेषमेतत् ॥
निर्विद्य भूयो मम सृष्टिरीदृङ् माभूदिति स्वं शपति स्म शंके ॥ ११८ ॥
अदर्शनात्संप्रति सुंदरीणामेतादृशीनामनुमेयशापः ॥
स्रष्टा कथं स्रक्ष्यति रत्नमीदृङ् न चासृजत्प्रागशपन्न यत्स्वं ॥ ११९ ॥
किंवा कियत्पुण्यमकारि तेन येनांकपर्यंकशयीकृतेयं ॥
पीयूषतः कोटिगुणाधरोष्ठी निर्विश्यते शर्म ममांगयष्टिः ॥ १२० ॥
तत्तादृशं व्यर्थमहो कृतं मे तपस्त्रिलोकीकृतसाधनं यत् ॥
अशेषलोकेशयजीवलोकप्रमोहनीं नैवमिमामविंदे ॥ १२१ ॥
अदर्शि वात्सल्यमहो भृशं नः पितामहेन प्रपितामहेन ॥
मयि स्थिते यः कृपया सहेमां मर्त्याय कस्मैचिददत्त वामां ॥ १२२ ॥
गृण्हातु पुंसः प्रसभं परस्मादस्मत्प्रपौत्रो रसगौरवाय ॥
इत्यन्यदीयीकरणे कृशांग्याः पत्युः प्रजानामथ वाशयः स्यात् ॥ १२३ ॥
आस्तां तदेषा युवतीषु भूषा ममैव भोग्या भवितुं हि योग्या ॥
एनामनादाय वृथा न भूयो निवर्तनीयं दशकंधरेण ॥ १२४ ॥
इतः परं विश्वजगज्जयश्रीलीलाविहारोचितसौधभूमौ ॥
नित्यं ममैवोरसि निस्तुलांगी शेतामियं श्रीरिव केशवस्य ॥ १२५ ॥
इति स मनसा तल्लावण्यामृतस्तुतिपूर्वकं कपटनियमी कामावेशावशेन विचिंतयन् ॥
सविधमसरत्तस्यास्त्रस्यत्कुरंगकुलांगनानयनसुषमाबंदीकारक्षमेक्षणसंपदः ॥ १२६ ॥

तं दृष्ट्वा यतिनायकं नृपसुता शालीनताशालिनी ।
भर्तुः संकटशंकया भृशतरं खिन्नापि संप्रीतधीः ॥
आतिथ्यं विधिवच्चकार मधुरैराराधयंत्यादरा-
द्वाग्भेदैरतिथिप्रशस्तिपिशुनैस्तत्कालकालोचितैः ॥ १२७ ॥

इति श्रीरामचरिते महाकाव्ये द्वादशः सर्गः

उपसंहारः

यः कोदंडमदारयत्पशुपतेः कन्यामपि क्षोणिजां ।
किं चारण्यमवासयत् कपिकुलश्रेष्ठं च देवालये ॥

भूमौ कीर्तिमराजयद्दशमुखं हत्वा च तत्सोदरं ।
स श्रेयः परमं ददातु भवतां रामो रघूणां वरः ॥ १ ॥
पाल्याद् बाल्याभिरामं शिरसि परिलसत्स्वर्णदीवारिपूरे ।
चंचच्चक्रांगचंचूदलितबिसलताखंडवन्मंडयन् वः ॥
पीयूषांशुं सुधाशाक्षितिवरविगलत्स्तोत्रजालस्रवंती ।
वेणीसंप्रापणीयस्थलसलिलनिधिः सर्वदा पार्वतीशः ॥ २ ॥
व्यालीसमुल्लासितचूलीभरा समरकेलीहतासुरशिरो-
नालीगलद्रुधिरपालीपरिभ्रमितकूलीकुला भगवती ॥
नालीकचारुतरनालीकदेहदहनालीकलोचनभवा ।
धूलीकरोतु मम काली कठोरदुरितालीमुदारचरिता ॥ ३ ॥
कोटिलिंगपुरे वासी युवराजो महाकविः ॥
अरीरचदिदं काव्यं रोचतां सुतरां सतां ॥ ४ ॥
कोटिलिंगपुरे वासा भवभालाक्षिसंभवा ॥
काली करोतु लोकानां सततं सकलं शिवम् ॥ ५ ॥
शास्त्रेषु शाततमशास्त्रसमापि बुद्धिः । काव्येषु नव्यनलिनाधिकसौकुमारी ॥
यस्यास्यतामरसलास्यरसा च वाणी । हर्षं न कस्य कुरुते युवराज एषः ॥ ६ ॥
व्याकृत्यादिसमस्तशास्त्रसमुदायांभोधिकुंभीसुतः
काव्यालंकृतिनाटकोद्धसुकृतौ काव्यस्य सत्यं समः ॥
पुण्यः पण्डितराजराजिगजताकुंभींद्रसंभेदने ।
दंभोलिर्युवराजकोविदमणिर्वर्वर्ति सर्वोपरि ॥ ७ ॥
अपि पुरुकृतरीढं पण्डितंमन्यमूढैर्मम तु सुकृतिरत्नं हंत गृण्हन्ति सन्तः ॥
अवगणितमवद्यैर्दर्दुरैरप्ययाप्याः किमनणकमृणालं राजहंसास्त्यजन्ति ॥ ८ ॥

समाप्तं.

---

५६ कुंभीसुतः=अगस्त्यः ५७ काव्यः=शुक्रः

श्रीरामचरितमहाकाव्यस्य शुद्धिपत्रम्.

पृष्ठांकः.	पद्यांकः.	पादांकः.	अशुद्धं.	शुद्धं.
			४४	३४
२	२४	४	सुधाशनान्	सुधाशनान्.
८	९	१	राजराजकल्ये	राजराजकल्पे.
,,	१०	२	उदयेयिवानुदारः	उदेयिवानुदारः
९	२५	४	क्काप्यमंगलं.	क्काप्यपमंगलं.
११	५२	२	स्तं.	स्तां.
,,	५४	४	पालि.	13 पालिं.
,,	५९	३	प्रथम.	प्रथमं.
,,	६०	३	चरालिः	चराली.
,,	६१	३	मनुण्य.	ममुण्य.
१३	८५	२	तं निवर्त्य.	संनिवर्त्य.
,,	८६	४	भागवः	मार्गवः.
,,	८९	४	कुबेरातिर्थि.	कुठारेतिर्थि.
१४	९१	१	त्रसुना.	त्रसुना.
,,	१	१	क्षितीपाल.	क्षितिपाल.
,,	३	४	यत्कतो.	यत्कतौ.
,,	५	२	यदं.	र्यदं.
१५	१४	२	मन्यपुष्टकं.	मान्यपुष्टकं.
,,	१४	३	नि गूहते.	निगूहते.
१६	२७	३	ह्री भय.	ह्रीर्भय.
१७	४०	४	सुभ्रषा	सुभ्रुवा

पृष्ठांकः.	पद्यांकः.	पादांकः.	अशुद्धं.	शुद्धं.
,,	४७	२	गाढितः	गाहितः
१८	५६	३	भूयतः	भूयंत
१९	६४	४	सकल्यकल्यतः	सकल्पकल्पतः
,,	६५	२	विवत्य	पिवत्य
,,	,,	४	यकणा	वकता
२०	७१	२	स्मर	स्मय
,,	८२	३	तन्मृदुतां	चन्मृदुतां
,, टीप	३०	—	शीतलिमेतस्य	शीतलितमेतस्य
२१	४	१	पंजरी	मंजरी
२१ टीप	३५	—	आहितमानरया= कृतादनया	आहितमानया=कृतादरया
२२	६	१	विक्रुम	विक्रम
२३	२१	४	ते जित	तेजित
२६	६८	४	मोदित	मादित
२७	७५	२	मृततुभियं	मृतुभियं
,,	७९	२	कशमर्मर	कृतमर्मर
,,	८६	२	कुंडलता	कुंदलता
२९	१०२	२	महीरूहा	महीरुहा
३०	८	२	तिलकर्मु	तिलकमु
,,	९३	४	मुदयुक्त	मुदयुक्त
,,	८७ टीप	—	सुदर	सुंदर

श्रीरामचरितमहाकाव्यस्य शुद्धिपत्रम्.

पृष्ठांकः.	पद्यांकः.	पादांकः.	अशुद्धं.	शुद्धं.
३१	१२ टीप	—	आम्नातकं	आम्रातकं
३२	३७	२	ज्योत्निष्मतान	ज्योतिष्प्रतान
,,	४०	३	सभ्रू	सभ्रू
३३	५०	१	कुड्मलस्र	कुड्मललस्र
,,	५२	३	धमिल्ल	धंमिल्ल
,,	५६	२	बुभ्व्याः	बुभ्व्या
,,	३४ टीप	—	विचारशून्यः	अविचारशून्यः
३४	६८	२	तुरंग	तरंग
,,	७२	१	वधनां	वधूनां
३५	८४	३	मारुतेन	मारुतेन
३६	५	१	प्रमानिः	प्रमामि
३७	२०	४	तंपीत	तपंति
,,	६२ टीप	—	वीप्संत	वीप्संतं
३८	२५	३	द्रष्टुं	दृष्टुं
३९	३५	४	ताराधिपं	ताराधियं
,,	३९	२	प्रभाकरं	प्राभाकरं
,,	१७ टीप	—	दंड	दंडः
४०	५२	३	आलोक्यतमास्य	आलोक्यतामास्य
,,	१३ टीप	—	मस्त	मस्तं
४४	११	३	मृमै	मूमै
४५	१३	३	श्रंपीत	श्रयंति
४६	३८	४	द्विमांशुः	द्विमांशुः
४७	५३	३	मणीमयी	मणीमयीं
,,	८० टीप	—	द्विजकुल	द्विजकुलं
४८	५७	१	मके	मर्के
४९	११ टीप	—	इन	इनः
५०	२० टीप	—	कार्कवाकव	कार्कवाकवः
,,	२२ टीप	—	ध्वांक्षाराति	ध्वांक्षारातिः
५१	८८	३	लोकोसवे	लोकोत्सवे
,,	१४	३	ह्लाळाय	लालय
५२	१०	४	निर्वृतिः	निर्वृति
५४	४०	३	हषा विष्टा	हषाविष्टा
५५	५४	१	कर्तुं	कर्तुं
,,	५९	१	कानने	कानने
५६	६०	३	सा	स
५७	८४	३	आसन्न	आसन्न
,,	५९ टीप	—	ससादांग	ससादांगः
५८	१७	३	वयंतु	वयं तु
५९	१	२	मधूर	मधुर
६०	७७ टीप	—	चारयो	चारवो
६१	८२ टीप	—	नीला	नीलाः
६६	२०	३	सामर	सा मर

श्रीरामचरितमहाकाव्यस्य शुद्धिपत्रम्.

पृष्ठकः.	पद्यांकः.	पादांकः.	अशुद्धं.	शुद्धं.
६६	२३	३	अवंती	स्रवंती
६८	५२	३	४९ कंदलान्	४८ कंदलाच्
,,	५४	३	विशाचरी	निशाचरी
७१	८७	३	चरित्र	चरित्रं
७२	१६	२	यामियनी	यामियती
७३	३०	१	गतः	गत
,,	,,	२	नर्मकथरीसंक	नर्मकथारसिकं

पृष्ठांकः.	पादांकः.	पादांकः.	अशुद्ध.	शुद्धं
७८	६	३	दशास्य	दशास्यः
८१	४४	४	नयेने	नयने
८२	६१	२	व तंसनीयः	वतंसनीयः
,,	६३	४	विशंकौ	विशंकी
,,	६४	२	क्रियासु	क्रीडासु

समाप्तं.

श्रीरामचरितमहाकाव्यान्तर्गतानां वृत्तानां नामानि.

सर्गः १.

पद्यांकः.	वृत्तनाम.
१–२	गीतिः
३–८५	उपजातिः
८६–८९	वसंततिलका
९०	शिखरिणी

सर्गः २.

पद्यांकः.	वृत्तनाम.
१–६१	माल्यभारा
६२–८४	वसन्ततिलका
८५	मालिनी
८६–८७	शार्दूलविक्रीडितम्
८८	शालिनी
८९–९०	शार्दूलविक्रीडितम्
९१	मालिनी
९२	वसन्ततिलका
९३	शार्दूलविक्रीडितम्
९४	मालिनी

सर्गः ३.

पद्यांकः.	वृत्तनाम.
१–९५	वंशस्थम्
९६	वसन्ततिलका
९७	शार्दूलविक्रीडितम्

सर्गः ४.

पद्यांकः.	वृत्तनाम.
१–९३	द्रुतविलम्बितम्
९४–१००	दोधकम्
१०१	वसन्ततिलका
१०२	शार्दूलविक्रीडितम्

सर्गः ५.

पद्यांकः.	वृत्तनाम.
१–९३	वसन्ततिलका
९४–९५	मन्दाक्रान्ता

सर्गः ६.

पद्यांकः.	वृत्तनाम.
१–९५	उपजातिः
९६	मन्दाक्रान्ता
९७	शार्दूलविक्रीडितम्
९८	वसन्ततिलका
९९	शार्दूलविक्रीडितम्

सर्गः ७.

पद्यांकः.	वृत्तनाम.
१–७३	प्रहर्षिणीयं
७४–७७	शार्दूलविक्रीडितम्
७८–७९	मन्दाक्रान्ता
८०–८२	शार्दूलविक्रीडितम्
८३	वसन्ततिलका
८४	शार्दूलविक्रीडितम्
८५	स्रग्धरा
८६	शार्दूलविक्रीडितम्
८७	मालिनी
८८	पृथ्वी
८९–९१	शिखरिणी
९२–९३	स्रग्धरा
९४	हरिणी

सर्गः ८.

पद्यांकः.	वृत्तनाम.
१–११०	अनुष्टुभ्
१११	मालिनी

सर्गः ९.

पद्यांकः.	वृत्तनाम.
१–५३	रथोद्धता
५४–५७	वसंततिलका
५८–५९	स्रग्धरा
६०	हरिणी
६१	शार्दूलविक्रीडितम्
६२	स्रग्धरा
६३–६९	मालिनी
७०	स्रग्धरा
७१	वसंततिलका
७२	शिखरिणी

सर्गः १०.

पद्यांकः.	वृत्तनाम.
१–१२	वंशस्थं
१३	शार्दूलविक्रीडितम्
१४	मंदाक्रांता

सर्गः ११.

पद्यांकः.	वृत्तनाम.
१–४२	तोटकं
४३–६८	शार्दूलविक्रीडितं
६९	स्रग्धरा

सर्गः १२.

पद्यांकः.	वृत्तनाम.
१–१२५	उपजातिः
१२६	हरिणी
१२७	शार्दूलविक्रीडितं

उपसंहारः

पद्यांकः.	वृत्तनाम.
१	शार्दूलविक्रीडितं
२	स्रग्धरा
३	अमृतध्वनिः

श्रीरामचरितमहाकाव्यान्तर्गतानां वृत्तानां नामानि

४–५	अनुष्टुभ्	७	शार्दूलविक्रीडितं
६	वसंततिलका	८	मालिनी

रामकाव्यांतर्गतवृत्तानां संख्या

अनुक्रमांक:	वृत्तनाम	संख्या	पादाक्षराणि. लक्षणं
१	अनुष्टुभ:–	११२	८ { श्लोके षष्ठं गुरुज्ञेयं सर्वत्र लघु पंचमं द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥
२	दोधकानि–	७	११ दोधकमिच्छति भत्रितयाद्गौ
३	उपजातय:–	३०३	११ { स्यादिंद्रवज्रा यदि तौ जगौग उपेंद्रवज्रा जतजास्ततो गौ। अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता:
४	शालिनी–	१	११ शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः
५	रथोद्धता:–	५३	११ रान्नराविह रथोद्धता लगौ
६	माल्यभारा:–	६१	११–१२ नोपलब्धं
७	द्रुतविलंबितानि–	१३	१२ द्रुतविलंबितमाह नभौ भरौ
८	वंशस्थानि–	१८७	१२ जतौ तु वंशस्थमुदीरितं जरौ
९	तोटकानि–	४२	१२ इह तोटकमंबुधिसैः प्रथितं
१०	प्रहर्षणीयानि–	७३	१३ म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षणीयं
११	वसंततिलका:–	१३१	१४ उक्ता वसंततिलका तभजा जगौ गः
१२	मालिन्य:	१३	१५ ननमयययुतेयं मालिनी भोगिलोकैः
१३	शिखरिण्य:	५	१७ रसै रुद्रैश्छिन्ना यमनसभलागःशिखरिणी
१४	मंदाक्रांता:–	६	१७ मंदाक्रांता जलधिषडगैर्म्भौ नतौ ताद्गुरूचेत्
१५	पृथ्वी	१	१७ जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः
१६	हरिण्य:	३	१७ रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा
१७	शार्दूलविक्रीडितानि	४९	१९ सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितं
१८	स्रग्धरा:	९	२१ म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयं
१९	अमृतध्वनि:	१	२२ (नोपलब्धं)
२०	गीती	२	३० (मात्राः) लक्ष्मैतत् सप्तगणा गोपेता भवति नेह विषमे जः। षष्ठोयं न लघू वा प्रथमेर्द्धे नियतमार्यायाः॥ आर्याप्रथोदलोक्तं यदि कथमपि लक्षणंभवेदुभयम दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजंगेशः॥
	संकलितं	११५२	

[काव्येतिहास-संग्रहांतर्गतः]

[१०.]

श्रीशंकराचार्य विरचितः

शतश्लोकीत्यपरनामा

वेदान्तकेसरी

ग्रंथः

सटीकः

मोडकोपाह्वेन बल्लालसूनुना बी. ए. उपपदधारिणा

जनार्दनेन

सुसंस्कृत्य

प्रकाशितः

स च

पुण्यपत्तने ज्ञानप्रकाशनाम्नि मुद्राक्षरयंत्रालये

सकीलकैः मुद्रितः

शालिवाहन शकाब्दाः १८०८.

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

वेदान्तकेसरीग्रंथस्थप्रकरणानामनुक्रमणिका.

अनुक्रमांकः	प्रकरणनाम.	पृष्ठं.
१.	विज्ञानकोशः	१
२.	आनंदकोशः	३६
३.	जगन्मिथ्यात्वं	४२
४.	कर्ममीमांसा	४७
५.	टीकाविरहिताः श्लोकाः	५१
६.	अवशिष्टटीका.	६

आचार्यकृतः

वेदान्तकेसरी.

—:•••:—

दृष्टांतो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोर्ज्ञानदातुः
स्पर्शश्चेत्तत्र कल्प्यः स नयति यदहो स्वर्णतामश्मसारं
न स्पर्शत्वं तथापि श्रितचरणयुगे सद्गुरुः स्वीयशिष्ये
स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन वा लौकिकोऽपि ॥ १ ॥
यद्वच्छ्रीखंडवृक्षप्रसृतपरिमलेनाभितोऽन्येपि वृक्षाः
शश्वत्सौगंध्यभाजोऽप्यतनुतनुभृतां तापमुन्मूलयंति
आचार्याल्लब्धबोधा अपि विधिवशतः संनिधौ संस्थितानां
त्रेधा तापं च पापं सकरुणहृदयाः स्वोक्तिभिः क्षालयंति ॥ २ ॥

श्रीगणेशाय नमः ॥ ज्ञानदातुः सद्गुरोः त्रिभुवनजठरे दृष्टान्तो नैव दृष्टः। क्षुद्रविद्योपदेष्टॄणां गुरूणां दृष्टांतः कथंचिदुपलभ्यते । परंतु न हि ज्ञानेन सदृशं पवित्रमिह विद्यते इत्युक्तत्वात् ज्ञानदातुर्दृष्टान्तः त्रिभुवनजठरांतर्वर्तिषु दैवादिषु लौकिकेषु नानाविचित्रवस्तुषु नैव दृष्टः । अथ मनाक् साम्यदर्शने स्पर्शपाषाणो दृष्टान्तत्वेन कल्प्यः कल्पनीयश्चेत्तथापि न घटत इत्याह । स नयतीति । स स्पर्शाश्मा अश्मसारं लोहं यद्यपि स्वर्णतां नयति प्रापयति तथापि स्पर्शत्वं न प्रापयति स्वसदृशं न करोतीत्यर्थः । सद्गुरुस्तु । श्रितचरणयुगे स्वीये शिष्ये स्वीयं साम्यं विधत्ते । तेन कारणेन स्पर्शादेर्दृष्टांतानर्हत्वाद्गुरुर्निरुपमो दृष्टान्तशून्यः तथा लौकिकोपि प्रपंचातीतोपि न दृष्टः ॥ आत्माकारत्वात् । ज्ञानी त्वात्मैव मे मतमिति भगवद्वाक्यात् ॥ १ ॥

अथ श्रीगुरोः सन्निधानमात्रेणैव शिष्यः कृतार्थतामेति किंपुनरुपदेशादित्याह । श्रीखंडवृक्षो मुख्यश्चंदनवृक्षः । तस्मात् प्रसृतो यः परिमलः तेनाभितः समंतत अन्येपि वृक्षा शश्वन्निरंतरं सौगंध्यभाजो भवंति । अथ न केवलं सौगंध्यभाजः किन्तु अतनुतनुभृतां बहूनां सर्वजातीयानां लोकानां तापमुन्मूलयंति । बहूनामिति तारतम्यवर्ज्यं । तद्वदाचार्याद्विधिवशाद्भाग्यवशाल्लब्धबोधाः संतः यदृच्छया सन्निधौ संस्थितानां सर्वजनानां यथाधिकारं कर्मोपासनाज्ञानकांडनिरूपकाभिः स्वोक्तिभिः स्वैरकथाभिः त्रेधा तापं च पापं चोन्मूलयंति विधिवशादिति पदेन बोधलब्धौ दुर्लभत्वं सूचितं ॥ २ ॥

आत्मानात्मप्रतीतिः प्रथममभिहिता सत्यमिथ्यात्वयोगाद्
द्वेधा ब्रह्मप्रतीतिर्निगमनिगदिता स्वानुभूत्योपपत्त्या ।
आद्या देहानुबंधाद्भवति तदपरा सा च सर्वात्मकत्वा-
दादौ ब्रह्माहमस्मीत्यनुभव उदिते खल्विदं ब्रह्म पश्चात् ॥ ३ ॥
आत्मा चिद्वित्सुखात्माऽनुभवपरिचितः सर्वदेहादियंता
सत्येवं मूढबुद्धिर्भजति ननु जनोऽनित्यदेहात्मबुद्धिं
बाह्यास्थिस्नायुमज्जापलरुधिरवसाचर्ममेदोयुगंत-
र्विण्मूत्रश्लेष्मपूर्णं स्वपरवपुरहो संविदित्वाऽपि भूयः ॥ ४ ॥
देहस्त्रीपुत्रमित्रानुचरहयवृषास्तोषहेतुर्ममेत्थं
सर्वे स्वायुर्नयन्ति प्रथितमलममी मांसमीमांसयेह

अथात्मानात्मप्रतीतिप्रकारमाह । प्रथमं मूलतस्तत्त्वविचारे क्रियमाणे सत्यं मिथ्या चेति कोटिद्वयमासीत् । तथा च सत्यमिथ्यात्वयोगादात्मानात्मप्रतीतिश्च । सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतेः सत्यं ज्ञानं मिथ्या तद्विपरीतमज्ञानं एवं सत्यस्य ब्रह्मणः प्रतीतिर्द्वेधा निगमनिगदिता वेदोक्ता अथ तामेवाह । स्वेति । स्वानुभूत्या उपपत्त्या चैवं द्वेधा प्रतीतिः । तत्राद्या स्वानुभूत्या या प्रतीतिः सा देहानुबंधात् शरीरावच्छेदेन भवति । तथोपपत्त्या या प्रतीतिः सा सर्वात्मकत्वात्समष्टिरूपा । अथात्र हेतुमाह । आदौ देहावच्छेदेन ब्रह्माहमस्मीत्यनुभवे उदिते सति पश्चात्तदनंतरं सर्वं खल्विदं ब्रह्मेति उपपत्त्या आत्मप्रतीतिर्भवति ॥ ३ ॥

एवमुद्देशमात्रेणात्मप्रतीतिमभिधायेदानीं विशेषतो निरूपयति । आत्मा चिद्वित्सुखात्मा वर्तते । चिच्चैतन्यं विद्विज्ञानं सुखं परमानंदः तदेतत्त्रयमप्यात्मा स्वरूपं यस्य स तथा । अथ न केवलं एवंविधमात्मस्वरूपं उपनिषद्वाक्यैरेव ज्ञातव्यमित्याह । अनुभवेति । किंभूत आत्मा । अनुभवपरिचितः अनुभवेन परिचितः निरंतराभ्यासेन ज्ञातः अथानुभवमेवाह सर्वदेहादियंतेति । सर्वे च ते देहादयश्च आदि शब्देन इंद्रियप्राणास्तेषां यंता नियंता चालकत्वेन देहनियंता चिद्रूपः इंद्रियनियंतृत्वेन संविद्रूपः सुषुप्तावानंदरूप इत्यवस्थात्रयेप्यनुभूयत इत्यर्थः । अहो इत्याश्चर्ये । एवं सत्यपि मूढबुद्धिः जनः अनित्यदेहादौ आत्मबुद्धिं भजति अनित्यश्चासौ देहश्च तत्रात्मबुद्धिं देह एवात्मेति मनुते अथ देहोप्यात्मकल्पनार्हो भविष्यतीति चेन्नेत्याह । बाह्य इति देहे बाह्ये अस्थीनि च स्नायवश्च सूक्ष्मशिरा मज्जा पलं मांसं रुधिरं रक्तं वसा चर्म मेदोयुक् अंतः विण्मूत्रश्लेष्मपूर्णं एवंविधं जुगुप्सास्पदं स्वपरवपुः स्वकीयं परकीयं वा शरीरं विदित्वापि भूयो देहात्मबुद्धिं भजत इति महदाश्चर्यमित्यर्थः ॥ ४ ॥

अथ पुनराश्चर्यमेव दर्शयन्नाह अमी सर्वे लोकाः इहास्मिन् जगति इत्थं मांसमी-

एते जीवंति येन व्यवहृतिपटवो येन सौभाग्यभाज-
स्तं प्राणाधीशमंतर्गतममृतममुं नैव मीमांसयंति ॥ ५ ॥
कश्चित्कीटः कथंचित्पटुमतिरभितः कंटकानां कुटीरं
कुर्वंस्तेनैव साकं व्यवहृतिविधये चेष्टते यावदायुः
तद्वज्जीवोऽपि नानाचरितसमुदितैः कर्मभिः स्थूलदेहं
निर्मायात्रैव तिष्ठन्ननुदिनममुना साकमभ्येति भूमौ ॥ ६ ॥
स्त्रीकुर्वन्व्याघ्रवेषं स्वजठरभृतये भीषयन्यश्च मुग्धान्
मत्वा व्याघ्रोऽहमित्थं स नरपशुमुखान्बाधते किं नु सत्वान्
मत्वा स्त्रीवेषधारी स्त्र्यहमिति कुरुते किं नटो भर्तुरिच्छां
तद्वच्छारीर आत्मा पृथगनुभवतो देहतो यस्य साक्षी ॥ ७ ॥

मांसया मांसविचारेणालं पूर्णं स्वायुर्नयंति स्वकीयमायुः परिकलयंति किंभूतमायुः प्रथितं वंशविज्ञानादिगुणैः ख्यातमपीत्यर्थः। इत्थं कथमित्याह । देहेत्यादि । देहः स्वदेहः स्त्री पुत्रः मित्रं अनुचरः सेवकः हयोश्वः वृषो बलीवर्दः एते मम तोषहेतवो भवंतीत्यभिमानेन तथा एते पुष्टाः कृशा वेति भरणपोषणरक्षणादिभिर्दृढप्रेमानुबंधेन स्वायुर्नयंति । देहभृतामिदमेव प्रयोजनमिति मत्वा व्यर्थं व्ययीकुर्वंति । अथ गूढमात्मतत्वं तैः परमप्रयोजनत्वेन कथं ज्ञेयं । न तत्र तेषामपराधः किंतु तद्गतमौढ्यस्य । अथ तदेवाह । एत इति । एते देहस्त्रीपुत्रादयः येन कृत्वा जीवंति । तथा येन व्यवहृतिपटवः स्वव्यवहारक्षमा भवंति तथा येन सौभाग्यं सौंदर्यं भजंति मृतशरीरे तथात्वादर्शनादित्यर्थः। अंतर्गतं अंतर्यामित्वेनास्थितं प्राणेशं प्राणमुख्यं अमृतं म्रियमाणेषु देहेषु अपि अमरणशीलं अमुं अनुभवैकवेद्यं नैव मीमांसयंतीति महदाश्चर्यमित्यर्थः ॥ ५ ॥

अथ देहात्मसाहचर्यं दृष्टांतेन दर्शयति । यथा कश्चित्पटुमतिः कीटः कथंचिन्निजकफोद्भूतसूत्रयत्नैः कंटकानां कुटीरं कुर्वन् व्यवहृतिविधये व्यवहारसिद्धये यावदायुश्चेष्टते इतस्ततः पर्यटति तद्वज्जीवोपि नानाचरितसमुदितैः अनेकविधानि चरितानि क्रियमाणसंचितानि तेभ्यः समुदितैः प्रारब्धकर्मभिः देहं शरीरं निर्माय विरचय्य ततोत्रैव देहे तिष्ठन्नमुना देहेन साकं सहैवानुदिनं भूमौ अभ्येति पर्यटति । अयमर्थः ॥ कंटककुटीरवदचेतनो देहः स्वतो न चलति मृतशरीरे चलनादर्शनात् अतस्तस्य कश्चिच्चालको वक्तव्यः स एव जीवः । तथा च रथाश्वन्यायवच्चालकव्यतिरेकेण देहो न चलति । तथा देहव्यतिरेकेण तस्य चालकत्वं न युज्यत इत्युभयोः साहचर्यं ॥ ६ ॥

अथ प्राप्तोपि देहः पारमार्थिको न भवति किंत्वविद्याकल्पितत्वात्कृत्रिमोस्तीति तदनुरूपं न कार्यमिति दृष्टांतेन द्रढयति । यःकश्चित्पुरुषः स्वजठरभृतये भिक्षया स्त्री-

स्वं बालं रोदमानं चिरतरसमयं* शांतिमानेतुमग्रे
द्राक्षं खर्जूरमाम्रं सुकदलमथवा योजयत्यंबिकास्य
तद्वच्चेतोऽतिमूढं बहुजननभवान्मौढ्यसंस्कारयोगात्
बोधोपायैरनेकैरवशमुपनिषद्बोधयामास सम्यक् ॥ ८ ॥
यत्प्रीत्या प्रीतिपात्रं तनुयुवतितनूजार्थमुख्यं स तस्मात्
प्रेयानात्माथ शोकास्पदमितरदतः प्रेय एतत्कथं स्यात्
भार्याद्यं जीवितार्थी वितरति च वपुः स्वात्मनः श्रेय इच्छं-
स्तस्मादात्मानमेव प्रियमधिकमुपासीत विद्वान्न चान्यत् ॥ ९ ॥

दरपूरणाय कृत्रिमं व्याघ्रवेषं स्वीकुर्वन् तेन मुग्धान् बालिशांश्च भीषयन् त्रासयन् आस्ते । स अहं व्याघ्र इत्थं मत्वा नरपशुमुखान् सत्वान् प्राणिनो बाधते किन्तु व्याघ्रवेषं कृत्रिमं जानन् तूष्णीमास्ते व्याघ्रवेषानुरूपं कर्म करोतीत्यर्थः अथ तदेव पुनर्दृष्टांतेन द्रढयति । मत्वेति स्त्रीवेषधारी नटः अहं स्त्रीति मत्वा भर्तुरिच्छां न कुरुते । स्त्रीवेषानुरूपैर्हावभावैरन्यान् पुरुषान्प्रलोभयति । परंतु स्वयं स्त्रियामिति मत्वा रमणयोगे इच्छां न कुरुते तद्वच्छरीरावच्छिन्न आत्मा देहतः देहानुभवेन पृथगस्ति । यतः स साक्षी तटस्थः तेन देहानुरूपा चेष्टा न कार्या स्वरूपानुरूपमेव स्थातव्यमित्यर्थः ॥ ७ ॥

अथ बहुप्रकारैरात्मप्रतीतिं दर्शयंत्याः श्रुतेः कौशलमाह । अंबिका माता चिरतरसमयं रोदमानं स्वबालं शांतिमानेतुं तूष्णींभावं प्रापयितुं अस्य बालस्याग्रे द्राक्षं खर्जूर माम्रं सुकदलं वा योजयति येनकेनाप्यभीष्टफलेनायं रोदनादुपशमं प्राप्नोत्वित्यर्थः तद्वद्बहुजननभवान्मौढ्यसंस्कारयोगादवशं चंचलं सदातिमूढं अज्ञानोपहतं चेतः उपनिषत्सम्यग्यथाधिकारं अनेकैर्बोधोपायैरात्मज्ञानोपायैर्बोधयामास आत्मप्रतिपत्तौ बहुषु उपायेषु प्रोक्तेषु सत्सु एकोपि प्रतिफलिष्यतीत्यर्थः ॥ ८ ॥

अथात्मनः सर्वापेक्षया प्रियत्वमाह । तस्माद् वक्ष्यमाणाद् विषयजातात् सकाशात् स आत्मा प्रेयान् परमप्रेमास्पदं भवति । स कः तनुयुवतितनूजार्थमुख्यं यद्विषयजातं तत् यत्प्रीत्या प्रीतिपात्रं भवति यस्य प्रीतिर्यत्प्रीतिस्तया सर्वं प्रीतिपात्रं अत्रायमर्थः । सुखदुःखान्यतरसाक्षात्कारो भोगः स तु आत्मन एव युज्यते अतो विषयभोगार्थं प्रवृत्तस्य प्रथममात्मप्रतीतिरुद्भिद्य तया मूलभूतया उक्तं विषयजातं प्रीतिपात्रं भवति । तत्रापि प्रथमं तनुः शरीरं भोगसाधनत्वात्ततो भोगेष्वंतरंगा युवतिः उभयप्रीतिजन्यस्तनूजः पुत्रस्ततस्तन्निर्वाहकोर्थः द्रव्यं ततोप्यर्थसाध्यं अन्यदन्नपानवस्त्रतांबूलादिकं प्रीतिपात्रं भवति तथा च मुख्या प्रीतिः आत्मनस्तदधीना गौणा प्रीतिरन्येषां इति प्रत्यक्षसिद्धमेवास्ति एवं यस्य मुख्या

* चिरसमयममुं इति पाठांतरं.

यस्माद्यावत्प्रियं स्यादिह हि विषयतस्तावदस्मिन् प्रियत्वं
यावद्दुःखं च यस्माद्भवति खलु ततस्तावदेवाप्रियत्वं
नैकस्मिन्सर्वकालेस्त्युभयमपि कदाप्यप्रियोऽपि प्रियः स्यात्
प्रेयानप्यप्रियो वा सततमपि ततः प्रेय आत्माख्यवस्तु ॥ १० ॥

प्रीतिः स एवात्मा प्रेयान् इत्यर्थः । भवत्वात्मा प्रेयान् तथापि विषयजातमपि प्रीति पात्रत्वादुपास्यमेवेत्यागतं इत्याशंक्य विषयेषु प्रीतिपात्रत्वं प्रातिभासिकं तत्र पारमार्थिकं दुःखपात्रत्वमेवास्तीत्याह। इतरदिति। इतरविषयजातं शोकास्पदमित्यनुभवसिद्धं आदिमध्यावसानेषु यद्दुःखं तत् दुःखास्पदमेव । उक्तं च। अर्जने रक्षणे नाशे क्लेशदो विषयो भवेत् । सुखाय सज्जते तत्र मूढधीरातिविस्मय इति । एवमन्वयव्यतिरेकाभ्यां दुःखास्पदमेतद्विषयजातं प्रेयः कथं स्यात् न स्यादेवेत्यर्थः। तस्मात् कारणात् पंडितः अधिकं यथा भवति तथा प्रियं प्रियतमं आत्मानमेवोपासीत न चान्यच्छरीराद्यं अथात्मनः सर्वेभ्योधिकत्वं प्रकटयति भार्याद्यमिति । जीवितार्थी पुमान् भार्याद्यं वितराति पुत्रवित्ताद्यमपि दत्वा स्वात्मानं रक्षति आत्मानं सततं रक्षेद् दारैरपि धनैरपि इत्युक्तत्वात् । अथ शरीरेप्यात्मानिषेधार्थमाह । वपुरिति । आत्मनो जीवस्य श्रेयः सुकृतातिशयमिच्छन् वपुर्वितराति भृगुपतनेन गंगाप्रवेशेन क्षात्रधर्मेण वा शरीरमर्पयति एवमात्यंतिकं प्रियत्वं आत्मन एव शरीरादिनामापेक्षिकमित्यर्थः ॥ ९ ॥

अथापेक्षितं प्रियत्वं विविच्याह इह विषयभोगे यस्माद्भार्यादिविषयतःसकाशाद्यावत्सुखं भवति तावदेवास्मिन्विषये प्रियत्वं तथा यस्माद्भार्यादिविषयतः सकाशात् यावद्दुःखं तावदेवास्मिन्नप्रियत्वं एवमुभयमपि प्रियत्वमप्रियत्वं वा एकस्मिन्विषये सर्वदा नास्ति यतः कदापि अप्रियोपि कार्यवशात्प्रियः स्यात् तथा कदापि प्रेयानपि भार्यादि विषयः निमित्तवशेन कालवशेन वा अप्रियः स्यात् । तत आत्माख्यवस्तु सततमपि प्रेयः अत्र मूलश्रुतिः न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवंत्यात्मनस्तु कामाय पुत्राः प्रिया भवंति तथा तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोन्यस्मात्सर्वस्मादंतरतरं यदयमात्मा स योन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात् प्रियं रोत्स्यतीति ईश्वरोहं तथैव स्यादात्मानमेव प्रियमुपासीत सत्यं आत्मानमेव प्रियमुपास्ते नेहास्य प्रियं प्रमायुक्तं भवति । भाष्यं। याज्ञवल्क्यो मैत्रेयीं प्रति वदति । अरे मैत्रेयी पुत्राणां कामाय पुत्राः प्रिया न भवंति किंतु आत्मनस्तु कामाय पुत्राः प्रिया भवंति प्रथमतः स्वीय आत्मा प्रियः स्यात्तर्हि तदर्थं पुत्रा मृग्यंते । यथा पुत्राय कदलीफलेन भाव्यमिति रथ्यां गतस्य मुख्या पुत्रप्रीतिरेवोद्दिष्टा । तदर्थं फलादेः तद्वन्मुख्यात्मप्रीतिः तदर्थं पुत्रादिप्रीतिः । एवमात्मप्रीतिविशेषत्वेनैव सर्वेषां प्रीतिः। अथ तदेतदिति । तत्र पुत्रवित्तयोरेषणातिप्रियत्वेन दुस्त्यजा अथ तदेतदात्माख्यं वस्तु पुत्रात्प्रेयः स्वभावतः पुत्रः प्रेयान् तदपेक्षयाप्येतत्प्रेय इत्यर्थः। तथैव वित्तादपि प्रेयः अथ किं प्रत्येकं वक्तव्यं।

श्रेयः प्रेयश्च लोके द्विविधमभिहितं काम्यमात्यंतिकं च
काम्यं दुःखैकबीजं* क्षणलवविरसं तच्चिकीर्षंति मंदाः
ब्रह्मैवात्यंतिकं यन्निरतिशयसुखस्यास्पदं संश्रयंते
तत्त्वज्ञास्तच्च काठोपनिषदभिहितं षड्विधायां च वल्ल्यां ॥ ११ ॥
आत्मांभोधेस्तरंगोस्म्यहमिति गमने भावयन्नासनस्थः
संवित्सूत्रानुबद्धो† मणिरहमिति वाऽस्मींद्रियार्थप्रतीतौ
दृष्टोस्म्यात्मावलोकादिति शयनविधौ मग्न आनंदसिंधा-
वंतर्निष्ठो मुमुक्षुः स खलु तनुभृतां यो नयत्येवमायुः ॥ १२ ॥

अन्यस्मादपि सर्वस्मात्प्रीतिपात्रात्प्रेयः न हि केवलं वाङ्मात्रेणास्य प्रियत्वं । अतो युक्तिमाह । अंतरतरमिति यद्यस्मात्कारणात्स यः अयमात्मा अंतरं भवति अंतरतरमित्यांतरं अंतरं पुत्रादि ततोप्यांतरं युक्त्यंतरमाह । अन्यमिति अयात्मनः सकाशात् अन्यं प्रियमिति ब्रुवाणं पुरुषं प्रति इति ब्रुयात् । इतीति किं । तवाभिमतं यत्पुत्र वित्तादि प्रियं तद्रोत्स्यति शोकास्पदं भवति उत्पत्तिस्थितिविनाशादिकालत्रयेपि दुःख हेतुत्वात् एवं यस्माद्दुःखं भवति तत्कथं प्रियत्वेन गण्यते । तदुक्तं भगवता । ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यंतवंतः कौंतेय न तेषु रमते बुधः । यथा यथा विषया दुःखहेतवः इति किमर्थं ईश्वरः किं तथैव स्यान्नेवेत्यर्थः । तस्मादात्मानमेव प्रियमुपासीत न पुत्रादि एवं य आत्मानमेवोपास्ते अस्य ह इति निश्चयेन प्रियं पुत्रादि प्रमायुक्तं प्रमाविषयो न भवति न स्फुरति घृतास्वादे तैलभक्षणवदित्यर्थ तदुक्तं भगवता । यं लब्ध्वा चापरं लाभं मन्यते नाधिकं तत इति ॥ १० ॥

अथात्र कठोपनिषदं संवादयति । लोके श्रेयः प्रेयश्च द्विविधमभिहितं प्रोक्तं । श्रेयः सुकृतसाधनं प्रेयः प्रेमास्पदं तद् द्वेधा । काम्यमात्यंतिकं च काम्यं श्रेयः फलोद्देशेन क्रियमाणं उपयाचितादिकं च । आत्यंतिकं मोक्षसाधनं तथा प्रेयोपि काम्यं जाया पुत्रादि आत्यंतिकं आत्माख्यं तत्र श्रेयः प्रेयो वा यत्काम्यं तद् दुःखैकबीजं दुःखनिदानं तर्हि तत्र लोकानां प्रवृत्तिः कथं दृश्यते इत्यत आह । क्षणलवविरसं शुक्तिकारजतवत् निमिषमात्रं दृष्टिरम्यं तन्मंदाः मूर्खाश्चिकीर्षंति वांछंति । तथा आत्यंतिकं श्रेयो प्रेयो वा ब्रह्मैव यतो निरतिशयसुखास्पदं तत्त्वज्ञाः श्रयंते इत्येतत्प्रमेयं कठवल्ल्युपनिषदि अभिहितं अथ कठोपनिषदो बहुधाः पठिताः संति । प्रकृते एतत्प्रमेयं कुत्र स्थले निरूपितमस्तीत्यत आह षड्विधायां च वल्ल्यां ॥ ११ ॥

अथ ब्रह्मैकत्वभावनया निष्पन्नस्यांतर्निष्ठस्य स्वरूपं श्लोकद्वयेनाह । एवं निरूपितप्रकारेण यो मुमुक्षुरायुर्नयति परिकलयति सोंतर्निष्ठ इत्युच्यते । अथ किं कुर्वन आयुः परिकलयतीत्याह आत्मेति । गमने अहमात्मांभोधेस्तरंग इति भावयन् स्थानांतर-

* माजं इति पाठांतरं. † विद्धो इति पाठांतरं.

वैराजव्यष्टिरूपं जगदखिलमिदं नामरूपात्मकं स्या-
दंतस्थप्राणमुख्यात्प्रचलति च पुनर्वेत्ति सर्वान्पदार्थान्
नायं कर्त्ता न भोक्ता सवितृवदिति यो ज्ञानविज्ञानपूर्णः
साक्षादित्थं विजानन्व्यवहरति परात्मानुसंधानपूर्वं ॥ १३ ॥
नैर्वेद्यं ज्ञानगर्भं द्विविधमभिहितं तत्र वैराग्यमाद्यं
प्रायो दुःखावलोकाद्भवति गृहसुहृत्पुत्रवित्तैषणादेः
अन्यद् ज्ञानोपदेशाद्यदुदितविषये वांतवद्धेयता स्यात्
प्रव्रज्यापि द्विधास्यान्नियमितमनसां गेहतो देहतश्च ॥ १४ ॥

चलने सति यथा तरंगो बाह्याभ्यंतरतो जलमय एव सन् इतस्ततश्चलति एवमहं जीवोप्यगाधस्य आत्मसमुद्रस्य तरंग इवास्मीति भावयन् गच्छतीत्यर्थः । क्रीडन्भूमिरपामिवेति श्रुतेः । अथासनस्थः यथास्थितो मुमुक्षुः संवित्सूत्रानुविद्धो मणिरहमस्मीति भावयन् संविद्रूपं यत्सूत्रं तेनानुविद्धः प्रोतः अहं जीवलक्षणो मणिरस्मीति भावयन्नास्ते । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवेति भगवद्वचनात् । एवं देहव्यापारे अंतर्निष्ठत्वं दर्शयन् इदानीमिंद्रियव्यापारे निरूपयति । दृष्ट इति । इंद्रियार्थप्रतीतौ सत्यां आत्मावलोकादात्मदर्शनान्ममेदानीं आत्मदर्शनं वृत्तमिति मत्वा दृष्टोस्मीति भावयन् अथेंद्रियोपरमेप्याह । शयनविधाविति । शयनविधौ सुषुप्तिकालांते अहमानंदसिंधौ मग्नः अभूवमिति भावयन् ॥ १२ ॥

अथ द्वितीयं श्लोकमाह । ज्ञानं शास्त्रोत्थं विज्ञानमनुभवः ताभ्यां पूर्णो यः पुमान् भवति साक्षादित्थमिति विजानन् आत्मानुसंधानपूर्वं व्यवहरतीति किमित्याशंक्याह वैराजेति अत्रैतदुक्तं भवति आत्माकारांतःकरणप्रवृत्तिः पुमान्यदा बाह्यदृष्टिर्भवति । तदा नामरूपात्मकं अखिलं समग्रं विचित्रं जगत् स्थूलसमष्टिरूपस्य जगतो विराजो ब्रह्मणो व्यष्टिरूपमिति पश्यन् कुत्सानिंदासूयाव्यतिरिक्तः सन् व्यवहरति तथा व्यष्टिरूपं जगत् अंतस्थप्राणमुख्याच्चिद्रूपात् प्रचलति व्यापारं करोति तथा तस्मादेव संविद्रूपात्पदार्थान्वेत्तीति विजानन् तदनुसंधानपूर्वमेव व्यवहरति । तथायमात्मा सवितृवत् सूर्यवन्न कर्ता चालकत्वेपि कर्तृत्वाभिमानशून्यः तथा न भोक्ता । पदार्थग्राहकत्वेपि भोक्तृत्वाद्यभिमानशून्यः तद्वद्व्यवहरतीति तात्पर्यं ॥ १३ ॥

अथ द्विप्रकारवैराग्यमाह । तत्र विज्ञानोपाये वैराग्यं द्विविधमभिहितं प्रोक्तं अथ तस्य द्वैविध्यमाह एकं नैर्वेद्यं अपरं ज्ञानगर्भं च निर्वेदाद्दुःखादुत्पन्नं नैर्वेद्यं तदेवाह । आद्यं नैर्वेद्यं । गृहसुहृत्पुत्रवित्तैषणादेः प्रायो दुःखावलोकाद्भवति । एतदग्रे दुःखजनकं भविष्यतीति वृश्चिकस्पर्शवत् दुःखदर्शनान्नाद्रियते आदृतमपि त्यज्यते अथ ज्ञानगर्भं वैराग्यमाह । अन्यदिति । अन्यद् द्वितीयं ज्ञानोपदेशात् भवति प्रथमं दुःखदर्शनादित्युक्तं अपरं आत्मातिरिक्तं सर्वं दुःखरूपं इत्याद्युपदेशादुदितविषये

यःकश्चित्सौख्यहेतोस्त्रिजगति यतते नैव दुःखस्य हेतो-
र्देहेऽहंता तदुत्था स्वविषयममता चेति दुःखास्पदे द्वे
जानन् रोगाभिघाताद्यनुभवति यतो नित्यदेहात्मबुद्धि-
र्भार्यापुत्रार्थनाशे विपदमथ परामेति नारातिनाशे ॥ १५ ॥
तिष्ठन् गेहे गृहेशोप्यतिथिरिव निजं धाम गंतुं चिकीर्षु-
र्देहस्थे दुःखसौख्ये न भजति सहसा निर्ममत्वाभिमानः
आयात्वायास्यतीदं जलदपटलवद्यातु यास्यत्यवश्यं
देहाद्यं सर्वमेतत्प्रविदितविषयो यश्च तिष्ठत्ययत्नः ॥ १६ ॥

उक्तविषये सुहृत्पुत्रकलत्रादिके वांतवद्धेयता स्यात् यथा जुगुप्सया वांते जाते सति पुनस्तद्ग्रहणेच्छा नोत्पद्यते । तद्वद्विषयवैरस्यज्ञानात् पुनर्विवेकिनः तद्ग्रहणेच्छा नोत्पद्यते । तदुक्तं वासिष्ठे । बुध्वाप्यत्यंतवैरस्यं यः पदार्थेषु दुर्मतिः । बध्नाति वासनां भूयो नरो नासौ स गर्दभ इति । अथ प्रव्रज्यापि द्विधा भवति प्रथमं गेहतो गृहात् प्रव्रज्या । अपरा देहतश्च । देहेऽभिमानशून्यत्वमेव देहतः प्रव्रज्येत्यर्थः ॥१४॥

अथोपदेशप्रकारमाह । त्रिजगति लोकत्रयेपि यःकश्चित्पुरुषः सौख्यहेतोः सुखं मे भूयादिति यतते प्रयत्नं करोति परंतु दुःखस्य हेतोः नैव यतते एवं सति या देहे अहंता तथा तदुत्था देहहितार्थमुत्पन्ना स्वविषयममता चेति दुःखास्पदे दुःखस्थाने भवतः एवं जानन्नपि नित्यदेहात्मबुद्धिः पुरुषः रोगाभिघाताद्यनुभवति रोगो ज्वरादिः अभिघातस्ताडनादि एवं देहोहमिति बुध्या रोगाभिघातादि दुःखमनुभवति तथा भार्यापुत्रादिषु ममतानिवेशेन तन्नाशे परां उत्कृष्टां विपदमेति प्राप्नोति परंत्वहंममताशून्यो दुःखी न भवति यथा अरातेर्वैरिणो नाशे सति ममताशून्यत्वाद्दुःखी न भवति तथा च यत्र अहंता ममता वा तत्रैव दुःखसाहचर्यमिति । धूमवन्हिसाहचर्यवन्निश्चितमित्यर्थः ॥ १५ ॥

अथ गृहाद्बहिः प्रव्राजितुमशक्तस्य विवेकिनोपि पुरुषस्य मोक्षोपायमाह । गृहेशो गृहस्थः गेहे तिष्ठन्नपि देहस्थे दुःखसौख्ये न भजति न स्पृशति । क इव गेहे तिष्ठन् अतिथिरिव मार्गस्थ इव किंभूतोतिथिः निजधाम गंतुं चिकीर्षुः स ग्रामं गंतुमिच्छुः । क्षणमधिवासस्थलं प्राप्तस्य अस्मात् श्वः गंतव्यमस्तीति कृतनिश्चयस्य यथा निःस्पृहत्वं तथैव प्रकृतेपीत्यर्थः किंभूतो गृहस्थः निर्ममत्वाभिमानः ममताभिमानशून्यः तर्हि स्थितेषु गतेषु वा विषयेषु कथमुदासीन इत्यत आह । आयातु आगमिष्यत् देहादि पदार्थजातं अवश्यमायास्यत्येव तथा यातु गमिष्यद्वस्तु यास्यत्येव किंवत् जलदपटलवत् जलदपटलं स्वप्रयत्नेन नायाति विधिवशादायातमपि स्वप्रयत्नेन न निर्गच्छति एवं इत्थं प्रविदितविषयः प्रविदितोन्वयव्यतिरेकेण ज्ञातः विषयोभिप्रायो येन स तथाभूतः पुरुषः अयत्नः सन् गृहे तिष्ठति ॥१६॥

शक्त्या निर्मोकतः स्वाद्बहिरहिरिव यः प्रव्रजन्स्वीयगेहा-
च्छायां मार्गद्रुमोत्थां पथिक इव मनाक्संश्रयेद्देहसंस्थ्यां
क्षुत्पर्याप्तं तरुभ्यः पतितफलमयं प्रार्थयेद्भैक्षमन्नं
स्वात्मारामं प्रवेष्टुं स खलु सुखमयं प्रव्रजेद्देहतोऽपि ॥ १७ ॥
कामो बुद्धावुदेति प्रथममिह मनस्युद्दिशत्यर्थजातं
तद्गृण्हातींद्रियास्यैस्तदनभिगमतः क्रोध आविर्भवेच्च
प्राप्तावर्थस्य संरक्षणमतिरुदितो लोभ एतत्त्रयं स्यात्
सर्वेषां पापहेतुस्तदिह मतिमता त्याज्यमध्यात्मयोगात् ॥ १८ ॥
दानं ब्रह्मार्पणं यत् क्रियत इह नृभिः स्यात्क्षमाऽक्रोधसंज्ञा
श्रद्धाऽऽस्तिक्यं च सत्यं सदिति परमतः सेतुसंज्ञं चतुष्कं

अथ प्रागुक्तां द्विविधप्रव्रज्यां पृथगनुवदति यः पुरुषः शक्त्या वैराग्यबलेन स्वीयगेहात् सकाशात् सर्पो यथा बलेन निर्गच्छति कंचुकं त्यक्त्वा बहिर्याति तथा पुत्रकलत्राद्यनादिस्नेहाद्यनुबंधेन दुस्त्यजादपि स्वगृहाद्बलेन प्रव्रजति । तथा यः देहसंस्थां जीवनोपायं मनाक् संश्रयेत् । अनुष्ठानसिद्धिप्रयोजनमात्रमिति कृत्वास्य आहारादिकं संस्थां श्रयेत् । क इव मार्गद्रुमोत्थां छायां पथिक इव । अग्रे गंतव्यमस्तीति द्रुमच्छायां क्षणं विश्रमते । न तु तत्रास्थां करोति । अथ देहधारणार्थं निर्वाहमाह । तरुभ्यः सकाशात् क्षुत्पर्याप्तं भैक्ष्यं अन्नं प्रार्थयेत न संग्रहबुध्द्या । किंभूतमन्नं पतितफलमयं वातादिना पतितानि यानि फलानि तन्मयं न तु फलच्छेदेन । अथ देहाभिमानमपि त्यजेदित्याह । स पुरुषः सुखमयं सुखस्वरूपं स्वात्मारामं प्रवेष्टुं देहतोपि प्रव्रजेत् । देहाभिमानशून्यत्वमेव देहतः प्रव्रज्येत्यर्थः॥१७॥

इदानीं कामक्रोधलोभाः सर्वेषां पापहेतवो भवंतीत्याह । मूलभूतः कामोभिलाषः प्रथमं बुद्धौ उदेति । ततो मनसि अर्थजातं पदार्थजातं रूपरसादि तन्मध्ये अमुकेन भवितव्यमिति उद्दिशति संकल्पविषयं करोति ततस्तत्पदार्थजातं इंद्रियास्यैश्चक्षुरादींद्रियमुखैर्गृण्हाति ग्रहीतुं यतते एवं कृतेपि यत्ने तदनधिगमतः तेषामनधिगमः अनेकांतरायैरप्राप्तिः तदा क्रोध आविर्भवति कामात् क्रोधोभिजायते इति भगवद्वचनात् अथ दैववशादर्थस्य प्राप्तौ नानोपायैस्तद्रक्षणार्थं या मतिः स्वीयत्वाभिमानः स एव लोभ उदितः एवमेतत्त्रयं कामक्रोधलोभरूपं सर्वेषां जीवानां पापहेतुः सकलदुःखस्वरूपसंसारकारणमित्यर्थः । तस्मादेतन्मतिमता पुरुषेण त्याज्यं । कुतः अध्यात्मयोगात । बुद्धेः परतो वर्तमानमध्यात्मं प्रत्यगात्मरूपं तस्य योगात् । निरंतरानुसंधानरूपादभ्यासयोगादित्यर्थः ॥ १८ ॥

एवं कामक्रोधादिदैत्यनिबर्हणेन देवत्वप्राप्तिरित्येतस्मिन्नर्थे सामवेदोक्तं कल्माषसाम संवादयन्नाह । नृभिर्मनुष्यैर्यद्ब्रह्मार्पणं व्ययीक्रियते तद्दानमिति प्रोक्तं तथा

सत्याद्बंधाय जंतोरिति चतुर इमान् दानपूर्वैश्चतुर्भि-
स्तीर्त्वा श्रेयोऽमृतं च श्रयत इह नरः स्वर्गतिं ज्योतिराप्तिं ॥१९॥

या अक्रोधसंज्ञा सा क्षमा प्रोक्ता तथा आस्तिक्यं अस्त्येवानेन प्रयोजनमिति विश्वास रूपिणी बुद्धिः श्रद्धेत्युच्यते । तथा सत्यं सदिति ब्रह्मेति चतुष्टयं मुक्तेः साधनं अत एभ्यः परं अन्यद्विरुद्धस्वरूपचतुष्कं सेतुसंज्ञं भवति । अदानं क्रोधोऽश्रद्धाऽसत्यमिति यत्सेतुचतुष्टयं तज्जंतोः प्राणिनः बंधाय भवतीतिकारणात् इमान् पुर्वोक्तान् चतुरः सेतून् दानपूर्वैश्चतुर्भिस्तीर्त्वा उल्लंघ्य नरः पुरुषार्थी श्रेय अमृतं स्वर्गतिं ज्योतिराप्तिं च श्रयते प्राप्नोति श्रेयः सुकृतातिशयं अमृतं देवत्वं स्वर्गतिमूर्ध्वगतिं ज्योतिराप्तिं प्राप्नोतीत्यर्थः । अत्र श्रुतिः । हा उ ३ सेतूंस्तर ३ दुस्तरान् ३ अक्रोधेन क्रोधं हा उ ३ पूर्वं देवेभ्यो अमृतस्य नाभा हा उ ३ सेतूंस्तर ३ दुस्तरान् ३ दानेनादानं हा उ ३ अहमस्मि प्रथमजा ऋतस्य हा उ ३ सेतूंस्तर ३ दुस्तरान् ३ श्रद्धया अश्रद्धां हा उ ३ यो मा ददाति स इ देवमावा हा उ ३ सेतूंस्तर ३ दुस्तरान् ३ सत्येनानृतं हा उ ३ अहमन्नमन्नमदंतमद्मि हा उ ३ वा एषा गतिः ३ एतदमृतं स्वर्गच्छ ज्योतिर्गच्छ सेतूंस्तीर्त्वा चतुराह । भाष्यं ॥ तत्र विकल्पे हा उ गद्यते । अदीर्घे दीर्घवत् कुर्यादित्यादि सामशिक्षोक्तमनुस्मरणीयं तत्र चतुरः सेतूनित्युत्तरेणान्वयः । सेतुर्यथा जलप्रवाहभेदको भवति तथा अखंडैकरसभेदकाश्चत्वारः सेतवो भवंति तान् तर उल्लंघयेत्युपदिशति । किंभूतान् सेतून् दुस्तरान् उपायांतरेण दुःखेन तर्तुमशक्यान् अथ सेतून् तथा तदुल्लंघनोपायांश्च कथयति दानेनेति तत्र ब्रह्मार्पणत्वेन यद्दीयते तद्दानं दानशब्दोनाम । तदन्यदेहभार्यापुत्राद्यर्थं यद्व्ययीक्रियते तत् अदानं एवं दानेन अदानमुल्लंघ्य देहाद्यर्थं व्ययीकृतमपि ब्रह्मार्पणमिति ज्ञात्वैव कुर्वीतेत्यर्थः । यदुक्तं भगवता । यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति । अथ ज्ञानप्रकारमाह । अहमस्मीति । अहं ऋतस्य सत्यस्य ब्रह्मणः प्रथमजोस्मि प्रथमं सर्वस्मात्प्राग्जात इति प्रथमजः शबलत्वेनोपस्थितः पुत्रकलत्रादिष्वंतर्गतो हिरण्यगर्भोहमस्मि इति ज्ञात्वा ब्रह्मार्पणमेव सर्वमितिभावयेदित्यर्थः । तथा हा उ इत्यथवा अक्रोधेन क्षमारूपेण क्रोधं द्वितीयसेतुं तर तत्रोपायमाह पूर्वमिति । देवेभ्यः मनश्चक्षुरादिभ्यः सकाशात्पूर्वं अमृतस्य ब्रह्मणो नाभिः बुद्धिरूपेण तारकोहमस्मि बुद्धिपर्यंतमेव क्रोधः ततोग्रे ब्रह्मैवास्मीति भावय यो बुद्धेः परतस्तु स इति भगवदुक्तेः तथा श्रद्धया कृत्वा अश्रद्धां तृतीयसेतुं तर । अस्त्येव परमात्मना परमप्रयोजनमिति भावयन् । तत्रोपायमाह य इति । यः पुरुषः मा इति मह्यं ददाति सर्वं निवेदयति स देवं आवा हा प्राप्तवानित्यास्तिक्यविश्वासादश्रद्धां तृतीयसेतुं तरेत्यर्थः । अथ सत्येन ब्रह्मणा अमृतं प्रातिभासिकं विश्वाकारं

अन्नं देवातिथिभ्योऽर्पितममृतमिदं चान्यथा मोघमन्नं
यश्चात्मार्थं विधत्ते तदिह निगदितं मृत्युरूपं हि तस्य,
लोकेऽसौ केवलाघो भवति तनुभृतां केवलादी च यः स्या-
त्त्यक्त्वा प्राणाग्निहोत्रं विधिवदनुदिनं योऽश्नुते सोऽपि मर्त्यः ॥२०
लोके भोजः स एवार्पयति गृहगतायार्थिनेऽन्नं कृशाय
यस्तस्मै पूर्णमन्नं भवति मखविधौ जायतेऽजातशत्रुः
सख्येनान्नार्थिने योऽर्पयति न स सखा सेवमानाय नित्यं
संसक्तायान्नमस्माद्विमुख इव परावृत्तिमिच्छेत्कदर्यात् ॥ ११ ॥

तर । तत्रोपायमाह अहमिति अहं जीवरूपेणान्नं अग्नि तथा प्रलये अन्नं अदंतं भक्षयंतं अन्याद्युपाधिभूतं सर्वं अग्निमाहुतिप्रक्षेपवज्जुहोमि । योवशिष्येत सोस्म्यहमिति भावयेदित्यर्थः एवमेषा उक्तप्रकारा गतिरुद्धारप्रकारः एतदुक्तप्रकारममृतं मोक्षः अनेनोपदेशेन स्वर्गच्छ तथा ज्योतिरमृतं गच्छेत्युपदेशः ॥ १९ ॥

अन्नमिति । देवातिथिभ्योर्पितमन्नं अमृतं भवति देवेभ्यो वैश्वदेवकर्मणि अतिथिभ्यश्च वैश्वदेवांते समागतेभ्यः अर्पितं यदन्नं तदमृतं स्यादित्यर्थः अन्यथा एतदकरणे देवातिथिवंचनेन मोघं निष्फलमन्नं भवति यश्चात्मार्थं पिंडपोषणार्थं अन्नं विधत्ते तत्तस्य मृत्युरूपं परिणामे विषोपमं भवति । असाक्षिकत्वात् । एवं यः पुमान् केवलमत्तीति केवलादी केवलाघो भवति केवलमघरूपो भवतीत्यर्थः । अत्र श्रुतिः । मोघमन्नं विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य । नार्यमाणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥ २० ॥

लोके इति लोके स एव भोजो दाता । यः गृहमागतायार्थिने अन्नमर्पयति किंभूताय कृशाय दरिद्रपीडिताय अथ तस्य फलमाह । तस्मै दात्रे मखविधौ लौकिके वा यज्ञे पूर्णमन्नं भवति । तथा अन्नदाता अजातशत्रुर्भवति तस्यान्नदानेन सर्वभूतांतरस्थाः सर्वे जीवाः संतृप्ता भवंत्यतो वैरिणोपि मित्रा भवंतीत्यर्थः । अथ व्यतिरेकमप्याह । सख्य इति । यः पुरुषः अन्नार्थिने सख्ये सखिभूताय स्वर्गप्रापकाय नार्पयति स सखा न भवति किंतु पिशुन एवेत्यर्थः किंभूताय नित्यं सेवमानाय आश्रिताय तथा संसक्ताय अनन्यशरणाय अनेन सर्वभूतेष्वपि अन्नदानं न करोतीत्युक्तं अथ याचकोपि अस्मात् कदर्यात् कृपणाद्विमुखः पराङ्मुख इव परावृत्तिमिच्छेत् पुनस्तं न याचयेत् । अन्यं दातारं गच्छेदित्यर्थः । श्रुतिरपि । स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय । अरमस्मै भवति यामहूतावुतापरीषु कृणुते सखायं । न स सखा यो न ददाति सख्ये स चाभुवे स च मानाय पित्वः अपास्मात्प्रेयान्न तदोको अस्ति पृणंतमन्यमरणं चिदिच्छेत् । भाष्यं । अन्वयमुखेन प्रशंसति । स इत् स एव भोजो दाता यः गृहवे प्रतिगृहीत्रे तत्रा-

स्वाज्ञानज्ञानहेतू जगदुदयलयौ सर्वसाधारणौ स्तो
जीवेष्वास्वर्णगर्भं श्रुतय इति जगुर्हूयते स्वप्रबोधे
विश्वं ब्रह्मण्यबोधे जगति पुनरिदं हूयते ब्रह्म यद्व-
च्छुक्तौ रूप्यं च रौप्येऽधिकरणमथवा हूयतेऽन्योन्यमोहात् ॥२२॥
तुच्छत्वाभासदासीद्गगनकुसुमवद्भेदकं नो सदासीत्
किंत्वाभ्यामन्यदासीद् व्यवहृतिगतिसन्नास लोकस्तदानीं
किंत्वर्वागेव शुक्तौ रजतवदपरो नो विराड् व्योमपूर्वः
शर्मण्यात्मन्यथैतत्कुहकसलिलवत्किं भवेदावरीवः ॥ २३ ॥

प्यन्नकामाय चरते गृहमागताय दारिद्र्येण कृशाय एतादृशायातिथयेऽन्नं ददाति । यामहूतौ यामा गंतारो देवा आहूयंते अत्रेति यामहूतिः यज्ञः तस्मिन्नस्मै दात्रे फलं अरं अलं पर्याप्तं भवति कामप्रदं भवतीत्यर्थः । उत अपि च आपरीषु अन्यासु शात्रवीषसेनासु सखायं कृणुते तस्य सर्वे सखाय एव न शात्रव इत्यर्थः । अथ व्यतिरेकान्वयाभ्यामाह स पुरुषः सखा न भवति यः स चाभुवे सर्वदा सहभवनाशीलाय तथा स च मानाय सेवमानाय उपसर्जनीभूताय सख्ये जनाय पित्वः पितूनन्नानि न ददाति न प्रयच्छति स सुहृन्न भवतीत्यर्थः । अपास्माददातुः सख्युः स अपप्रेयात् । अपगच्छेत् यदेनं परित्यज्य गच्छेत्तदोकः सद्म नास्ति न भवति अरण्यतुल्यं । स पुरुषः अन्नं पृणंतं अन्नदातारं अरणं शरणं गच्छेत् कामयेत् ॥ २१ ॥

स्वाज्ञानेति । जगदुदयलयौ स्वाज्ञानज्ञानहेतू स्तः जगतो नामरूपात्मकस्य चराचरस्योदयः प्रादुर्भावः लयश्च प्रलयः एतौ स्वस्याज्ञानं च ज्ञानं च स्वाज्ञानज्ञाने त एव हेतवः कारणं ययोस्तौ । स्वशब्देनात्मा । तथा चात्माज्ञानाज्जगत्प्रादुर्भावः तथा चात्मज्ञानाज्जगत्प्रलय इत्यर्थः । एतौ आस्वर्णगर्भं हिरण्यगर्भं मर्यादीकृत्य सर्वजीवेषु साधारणौ हिरण्यगर्भः स्वस्वरूपं विस्मृत्याहमीश्वरो नियंतेत्यभिमानं वहति तदा प्रादुर्भूतं विश्वाभासं पश्यति अथ यदा ब्रह्माहमस्मीति स्वरूपे लीनो भवति तदा विश्वाभासविलयः इति श्रुतयो जगुः । एवमेव जीवेष्वपीति प्रकटयन्नाह हूयत इति स्वप्रबोधे ब्रह्माकारांतःकरणवृत्तौ जातायां विश्वं ब्रह्मणि हूयते अग्नावाहुतिप्रक्षेपवद्भस्मसात्क्रियते यदा देहाभिमानित्वाद्यबोधे सति इदं ब्रह्म जगति हूयते नास्त्येव क्रियते अत्र दृष्टांतमाह । यद्वदिति । भ्रमनिवृत्तिकाले शुक्तौ रौप्यं हूयते । तथा प्रतिभासकाले तु अधिकरणं शुक्तिः रौप्ये हूयते कस्मादन्योन्यमोहात् । शुक्त्याज्ञाने रजतोदयः रजताज्ञाने च शुक्तिरित्यर्थः ॥ २२ ॥

ननु नामरूपात्मकस्य दृश्यमानस्य जगतः कर्ता उपादानकारणं किं स्यादिति विचार्यमाणे न तावच्छुद्धस्यानीहस्य ब्रह्मणस्तथात्वमुपपद्यते । अथ तदतिरिक्तस्य

बंधो जन्मात्ययात्मा यदि न पुनरभूत्तर्हि मोक्षोपि नासी-
द्यद्वद्रात्रिर्दिनं वा न भवति तरणौ किंतु दृग्दोष एषः
अप्राणं शुद्धमेकं समभवदथ तन्मायया कर्तृसंज्ञं
तस्मादन्यन्न नासीत्परिवृतमजया जीवभूतं तदेव ॥ २४ ॥

तथात्वकल्पने किमसत्सद्वा कल्पनीयं तत्राद्यं निषेधति तुच्छत्वादिति । तत्र तावज्जगदुपादानकारणं असत् नासीत् कुतः तस्यासतो गगनकुसुमवत् तुच्छत्वात् अत्यंतासत्वेन उपादानकारणत्वानर्हत्वात् अथ नापि भेदकं सद्वाच्यं परमार्थसतो ब्रह्मणः सकाशादन्यस्य भेदकजनकस्यासंभवात् अतः परिशेषात्सदसद्विलक्षणमासीदित्याह । किंलिति । आभ्यां सदसद्भ्यां अन्यद्विलक्षणमासीदित्युक्तं भवति ननु तर्हि ब्रह्मातिरिक्तं परमार्थसन्मास्तु । तथापि व्यवहारः सदासीदेवेति चेत्तदपि निषेधति । व्यवहृतीति । तदानीं व्यवहारस्याप्यभावादित्यर्थः तदानीमिति पदेन सृष्टेः प्राङ् नासीत् । किंतु परिशेषान्मध्य एवोत्पन्नमित्युक्तं भवति । ननु तदानीमाकारवन्नास्ति तथापि व्योमासीत् तथा महद्भूतारब्धो विराडप्यासीदिति चेत्तदपि निषेधति । न विराड् व्योमपूर्व इति व्योम पूर्वं कारणीभूतं यस्य स तथा । अथास्तां मध्य एवोत्पन्नं तस्य पृथग्भूतत्वेन ब्रह्मणः आवरकत्वं भवेत् तदपि दृष्टांतेन निषेधति । शर्मणीति । शर्मणि शुद्धे ब्रह्मणि तत्किमावरीवः आवृणोतीत्यावरीवः आवरकं भवेन्नेत्यर्थः । किंवत् । कुहकसलिलवत् । मायया स्थले जलभ्रममुत्पादयतः कुहकस्यैंद्रजालिकस्य क्षणमुत्पन्नं सलिलं भ्रमनिवृत्तौ सत्यां किं स्थलस्यावरकं भवेत्तद्वत् प्रकृतेपीत्यर्थः ॥ २३ ॥

अथ वस्तुतो ब्रह्मरूपाणामेव जीवानां बंधमोक्षावप्यज्ञानकृतावित्याह । बंध इति । पुनर्जन्मात्ययात्मा मृत्युरूपो यदि बंधो नासीदेव तर्हि मोक्षोपि नासीत् , तदुक्तं बद्धो मुक्तः इति व्याख्या गुणतो न स्वभावतः तथा द्वितीयस्याभावात् को बद्धः कश्च मुक्त इति अत्र दृष्टांतमाह यद्वदिति तरणौ सूर्ये रात्रिर्दिनं वा न भवति न युज्यते कथं तर्हि रात्रिदिनव्यवहारो भवतीत्याह , एष दृग्दोषः जगच्चक्षुषोः सूर्यादर्शनमेव रात्रिदिनव्यवहारनिमित्तमापेक्षिकमित्यर्थः अथ जीवत्वोपाधिनिमित्तमाह । अप्राणमिति । अप्राणो ह्यमनाः शुभ्र इति शुभ्रस्य ब्रह्मणः प्राणसंबंधाभावात् अप्राणं एकं अद्वितीयं तन्मायया कर्तृसंज्ञं हिरण्यगर्भाख्यमभवत् तस्मादन्यन्नासीत् तदेव अजया मायया परिवृतं जीवभूतं जीवत्वं प्राप्तं न पृथक्कश्चिज्जीवोस्तीत्यर्थः। अत्र श्रुतिः । क्वचित् पूर्वश्लोकपठनीया शुद्धे ब्रह्मणीत्यर्थः। नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमापरो यत् । किमावरीवः कुहकस्य शर्मन्नंभः किमासीद्गहनं गभीरं ॥ २४ ॥

प्रागासीद् भावरूपं तम इति तमसा गूढमस्मादतर्क्यं
क्षीरांतर्यद्वदंभो जनिरिह जगतो नामरूपात्मकस्य

अथ पूर्वमुक्तं तदानीं जगन्नासीदिति तर्हि पुनः कथमुत्पन्नमित्याशंक्याह । जगदुपादानभूतं भावरूपं तम इत्यज्ञानमासीत् तेन तमसा जगद्गूढमाच्छादितं अस्मात्कारणादतर्क्यं अज्ञायमानं । किंवत् यद्वत्क्षीरांतर्गतमंभः उदकं क्षीरांतरवर्तमानमपि न ज्ञायते तद्वत् । तत इहास्मिन्नज्ञाने अस्य नामरूपात्मकस्य जगतः जनिरुत्पत्तिः ननु यद्यपि बीजांतर्गतो वृक्षस्तिष्ठति तथापि कारणसामग्र्यतिरेकेण नोत्पद्यते अत आह । कामादिति सिसृक्षोः स्रष्टुमिच्छतः धातुः परमेश्वरस्य कामादिच्छातः सापि कुत इत्यत आह । किंभूताद्धातोः कामात् अनुगतजगतः कर्मभिः संप्रवृत्तात् अनुगतं अनादित्वेन वर्तमानं यज्जगत्तस्य कर्मभिः प्रेरितात् । अथ तान्यपि कुत इत्यत आह । रेतोरूपैर्बीजभूतैर्मनोभिः प्रथमं अनादिप्रवाहेणानुगतैः सद्भिः कार्यमाणैर्निष्पादितैः कर्मभिरित्यर्थः एतदर्थे श्रुतिरपि । तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वं मा इदं । तुच्छ्येनाभ्वपिहितं यदासीत्तमसास्तन्महिनाजायतैकं ॥ १ ॥ कामस्तदग्रे समवर्तताधिमनसो रेतः प्रथमं यदासीत् । सतो बंधुमसति निरविंदन् हृदि प्रतीष्या कवयो मनीषा । भाष्यं । ननूक्तप्रकारेण यदि पूर्वमिदं जगन्नासीत् कथं तर्हि तस्य जन्म जायमानस्य जनिक्रियायां कर्तव्यत्वेन कारकत्वात् कारकत्वं कारणावांतरविशेष इति कारकस्य सतो नियतपूर्वक्षणवर्तित्वस्यावश्यंभावित्वात् अथैतद्दोषपरिजिहीर्षया जनिक्रियायाः प्रागपि तद्विद्यत इत्युच्यते कथं तस्य जन्म अत आह । तमसा गूढमग्र इति । अग्रे सृष्टेः प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत् तमसा गूढं यथा नैशं तमः सर्वं पदार्थजातमावृणोति तद्वदात्मतत्वस्यावरणकत्वान्मायापरपर्यायं भावरूपाज्ञानं अत्र तम इत्युच्यते तेन तमसा निगूढं संवृतं कारणभूतेन तेनाच्छादितं भवति । आच्छादकात् तस्मात् तमसो नामरूपाभ्यां यदाविर्भवनं तदेव तस्य जन्मेत्युच्यते । ननु कारणभूते तमसि तज्जगदात्मकं कार्यं विद्यते चेत् तर्हि कथं नासीद्रज इत्यादिना तन्निषेधस्तत्राह । तम आसीदिति । तमोभावरूपाज्ञानं मूलकारणं तद्रूपतां तदात्मतां यतः सर्वं जगत्प्राप्तमासीत् अतो निषिध्यत इत्यर्थः नन्वावरकत्वादावरणं तमः कर्तृ आवार्यं जगत् कर्म कथं कर्तृकर्मणोस्तादात्म्यं तत्राह । अप्रकेतमपि अप्रकेतं अप्रजायमानं । अयमर्थः । यद्यपि जगतस्तमसः कर्मकर्तृभावो यौक्तिको विद्यते तथापि व्यवहारदशायामेव तस्यां दशायां नामरूपाभ्यां विस्पष्टं न ज्ञायत इति तादात्म्यवर्णनं । अत एव मनुना स्मर्यते । आसीदिदं तमोभूतमप्रज्ञानलक्षणं । अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वत इति । कुतो वा न प्रज्ञायत इत्यत्राह । सलिलमिति । लुप्तोपमा सलिलमिव यथा क्षीरेणाविभागापन्नं नीरं दुर्विज्ञातं तथा तमसा अविभागापन्नं जगत् । ननु

**कामाद्धातुः सिसृक्षोरनुगतजगतः कर्मभिः संप्रवृत्ताद्
रेतोरूपैर्मनोभिः प्रथममनुगतैः संततैः कार्यमाणैः ॥ २५ ॥
चत्वारोऽस्याः कपर्दा युवतिरथ भवेन्नूतना नित्यमेषा
माया वा पेशला स्यादघटनघटनापाटवं याति यस्मात्**

विविधविचित्रभूयसः प्रपंचस्य कथमतितुच्छेन तमसा क्षीरेण नीरस्येवाभिभवः तथा तमोपि क्षीरवद्धुलवदित्येवोच्यते । तर्हि दुर्बलस्य जगतः सर्गसमये नोद्भवसंभव इत्यत आह । तुच्छेनेति । आसमंताद्भवतीत्याभुः तुच्छेन तुच्छकल्पेन सदसद्विलक्षणेन भावरूपाज्ञानेन पिहितं छादितमासीत् । एकं एकीभूतं कारणेन तमसा अविभागतां प्राप्तमपि तत्कार्यजातं तमसः पर्यालोचनरूपत्वं चान्यत्राम्नायते यः सर्वज्ञः स सर्ववित् । यस्य ज्ञानमयं तप इति अथ कामस्तदग्र इति । ननूक्तरीत्या यदीश्वरस्य पर्यालोचनं । जगतः पुनरुत्पत्तौ कारणं तदेव वा किंनिबंधनमित्यत आह । कामस्तदग्र इति । अग्रे अस्य विकारजातस्य सृष्टेः प्रागवस्थायां परमेश्वरस्य मनसि कामः समवर्तत सम्यगजायत सिसृक्षा जातेत्यर्थः । ईश्वरस्य सिसृक्षा वा किंहेतुकेत्यत आह । मनस इति । मनसोंतःकरणस्य संबंधिवासनशेषेण मायायां विलीनेंतःकरणे समवेतं सामान्यापेक्षं एकवचनं सर्वप्राण्यंतःकरणेषु समवेतमित्यर्थः । एतेनात्मनो गुणाधारत्वं प्रत्याख्यातं तादृशरेतोभाविनः प्रपंचस्य बीजभूतं प्रथमं अतीते कल्पे प्राणिभिः कृतं पुण्यापुण्यात्मकं कर्म यत् यतः कारणात् सृष्टिसमये आसीदभवत् । भूष्णुर्वर्द्धिष्णुः अजायत परिपक्वं सत् फलोन्मुखमासीदित्यर्थः तत् ततो हेतोः फलप्रदस्य सर्वसाक्षिणः कर्माध्यक्षस्य परमेश्वरस्य मनसि सिसृक्षा अजायतेत्यर्थः । तस्यां जातायां स्रष्टव्यं पर्यालोच्यते अतः सर्वं जगत् सृजति । तथाचाम्नायते । सोकामयत बहु स्यां प्रजायै इति । स तपोतप्यत । स तपस्तप्त्वा । इद९ सर्वमसृजत यदिदं किंचेति । अतो विद्वदनुभवमप्यनुग्राहकत्वेन प्रमाणयति । सत इति । सतः सत्वेनेदानीमनुभूयमानस्य सर्वस्य जगतः बंधुं बांधवत्वहेतुभूतं कल्पांतरे प्राण्यनुष्ठितं कर्मसमूहं कवयः क्रांतदर्शिनो योगिनः हृदि हृदये निरुद्ध्या मनीषया बुध्द्या प्रतीष्य विचार्य असति सद्विलक्षणे अव्याकृते कारणे निरविंदन् निष्कृष्यालंभंत विविच्य जानन्नित्यर्थः ॥ २५ ॥

मायाया उत्कर्षं वर्णयति । अस्याः पूर्वोक्तमायायाः चत्वारः कपर्दाः उत्कर्षाः संतीति । अथ तानेवाह । युवतिरिति । एषा माया नित्यं नूतना कदापि स्थविरा न भवति । अतो युवतिर्भवेत् देहादिवार्धक्येपि सा तरुणैवास्ति अयमेक उत्कर्षः तथेयं पेशला स्यात् । किंनाम पेशलत्वमाह । पेशला कुशलेत्यर्थः तदेवाह यस्मादिति यस्मात्कारणादियं अघटनघटनापाटवं विक्षेपे एवं कौशलं याति अयं द्वितीय उत्कर्षः तथेयमारंभे उपक्रमे घृतास्या घृतवन्मिष्टमास्यं मुखं यस्याः सा तथा

६१।

इयादारंभे घृतास्या श्रुतिभववयुनान्येयमाच्छादयंती
तस्यामेतौ सुपर्णाविव परपुरुषौ तिष्ठतोऽर्थप्रतीत्या ॥ २६ ॥
एकस्तत्रास्त्यसंगस्तदनु तदपरोऽज्ञानसिंधुं प्रविष्टो
विस्मृत्यात्मस्वरूपं स विविधजगदाकारमाभासमैक्षत्
बुद्ध्यांतर्यावदैक्षं विसृजति तमजा सोऽपि तामेवमेकः
तावद्विप्रास्तमेकं कथमपि बहुधा कल्पयंति स्ववाग्भिः ॥ २७ ॥
नायाति प्रत्यगात्मा प्रजननसमये नैव यात्यंतकाले
यत्सोऽखंडोऽस्ति लैंगं मन इह विशति प्रव्रजत्यूर्ध्वमर्वाक्

यस्य कस्याप्यारंभे मिष्टं दर्शयति परिणामे विषोपमेत्यर्थः । अयं तृतीय उत्कर्षः । ययेयं श्रुतिः भववयुनानि उपनिषद्भागैः प्रतिपादितानि आत्मज्ञानानि आवरणशक्त्या आच्छादयति । अयं चतुर्थ उत्कर्षः । तस्यां चतुरुत्कर्षवत्यां मायायां एतौ परपुरुषौ परः परमात्मा पुरुषो जीवः एतौ सुपर्णौ पक्षिणाविव तिष्ठतः केन प्रकारेण ज्ञाताविल्याह । अर्थेति अर्थप्रतीत्या पदार्थभासकत्वेन माया तु तिरोधानकर्त्री सकलभासकत्वं परमात्मन एवेत्यर्थः ॥ २६ ॥

इदानीं जीवपरमात्मनोः परमार्थत एकत्वमाह । तत्र तयोः सुपर्णयोर्मध्ये एकः परमात्मा असंगोस्ति । तदनु तदपरो जीवः अज्ञानसिंधुं प्रविष्टः स आत्मस्वरूपं स्वस्वरूपं विस्मृत्य विविधजगदाकारमाभासं प्रातिभासिकं ऐक्षत दृष्टवान् । ततः बुध्या निश्चयात्मिकया अंतः यावदैक्षं तावत् अजा माया तं जीवं विसृजति । तथा सोपि जीवः तां मायां विसृजति । अंतर्दृष्ट्या विचार्यमाणे उभयोरसंस्पर्शे अखंडत्वमेवानुभूयते । तर्हि सुपर्णद्वयकल्पना कुत इत्यत आह विप्रा इति । तमेकमेवात्मानं विप्राः श्रुतिज्ञाः कवयः शिष्यबोधादिव्यवहारविषये वाग्भिर्वचोभिरनेकधा कल्पयंति । न त्वनुभवत इत्यर्थः एतदर्थे श्रुतिः । चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते । तस्यां सुपर्णा वृषणा निषेदतुर्यत्र देवा दधिरे भागधेयं ॥ २७ ॥

अथ जन्ममरणानुबंधेप्यस्य स्वस्वरूपत्वं निरूपयति । प्रजननसमये गर्भाविर्भावे सति प्रत्यगात्मा नायाति गर्भे न प्रविशति । तथांतकाले देहावसानसमये न याति न गच्छति यत् यतः स आत्माऽखंडः अपरिछिन्नोस्ति यतः प्रवेशनिर्गमौ हि परिछिन्नस्यैव संभवतः तर्हि लोके जन्ममरणादिव्यवहारः कस्येत्यत आह । लैंगमिति । लैंगं पंचदशकलोपेतं मनः इह लोके ऊर्ध्वे देवलोकेऽर्वाक् मनुष्यलोके वा गर्भे विशति तथा प्रव्रजति च न प्रत्यगात्मा । अथ तल्लिंगदेहोपेतं मनः वपुषः स्थूलदेहस्य कार्श्यं कृशतां स्थूलतां पुष्टत्वं वा न भजति रोगाद्युपहतौ कृशतां तथापाटवे पुष्टत्वं वा न भजति एवं तन्मन उत्क्रांतौ पूर्वसंस्कारजातं तथा

तत्कार्श्यं स्थूलतां वा न भजति वपुषः किंतु संस्कारजातम्
तेजोमात्रा गृहीत्वा व्रजति पुनरिहायाति तैस्तैः सहैव ॥ २८ ॥
आसीत्पूर्वं सुबंधुर्भृशमवनिसुरो यः पुरोधाः सनाते-
र्ब्राह्यात्कूटाभिचारात्स खलु मृतिमितस्तन्मनोऽगात्कृतांतं
तद्भ्राता श्रौतमंत्रैः पुनरनयदिति प्राह सूक्तेन वेदः
तस्मादात्माभियुक्तं व्रजति ननु मनः कर्हिचिन्नांतरात्मा ॥ २९ ॥
एको निष्कंप आत्मा प्रचलति मनसा धावमानेन तस्मिं-
स्तिष्ठन्नग्रेऽथ पश्चान्न हि तमनुगतं जानते चक्षुराद्याः

तेजोमात्राः प्रत्यंगप्राणान् गृहीत्वा व्रजति गच्छति तथा पुनरुत्पत्तिसमये तैस्तैः संस्कारजातैः सह इह गर्भे आयाति ॥ २८ ॥

अथ प्रवेशनिर्गमौ मनस एव संभवतो नात्मन इत्यत्र ऋक्शाखीयां श्रुतिमाख्यायिकापूर्विकां संवादयति । सुबंधुर्नामा अवनिसुरः ब्राह्मणः पूर्वं भृशं अत्यर्थं सर्वोत्कर्षेण आसीत् । किंभूतः सनातेः पृथ्वीभुजः पुरोधा पुरोहितः अत्र खल्विति श्रूयते स ब्राह्यात् ब्राह्मणकृतात् कूटाभिचारात् कापट्यरचितादभिचारात् अस्त्रप्रयोगान्मृतिमितः मरणं प्राप्तः तन्मनः कृतांतं यमलोकमगात् अथ तस्य सुबंधोर्भ्राता श्रौतमंत्रैः तद्गतं मनः पुनरनयत् आनीतवान् । इति सूक्तेन वेदः प्राह । तस्मात् कारणात् आत्माभियुक्तं आत्मप्रतिबिंबाभियुक्तं सत् मन एव व्रजति परंत्वंतरात्मा न व्रजति एतन्मूलभूता श्रुतिरपि अष्टमाष्टके यत्ते यमं वैवस्वतं मनो जगाम दूरकं । तत आवर्तयामसीह क्षयाय जीवसे । भाष्यं । अत्रेयमाख्यायिका । पूर्वं सनातिसंज्ञस्य राज्ञो गृहे बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुः इति चत्वारो भ्रातरः पुरोहिता आसन् । ते द्विषन्नाशाय राज्ञादिष्टं आभिचारिकं न कुर्वंतीति राज्ञा बहिःकृताः ततोन्यन्मायाविपुरोहितद्वयं कृतं तेन बंध्वादयश्चत्वारः क्षुब्धाः संतो राज्ञ आभिचारिकं कर्तुं प्रवृत्ताः तच्छ्रुत्वा मायाविनौ पुरोहितौ चाभिचारिककर्मणा सुबंधुं जघ्नतुः ततः सुबंधोर्भ्रातरः तं पुनर्जीवयितुं वक्ष्यमाणैः श्रौतमंत्रैरुपायं चक्रुः । यत्ते यममिति । भो सुबंधो यत्ते मनः वैवस्वतं विवस्वतः सूर्यस्य पुत्रं यमं प्रति दूरं जगाम तत्ते मनः आवर्तयामसि ततो निवर्तयामः किमर्थं इह लोके क्षयाय निवासाय जीवसे जीवनायेति प्रथमा । अथ द्वितीया । यत्ते दिवं यत्पृथिवीं मनो जगाम दूरकं । तत्त ते आवर्तयमसी० तथा । यमादहं वैवस्वतात् सुबंधोर्मन आभरां । जीवातवे न मृत्यवेथो अरिष्टतातये ॥ २९ ॥

इदानीं चलनादिधर्माः मनस एव नात्मन इति दर्शयति । एकोऽद्वितीयो निष्कंपः कर्मशून्य आत्मा धावमानेन मनसा सह चलति । तथा तस्मिन्मनस्यपि तिष्ठन् अग्रे पुरतः पश्चाच्च वर्तते । तमेवंविधमात्मानं अनुगतं अंतर्गतमपि चक्षुराद्याः न जा-

यद्वत्पाथस्तरंगैः प्रचलति परितो धावमानैस्तदंतः
प्राक् पश्चादस्ति तेषां पवनसमुदितैस्तैः प्रशांतैर्यथावत् ॥ ३० ॥
एकाक्यासीत्स पूर्वं मृगयति विषयानानुपूर्व्याऽन्तरात्मा
जाया मे स्यात्प्रजा वा धनमुपकरणं कर्म कुर्वंस्तदर्थं
क्लेशैः प्राणावशेषैर्महदपि मनुते नान्यदस्माद्गरीय-
स्त्वेकालाभेऽप्यकृत्स्नो मृत इव विरमत्येकहान्याऽकृतार्थः ॥ ३१ ॥
नासीत्पूर्वं न पश्चादतनुदिनकराच्छादको वारिवाहो
दृश्यः किंत्वंतराऽसौ स्थगयति स दृशं पश्यतो नार्कबिंबम्

नते न जानंति इंद्रियागोचरत्वात् । तत्र दृष्टांतमाह । यद्वदिति । यद्वत्पाथः उदकं परितो धावमानैस्तरंगैः प्रचलति । तथा तेषां तरंगाणामंतः प्राक् पश्चाच्च पाथोऽस्ति । किंभूतैस्तरंगैः पवनसमुदितैः वायुनोत्पन्नैः एवं मायामयैरिंद्रियैरप्यात्मा । अथ तैः प्रशांतैः साद्भिः यथावत् प्रकृतिस्थं पाथ एवास्ति । तद्वदात्मापि ॥ ३० ॥

इदानीं जीवस्य बाह्यप्रपंचानुवृत्तिं निरूपयति । सोंतरात्मा पूर्वं एकाकी आसीत् । अतःपरं अनुपूर्व्याऽनुक्रमेण विषयान् मृगयति गवेषयति । अथानुपूर्वीमाह प्रथमं जाया मे स्यात् ततः प्रजा मे स्यात् ततः तन्निर्वाहार्थे धनं वित्तं मे स्यात् अथ तदर्थं वित्तप्राप्त्यर्थं प्राणावशेषैः क्लेशैः कर्म कुर्वन् एवं धनादिविषयप्राप्तौ अस्माद्विषयादन्यन्महद्गरीयः श्रेष्ठं न मनुते । एवं बहुविषयोद्देशे सति एकविषयालाभे सति अकृत्स्नो भूत्वा मृत इव विरमति विरामं प्राप्नोति । तथा एकहान्या प्राप्तस्य नाशेनाकृतार्थो भवति । अत्र मूलश्रुतिः । आत्मैवेदमग्र आसीदेक एव सोऽकामयत । जाया मे स्यात् अथ प्रजा मे स्याद्वित्तं मे स्यादथ कर्म कुर्वीयेत्येतावान् वै कामो नेत्सच्च नातो भूयो विंदेत । तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति । स यावदप्येतेषां एकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्याकृत्स्नता ॥ भाष्यं ॥ अग्रे पूर्वं इदमयं एकः एव केवलं आत्मैवासीत् । स जाया मे स्यादित्यकामयत ऐच्छत् । ततोऽस्यां जायायां प्रजायेय पुत्रत्वेन जन्म प्राप्नुयामित्यकामयत । अस्यां जायते पुनरितिश्रुतिः । आत्मैव जायापुत्रत्वेन परिणमति । तथा यत्कर्म करोति तदपि आत्मार्थमेवेति पुनः श्रुत्या निरूपयिष्यते एवं जायापुत्रप्राप्तौ तद्भरणार्थं वित्तं मे स्यादिति कामयते अथ वित्तप्राप्त्यर्थं कर्म कुर्वीयेति । एतावान् वै कामः । अथ नेदिति निपातो निषेधार्थे नेत्सत् । न संभवतीत्यर्थः । अथ जायापुत्रादिविषयादन्यद्भूयः बहुतरं न विंदेत न विंदति । एवं यावज्जीवं पुनरुत्पत्तिमासाद्य तथैवेति पुनरुक्तं एव स जीवः यावदेतेषां जायादीनां मध्ये एकं नाप्नोति तावदकृत्स्नः असंपूर्णोहमिति मन्यते इत्येवं तस्याकृत्स्नता असंपूर्णता. ॥ ३१ ॥

नो चेदेवं विनाऽर्कं जलधरपटलं भासते तर्हि कस्मा-
त्तद्वद्विश्वं पिधत्ते दृशमथ न परं भासकं चालकं स्वं ॥ ३२ ॥
भुंजानः स्वाप्नराज्यं ससकलविभवो जागरं प्राप्य भूयो
राज्यभ्रष्टोऽहमित्थं न भजति विषमं तन्मृषा मन्यमानः
स्वप्ने कुर्वन्नगम्यागमनमुखमघं तेन न प्रत्यवायी
तद्वज्जाग्रद्दशायां व्यवहृतिमखिलां स्वप्नवद्विस्मरेच्चेत् ॥ ३३ ॥

अविद्याया आवरणशक्तिमेव विविच्य प्रपंचयति । वारि वहतीति वारिवाहो मेघः अतनुदिनकराच्छादको भवति । न तनुरतनुः महान् लोकत्रयप्रकाशको यो दिनकरो दिवसे प्रसृतकरः सूर्यस्तदाच्छादको भवति । अथ तस्याच्छादकत्वं अंतरालिकं न प्रवाहपरंपरागतमित्याह नासीदिति । मेघः प्रावृट्कालात् पूर्वं ग्रीष्मे नासीत् । अथ पश्चाच्छरत्कालेपि नासीत् । एवमेवंविधो मेघः सूर्यं पश्यतो जनस्य दृशमेव स्थगयति आवृणोति । नार्कबिंबं । तस्य मेघादप्यभितः करप्रसारशालित्वादित्यर्थः । एवं सत्यपि लोके सूर्यो निष्प्रभ इति प्रतीतिः प्रातिभासिकीत्याह । नो चेदिति । एवमुक्तप्रमेयं नो चेत् सूर्य एवाच्छादितश्चेत् तर्हि अर्कं विना जलधरपटलं सूर्यावरकीभूतं मेघपटलं कस्माद्भासते सूर्यस्य घनपटलेन तिरोहितत्वात् घनपटलं कस्मात् प्रकाशांतराज्ज्ञायते । सूर्यस्याच्छिन्नत्वेन प्रकाशकत्वानर्हत्वादित्यर्थः । तथा च सूर्यं पश्यतो जनस्य घनपटलेन दृष्टिरेवावृता न सूर्यःएतद्दृष्टांतावष्टंभेन भूमंडलस्यापि सूर्यावरकत्वं तद्वदेवेत्यर्थः । अथ यदर्थमेतदुपक्रांतं तदाह । तद्वदिति । तद्वदंतरोत्पन्नं विश्वमपि पश्यतो दृशं दृष्टिमेव पिधत्ते । न परं परब्रह्मस्वरूपं नाच्छादयति । तर्हि कथं न दृश्यत इत्याशंक्य दृश्यत एवेत्याह । किंभूतं परं ब्रह्म स्वभासकं चालकं च स्वशब्देन विश्वं तस्य भासकं तथा चालकं च । येन विचित्ररूपं विश्वं आभाति तथा येन चलति सर्वं व्यवहारं करोति तत् परं ब्रह्म कथमाच्छादयितुं शक्यते ब्रह्मव्यतिरेकेण तस्य भासकचालकांतराभावात् तथा च जगदाकारादादिमध्यावसानेषु वर्तमानं ब्रह्मैव सत्यं तदज्ञानादुदितो जगदाकारः । शुक्तिकारजतवत् प्रातिभासिक इत्यर्थः ॥ ३२ ॥

एवं स्वप्नदृष्टांतेन प्रपंचस्य मिथ्यात्वं निरूपयति । ससकलविभवः सेनाकोशाद्युपस्कारयुक्तः सन् स्वप्नराज्यं भुंजानः पुरुषः भूयो जागरं प्राप्य प्राक्तनं दरिद्रं रंकदेहं निरीक्ष्याहं राज्यभ्रष्ट इति विषमं शोकं न भजति । कुतः । तत् स्वाप्नं राज्यं मृषा मन्यमानः । अथ इममेवार्थं दृष्टांतेन द्रढयति । स्वप्न इति । स्वप्ने अगम्यागमनमुखं सुरापानब्रह्मवधाद्यघं पातकं कुर्वन् ततः प्रबोधं प्राप्तः सन् तेन पातकेन प्रत्यवायी प्रायश्चित्ती न भवतीति यथापूर्वं लोके व्यवहारार्थं एव दृश्यते मनसाप्यनुतापं न प्राप्नोति कुतः तन्मृषा मन्यमान इति पूर्ववत् तथा जाग्रद्दशायामेव पापकर्ता प्राय-

स्वप्नावस्थानुभूतं शुभमथ विषमं तन्मृषा जागरे स्या-
ज्जागृत्यां स्थूलदेहव्यवहृतिविषयं तन्मृषा स्वापकाले
इत्थं मिथ्यात्वसिद्धावनिशमुभयथा सज्जते तत्र मूढः
सत्ये तद्भासकेऽस्मिन्निह हि कुत इदं तन्न विद्मो वयं हि ॥ ३४ ॥
जीवंतं जाग्रतीह स्वजनमथ मृतं स्वप्नकाले निरीक्ष्य
निर्वेदं यात्यकस्मान्मृतममृतममुं वीक्ष्य हर्षं प्रयाति
स्मृत्वाऽप्येतस्य जंतोर्निधनममुयुतिं भाषते तेन साकं
सत्येवं भाति भूयोल्पकसमयवशात्सत्यता वा मृषात्वं ॥ ३५ ॥

श्चित्तार्हो भवति । अथ जाग्रद्दशायामप्यखिलां पुण्यपापव्यवहृतिं चेत् स्वप्नवद्विस्मरेत् तथापि प्रायश्चित्तार्हो न भवति यतस्तन्मृषा मन्यमान इति प्रागुक्तमेव । भगवतापि उक्तं ब्रह्मण्याधाय कर्माणीत्यादिना ॥ ३३ ॥

अथ जाग्रत्स्वप्नावस्थयोरपि भ्रमजनकत्वमस्तीत्याह। स्वप्नावस्थायां अनुभूतं शुभं राज्य-भोगेष्टप्राप्त्यादि तथा विषमं व्याघ्रभक्षणादि तत् सर्वं जागरे मृषा भवति । अथ जाग्रद्दशायां स्थूलदेहव्यवहृतिविषयं शुभं मिष्टान्नादि सकलभोगसुखं तथा विषमं आधिव्याधियातनाजनितं दुःखं यत् तत् स्वापकाले सर्वं मृषा भवति । इत्थममुना प्रकारेणोभयथापि अनिशं निरंतरं मिथ्यात्वसिद्धौ सत्यां तत्र मूढः यः सज्जते अभि-निवेशं करोति तत् कस्मात् कारणादिति वयं न विद्मः॥ ३४ ॥

अथैतदेव सोदाहरणं निरूपयति । इह लोके जाग्रदवस्थायां जीवंतं स्वजनं अथेदानीं स्वप्नकाले मृतं निरीक्ष्याकस्मान्निर्वेदं दुःखं याति प्राप्नोति । अथ वा जागृत्यां मृतं विपन्नं स्वजनं स्वप्नकाले जीवंतं वीक्ष्य हर्षं प्रयाति । अनेन जागृत्यनुभूतं स्वप्नकाले मृषा भवतीति दर्शितं । अथ तत्र तदस्मरणे-नान्यथा प्रतीयत इति चेत् तत्राह । स्मृत्वेति । तस्य जागृत्यां मृत-स्य जंतोर्निधनं स्मृत्वापि । अथवा जीवंतं असुयुतिं जीवनं स्मृत्वापि तेन सह भाषते वार्ताः कथयति । तथा मृतेन सह दीनालापं करोति । तथा स्वप्नकालेपि स्मरणवतोपि मृषात्वप्रतीतिर्भवतीति सूचितं । एवं सति उभयथा मिथ्याभूतौ सत्यां अपि स्वप्ने मृषात्वप्रतीतिर्जागृत्यां च सत्यत्वप्रतीतिर्लोकानां कथमुत्पद्यत इत्यत आह । भूयोल्पकसमयवशात् सत्यता मृषात्वं वा भाति भासते न तु तात्त्विकं । भूयांश्चाल्पकश्च तौ समयौ च तद्वशाज्जागृतिः चिरकालमस्ति । तत्र दृढानुसंधानात् सत्यत्वं भासते । स्वप्नस्तु अल्पसमयदृश्योस्त्यतस्तत्र मृषात्वं भासते । विचार्यमाणे तावदुभयोरपि असत्यत्वमित्यर्थः ॥ ३५ ॥

स्वाप्नस्त्रीसंगसौख्यादपि भृशमसतो या च रेतश्च्युतिः स्यात
सादृश्यात्तद्वदेतत्स्फुरति जगदसत्कारणं सत्यकल्पं
स्वप्ने सत्यः पुमान्स्याद्युवतिरिह मृषैवानयोः संयुतिश्च
प्रातः शुक्रेण वस्त्रोपहतिरिति यतः कल्पनामूलमेतत् ॥ ३६ ॥

पश्यंत्यारामस्य प्रतिदिवसममी जंतवः स्वापकाले
पश्यत्येनं न कश्चित्करणगणमृते मायया क्रीडमानं
जाग्रत्यर्थव्रजानामथ च तनुभृतां भासकं चालकं वा
नो जानीते सुषुप्तौ परमसुखमयं कश्चिदाश्चर्यमेतत् ॥ ३७ ॥

स्वप्ने मंत्रोपदेशः श्रवणपरिचितः सत्य एव प्रबोधे
स्वाप्राद्देवप्रसादादभिलषितफलं सत्यतां प्रातरेति
सत्यप्राप्तिस्त्वसत्यादपि भवति तथा किं च तत्स्वप्रकाशं
येनेदं भाति सर्वं चरमचरमथोच्चावचं दृश्यजातं ॥ ३८ ॥

• इदानीमसद्रूपोपादानकं विश्वमपि सदिति सदृष्टांतमाह । असतः अविद्यमानादपि स्वाप्नस्त्रीसंगसौख्याद्रेतश्च्युतिः शुक्रद्रावो भवति । सादृश्याद्व्यावहारिकसत्यात् तद्वदसत्कारणं जगत् सत्यकल्पं स्फुरति नामैकदेशे नामग्रहणमिति वत् । असत् सदसद्विलक्षणमविद्याख्यं कारणं यस्य तदसत्कारणं एवंविधं जगत् सत्यकल्पं स्फुरति न तु सत्यं सुषुप्तावस्तमितत्वात् । अथ दृष्टांते न दार्ष्टांतिकं सिद्धमाह । स्वप्न इति । स्वप्ने पुमान् सत्यः युवतिः स्त्री मृषा च परं अनयोः स्त्रीपुरुषयोः संयुतिः सुरतमपि मृषा तथा प्रातर्जाग्रदवस्थायां शुक्रेण रेतसा वस्त्रोपहतिः प्रत्यक्षसिद्धा एवं आत्मा सत्यः स्त्री माया असत्या तयोर्युतिः संबंधः आध्यासिकः अत एव मृषा । तस्माज्जातं जगत् व्यवहारसत्यं यतः सर्वकल्पनामूलं काल्पनिकमित्यर्थः ॥ ३६ ॥

अथावस्थात्रयेपि अनुभूयमानं आत्मानं केऽपि न चिन्वंतीत्याश्चर्यमाह । अमी जंतवो जीवाः प्रतिदिवसं स्वापकाले अस्य परमात्मनः आरामं क्रीडां पश्यंति परंत्वेनं आत्मानं कश्चिन्न पश्यति किंभूतमात्मानं करणगणमृते बाह्येंद्रियव्यतिरेकेणापि मायया स्वाप्नदेहेंद्रियरूपया क्रीडमानं अथास्तां तावत् मौढ्यदशा स्वप्नावस्थायां जागृत्यामपि तनुभृतां चालकं तथा अर्थव्रजानां भासकं प्रकाशकं निरंतरं पश्यति न । तथा सुषुप्तौ परमसुखमयं एवंविधं परमात्मानं कोपि न जानंतीत्येतन्महदाश्चर्यमित्यर्थः ॥ ३७ ॥

ननु जाग्रदवस्थायामपि स्वप्नदृष्टांतेन मृषात्वे प्रोच्यमाने तस्यां गुरुमुखादुपनिषद्विचारादिना यो ब्रह्मबोधः सो मृषा भवति । ततो ब्रह्मापि वंध्यापुत्रवदसद्रूपं स्यादित्याशंक्याह । स्वप्नेत्यादिना ॥ ३८ ॥

मध्यप्राणं सुषुप्तौ स्वजनिमनुविशंत्यग्निसूर्यादयोऽमी
वागाद्याः प्राणवायुं तदिह निगदिता ग्लानिरेषां न वायोः
तेभ्यो दृश्यावभासो भ्रम इति विदितः शुक्तिकारौप्यकल्पः
प्राणायामव्रतं सच्छ्रुतिशिरसि मतं स्वात्मलब्ध्यै न चान्यत्॥३९॥

नोऽकस्मादार्द्रमेधः स्पृशति च दहनः किंतु शुष्कं निदाघा-
दार्द्रं चेतोऽनुबंधैः कृतसुकृतमपि स्वोक्तकर्म प्रजार्थैः
तद्वज्ज्ञानाग्निरेतत्स्पृशति न सहसा किंतु वैराग्यशुष्कं
तस्माच्छुद्धो विरागः प्रथममभिहितस्तेन विज्ञानसिद्धिः ॥ ४० ॥

एवं स्वप्ननिदर्शनेन जगन्मिथ्यात्वं निरूप्येदानीं जगत्सत्यत्वाभिव्यंजकायां जागृत्यामपि तन्मिथ्यात्वं निरूपयति । अमी अग्निसूर्यादयः वागादींद्रियाधिदेवताः सुषुप्तौ तृतीयावस्थायां मध्यप्राणं विराजं अनुविशंति प्रविशंति । किंभूतं विराजं स्वजनिं स्वस्य जनिः यस्मिन् स तथा स्वस्योत्पादकं । मुखादिंद्रश्चाग्निश्चेति तथा चक्षोः सूर्यो अजायतेति श्रुतेः । कार्यजातस्य कारणे प्रवेशो युक्त एवेत्यर्थः । तथा वागाद्या इंद्रियगणाः सुषुप्तौ प्राणवायुं इंद्रसंज्ञं अनुविशंति । तत् तस्मात्कारणादेषां साधिदेवतानामिंद्रियाणां ग्लानिरस्तमयः निगदिता उपनिषत्प्रतिपादिता । परंतु स्थूलसूक्ष्मप्रपंचलयरूपायां सुषुप्तावपि प्राणवायोः अस्तमयो नास्ति । ततः सुषुप्तौ श्वासरूपेण प्रत्यक्षत उपलभ्यमानत्वात् । अथ जागृत्यामपि चक्षुरादिभ्यो यो दृश्यावभासः दृश्यानां रूपरसादीनां प्रतिभासः स भ्रमः न तात्विक इति विदितः । अथ भ्रमे दृष्टांतमाह शुक्तिकारौप्यकल्प इति । यथा शुक्त्यवच्छिन्नेऽधिकरणे रौप्यं प्रातिभासिकं प्रतीयते तद्वद्ब्रह्मण्याधिकरणे नामरूपात्मकं विश्वं प्रातिभासिकं । तस्मात् कारणादवस्थात्रयेपि अनस्तमितं प्राणायामव्रतं स्वात्मलब्ध्यै श्रुतिशिरसि मतं नान्यच्चक्षुरादिव्रतं । तस्यावस्थात्रयेपि आत्मलब्धावशक्तत्वात् ॥ ३९ ॥

अथ तपोवैराग्ययोगेनैव ज्ञानसिद्धिरित्यनुवदति । आर्द्रं जलाक्तं एधः काष्ठं दहनः कस्मान्न स्पृशति । किंतु । निदाघादातपात् शुष्कमेव स्पृशति । तद्वदनुबंधैः भार्यादिविषयैः आर्द्रं चेतः स्वोक्तकर्म प्रजार्थैः कृतसुकृतमपि ज्ञानाग्निर्न स्पृशति स्वोक्तकर्म स्वाश्रमवर्णोचितं प्रजा पुत्रः पुत्रेणैव जयो नान्येन कर्मणेति । तथा नापुत्रस्य लोकोस्तीति श्रुतिः । तथार्थैरर्थसाध्यैः यज्ञदानादिभिः कृतसुकृतमपीत्यर्थः । किंतु वैराग्यशुष्कमेव चेतः ज्ञानाग्निः स्पृशति । तस्मात्कारणाच्छुद्धो विरागः वांतत्यक्तान्नवत् विषयवितृष्णता प्रथमं आवश्यकत्वेनाभिहितः प्रोक्तः अनेन कृत्वा विज्ञानसिद्धिर्भवति । अत्र श्रुतिः । न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः परेण नाकं निहितं गुहायां विभ्राजदेतेतद्यतयो विशंति । भाष्यं । एके त्यागेन वैराग्येण यतयः अमृतत्वं आनशुः प्राप्ताः परंतु न कर्मणा फलापेक्षया न प्रजया पुत्रेण न धनेन

यत्किंचिन्नामरूपात्मकमिदमसदेवोदितं भाति भूमौ
येनानेकप्रकारैर्व्यवहरति जगद्येन तेनेश्वरेण
तद्वत्प्रच्छादनीयं निभृतरशनया यद्वदेव द्विजिह्व-
स्तेन त्यक्तेन भोज्यं सुखमनतिशयं मा गृधोऽन्यद्धनाद्यं ॥ ४१ ॥
जीवन्मुक्तिर्मुमुक्षोः प्रथममथ ततो मुक्तिरात्यंतिकी च
तेऽभ्यासज्ञानयोगाद्गुरुचरणकृपापांगसंगेन लब्धात्
अभ्यासोऽपि द्विधा स्यादधिकरणवशाद्दैहिको मानसश्च
शारीरस्त्वासनाद्यो ह्युपरतिरपरो ज्ञानयोगः पुरोक्तः ॥ ४२ ॥
सर्वानुन्मूल्य कामान्हृदि कृतनिलयान् क्षिप्तशंकूनिवोच्चै-
र्दीर्घेद्देहाभिमानस्त्यजति चपलतामात्मदत्तावधानः

दानादिना । अथामृतत्वं निरूपयति । परेणेति । परेण परब्रह्मणा नाकं स्वांशभूतं गुहायां हृदाकाशे यन्निहितं निधिवद्गोपितं वस्तु यच्चार्थप्रकाशकत्वेन भ्राजते स्फुरति तदमृतं यतयो विशंति । वैराग्यं ज्ञानगर्भमिति यतः पठति ॥ ४० ॥

अथ प्रागुक्तोपदेशक्रमे ईशावास्योपनिषदुक्तां श्रुतिं संवादयन्नाह । यत्किंचिदसदेवोदितं नामरूपात्मकं इदं शुक्तिकारजतवत् । इदंत्वेन भूमौ येन आभासते तथा गच्छतीति जगद्येन कृत्वानेकप्रकारैर्व्यवहरति तेनेश्वरेणेदं तद्वत् प्रच्छादनीयं आच्छादनीयं तद्वत् किंवत् यद्वत् निभृतरशनया निश्चयेन ज्ञातया रज्वा एषःप्रातिभासकत्वेन चालकत्वेन ज्ञातो द्विजिव्हः सर्प आच्छाद्यते । तद्वज्जगद्भासकत्वेन चालकत्वेन च संविच्चिद्रूपत्वनिश्चयेन परमात्मना जगदाच्छादनीयं । तेन जगदाभासेनत्यक्तेन दूरतोपास्तेन केवलीभावे प्राप्ते अनतिशयमत्युत्कृष्टमात्यंतिकं सुखं भोज्यं । परंतु । अन्यत् तद्विलक्षणं धनादिकं विषयसुखं मा गृधः माभिकांक्ष इत्युपदेशात्रयं । श्रुतिश्च । ईशावास्यमिति । भाष्यं । इदं पुरो भासमानं यत्किंचिन्नामरूपात्मकं सर्वमाब्रह्मस्तंभपर्यंतं गच्छतीति जगत् व्यवहारवत् जगत्यां पृथिव्यां यद्भाति तत् । ईष्टे इति ईट् तेन ईशा सर्वोत्कृष्टेन परमात्मना कृत्वावास्यं वसु आच्छादने आच्छादनीयं जगद्भासकत्वेन चालकत्वेन च ज्ञातेन परब्रह्मणा प्रातिभासिकं जगदाच्छाद्यं तुच्छत्वेन ज्ञेयं एवं तेन जगदाभासेन त्यक्तेन दूरतोपास्तेनावशिष्टमात्मस्वरूपमानंदात्मकं भुंजीयाः । परंतु धनं विषयसुखं मा गृधः । गृधु अभिकांक्षायां इदं कस्यस्वित् किमुपादानमिति ज्ञात्वा माभिकांक्षय तिष्ठन् गेहे गृहेश इति शक्त्या निर्मोकतः इति पठनीयं ॥ ४१ ॥

अथ द्विधा मोक्षप्रकारमाह । उपरतिः प्रपंचोपरमः । शेषं स्पष्टं ॥ ४२ ॥

अथ प्रथमोद्दिष्टां जीवन्मुक्तिमाह । हृदि कृतनिलयान् अनेककल्पपर्यंतं संस्काररूपेण हृदि स्थितान् सर्वान् कामान् मनोरथानुन्मूल्य समूलमुत्खातान् कृत्वा

यात्यूर्ध्वस्थानमुच्चैः कृतसुकृतभरो नाडिकाभिर्विचित्रं
नीलश्वेतारुणाभिः स्रवदमृतभरं गृह्यमाणात्मसौख्यः ॥ ४३ ॥

दीर्घदेहाभिमानः सन् चपलतां त्यजति। अहं ममताभिमानमुत्सृज्य मानोवेगं त्यजति। किंभूतः आत्मदत्तावधानः आत्मनि दत्तं अवधानं अविरतानुसंधानं येन स तथा एवं तथा भूतः सन् उच्चैः ऊर्ध्वं स्थानं सर्वोत्कृष्टब्रह्मरंध्रं सुषुम्नाविवरेण याति किंभूतं स्थानं नीलश्वेतारुणाभिः नाडीभिः विचित्रं सहस्रदलं चक्रं। पुनः किंभूतं। स्रवदमृतभरं कुंडलिनीमुखनिर्भेदनामृतं स्रवतीत्यर्थः। किंभूतो जीवन्मुक्तः। कृतसुकृतभरः कृतानेकपुण्यपुंजः। पुनः किंभूतः गृह्यमाणात्मसौख्यः ब्रह्मानंदवानस्मीति किंचिदुर्वरिताहंकारशेष इत्यर्थः। अत्र श्रुतिः। कंडिकाचतुष्टयं। यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि स्थिताः॥ अथ मर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुतइति। तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेथायमनस्थिकोशरीरः प्राज्ञ आत्मा ब्रह्मैव लोक एव सम्राडिति होवाच याज्ञवल्क्यः। तदप्येते श्लोकाः। अणुः पंथा विवरो मा स्पृष्टो वित्तो मयैव। तेन धीरा अपि यंति ब्रह्मविद उत्क्रम्य स्वर्गं लोकमितो विमुक्ताः। तस्मिञ्छुक्लमुतनीलमाहुः पिंगलं हरितं लोहितं च। एष पंथा ब्रह्मणा अनुवित्तस्तेनैति ब्रह्मवित् तैजसः पुण्यकृच्च। भाष्यं। अस्य मुमुक्षोः पुरुषस्य हृदि स्थिताः सर्वे कामाः संकल्पाः यदा प्रमुच्यंते शांता भवंति। अथेत्यनंतरं तदानीमित्यर्थः। मर्त्यो मरणधर्मा कोपि अमृतो मुक्तो भवति किं पुनर्देवादिः। अथामृतत्वमेवाह। अत्रेति। अत्रास्मिन्देहे वर्तमान एव ब्रह्म समश्नुते परमानंदमनुभवति। अथ शरीरे वर्तमानः सन् तदभिमानशून्य इति सदृष्टांतमाह। तद्यथेति। अहेः सर्पस्य निर्ल्वयनी निर्मोकः कंचुकं मृता निर्जीवा वल्मीके सर्पस्थाने प्रत्यस्ता क्षिप्ता सती शयीत। निश्चेष्टतया स्थिता सा दूरात् सर्प इव दृश्यते परंतु सर्पकृत्यं न करोति। एवं तद्वदिदं अयं पुरुषः शरीरमित्राधिष्ठाय शेते निश्चेष्टतयावतिष्ठति। अथेत्यनंतरं अयं प्राज्ञ आत्मा जीवः अनस्थिकः अस्थिरूपं स्थूलदेहं तदभिमानशून्यस्तथा अशरीरः शरीरं सूक्ष्म शरीरं तदभिमानशून्यश्च भो सम्राडिति संबुध्या याज्ञवल्क्यो जनकं प्रत्युवाच। तदप्येते श्लोका इति। तत्रार्थे श्लोकाः प्रसिद्धा मंत्राः संति। तानेव याज्ञवल्क्य आह अणुरिति। अणुः सूक्ष्मो मार्गः सुषुम्नाविवरोपलक्षितः विवरो विशिष्टतरः श्रेष्ठतमः एवं विधो मार्गः मां स्पृष्टः मम गुरुमुखात् कर्णघातो जातः। अनंतरं मयैव अनुवित्तः अनुष्ठितः तेन मार्गेण धीरा ब्रह्मविदः पुरुषा अपि इतः प्रपंचाद्विमुक्ताः संतः सुवर्गं लोकं ब्रह्मरंध्राख्यं स्थानं यंति प्राप्नुवंति। तस्मिन् विचित्रवर्णा नाड्यः संतीत्याह शुक्लमित्यादि। एवमध्यात्मरीत्या व्याख्यातं। केपि आधिदैविकरीत्या विष्ण्वादिलोकप्राप्ति व्याकुर्वंति। एवमेष पंथा मार्गः ब्रह्मणा मतः पूर्वमनुवित्तः अनुष्ठितः। तेनैव मार्गेण

प्रापश्यद्विश्वमात्मेत्ययमिह पुरुषः शोकमोहाद्यतीतः
शुक्रं ब्रह्माध्यगच्छत्स खलु सकलवित्सर्वसिद्ध्यास्पदं हि
विस्मृत्य स्थूलसूक्ष्मप्रभृति वपुरसौ सर्वसंकल्पशून्यो
जीवन्मुक्तस्तुरीयं पदमधिगतवान्पुण्यपापैर्विहीनः ॥ ४४ ॥
यः सत्त्वाकारवृत्तौ प्रतिफलति युवा देहमात्रावृतोऽपि
तद्धर्मैर्बाल्यवार्ध्यादिभिरनुपहतः प्राण आविर्बभूव
श्रेयान्साध्यस्तमेतं सुनिपुणमतयः सत्यसंकल्पभाजो-
ऽप्यभ्यासाद्देवयंतः परिणतमनसा साकमूर्ध्वं नयंति ॥ ४५ ॥

ब्रह्मवित्तैजसः वैराज्यत्वं प्राप्तः पुण्यकृदेति नान्य इत्यर्थः ॥ ४३ ॥

अस्मिन्नर्थे ईशावास्योपनिषदुक्तां श्रुतिं संवादयति । अयं पुरुषः इहास्मिन् देहे वर्तमानः सन् विश्वं आत्मेति प्रापश्यत् पश्यति स्म । विश्वं विश्वाकारेण नापश्यत् । किंत्वात्माकारेणैव । किंभूतः शोकमोहाद्यतीतः एवंविधः सन् शुक्रं शबलं ब्रह्म हिरण्यगर्भाख्यं अध्यगच्छत् अधिगतवान् एवं हिरण्यगर्भत्वं प्राप्तः सकलवित् सर्वज्ञो जातः तथा सर्वसिद्धीनामणिमाद्यष्टानामास्पदं स्थानं च जातः । तथा असौ पुरुषः स्थूलसूक्ष्मप्रभृतिवपुर्विस्मृत्य सर्वसंकल्पशून्यः सन् तुरीयं पदं अधिगतवान् आत्मसुखमनुभवति स्म । ततः पुण्यपापैर्विहीनः सकलकर्मातीतः । अत्र श्रुतिः । सार्धकंडिका । यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः । को मोहस्तत्र कः शोक एकत्वमनुपश्यतः ॥ १ ॥ स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धं । भाष्यं । यस्मिन् काले विजानतो विज्ञानवतः पुरुषस्य सर्वभूतानि आत्मैवाभूत् सकलं ब्रह्मैवाभूत् तत्र तस्मिन् काले को मोहः किमज्ञानं । तथा तन्मूलः शोकः कः न कोपीत्यर्थः । किंभूतस्य विज्ञानवतः एकत्वमभेदमनुपश्यतः सर्वत्र एकत्वभावेनैव विज्ञानस्वरूपमित्यर्थः एवं स जीवन्मुक्तः शुक्रं शबलं हिरण्यगर्भरूपं पर्यगात् प्राप्तवान् । किंभूतं शुक्रं अपापविद्धं । पापमहंकारस्तेनास्पृष्टं अत एव शुद्धं प्राप्तवानित्यर्थः । पुनः किंभूतं । अस्नाविरं । स्नायवः शिराः तत्स्वरूपं स्थूलदेहं तस्मादतीतं अस्नाविरं । तथा अव्रणं । व्रणं चिन्हं सूक्ष्मभूतेंद्रियप्राणावस्थात्मकं लिंगदेहं तस्मादप्यतीतं । एवं चतुर्थे महाकारणदेहे वर्तमानमित्यर्थः ॥ ४४ ॥

अथ जीवन्मुक्तस्य प्राणा ऊर्ध्वं गच्छंतीत्येतस्मिन्नर्थे ऋक्शाखीयां श्रुतिं संवादयति । यः आत्मा सत्वाकारवृत्तौ प्रतिफलति स युवा प्राण आविर्बभूव । सत्वगुणोपपन्नो जीव इत्यर्थः । स देहमात्रावृतोपि बाल्यवार्ध्यादिभिस्तद्धर्मैर्देहधर्मैरनुपहतः सन् श्रेयान् कल्याणरूपः तथा साध्यः साधयितुं उत्तमां गतिं प्रापयितुं योग्यः तं एतं प्राणं सुनिपुणमतयः कुशलबुद्धयः सत्ये परब्रह्मणि संकल्पो मनोगतिर्येषां ते तथाविधाः पूर्वोक्तादभ्यासाद्देवत्वं प्राप्तुमिच्छंतः परिणतमनसा विविक्तेन

प्रायोऽकामोऽस्तकामो निरतिशयसुखायात्मकामस्तदाऽसौ
तत्प्राप्तावाप्तकामः स्थितचरमदशस्तस्य देहावसाने
प्राणा नैवोत्क्रमंति क्रमविरतिमिताः स्वस्वहेतौ तदानीं
क्वायं जीवो विलीनो लवणमिव जलेऽखंड आत्मैव पश्चात् ॥४६॥
पिंडीभूतं यदंतर्जलनिधिसलिलं याति तत्सैंधवाख्यं
भूयः प्रक्षिप्तमस्मिन् विलयमुपगतं नामरूपे जहाति

मनसा सहोर्ध्वं नयंति । अत्र श्रुतिः तृतीयाष्टके । युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः । तं धीरासः कवय उन्नयंति । स्वाध्यो ३ मनसा देवयंतः । भाष्यं । बाल्यवार्धक्याद्यैर्देहविकारैर्विरहितो युवा मुख्यप्राणः । सुवासा सुष्ठु वासः प्रावरणं यस्य । सत्वाकारांतःकरणवृत्तिबिंबतः परिवीतः शरीरावृतः सन् आगच्छत् जीवदशां प्राप्तः उ इति निश्चयेन स जायमानः प्रादुर्भूतमात्रः श्रेयान् सत्कर्मनिरतो भवति । स स्वाध्यः सुखेनाराध्यः तमेवं धीरं धीरासः दृढव्रताः कवयः क्रांतदर्शिनो ज्ञानिनः देवयंतो देवत्वं प्राप्तुमिच्छंतः मनसा सह उन्नयंति सुषुम्नामार्गेणोर्ध्वं नयंति ब्रह्मरंध्रं प्रापयंति ॥ ४५ ॥

अथ निर्वाणमुक्तिमाह । प्राङ् निरूपितो जीवन्मुक्तः पुरुषः प्रायो बाहुल्येन अकाम एव तिष्ठति । यतोस्तकामः आत्माकारस्य मनसो विक्षेपाभावात् । परंतु निरतिशयसुखं परमानंदः तदर्थमात्मकामः । आत्माकारः कामो यस्य स तथा । अथ तत्प्राप्तौ अकामः परमानंदे क्षुद्रानंदानामंतर्भूतत्वात् । तदुक्तं भगवता । यं लब्ध्वा चापरं लाभं मन्यते नाधिकं तत इति । किंभूतः स्थितचरमदशः स्थिता प्राप्ता चरमा दशा यस्य । अथ दशातीतत्वमाह । तस्येति । तस्य पुरुषस्य देहावसाने प्राप्ते सति प्राणा नैवोत्क्रमंति । उत्क्रमणं हि पुनर्देहारंभाय कल्पते । प्रकृते तु तथा न भवति । किंतु स्वस्वहेतौ स्वस्वकारणे क्रमविरतिं क्रमेण नाशं इताः प्राप्ताः । तदानीं क्वायं जीवदशापन्नः । क्वास्ति न क्वापीत्यर्थः । यतो जले लवणमिव विलीनः । लयं प्राप्तः । पश्चादखंड आत्मैव तिष्ठति । अवच्छेदकाभावात् । ब्रह्मैव सन् ब्रह्माप्येति इति श्रुतेः । जीवः प्रथमं ब्रह्मैवासीन्मध्ये जीवदशां प्राप्तः पुनर्ब्रह्मत्वमेव प्राप्नोतीत्यर्थः ॥ ४६ ॥

अथ लवणमिव जलमित्येतद्दृष्टांतं विशदयन् आह । स्पष्टोर्थः । अत्र श्रुतिः यथा सैंधवखिल्य उदके प्रास्त उदकमेवानुविलीयेत नो हास्योद्ग्रहणायेव स्याद्यतस्त्वाददीत लवणमेव वा । अरे इदं महद्भूतं अनंतमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति अरे ब्रवीमीति होवाच याज्ञवल्क्यः । भाष्यं । मैत्रेयीं ज्येष्ठपत्नीं प्रति याज्ञवल्क्य उवाच । अरे मैत्रेयि सैंधवखिल्यः सैंधवपिंडः उदके प्रास्तः प्रक्षिप्तः सन् अनुविलीयेत विलीनः सन् उदकत्वमेव प्राप्नोति न

प्राज्ञस्तद्वत्परात्मन्यथ भजति लयं तस्य चेतो हिमांशौ
वागग्नौ चक्षुरर्के पयसि पुनरसृग्रेतसी दिक्षु कर्णौ ॥ ४७ ॥
क्षीरांतर्यद्वदाज्यं मधुरिमविदितं तत्पृथक्भूतमस्मा-
द्भूतेषु ब्रह्म तद्वद्व्यवहृतिविदितं श्रांतविश्रामबीजं
यं लब्ध्वा लाभमन्यं तृणमिव मनुते यत्र नोदेति भीतिः
सांद्रानंदं यदंतः स्फुरति तदमृतं विध्द्यतो नान्यदार्तं ॥ ४८ ॥

प्रकारांतरं ह इति निश्चयेन पुनरस्य सैंधवस्योद्ग्रहणाय नैव स्यात् । तत् सैंधव जले प्रक्षिप्तं तस्य उत् ऊर्ध्वं ग्रहणं बहिर्निष्कासनं तदर्थेनैव स्यात् । पुनस्तस्य न प्राप्तिः । अथ तदेवाह । तु पुनः लवणं क्षारोदकमेवलभ्यते एवममुना प्रकारेण इदं महद्भूतं अनंतमक्षोभ्यं अपारं अमर्यादं वैराजरूपं विज्ञानघने परमात्मस्वरूप एव एतेभ्यो भूतेभ्यः स्वकारणेभ्यः समुत्थाय उदकं प्राप्य तान्येव भूतान्यनुलक्षीकृत्य विनश्यति तस्य न प्रेत्य संज्ञास्तीति । प्रेत्य नाशं प्राप्य तस्य संज्ञा नास्तीति स्वकारणे लीयंत इत्यत्र आर्तभागयाज्ञवल्क्ययोः संवादश्रुतिमुक्तवान् । तथा च श्रुतिः । याज्ञवल्क्य इति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चंद्रं दिशः श्रोत्रं पृथिवीं शरीरमात्मौषधीर्लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीत्याह । आहर सौम्य हस्तं । भाष्यं । जारत्कारव आर्तभागो याज्ञवल्क्यं प्रति वदति । भो याज्ञवल्क्य । अस्य जीवन्मुक्तस्य पुरुषस्य मृतस्य त्यक्तदेहस्य वाक् अग्निं स्वाधिदैवतं अप्येति प्रविशति चक्षुरादित्यं प्रविशति । मनश्चंद्रं दिशः श्रोत्रं प्रविशति । इत्याद्यधिदैवतप्रवेश उक्तः । अथ शरीरं पृथिवीं स्वकारणभूतां प्रविशति । आत्मा हृदयावकाशः आकाशे प्रविशति लोमानि कंठादधस्तानि ओषधीः प्रविशंति । केशा मूर्धन्याश्च वनस्पतीन् वृक्षान् प्रविशंति । रेतः शुक्रं लोहितं अशुद्धं च अप्सु प्रविशति तदा क्वायं पुरुषो भवतीति प्राप्तसंकेतो याज्ञवल्क्यो वदति । आहरेति । भो सौम्य आर्तभाग हस्तं आहरेति हस्तं देहीत्यर्थः ॥ ४७ ॥

अथ सर्वं विश्वं आत्मसंबंधेनैव चलतीत्याह । यत् क्षीरांतर्दुग्धमध्ये यदाज्यं घृतमस्तीति मधुरिमविदितं मधुरिम्णा माधुर्येण ज्ञातं अथ तद् घृतं अस्मात् क्षीरात् पृथग्भूतं भिन्नमय नो ज्ञातं । यतः पुनर्घृतं क्षीरांते निक्षिप्तं सत् दुग्धत्वं न प्राप्नोति तद्वद्भूतेषु ब्रह्मास्तीति व्यवहृतिर्व्यवहारस्तेन विदितं । तच्च भूतापेक्षया भिन्नं । यतः श्रांतविश्रामबीजं । जागृत्यां श्रांतस्य पुरुषस्य सुषुप्तौ यो विश्रामस्तस्य बीजं कारणं । यतः यं लब्ध्वा प्राणी अन्यलाभं तृणमिव मनुते । तथा यत्र यस्मिन् ब्रह्मणि भीतिर्नोदेति । अद्वैतत्वात् । द्वितीयाद्वै भयं भवतीति श्रुतेः । यतः सुषुप्तौ स्थूलसूक्ष्मप्रपंचलये मनः केवलमात्माकारं भवति । एवं सांद्रानंदं वस्तु यदंतः स्फुरति

ओतः प्रोतश्च तंतुष्विह विततपटश्चित्रवर्णेषु चित्र-
स्तास्मिञ्जिज्ञास्यमाने ननु भवति पटः सूत्रमात्रावशेषः

तदमृतं विद्धि जानीहि । अतो नान्यत् पदार्थजातं तस्मात् कारणात् सर्वं आर्तं बाधितं विद्धि जानीहि । अतो नान्यत् पदार्थजातं । शुक्तिकारजतवदुत्तरक्षणे बाधदर्शनात् । अयमर्थः । केवलमुदकरूपे दुग्धे उदकाद्विलक्षणं तन्माधुर्यं तदंतर्गतस्याज्यस्यैव संभवति । एवं मृतरूपे देहे चेतनादि व्यापारः तथेंद्रियेष्वर्थप्रकाशः । एतदात्मकृतमेव न शरीरकृतं । यतो मृतशरीरे तथात्वं न दृश्यते । अनेन तेजोमयोमृतमयस्तयांतर्याम्यमृतमय इत्यादि श्रुतीनां विषयो दर्शितः ॥ ४८ ॥

अथेदं विश्वं परंपरया ब्रह्मण्येव ओतप्रोतमिति दर्शयति । इह लोके विततो विस्तृतः पटः तंतुषु ओतप्रोतो दृश्यते किंभूतेषु तंतुषु विचित्रवर्णेषु । किंभूतः पटः । विचित्रवर्णः । तस्मिन् पटे जिज्ञास्यमाने सम्यग्विचार्यमाणे । ननु निश्चयेन पटः सूत्रमात्रावशेषो भवति उर्ध्वतंतुषु ओतः तिर्यक्तंतुषु प्रोतः । एवंविधो यः पदार्थः स पटसंज्ञां प्राप्तः । परंतु तत्र सूत्रव्यतिरेकेणान्यः कोपि पदार्थो नानुभूयते तद्वत्नगनगरनरग्रामपश्वादिरूपं गुणकर्मविभागेन विचित्रं विश्वं वैराजरूपे ब्रह्मांडविग्रहे प्रोतं स च वैराजः वियति आकाशे प्रोतः तदपि वियत् ब्रह्मणि प्रोतं । अनेनाक्षरं ब्रह्म प्रतिपादितं । अत्र श्रुतिः । स होवाच यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदंतरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यं चेत्याचक्षत आकाश एव तदोतं प्रोतं चेति कस्मिन्नाकाश ओतश्चप्रोतश्चेति ॥ १ ॥ स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोवाय्वनाकाशमसंगमस्पर्शमगंधमरसमचक्षुष्कमश्रोत्रमवागमनोतेजस्कमप्राणमनामागोत्रमजरममरमभयममृतमजरमशब्दमविवृतमसंवृतमपूर्वमनपरमनंतरमबाह्यं न तदश्नोति कंचन न तदश्नोति कश्चन॥ २ ॥ भाष्यं । जनकसभायां याज्ञवल्क्येन सह विवदमानेषु ब्राह्मणेषु गर्गकन्या वाचक्नवी तया पृष्टो याज्ञवल्क्यः तस्याः प्रश्नं अनुवदति स्म । स होवाचेति । स याज्ञवल्क्यः ह इति निश्चित्य गार्गीं प्रत्युवाच । भो गार्गि त्वयैव तत् पृष्टं । तत् किं दिवो यदूर्ध्वं स्वर्गादप्युच्चं । तथा पृथिव्याः सकाशात् यदर्वागधो वर्तते तथा यदंतरा यन्मध्ये इमे दृश्यमाने द्यावापृथिवी तथा यद्भूतमतिक्रांतं भवद्वर्तमानं भविष्यदागामि पदार्थमित्याचक्षते । तत् कस्मिन्नोतं प्रोतं चेति त्वया पृष्टे सति मयोत्तरितं तदाकाश एवौतं प्रोतं चेति । पुनः त्वया पृष्टं कस्मिन् वा आकाशः ओतश्च प्रोतश्चेति तत्रोत्तरं श्रूयतामित्याह । स होवाचेति । भो गार्गि त्वया एतद्वा पृष्टं तर्हि ब्राह्मणा ब्रह्मज्ञाः पुरुषाः एतदक्षरं अविनाशि ब्रह्म अभिवदंति तस्मिन्नक्षरे ब्रह्मणि आकाश ओतश्च प्रोतश्चेति शेषः । तत्र किंभूतमक्षरमिति यदि पृच्छसि तर्हि श्रूयतामित्याह । अस्थूलमिति । स्थूलादि-

तद्वद्विश्वं विचित्रं नगनगरनरग्रामपश्वादिरूपं
प्रोतं वैराजरूपे स वियति तदपि ब्रह्मणि प्रोतमोतम् ॥ ४९ ॥
रूपं रूपं प्रतीदं प्रतिफलनवशात्प्रातिरूप्यं प्रपेदे
ह्येको द्रष्टा द्वितीयो भवति च सलिले सर्वतोऽनंतरूपः
इंद्रो मायाभिरास्ते श्रुतिरिति वदति व्यापकं ब्रह्म तस्मा-
ज्जीवत्वं यात्यकस्मादतिविमलतरे बिंबितं बुद्ध्युपाधौ ॥ ५० ॥

चतुर्विधपरिमाणातीतं जात्यभिप्रायेणैकत्वनिर्देशः। अलोहितमिति । लोहितादि-वर्णातीतं । अथास्नेहं । स्नेहश्चिक्कणतागुणस्तद्रहितं । अच्छायममूर्तं अतमं तमोभाव-रूपाज्ञानं मायाख्यं ततोप्यतीतं । अवायु अनाकाशं ताभ्यामतीतं असंगं असन्मीलि-तं । अस्पर्शं स्पर्शरहितं तथा अचक्षुष्कं इत्यादितः इंद्रियरहितं अथ तद्गतं अधिदैवतरूपं तेजो न भवतीत्यतेजस्कं तर्हींद्रियचालकः प्राणो भविष्यतीति चेत् तदपि निषेधयति अप्राणमिति । अमुखं मुखरहितं नामगोत्ररहितं च अजरं जरा-तीतं च अमरणस्वभावं द्वितीयाभावात् अभयं अमृतं नित्यमुक्तस्वभावं अरजं गुणातीतं लोकातीतं वाशब्दं शब्दागोचरं । अविवृतं विवर्तवर्जितं असंवृतं अव-च्छेदरहितं अपूर्वं न विद्यते किंचित् पूर्वं यस्मात् अनपरं न विद्यते अपरं यस्मादनंतरं न विद्यते अंतरमभ्यंतरं यस्य अबाह्यं न विद्यते बाह्यावरणं यस्य । एवं विधमेतत् किंचन किमपि नाश्नाति नांगीकुरुते असंगोदासीनत्वात् तथा कश्चन तन्नाश्नोति न व्याप्नोति अग्राह्यत्वात् ॥ ४९ ॥

अथात्मनो बिंबप्रतिबिंबन्यायेन सर्वात्मकत्वमाह । अत्र प्रतिबिंबविषये श्रुतित्रय-मुपन्यस्तवान् । इदं ब्रह्म प्रतिफलनवशात् रूपं रूपं प्रति प्रातिरूप्यं प्रपेदे प्रतिरूपस्य भावः प्रातिरूप्यं । अत्र श्रुतिः । दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदपश्यन्नवोचत् रूपं रूपं प्रतिरूपो बभूवेति । अत्रेयमाख्यायिका । पूर्वम-श्विनौ देवभिषजावात्मज्ञानोपदेशार्थं दधीचिं प्रति गत्वा आवाभ्यां आत्मविद्योप-देशोऽस्त्वित्यूचतुः । तेनोत्तरितं क्षणांतरे उपदेक्ष्यामीति दधीचिवाक्यं श्रुत्वा स्वगृहं गतौ तदंतरे इंद्रः समागत्य दधीचिं प्रत्युक्तवान् । त्वयैतौ मदीयभिषजौ नोपदेष्टव्यौ अथ यदि मदीयं वचनं न शृणोषि तर्हि तव शिरः पातयिष्यामीत्यु-क्त्वा निर्गतः । पुनरश्विनावागतौ ततस्तौ दधीचिमुखाद्विदितवृत्तांताववोचतुः । भो दधीचे क्षणांतरे उपदेक्ष्यामीति तव प्रतिज्ञा मिथ्या भवितुं नार्हतीति । इदानीं तव शिरः स्थानांतरे निधाय अश्वशिरस्त्वयि संयोज्य तेन शिरसात्मविद्यामुपदिशस्व तत इंद्र आगत्याश्वशिरश्छित्वा गमिष्यति पुनस्तव स्वाभाविकं शिरः संयोजयिष्याव इति नासत्यवचसा तथाविधायां सत्यां अश्वशिरसा मधुकांडमुपदिष्टवानिति पूर्ववृत्तांतः। अथ दध्यङ्ङाथर्वणः अथर्वणस्यापत्यं आथर्वणः एवंविधो दधीचिः अश्विभ्यां

तज्ज्ञाः पश्यंति बुद्ध्या परमबलवतो माययाक्तं पतंगं
बुद्धावंतः समुद्रे प्रतिफलितमरीच्यास्पदं वेधसस्तं
यादृग्यावानुपाधिः प्रतिफलति तथा ब्रह्म तस्मिन्यथाऽऽस्यं
प्रासादर्शानुरूपं प्रतिफलति यथावस्थितं सत्सदैव ॥ ५१ ॥

यदुवाच तदेव ऋषिर्वेदः पश्यन् अवोचत् । तत् किं । रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रति चक्षणाय । इंद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्यः हरयः शतादश । प्रतिबिंबितं रूपं यस्येति प्रतिरूप इत्यर्थः। अथ द्वितीयां श्रुतिमाह । एक इति । चपरं एको द्रष्टा सलिले द्वितीयो भवति पश्यतीति द्रष्टा । अत्र श्रुतिः । सलिल एको द्रष्टा द्वैतो भवतीति । अथ तृतीयां श्रुतिं दर्शयति । इंद्र इति । इंद्रो मायाभिः सर्वतो अनंतरूप आस्ते । इंद्रः परमात्मा मायाभिः कृत्वा सर्वतः अनंतरूप आस्ते । अत्र श्रुतिः । इंद्रो मायाभिः पुरुरूप ईयते । पुरुरूपो बहुरूपः ईयते ज्ञायते । इत्यमुना प्रकारेण श्रुतिव्यापकं ब्रह्म वदति । तस्माद् बुध्युपाधौ प्रतिबिंबितं सत् जीवत्वं याति । किंभूते उपाधौ विमलतरे स्वच्छतरे ॥ ५० ॥

अथास्मिन्नर्थे ऋक्शाखीयां श्रुतिं संवादयन्नाह । पतनशीलः पतंगः जीवः तं पूर्वं प्रतिपादितं जानंति ते तज्ज्ञाः शास्त्रविदः बुद्ध्या निश्चितांतःकरणवृत्त्या पश्यंति । अथ किंरूपत्वेन पश्यंतीत्याह । बुद्धाविति । बुद्धौ बुद्धिलक्षणे समुद्रे अंतः वेधसः परमात्मनः प्रतिफलितमरीच्यास्पदं प्रतिफलिताः प्रतिबिंबिताः ये मरीचयः किरणास्तदेवास्पदं स्वरूपं यस्य स तथा । अथ तस्य पतनशीलत्वं प्रकटयन्नाह परमेति । परमबलवतो दुर्जयमायस्य वेधसो हिरण्यगर्भगर्भस्य मायया अक्तं व्याप्तमुह्यमानं । अत्र श्रुतिः । पतंगमक्तमसुरस्य मायया हृदा पश्यंति मनसा विपश्चितः । समुद्रे अंतः कवयो विचक्षते मरीचीनां पदमिच्छंति वेधसः ॥ भाष्यं । असुरस्य बलवतो दुरंतमायस्य परमात्मनो माययाक्तं व्याप्तं अत एव पतंगं पतनशीलं जीवं विपश्चितः ज्ञानिनः मनसा संकल्पात्मकेन हृदा बुद्धिरूपेण बुध्येत्यर्थः । अंतः पश्यंति । समुंदनाद्व्यापनात् समुद्रः स एव बुद्धिलक्षणः तस्मिन् प्रतिफलितानां वेधसः ईश्वरस्य चित्स्वरूपाणां मरीचीनां पदं स्थानमिति कवयः क्रांतदर्शिनः विचक्षते वदंति । परं इच्छंति च उपासते च । अथ श्लोकोत्तरार्धेन प्रतिबिंबप्रकारं विशदयन्नाह । यादृगिति यद्रूपो यादृक् यत्प्रमाणो यावान् एवंविधो य उपाधिः बुद्धिलक्षणस्तस्मिन् तथा ब्रह्म प्रतिफलति । यादृगिति । सत्वरजस्तमोमयः यावानिति स्थूलसूक्ष्मो दीर्घो वर्तुलो वा यथोपाधिरस्ति तत्र तत्र तथैव स्वयं सदेव यथावस्थितं सत् प्रतिफलति । स मर्यादां न जहाति । अत्र दृष्टांतमाह । यथेति । यथा आस्यं मुखं प्रासादर्शो दर्पणः तदनुरूपमेव प्रतिफलति परंतु स्वयं यथावस्थितमेव तिष्ठति तद्वद्ब्रह्मापि ॥ ५१ ॥

एको भानुस्तदस्थः प्रतिफलनवशाद्यस्त्वनेकोदकांत-
र्नानात्वं यात्युपाधिस्थितिगतिसमतां चापि तद्वत्परात्मा
भूतेषूच्चावचेषु प्रतिफलित इवाभाति तावत् स्वभावा-
वच्छिन्नो यः परंतु स्फुटमनुपहतो भासते तैः स्वभावैः ॥ ५२ ॥
यद्वत् पीयूषरश्मौ दिनकरकिरणैर्बिंबितैरेति सांद्रं
नाशं नैशं तमिस्रं गृहगतमथवा मूर्छितैः कांस्यपात्रे
तद्वद् बुद्धौ परात्मद्युतिभिरनुपदं बिंबिताभिः समंता-
द्भासंते हींद्रियास्यप्रसृतिभिरनिशं रूपमुख्याः पदार्थाः ॥ ५३ ॥
पूर्णात्मानात्मभेदात्त्रिविधमिह परं बुध्यवच्छिन्नमन्यत्
तत्रैवाभासमात्रं गगनमिव जले त्रिप्रकारं विभाति
अंभोवच्छिन्नमस्मिन् प्रतिफलितमतः पाथसोंतर्बहिश्च
पूर्णावच्छिन्नयोगे व्रजति लयमविद्या स्वकार्यैः सहैव ॥ ५४ ॥
दृश्यंते दारुनार्यो युगपदगणितास्तंभसूत्रप्रयुक्ताः
संगीतं दर्शयंत्यो व्यवहृतिमपरां लोकसिद्धां च सर्वां

अथैतदेव दृष्टांतांतरेण दृढयन्नाह । क इति । स्पष्टार्थमिदं पद्यं ॥ ५२ ॥

ननु जलादिष्वर्कप्रतिबिंबं स्वकीयं रूपमेव प्रकटयति । न पदार्थांतरं । एवमात्मप्रतिबिंबो जीवश्चेत् तर्हि कथं पदार्थांतरज्ञापको भवतीत्याशंक्य दृष्टांतमाह । यद्वत्पीयूषरश्मौ जलमये चंद्रे दिनकरकिरणैर्बिंबितैः सद्भिः सांद्रं निबिडं नैशं रात्रिभवं तमिस्रं अंधकारः नाशं प्राप्नोति आदित्येन चंद्रमा भातीतिश्रुतेः । अथवा कांस्यपात्रे दिनकरकिरणैर्मूर्छितैः सद्भिः गृहगतं गृहांतर्गतं तमिस्रं ना‸ मतीति प्रसिद्धं । तद्वद् बुद्धौ बिंबिताभिः परमात्मद्युतिभिः समंताद्रूपमुख्याः पदार्थाः भासंते । तर्हि निमीलितनेत्रस्यापि पदार्थभासोस्तीति तत्राह । किंभूताभिः । अनुपदं तत्काल इंद्रियास्यप्रसृतिभिः इंद्रियास्यैरिंद्रियमुखैः प्रसृतिः प्रसारो यासां तास्ताभिः ॥ ५३ ॥

अथोपाधावेव त्रेधा ब्रह्मप्रतीतिरस्तीत्याह।इहोपाधौ पूर्णं च आत्माच अनात्माचेति त्रिविधं ब्रह्म भासते तत्रैकं परं पूर्णं उपाधेर्बाह्याभ्यंतरतोर्वर्तमानं तथा द्वितीयं बुध्यवच्छिन्नं बुध्यावृतं । तथान्यत् तृतीयं तत्रैव बुद्धौ आभासमात्रं प्रतिबिंबस्वरूपं । किमिव । जले त्रिःप्रकारगगनमिव विभाति । अथ प्रकारत्रयमाह । एकं अंभोवच्छिन्नं उदकावृतं अपरं अस्मिन्नुदके प्रतिफलितं तृतीयमतोस्मात् पाथसः उदकात् सकाशादंतर्बहिश्चेति । एवं पूर्णावच्छिन्नयोगे सति उपाधिभूताऽविद्या स्वकार्यैः प्रतिबिंबादिभिः सह लयं नाशं याति । अधिष्ठानसाक्षात्कारे आभासो नश्यतीत्यर्थः॥५४॥

अथ सूत्ररूपं सर्वात्मकं ब्रह्माह । युगपदेकसमयावच्छेदेन अगणिता अनेका दारुनार्यः काष्ठरचिता अचेतना अपि नार्यो नर्तक्यः संगीतं वाद्यनृत्यात्मकं दर्शयं-

सर्वत्रानुप्रविष्टादभिनवविभवाद्यावदर्थानुबंधात्
तद्वत् सूत्रात्मसंज्ञाद्व्यवहरति जगद्भूर्भुवःस्वर्महांतम् ॥ ५५ ॥
तत् सत्यं यत् त्रिकालेष्वनुपहतमदःप्राणदिग्व्योममुख्यं
यस्मिन् विश्रांतमास्ते तदिह निगदितं ब्रह्म सत्यस्य सत्यं
नास्त्यन्यत् किंच यद्वापरमधिकमतो नाम सत्यस्य सत्यं
सच्च त्यच्चेति मूर्त्ताद्युपहितमवरं सत्यमस्यापि सत्यं ॥ ५६ ॥

त्यो दृश्यंते । न ह्यचेतने तथात्वं युक्तमित्याशंक्याह । किंभूता नार्यः स्तंभसूत्रप्रयुक्ताः शिल्पकेन रचितं यत् स्तंभांतःसूत्रं तेन प्रयुक्ताः तालादिनियमेन चेष्टां प्रापिताः न केवलं संगीतं दर्शयंत्यः किंतु लोकसिद्धां सर्वां व्यवहृतिं च । लोकप्रसिद्धा सर्वा व्यवहृतिः व्यवहारः मल्लयुद्धशस्त्रसाधनमृगयादिः तमपि दर्शयंत्यः । तद्वत् सर्वत्रानुप्रविष्टात् सूत्रात्मसंज्ञादात्मनः प्रेरकाद्भूर्भुवःस्वर्महांतं जगद्व्यवहरति । किंभूतात् अभिनवविभवात् अतर्क्यसामर्थ्यात् । पुनः किंभूतात् । यावदर्थानुबंधात् । यावानर्थः प्रयोजनं तावानेव संबंधो यस्मात् यस्मिन् व्यवहारे यावत् प्रयोजनं तावदेवानुबध्नाति नियतत्वेन संबंधं प्रापयति न त्वनियतत्वेन । अत्र श्रुतिः । वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्चलोकः सर्वाणि च भूतानि संदृब्धानि भवंति । अथैतदर्थे ऋक्शाखीया श्रुतिश्च । स्त्रियः सतीस्ताँ उ मे पुंसः आहुः पश्यदक्षण्वान्न विचेतदंधः । कविर्यः पुत्रः स इमाचकेत यस्ता विजानात् स पितुः पिता सत् । भाष्यं । याः इदानीं स्त्रियः सतीः स्त्रीत्वं प्राप्ताः आहुर्लौकिकाः ताः उत मे मह्यं पुंसः पुरुषान् आहुः प्रतिपादयंति तत्वज्ञाः कथमन्यस्यान्यभाव उच्यते । एकस्यैव निरस्तसमस्तोपाधिकस्यात्मनस्तत्तद्देहावस्थानमात्रेण तद्व्यपदेशोपपत्तेः । श्रूयते हि । त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारीत्यादि । स्त्रीत्वं पुंस्त्वं चोभयवस्तु नास्तीत्युक्तं भवति । श्रुतिस्तदभावं बोधयति । नैव स्त्री न पुमानेष नैव चायं नपुंसकः ॥ यद्यच्छरीरमादत्ते तेन तेन तथोच्यते ॥ १ ॥ अमुमर्थमत्यंतं निगूढं अक्षण्वान् ज्ञानदृष्ट्युपेतः कश्चित्पश्यन् पश्येत् जानाति तथा अंधः अतयारूपः स्थूलदृष्टिर्नविचेतत् न जानाति । किंतुपुत्रः वयसा अल्पोपि यः कविः क्रांतप्रज्ञः ज्ञानी स्यात् स इममर्थं आचकेत जानाति एवमुक्तलक्षणस्य परमात्मनः जातानि स्त्रीत्वपुरुषत्वादीनि विजानात् औपाधिकानि जानीयात् । स पितुः स पुत्रः कविः । स्वोत्पादकस्यापि ज्ञानरहितस्य पिता सत् । पितृवत् पूज्यो भवति ॥ ५५ ॥

अथ सत्यशब्दव्यपदेश्यं परब्रह्माह । यत् त्रिकालेषु भूतभविष्यवर्तमानेषु अनुपहतं उपहतिवर्जितं अबाधितं । अदः अमूर्तं प्राणदिग्व्योममुख्यं प्राणा मुख्यप्राणादयः दिशो व्योम मुख्यशब्दात् कालादिरेव सत्यं यद्वा प्रकारांतरेणाह । अतोस्मा-

यत्किंचिद्भात्यसत्यं व्यवहृतिविषये रौप्यसर्पांबुमुख्यं
तद्वै सत्याश्रयेणेत्ययमिह नियमः सावधिर्लोकसिद्धः
तद्वै सत्यस्य सत्ये जगदखिलमिदं ब्रह्मणि प्राविरासीत्
मिथ्याभूतं प्रतीतं भवति खलु यतस्तच्च सत्यं वदंति ॥ ५७ ॥
यत्राकाशावकाशः कलयति च कलामात्रतां यत्र कालो
यत्रैवाशावसानं बृहदिह हि विराट् पूर्वमर्वागिवास्ते
सूत्रं यत्राविरासीन्महदपि महतस्तद्धि पूर्णाच्च पूर्णं
संपूर्णादर्णवादेरपि भवति यथापूर्णमेकार्णवांभः ॥ ५८ ॥

ब्रह्मणः सकाशादन्यत् परमुत्कृष्टमधिकं महत् । किंचिदपि सत्यस्य नाम नास्ति । यद्यस्ति तर्हि वेदेषु कथं न प्रसिद्धं अतः ब्रह्मैव सत्यं व्यपदेश्यं । अथ सत्यशब्दं व्युत्पत्याह । सच्च त्यच्चाभवदिति श्रुतेः । सच्चेति सन्मूर्तं पृथिव्यप्तेजोरूपं त्यच्चेति अमूर्तं वाय्वाकाशौ ताभ्यामुपहितमाश्रितं यत् । अवरं शबलं ब्रह्म तस्यापि सत्यं ब्रह्म ॥ ५६ ॥

अथ सत्यस्य सत्यमिति दृढीकुर्वन् सदृष्टांतमाह । लोके व्यवहारविषये दृश्यजाते यत्किंचिद्रौप्यसर्पांबुमुख्यमसत्यं भाति । शुक्तिकायां रजतं । रज्जौ सर्पः । मरीचिष्वंबु एवमेतत्प्रमुखमसत्यं यद्भासते तत् सत्याश्रयेणैव भासते शुक्तिकाद्यधिकरणं हि व्यावहारिकं सत्यं तदाश्रयेणैव रौप्यसर्पांबुमुख्यमसत्यं भाति तद्व्यतिरेकेण प्रतिभासासंभवात् । इह लोके अयं नियमः सावधिर्लोकसिद्धो दृष्टः । सत्याश्रयेणैवासत्यं भातीति नियमो लोकसिद्धोस्ति। किंभूतो नियमः सावधिः अवधिना सह वर्तमानः नेदं रजतमित्युत्तरकाले बाधदर्शनात् । एवं यावद्बाधदर्शनं तावदेव रजतादि भासते । अत एवास्यासत्यत्वं यद्वत् सत्यस्य सत्ये ब्रह्मणि इदमखिलं जगत् प्राविरासीत् प्रादुर्भूतं तदपि सावधि प्रातिभासकमित्यर्थः । प्रकारांतरेण सत्यं दृढीकरोति मिथ्येति । मिथ्याभूतं रजतादि येन प्रतीतं प्रतीतिविषयो भवति तत् खल्विति निश्चयेन सत्यं वदंति ॥ ५७ ॥

अथ पूर्णब्रह्म दर्शयति । अहो इत्याश्चर्ये बृहन्महदपि स्थूलं अधिविराट् पूर्वं ब्रह्म विराडिति । पूर्वमुपलक्षणं यस्यैवंविधं विश्वरूपाख्यं अर्वागेवास्ते । तत् किं यत्र यस्मिन् आकाशावकाशः । आकाशस्याप्यवस्थानं तथा यत्र कालः कलामात्रतां कलयति प्राप्नोति तथा । यत्रावस्थानं दिक्पर्यवसानं भवति । एवंविधमपि अर्वागेवास्ति तथात्र सूत्रं । आविरासीत् किंभूतं महतोपि विराजोपि महत् हिरण्यगर्भाख्यमित्यर्थः एवंविधं यत् हीति निश्चयेन तदेव पूर्णात् पूर्णं ब्रह्म । अत्र दृष्टान्तमाह यथेति। यथा स्वरूपेणैव पूर्णादर्णवादेःसमुद्रादिपदार्थादेकार्णवांभः एकीभूतसप्तसमुद्रादेकं पूर्णात् पूर्णं तद्वत् प्रकृतेपीत्यर्थः । अत्र श्रुतिः । पूर्णमदः पूर्णमिदं पूर्णात् पूर्ण-

अंतः सर्वौषधीनां पृथगमितरसैर्गंधवीर्यैर्विपाकै-
रेकं पाथोदपाथः परिणमति तथा तद्वदेवांतरात्मा
नानाभूतः स्वभावैर्वहति वसुमती येन विश्वं पयोदो
वर्षत्युद्यैर्हुताशः पचति दहति वा येन सर्वांतरोसौ ॥ ५९ ॥
भूतेष्वात्मानमात्मन्यनुगतमखिलं भूतजातं प्रपश्येत्
प्रायः पाथस्तरंगान्वयवदथ चिरं सर्वमात्मैव पश्येत्
एकं ब्रह्माद्वितीयं श्रुतिशिरसि मतं नेह नानास्ति किंचि-
न्मृत्योराप्नोति मृत्युं स इह जगदिदं यस्तु नानेव पश्येत् ॥६०॥
प्राक् पश्चादस्ति कुंभाद् गगनमिदमिति प्रत्यये सत्यपीदं
कुंभोत्पत्तावुदेति प्रलयमुपगते नश्यतीत्यन्यदेशम्
नीते कुंभेन साकं व्रजति भजति वा तत्प्रमाणानुकारं
इत्थं मिथ्याप्रतीतिः स्फुरति तनुभृतां विश्वतस्तद्वदात्मा ॥६१॥

मुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । भाष्यं । एकं साधितपूर्णं तद-पेक्षिकं यथा नदीन्हदतडागाः पूर्णाः तडागात् समुद्रः तथेदं मूर्तं पूर्णं तदपेक्षया अदः अमूर्तं पूर्णं तस्मादपि पूर्णमुदच्यते उत्कर्षं प्राप्नोति । तत्पूर्णस्य पूर्णं पूर्णत्वं आदाय अंगीकृत्य संमीलनेन एकीभावमाप्य पूर्णमेवावशिष्यते तदेवं पूर्णात् पूर्णं अनतिशयं पूर्णमित्यर्थः ॥ ५८ ॥

अथ सर्वांतरब्रह्माह । स्पष्टार्थं पद्यं । श्रुतिरपि । यः पृथिव्यां तिष्ठन् पृथिव्या आंतरोयं पृथिवी न वेदेत्यादिका ॥ ५९ ॥

अथ ब्रह्मण एकत्वे मूलश्रुतिसहकारिणीमीशावास्योपनिषच्छ्रुतिं संवादयन्नाह ।

भूतेष्विति । भूतेषु बहुषु आत्मानं एकं पश्येत् । तथा एकस्मिन्नात्मनि अखिलं समग्रं भूतजातं प्रायः बाहुल्येन चिरकालं प्रपश्येत् किमिव पाथस्तरंगान्वयवत् । पाथश्च तरंगाश्च तेषामन्वयःसंबंधस्तद्वत् । अथ एकस्मिन्नुदके सहस्रशस्तरंगा दृश्यंते तथा सर्वेषु तरंगेषु एकं जलमेव दृश्यते । नान्यत् किंचित् पदार्थांतरमनुभूयत इत्यर्थः । एवमेतैरुक्तप्रकारैः एकमद्वितीयं ब्रह्मैव श्रुतिभिरभिहितं निरूपितं।इह किंचि-न्नाना न विद्यते । वस्तुतस्तु नाना न भवति परंतु यः नानेव पश्येत् स मृत्योः देहाहंकाराभिनिवेशात् पुनर्मृत्युमेवाप्नोति । श्रुतिरपि। यस्तु सर्वाणि भूतानि आत्मन्ये-वानुपश्यति । सर्वभूतेषु चात्मानं ततो न विचिकित्सति।विचिकित्सति उत्तमाधमभावेन तारतम्यं न करोति । तथा मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ ६० ॥

अथोक्तप्रमेयं दृष्टांतेन दृढीकुर्वन्नाह । इदं गगनमाकाशः कुंभात् सकाशात् प्राक् पश्चादस्तीति प्रत्यये सत्यपि तनुभृतामित्यमिति प्रकारैर्मिथ्या प्रतीतिः स्फुरति । अथ तदेवाह । इदं घटावच्छिन्नं गगनं घटोत्पत्तौ सत्यां उदेति उत्पद्यते तथैव

यावत् पिंडो गुडस्य स्फुरति मधुरिमैवास्ति सर्वोपि तावान्
यावत् कर्पूरपिंडः परिणमति सदा मोद एवात्र तावान्
विश्वं यावद्विभाति द्रुमनगनगरारामचैत्याभिरामं
तावच्चैतन्यमेकं प्रविकसति यतोंते तदात्मावशेषं ॥ ६२ ॥
वाद्यान्नादानुभूतिर्यदपि तदपि सा नूनमाघातगम्या
वाद्याघातध्वनीनां न पृथगनुभवः किंतु तत्साहचर्यात्
मायोपादानमेतत् सहचरितमिव ब्रह्मणा भाति तद्वत्
तस्मिन् प्रत्यक्प्रतीते न किमपि विषयीभावमाप्नोति यस्मात् ॥६३॥
दृष्टः साक्षादिदानीमिह खलु जगतामीश्वरः संविदात्मा
विज्ञातस्थाणुरेको गगनवदभितः सर्वभूतांतरात्मा
दृष्टं ब्रह्मातिरिक्तं सकलमिदमसद्रूपमाभासमात्रं
शुद्धं ब्रह्माहमस्मीत्यविरतमधुनात्रैव तिष्ठेदनीहः ॥ ६४ ॥

इति विज्ञानकोशः

घटे प्रलयं नाशमुपगते घटाकाशो नश्यति । तथा कुंभे अन्यदेशं प्रदेशांतरं नीते सति गगनमपि कुंभेन सार्कं व्रजति तत्प्रमाणानुकारं भजति लघियसि महति च घटे तत्प्रमाणं भवति । तदा दीर्घे निम्ने वक्रे वा घटे तत्तदाकारं भजति । तद्वद्विश्वतश्चराचरात् प्राक् पश्चादात्मा वर्तते इति ज्ञात्वापि पूर्ववत् तत्रावस्थानकल्पनं भ्रांतिरेवेत्यर्थः ॥ ६१ ॥

अथ प्रकारांतरेण ब्रह्मणः सर्वात्मकत्वमाह । यावदेति । स्पष्टार्थं पद्यं ॥ ६२ ॥

अथ पुनरपि ब्रह्मणः सर्वात्मकत्वमाह । यद्यपि वाद्यात् सकाशात् नादानुभूतिर्भवति तदपि तथापि सा नादानुभूतिः आघातगम्या आघातव्यतिरेकेण नोत्पद्यते आघात इत्युपलक्षणं । क्वचिदाघातेन क्वचिद्वादनेन क्वचिद्वायोरापूरणेन नादानुभूतिर्भवति किंतु साहचर्यादेकसमयावच्छेदेन भवतीति प्रत्यक्षसिद्धं तद्वदेतन्मायोपादानं विश्वं ब्रह्मणा सार्कं सह चरितमेवाभाति यस्मात् कारणात् तस्मिन् ब्रह्मणि प्रत्यक् विपरीतरीत्या प्रतीते अनुभूते सति किमपि प्रातिभासिकं विषयीभावं न प्राप्नोति । अत्र श्रुतिः । यथा दुंदुभेर्हन्यमानस्य न शब्दान् बाह्यान् शक्नुयात् ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य च शब्दो गृहीतः । भाष्यं । यथा हन्यमानस्य दुंदुभेः बाह्यान् पृथक् स्थितान् ग्रहणाय गृहीतुं न शक्नुयात् । किंतु दुंदुभेर्ग्रहणेन ज्ञानेन सह दुंदुभ्याघातस्य साहचर्येण शब्दो गृहीतः ॥ ६३ ॥

अथ निरूपितस्य प्रमेयस्य पर्यवसितमर्थमाह दृष्ट इति । एतत्पद्यं स्पष्टार्थमिति न व्याख्यातं ॥ ६४ ॥

इति विज्ञानकोशप्रकरणं समाप्तं । अथानंदकोशो व्याख्यायते । तत्रानंदस्वरूपस्य

अथ आनंदकोशः

इंद्रेंद्राण्याः प्रकामं सुरतसुखजुषोः स्याद्रतांतः सुषुप्ति-
स्तस्यामानंदसांद्रं पदमतिगहनं यत् स आनंदकोशः

ब्रह्मणोभिव्यक्तिः सुषुप्तौ भवतीति सुषुप्तिस्वरूपमाह । इंद्रश्चेंद्राणी च तयोः प्रकामं स्वेच्छया सुरतसुखमभिलषतोर्यो रतांतः सुरतसमाप्तिः सा सुषुप्तिः यथा लोके शुक्रद्रावो-पलक्षिते सुरतांते सुखाविर्भावो भवति । तथैवेंद्रेंद्राण्योः सुषुप्तौ सुखाविर्भावो भवति । तत्रेंद्रो नाम दक्षिणमक्षि पुरुषः । तथा वामनेत्रस्थं अर्थप्रकाशकं ज्योतिः सेंद्राणी तयोर्जागृत्यां भ्रूमध्येवस्थानं । स्वापकाले तु तस्मादवरुह्य हृदाकाशे पुरीततिस्थाने तिष्ठतः तयोः सुरतप्रसंगः स्वप्नावस्था । सुरतांतः सुषुप्तिः तस्यां यदानंदकोशः तस्मिन् सुषुप्त्युपलक्षितः आनंदकोशो जीवः किंचिन्न वेद न जानाति । कुत इत्याशंक्याह । निरतिशयसुखाभ्यंतरे लीयमानः न विद्यते अतिशयो यस्मात् तं निरतिशयसुखं परमानंदस्तत्र लीयमानो लुप्ताहंकारत्वात् अथ तस्य सुखस्य निर-तिशयत्वं प्रकटयन्नाह दुःखी स्यादिति। यतो बोधितः बलात्कारेण जाग्रद्दशां प्रापितः सन् दुःखी भवति दुःखं प्राप्नोति । भोजनादिविषयसुखभोगार्थमपि बोधितो दुःख-माप्नोति । तस्माद्विषयसुखापेक्षया आत्मसुखमेव निरतिशयमित्यर्थः यस्मादेवं तस्मात् कारणात् कुशलमतिर्ज्ञाता पुरुषः सुप्तं सुषुप्त्यवस्थं पुरुषं नैव बोधयेत् निद्राभंगं न कुर्यात् । श्रुत्युक्तप्रत्यवायश्रवणात् । एवमिंद्रेंद्राणीसुरतविषये जगन्मिथ्यात्वप्रकरणे बव्ह्यः शातपथ्यः श्रुतयः सभाष्याः सम्यगुदाहृताः संति । अथ स्वप्नसुषुप्तिविषयी श्रुतिः । अथ हैतत्पुरुषः स्वपिति नामगृहीते एव प्राणो गृहीता वाग्गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः स यत्रैतत् स्वप्नया चरति ते हास्यलोकास्तदुतेव महाराजो भव-त्युतेव महाब्राह्मणः उतेवोच्चावचं निगच्छति । स स यथा महाराजो जानपदान् गृ-हीत्वा स्वे जनपदे यथाकामं परिवर्तते एवमेवैतत् प्राणान् गृहीत्वा स्वे शरीरे यथा-कामं परिवर्तते । भाष्यं । ह इति यदा एतदयं पुरुषः स्वपिति निद्रां करोति तदा प्राणः क्षुत्पिपासाप्रवर्तकः गृहीत आकर्षित एव भवति वाक्चक्षुः श्रोत्रमपि गृहीतं भवति । स्वस्वविषयग्रहणाशक्तत्वात् । तथा संकल्पविकल्पा-त्मकं मनोपि गृहीतं । अथेत्यनंतरं एतदयं जीवः स्वप्नया स्वप्नावस्थया चरति । ह इति निश्चयेनास्य ते लोकाः क्रीडास्थानानि तदुतेव सत् तत्क्षण एव महाराजो भवति । तथा तदुतेव तत्क्षणादेव महाब्राह्मणः श्रोत्रियो भवति उतैवोच्चावचं अप-कृष्टयोनिं गच्छति । अत्र दृष्टांतमाह । यथा महाराजः जानपदान् स्वप्रजाः गृहीत्वा आक्रम्य स्वे जनपदे प्राज्यसाम्राज्ये यथाकामं यथेच्छं परिवर्तते तं व्यापारं करोति । एवमेवैष जीवः प्राणान् गृहीत्वा स्वशरीरे यथाकामं परिवर्तते तथा । अथ यदा न कस्यचन वेद हि ता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात् पुरीततिमपि प्रति-

तस्मिन्नो वेद किंचिन्निरतिशयसुखाभ्यंतरे लीयमानो
दुःखी स्याद्बोधितः सन्निति कुशलमतिर्बोधयेन्नैव सुप्तं ॥ ६५ ॥
सर्वे नंदंति जीवा अधिगतयशसा गृण्हता चक्षुरादी-
नंतः सर्वोपकर्त्रा बहिरपि च सुषुप्तौ यथा तुल्यसंस्थाः

श्रेते ताभिः प्रत्यवसृत्य पुरीतते शेते स यथा कुमारो वा महाब्राह्मणो वाऽतिघ्नीमा-नंदस्य गत्वा शयीतैवमेवैष एतच्छेते । भाष्यं अथ स्वप्नावस्थातिक्रमानंतरं यदा सुप्तः सुषुप्त्यवस्थां प्राप्तो भवति । अथ तदुपलक्षणमाह । यदेति यदा न कस्यचन वेद कस्यापि किंचिदपि न जानाति तदा ताः सुखकारिण्यो द्वासप्ततिसह-स्राणि नाड्य हृदयात् सकाशादभिसमंततो यत् पुरीततिमेकांतस्थलं तस्मादभि-भितः प्रतिष्ठंते । आवृत्य स्थिता भवंति । ताभिर्नाडीभिः प्रत्यवसृत्य आवरणं वि-धाय पुरीतति एकांतस्थले शेते निश्चेष्टतया तिष्ठति । अत्र दृष्टांतमाह । स यथेति । यथा कुमारो बालः महाब्राह्मणः श्रोत्रियो वा अतिघ्नी स्थूलसूक्ष्मप्रपंचनाशकर्त्री आनंदस्य पदवीं गत्वा शयीत । अनेन सर्वेषां जीवानां सुषुप्तिसुखे तारतम्यं नास्तीति सूचितं एवमेवोक्तप्रकारेण पुरीतति शेते ॥ ६५ ॥

अथास्मिन्नर्थे ऋक्शाखीयां श्रुतिं संवादयन्नाह । अधिगतेन प्राप्तेन यशसा ब्रह्मणा कृत्वा सर्वे जीवा नंदंति परमसुखं प्राप्नुवंति । आत्मसाक्षात्कारे वर्णाश्रमादय-प्रयोजका न भवंति । किंभूतेन ब्रह्मणा चक्षुरादीनंतर्गृण्हता आक्रमता पुनः किं-भूतेन बहिरपि च सर्वोपकर्त्रा इंद्रियद्वारा विषयभोगदानेनाराद्दुपकारकेण किंभूता जीवाः तुल्यसंस्थाः आत्मप्राप्तौ तुल्या संस्था संस्थानं येषां ते । जातिप्रयुक्ततारतम्य-वर्जिता इत्यर्थः । अत्र दृष्टांतमाह । सुषुप्ताविति । सुषुप्तौ यथात्माकारांतःकरणवृत्तौ सत्यां सकलजीवानां सुखतारतम्यं नास्ति । तद्वदात्मप्रतीतावपि । अथैतेषां जीवानां मध्ये यः जठरभृतिकृते अन्नादिविषयभोगार्थं बहिर्वृत्तिरास्ते । किल्बिषस्पृक् कि-ल्बिषं दुःखं स्पृशति स तथा । अथैतदेव प्रकटयन्नाह । त्वगित्यादि । त्वक्चक्षुःश्रो-त्रनासारसनवशमितः इंद्रियाधीनत्वं प्राप्तः सन् शोकं मोहं च याति विषयाप्राप्तौ मोहमित्यर्थः । श्रुतिः । सर्वे नंदंति यशसा गतेन सभासाहेन सख्या सखायः कि-ल्बिषस्पृक् पितुषणिः ह्येषामरं हितो भवति वाजिनाय । अत्र प्रथममाचार्याभिमत-मध्यात्मरीत्या रावणभाष्यं । न तस्य प्रतिमा अस्ति । तस्य नाम महद्यश इति श्रुतेः । यशसा परमात्मना आगतेन प्राप्तेन सर्वे जीवा नंदंति परमानंदं प्राप्नुवंति । यथा । नृपशुपक्षिप्रभृतयः सर्वे जीवाः सुषुप्तिसमये परमसुखिनो भवंति तद्वदात्मप्राप्ताबि-त्यर्थः किंभूतेन यशसा सभासाहेन सभांस्तेजोरूपानर्थप्रकाशकांश्चक्षुरादीन् सहते आक्रमते स यथा गृहीता वाक् गृहीतं चक्षुरिति श्रुतेः पुनः किंभूतेन सख्या उप-कारकेणापि विषयभोगनिमित्तत्वेनेत्यर्थः किंभूताः जीवाः सखायः समानज्ञानाः सदृशा-

एतेषां किल्बिषस्पृग् जठरभृति कृते यो बहिर्वृत्तिगस्ते
त्वक्चक्षुःश्रोत्रनासारसनवशमितो याति शोकं च मोहं ॥ ६६ ॥
जागृत्यामंतरात्मा विषयसुखकृते नैकयत्नान् विधास्यन्
श्राम्यत्सर्वेंद्रियौघोधिगतमपि सुखं विस्मरन् याति निद्रां
विश्रामाय स्वरूपे त्वतितरसुलभं तेन चातींद्रियं हि
सौख्यं सर्वोत्तमं स्यात् परिणतिविरसादिंद्रियोत्थात् सुखाच्च ॥ ६७ ॥

सुखानुभवः अथैषां जीवानां मध्ये यः पितुषाणिः पितुरित्यन्ननाम पितुः सूनोति स पितुषाणिः केवलमुदरंभरः स किल्बिषस्पृक् दुःखभागी भवति । हि यस्मात् कारणात् एवमत्यर्थे वाजिनाय इंद्रियवीर्याय हितः तत्परो भवति । अथैतदुक्तं भवति सुखशब्दव्यपदेश्यं आत्मसुखमेवेंद्रियसुखं तद्दुःखपक्षांतर्भूतमित्यर्थः यथाधिदैवरीत्या सायणभाष्यकारः सर्वे नंदंति सखायः समानज्ञानाः सर्वे मनुष्याः सभ्याः सभासाहेन सभां सोढुं दुःशकनुवता सख्या ऋत्विजां प्रति भूतेन यज्ञं प्रत्यागते यशसा यशस्विना सोमेन हेतुना नंदंति हृष्टा भवंति सहिसएव सोमः एषां जनानां किल्बिषस्पृक् यः स्वस्मादन्यः पुरुषः यः श्रेष्ठतामश्नुते स किल्बिषी भवति बाध्यत्वेन यथापापं सदाचारैर्बाधितव्यं भवति । तद्वत्पापरूपस्य शत्रोर्बाधकः यद्वा यज्ञे साध्वनुप्रवचनाकरणेन यत्किंचित् किल्बिषमेषां जायते तं यो बाधते स किल्बिषस्पृक् यथात्वं पितुषाणिः पितुरित्यन्ननाम दक्षिणा वा तमनेन सोमेन सुनोति यजमानः किं च हितः पात्रेषु निहितः सोमः वाजिनाय इंद्रियवीर्याय तत्कर्तुं अरं अलं पर्याप्तः समर्थो भवति ॥ ६६ ॥

अथ परमानंदापेक्षया क्षुद्रानंदानामतितुच्छत्वमस्तीति अनुभवैकसिद्धत्वेन निरूपयति । जागृत्यां जाग्रदवस्थायां अंतरात्मा जीवः विषयसुखनिमित्तं अनेकयत्नान् विधास्यन् कुर्वन् वर्तते । तत्र विद्वान् देशपर्यटनात् दुःशीलप्रभुसमर्जनात् शूरस्तु संग्रामादिप्राणसमर्पणात् चोरस्तु देहहिंसापर्यवसन्नकर्मकरणात् । तथैव गारुडादिविद्योपजीविनः एवं सर्वोऽपि जनः स्वस्वोद्यमातिक्रमेण विषयसुखाय यतते तत्र तत्र श्राम्यत्सर्वेंद्रियौघः शिथिलीभूतकरचरणवाग्व्यापारः पुमान् विधिवशात् प्राप्तमपि विषयं विस्मरन् विश्रामाय हृदाकाशेवस्थिते स्वात्मरूपे क्षणं निद्रां याति । अप्राप्ते विषये समुद्विग्नस्य विश्रांत्यै निद्रैव शरणमित्यर्थः । तेन कारणेन इंद्रियसुखादतींद्रियसुखं सर्वोत्तमं । तथा सर्वापेक्षया श्रेष्ठतमं । तथा अतितरसुलभं विषयसुखप्रयासापेक्षयाल्पप्रयाससाध्यमित्यर्थः । अथ अतिप्रयाससाध्यं किमपि विषयसुखं क्षणभंगुरमंते च विरसमित्याह । किंभूतात् इंद्रियसुखात् परिणतिविरसात् परिणामे दुःखप्रदात् ॥ ६७ ॥

पक्षावभ्यस्य पक्षी जनयति मरुतं तेन यात्युच्चदेशं
लब्ध्वा वायुं महांतं श्रममपनयति स्त्रीयपक्षौ प्रसार्य
दुःसंकल्पैर्विकल्पैर्विषयमनु कदर्थीकृतं चित्तमेतत्
खिन्नं विश्रामहेतोः स्वपिति चिरमहो हस्तपादान् प्रसार्य ॥६८॥
आश्लिष्यात्मानमात्मा न किमपि सहसैवांतरं वेद बाह्यं
यद्वत् कामी विदेशात् सदनमुपगतो गाढमाश्लिष्य कांतां

अथात्र श्रुत्युक्तदृष्टांतमुपन्यसन् उक्तार्थमेव दृढीकुर्वन्नाह। पक्षी पक्षावभ्यस्य व्यापारयित्वा मरुतं वायुमुत्पादयति तेन वायुनोच्चदेशं याति । तत्रोच्चैस्तरां आकाशदेशे महांतं वायुं लब्ध्वा पक्षी प्रसार्य प्राक्तनं श्रममपनयति त्यजति एवं कृते दुःखकल्पैस्तद्विपरीतैर्विकाल्पैश्च विषयमनुलक्षीकृत्यैतच्चितं कदर्थीकृतं ततः खिन्नं सत् हस्तपादान् प्रसार्य विश्रामहेतोश्चिरं स्वपिति । अत्र श्रुतिः। तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रांतः संहत्य पक्षौ संलयाय ध्रियते एवमेवायं पुरुषः एतस्मादंताय धावति । यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति । भाष्यं । यथा यद्वदस्मिन् दृप्रसारोपलक्षितः आकाशे श्येनः पक्षिकुलहंता पतत्रिविशेषः सुपर्णो गृध्रादिः विपरिपत्य उच्चैरुत्पत्य तत्र श्रांतः सन् पक्षौ संहत्य प्रसार्य संलयाय विश्रांतये ध्रियते प्रयत्नं करोति एवमेवायं पुरुषः एतस्मात् जागृतिप्रयासात् अंतायोपरमाय धावति । पूर्णं स्वमूलमाश्रयते । तत्र सुप्तः सन् जाग्रद्दशायां न कंचन कामं विषयोद्देशं करोति । न वा स्वप्नं पश्यति । अथ हस्तपादान् प्रसार्येत्यत्र तथा बोधितः सन् दुःखी स्यादित्यत्र श्रुतिः। तन्नायतं बोधयेदित्याहुरिति । भाष्यं । तस्मात् कारणादायतं विस्तारितहस्तपादाद्यं प्रसुप्तं न बोधयेत् । जागरं न प्रापयेदिति श्रुतय आहुः । तथाचोक्तमग्निरहस्ये दशमकांडे । तस्मादु ह स्वपंतं पुरुषं धुरेव सहसा न बोधयेत् नैतदेव ते देवते मिथुनीभवंत्यौ न हिनस्यामिति । भाष्यं । तस्मात् कारणादु ह नियमेन स्वपंतं पुरुषं धुरेव सहसा न बोधयेत् यत एते देवते इंद्रेंद्राण्यौ मिथुनीभवंत्यौ सुरतसुखासक्तौ न हिनस्यामिति न हन्मीति मत्या न बोधयेदित्यर्थः अनया निद्राभंगकर्तुः प्रत्यवायो प्रदर्शितः ॥ ६८ ॥

अथ सुषुप्तिपरिणामावस्थामाह । आत्मा जीवः आत्मानं परमात्मानं सहसा अकस्मादाश्लिष्यालिंग्यैकीभूय किमप्यंतरं सूक्ष्मदेहानुभूतं स्वप्नबाह्यं स्थूलदेहानुभूतं न वेद न जानाति । सर्ववृत्तीनां लीनत्वात् । अथात्र दृष्टांतांतरमाह । यद्वदिति । यद्वद्विदेशात् स्वसदनं स्वगृहं उपगतः कामी चिरकालं प्रोषितत्वात् कामातुरः कांतां कमनीयां स्त्रियं गाढमत्यौत्कंठ्येनाश्लिष्य आलिंग्य बाह्यमांतरं वा कमपि विषयांतरं न वेद तद्वादित्यर्थः । अत्र श्रुतिः। यद्वा अस्यै तदात्मकाममवाप्तकाममकामश्च रूपं स यथाप्रियया संपरिष्वक्तो न बाह्यं किंचन वेद नांतरं । भाष्यं ।

यात्यस्तं तत्र लोकव्यवस्थितिरखिला पुण्यपापानुबन्धः
शोको मोहो भयं वा समविषयमिदं न स्मरत्येव किंचित् ॥६९॥
अल्पानल्पप्रपंचप्रलयमुपरतिश्चेंद्रियाणां सुखाप्तिः
जीवन्मुक्तौ सुषुप्तौ त्रितयमपि समं किंतु तत्रास्ति भेदः
प्राक् संस्कारात् प्रसुप्तः पुनरपि च परावृत्तिमेति प्रबुद्धो
नश्यत्संस्कारजातो न स किल पुनरावर्तते यश्च मुक्तः ॥ ७० ॥
आनंदान् यश्च सर्वाननुभवति नृपः सर्वसंपत्समृद्धः
तस्यानंदः स एकः स खलु शतगुणः संप्रतिष्ठः पितॄणां

पूर्वं श्रुतौ योस्य परमो लोकोथ यत्र सुप्तो न कंचन कामं कामयते इत्याद्युक्तं तद्वा एतस्य सुषुप्त्यवस्थां प्राप्तस्य पुरुषस्य रूपं प्रथमत आप्तकामं सुखप्राप्तौ अवाप्तसकलकामं ततः अकाममस्तमितकामं भवति । एवं शरीरः शरीरावच्छिन्नः परमात्मा प्राज्ञेन जीवात्मना परिष्वक्तः आश्लिष्टः सन् न वेद किंचनांतरं बाह्यं वा । अत्र दृष्टांतमाह तद्यथेति । प्रियया प्रेमास्पदीभूतया स्त्रिया परिष्वक्तः पुमानिति॥ ६९ ॥

इदानीं जीवन्मुक्तिसुषुप्त्योर्लक्षणसाम्येपि वैलक्षण्यं दर्शयति । जीवन्मुक्तौ सुषुप्तौ च एतत् त्रितयं समं तुल्यं । तत् किं त्रयं । अल्पानल्पप्रपंचप्रलयः सूक्ष्मस्थूलयोः प्रपंचयोः प्रलयः प्रकृष्टः आत्यंतिको लयः तथेंद्रियाणामुपरतिरुपरमो विलयः गृहीत इव प्राणो गृहीता वागित्यादि पूर्वमेवोक्तं तथा सुखावाप्तिरेव मुक्तिरस्तान्नाम कथं पुनः मुक्तिसाधनार्थं प्रयास इत्याशंक्याह किंत्विति किंतु तत्र सुषुप्तिमुक्त्योर्मध्ये भेदोस्ति तमाह । प्रसुप्तः सुषुप्तिं प्राप्तः पुरुषः प्राक्संस्कारात् पुनरपि परावृत्तिमेति । तथा यश्च प्रबुद्धः प्रबोधं ज्ञानं प्राप्तः निरंतरं मुक्तः सन् नश्यत्संस्कारजातः सन् पुनर्नावर्तते आवृत्तिं न प्राप्नोति । अयमर्थः । यद्यपि सुषुप्तौ सर्वप्रलयो भवति । तथापि तस्याः दैनंदिनत्वात् आकस्मिकत्वाच्च प्राक् पूर्वं जागृतिः तदुत्पन्नात् संस्कारात् बीजरूपेण तिष्ठति । तैरात्मा जीवः आश्लिष्टः पुनरावर्तते मुक्तस्तु शनैर्ज्ञानयोगात् सर्वसंस्कारनाशो भवति तेन न स पुनरावर्तते ॥ ७० ॥

अथ सकलविषयसुखापेक्षया आत्मसुखस्य निरतिशयत्वं युक्त्या निरूपयति । यः सर्वसंपत्समृद्धो नृपः सर्वानंदाननुभवति । दरिद्राणामेकैकविषयप्राप्तौ एक एवानंदो भवति मनागधिकानामानंदद्वयं एवमुत्तरोत्तरं यस्य यावतां विषयाणां प्राप्तिस्तावंतस्तस्यानंदा भवंति । एवं सर्वविषयप्राप्तिः नृपस्यास्त्यतस्तस्य सर्वानंद भोगः । तथा च सर्वविषयानंदा यत्रैकीभवंति । स एको राज्ञ आनंदः खल्विति निर्धारणे शतगुणः सन् पितॄणामानंदः स एवमुत्तरोत्तरं देवलोकमारभ्य ब्रह्मलोकपर्यंत शतगुणिताः आनंदा भवंति । ते सर्वेपि यदंतर्गता अंतर्भूताः स्युः स एको

आदेवब्रह्मलोकं शतशतगुणितास्ते यदंतर्गताः स्यु-
र्ब्रह्मानंदः स एकोऽस्त्यतिविषयसुखान्यस्य मात्रा भवंति ॥ ७१ ॥
यत्रानंदाश्च मोदाः प्रमद इति मुदश्चासते सर्व एते
यत्राप्ताः सर्वकामाः स्युरखिलविरमात् केवलीभाव आस्ते
मां तत्रानंदसांद्रे कृधि चिरममृतं सोम पीयूषपूर्णां
धारामिंद्राय देहीत्यपि निगमगिरो भ्रूयुगांतर्गताय ॥ ७२ ॥

ब्रह्मानंदोऽस्ति । अथास्य ब्रह्मानंदस्य विषयसुखानि पूर्वोक्तानि क्षुद्रमात्रा अंशा भवंति । यथात्मैवोपाधिवशेन पृथक् क्षुद्रत्वेन भासते तथैव परमानंदोपि विषयसुखाकारेणेत्यर्थः । अत्र श्रुतिः । स यो मनुष्याणां राद्धः समृद्धो भवति । अन्येषामधिपतिः सर्वैर्मानुष्यकैः कामैः संपन्नतमः स मनुष्याणां परम आनंदः । अथ ये शतं मनुष्याणामानंदाः स एकः पितृणां जितलोकानामानंद इत्यादि । तथा अथैष ब्रह्मलोकः सम्राडिति हैनमुवाचैषोऽस्य परमासंपदेषोऽस्य परमो लोकः । अथ एषोऽस्यपरमानंदः तस्यैवानंदस्यान्यानि भूतानि मात्रा मुपजीवंति । भाष्यं । यो मनुष्याणां मध्ये राद्धः समृद्धः प्राप्तसर्वविषयो भवति । अन्येषां मनुष्याणां अधिपतिर्नियंता सर्वैर्मानुष्यकैर्मनुष्यप्रसिद्धैः कामैः प्रार्थनीयपदार्थैः संपन्नतमः तस्यानंदः स मनुष्याणां परमानंदः । अथ ये शतं मनुष्याणामानंदाः स एकः पितृणामानंदः जितः अर्वाक् लोको यैस्ते जितलोकाः तेषां पितृणामित्यर्थः । एवमुत्तरोत्तरं देवाद्यानंदाः स्युः अथैष ब्रह्मलोक इति । ह इति निश्चित्य एनं जनकं प्रति याज्ञवल्क्य इत्युवाच । इतीति किं भो सम्राट् जनक एष एवोक्तप्रकार आनंदः ब्रह्मलोकः ब्रह्मैव लोकः प्राप्यवस्थानं यस्मिन् स ब्रह्मलोकः अथास्य मुमुक्षोः पुरुषस्य एषा परमा उत्कृष्टा निरतिशाया संपत् परमैश्वर्यं तथास्य एष परमो लोकः पूर्वोक्तः तथा एषोऽस्य परमानंदः अथैतस्यैवेति - अन्यानि आत्मबहिर्मुखानि भूतानि जीवजातानि एतस्य निरूपितस्य परमानंदस्य मात्रामेकैकदेशमुपजीवंति एवं ये भूतानां क्षुद्रानंदास्ते परमानंदस्यैवांशाः परमानंदे क्षुद्रानंदानामंतर्भूतत्वात् ॥ ७१ ॥

अथास्मिन्नर्थे ऋक्शाखीयां श्रुतिं संवादयन्नाह । यत्र यस्मिन् परमानंदे सर्वे आनंदाः मोदाः मानुष्यानंदाः तथा पितृणां प्रमुदः तथा आजानजानां देवानां मुदः एवमुत्तरोत्तरं सर्वेपि आसते वर्तंते तथा यत्र यस्मिन् परमानंदे सर्वे कामाः सत्यलोकादिप्राप्तिरूपाः आप्ताः प्राप्ताः स्युस्तथा यत्र अखिलविरमात् स्थूलसूक्ष्मप्रपंचविलयात् केवलीभाव आस्ते भो सोम षोडशकलारूपहिरण्यगर्भ मां जीवदशापन्नं तत्र सांद्रानंदे चिरं अमृतं कृधि कुरुष्व । तथा इंद्राय जीवात्मने पीयूषपूर्णां धारां देहि। मुक्तानां सोमवक्त्रादमृतस्रावो भवतीति योगशास्त्रे प्रसिद्धं । किंभूतायेंद्राय भ्रूयुगांतर्गतायेति । एवमुक्तप्रमेयं निगमगिरः प्राहुः । अत्र श्रुतिः । सप्तमाष्टके । यत्रानंदाश्च

आत्माकंपः सुखात्मा स्फुरति तद ‍रा त्वन्यथैव स्फुरंती
स्थैर्यं वा चंचलत्वं मनसि परिणतिं याति तत्रत्यमस्मिन्
चांचल्यं दुःखहेतुर्मनस इदमहो यावदिष्टार्थलब्धि-
स्तस्यां यावत् स्थिरत्वं मनसि विषयजं स्यात् सुखं तावदेव॥७३॥
यद्वत् सौख्यं रतांते निमिषमिह मनस्येकताने रसे स्यात्
स्थैर्यं यावत् सुषुप्तौ सुखमनतिशयं तावदेवाथ मुक्तौ
नित्यानंदः प्रशांते हृदि तदिह सुखस्थैर्ययोः साहचर्यं
नित्यानंदस्य मात्रा विषयसुखमिदं युज्यते तेन वक्तुम् ॥ ७४ ॥

अथ जगन्मिथ्यात्वप्रकरणं.

श्रांतं स्वांतं स्वबाह्यव्यवहृतिभिरिदं ताः समाकृष्य सर्वा-
स्तत्तत्संस्कारयुक्तं ह्युपरमतत्पराभूतमिच्छन्निदानं

मोदाश्च मुदः प्रमुद आसते । कामस्य यत्राप्ता कामास्तत्र मामृतं कृधींद्रायेंदो परिस्रव । भाष्यं । कामस्य वासनारूपस्य मनसः कामाः यत्राप्ताः प्राप्ता भवंति तत्र माममृतं कृधि । तदेवाह । भो इंदो चंद्ररूप परमात्मन् इंद्राय सकलेंद्रियनियंत्रे जीवाय अमृतं परिस्रव । नन्वतींद्रियसुखं हि परमानंदः तथा विषयसुखं इंद्रियजन्यं एवमुभयोर्महति वैषम्येनुभवसिद्धे सति कथमुक्त एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति इत्याशंक्य श्लोकद्वयेनोत्तरयति ॥ ७२ ॥

आत्मेति । आत्मा तावदकंपः कंपरहितः । तथा सुखात्मा सुखरूपोपि । विज्ञानमानंदं ब्रह्मेति आत्मनः आनंदरूपत्वं श्रुतिसिद्धं । सुषुप्त्यवस्थायामनुभवसिद्धं चातः स्फुरतीत्युक्तं तथा तदपरा तद्विलक्षणा माया अन्यथा उक्ता । तद्विपरीतस्वभावा सकंपा दुःखरूपाचात्मसहचरितैव स्फुरति । पूर्ववदनुभवसिद्धास्ति एवं तत्रत्यं तयोरात्ममाययोरनुगतं स्थैर्यं चंचलत्वं वास्मिन् मनसि परिणतिं परिणामं याति तस्य चिदाचिद्ग्रंथिस्वरूपत्वात् । अहो इति संबुद्धौ । यावदिष्टार्थलब्धिः अभीष्टविषयप्राप्तिः तावत् प्रयत्नशताकुलस्य मनसश्चांचल्यं इदं दुःखहेतुर्भवति । अथ तस्यां विषयप्राप्तौ सत्यां कृतकृत्यत्वेन मनसि यावत्स्थिरत्वं तावदेव विषयजं सुखं स्यात् ॥७३॥

अथात्र द्वितीयश्लोकेन दृष्टांतद्वयमाह । यद्वदिति । यथा इहास्मिन् अनुभवसिद्धिः रतांते शृंगाररसे मनस्येकताने एकाग्रे सति निमिषं निमिषमात्रं सुखं भवति तथा सुषुप्तौ मनसि यावत् स्थैर्यं तावदेवानतिशयं सुखं । अथ मुक्तावपि हृदि प्रशांते सति नित्यानंदो भवति । तत् तस्मात् कारणात् इह सुखस्थैर्ययोः साहचर्यं सहचरितत्वं अनुभवसिद्धं । तेनकारणेनेदं विषयसुखं नित्यानंदस्य मात्रेति वक्तुं युज्यते ॥ ७४ ॥

इत्यानंदकोशप्रकरणं

अथ जगन्मिथ्यात्वप्रकरणमुच्यते । तत्र प्रपंचमिथ्यात्वे प्रथमतः

स्वाप्नान् संस्कारजातप्रजनितविषयान् स्वप्नदेहेनुभूतान्
प्रोज्झ्यांतः प्रत्यगात्मप्रवणमिदमगाद्भूरिविश्राममस्मिन् ॥ ७५ ॥
स्वप्ने भोगः सुखादेर्भवति ननु कुतः साधने मूर्छमाने
स्वाप्नं देहांतरं तद्व्यवहृतिकुशलं नव्यमुत्पद्यते चेत्
तत् सामग्र्या अभावात् कुत इदमुदितं तद्धि सांकल्पिकं चेत्
तत् किं स्वाप्ने रतांते वपुषि निपतिते दृश्यते शुक्रमोक्षः ॥७६॥

स्वप्नदशानिदर्शनेन दर्शयन् स्वप्नस्वरूपं निरूपयति । इदं स्वांतं मनः बाह्यव्यवहृतिभिः स्त्रीपुत्रादिपोषणप्रभृतिभिः सुश्रांतं सत् उपरमति विरमति अव्यापारं भवति । किं कृत्वा ताः सर्वाः बाह्येंद्रियार्थस्य व्यवहृतीः समाकृष्य । यद्वा इदंताः इंद्रियैः कृत्वा इदंताकारेण भासमानान् विषयांस्तान् अंतःसमाकृष्य । एवं यद्यपि बाह्यव्यवहारत्यक्ताः तथापि दृढानुसंधिनोत्पन्नं तत्तत्संस्कारयुक्तं सत्परावृत्तं । अथ किमुद्दिश्य परावृत्तमित्याशंक्याह । निदानं इच्छन् निदानं स्वीयमादिकारणं आत्मस्वरूपं इच्छन् । यथा बहुदेशाटनैः खिन्नः पांथः विश्रांत्यै स्वगेहगमनमिच्छति तद्वदित्यर्थः । अत्र श्रुतिः । अथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति । गृहीता वाक् गृहीतं चक्षुर्गृहीꣳ श्रोत्रं गृहीतं मन इति । तत्तत्स्मरणादिरूढसंस्कारजातेन प्रजनितविषयान् स्वाप्नान् सूक्ष्मदेहेनुभूतान् प्रोज्झ्य त्यक्त्वा प्रत्यगात्मप्रवणं परमात्मसंयोगोन्मुखं तदस्मिन्नात्मनि विश्रामं विश्रांतिमगात् । यथा महाभूपदर्शनाय कश्चित् प्रवृत्तः सामंतो बहिर्द्वारि सेनासन्नाहं त्यक्त्वा द्वित्रैः पार्षदैः सह प्रविशति तथा तद्विपरीतानपि त्यक्त्वा केवलं स्वरूपेणैव समक्षं गच्छति तद्वदित्यर्थः । अनेन मनसः प्रथमतः सुषुप्तिरेवोद्दिष्टा स्वप्नावस्था तु विधिवशादांतरालिकैवोत्पन्नेत्युक्तं ॥ ७५ ॥

अथ पूर्वपक्षमुद्घाटय दृढीकुर्वन् श्लोकमाह । नन्वाशंकते । साधने भोगसाधने स्थूलशरीरे ज्ञानकर्मेंद्रियैः सह मूर्छमाने निश्चेष्टतया पतिते सति स्वप्ने स्वप्नावस्थायां सुखादेः सुखदुःखसाधकविषयभोगः कुतः कस्माद्भवतीति । अथ चेदेवं ब्रूषे स्वाप्नं स्वप्नसंबंधि देहांतरं तद्व्यवहृतिकुशलं स्वाप्नविषयभोगकुशलं नव्यं नवीनं उत्पद्यते तेन स्वाप्नव्यवहारस्तु किं प्राक्तनेन शरीरेणेति । तदपि दूषयति । तदिति । तत्सामग्र्याः तस्य स्वप्नदेहस्य या सामग्री पित्रोः शुक्रशोणितरूपा तस्या अभावात् कुतः कस्मात् सामग्र्यंतरादुदितमुत्पन्नं असद्रूपभूतविशन्यायेन उत्पन्नमिति चेन्न । स्वाप्नेरतांते स्वप्ने स्त्रीभोगांते शुक्रद्रावः स्वाप्ने शरीर एवास्तु स तु पतिते वपुषि निश्चेष्टे स्थूलशरीरे किमिति दृश्यते । मृषारूपस्य देहस्य सुरतांतोपि मृषैवास्तु । सुरतांताभिव्यंजकः शुक्रद्रावः प्रातः सत्यत्वेन कथमुपलभ्यत इत्यर्थः ॥ ७६ ॥

भीत्या रोदित्यनेन प्रवदति हसति श्लाघते नूनमस्मात्
स्वाप्नेप्यंगेनुबंधं त्यजति न सहसा मूर्छितोप्यंतरात्मा
पूर्वं ये येनुभूतास्तनुयुवतिहयव्याघ्रदेशादयोर्था-
स्तत्तत्संस्कार*रूपान् सृजति पुनरमून् श्रित्य संस्कारदेहम् ॥७७॥
संधौ जाग्रत्सुषुप्त्योरनुभवविदिता स्वाप्नयवस्था द्वितीया
तत्रात्मज्योतिरास्ते पुरुष इह समाकृष्य सर्वेंद्रियाणि
संवेश्य स्थूलदेहं समुचितशयने स्वीयभासांतरात्मा †
पश्यन् संस्काररूपानभिमतविषयान् याति तत्रापि तद्वत् ॥७८॥
रक्षन् प्राणैः कुलायं निजशयनगतं श्वासमात्रावशेषै-
र्मा भूतप्रेतकल्पाकुलिकमिति पुनः सारमेयादिभक्ष्यं

दूषणांतरमाह भीत्येति । स्वप्नोत्पन्नया दस्युव्याघ्रादिभीत्या अनेन स्थूलदेहेन कु-त्वैव रोदिति साट्टहासं रोदनं करोति न स्वाप्नशरीरेणैवेत्यर्थः । न केवलं रोदिति । अनेनैव प्रवदति यत्किंचिज्जल्पति । तथा हसति श्लाघते अहं कृतार्थ इति एवं पूर्वं पक्षमनुद्य प्रागुक्तं पर्यवसितमर्थमाह । नूनमिति । नूनं निश्चयेन अस्माद्धेतोः अंत-रात्मा स्वाप्नेप्यंगे स्थूलदेहे मूर्छितेपि सहसा अनुबंधं संबंधं न त्यजति । अथ सोनुबंधः पूर्वं त्वयैव निराकृतः कथमिदानीं अनुबंधः प्रोच्यत इत्याशंक्याह । पूर्वमिति । पूर्वमनादि जाग्रदवस्थासु ये ये अर्थाः पदार्थाः अनुभूतास्ते के तनुयुवतिहयव्याघ्रा दयः तनुः शरीरं युवतिः स्त्री स्वकीया परकीया वा हयोश्वः प्रयाणनिमित्तं व्याघ्रो भयनिमित्तं देशः काश्यादिप्रदेशः आदिशब्दादन्येपि विषयास्तेषां पूर्वमनुभूतानां यः संस्कारः स एव रूपं स्वरूपं येषां ते तथाविधानमून् शरीरादिविषयान् तदनु-रूपानेव पुनः सृजति । त एव विषयाः संस्काररूपत्वेन भासंत इत्यर्थः । अथांतरा-त्मा किं सृजतीत्याह । संस्कारदेहं लिंगदेहं श्रित्य तमधिष्ठाय तस्मिन् देहे सर्वे संस्काराः उद्बुद्धाः संतः तत्तद्विषयाकारेण परिणमंतीत्यर्थः ॥ ७७ ॥

अथ श्रुत्युक्तरूपां अर्थप्रक्रियां निरूपयति । जाग्रत्सुषुप्तयोः अवस्थयोः संधौ अनुभवसिद्धा स्वाप्नी द्वितीयावस्था तत्र तस्यामवस्थायां इह स्वरूपे सर्वेंद्रियाणि समाकृष्य पुरुषोंतरात्मा आत्मज्योतिरास्ते इंद्रियाभावात् तस्यामवस्थायां यद्विषयग्रहणं तदात्मज्योतिषैव संपादयतीत्यर्थः । ननु तदा स्थूलदेहस्य का गतिरित्यत आह । स्थूलदेहं समुचितशयने यथा प्राप्तनिद्रास्थले निवेश्य प्रसारितं हस्तपादादि संवेश्य तथ स्वीयभासा स्वसामर्थ्येन स्वाप्नदेहान् संस्काररूपान् समुचितेंद्रियगणं निर्माय यत्र कुत्राप्यभीष्टस्थाने तद्वत्संस्काररूपेणैव याति विचरति ॥ ७८ ॥

पूर्वश्लोके देहं विसृज्य यातीत्युक्तं जीवदजीवद्वा विसृजति

---

* तत्संस्कारप्रयुक्तान् इति पाठांतरं. † स्वीयभासा परात्मा इति पाठांतरं.

स्वप्ने स्वीयप्रभावात्सृजति हयरथान् निम्नगाः पल्वलानि
क्रीडास्थानान्यनेकान्यपि सुहृदबलापुत्रमित्रानुकारान् ॥ ७९ ॥
मातंगव्याघ्रदस्युद्विषदुरगकपीन् कुत्रचित् प्रेयसीभिः
क्रीडन्नास्ते हसन् वा विहरति कुहचिन्मिष्टमश्नाति चान्नम्
म्लेछत्वं प्राप्तवानस्म्यहमिति कुहचिच्छंकितः स्वीयलोका-
दास्ते व्याघ्रादिभीत्या प्रचलति कुहचिद्रोदिति ग्रस्यमानः ॥८०॥

जीवश्चेत् तर्हि कथमव्यापारमजीवश्चेत् तर्हि कथं श्वासा-द्युपेतमित्याशंक्य श्लोकद्वयेनोत्तरमाह । निजशयनगतं कुलायं शरीरं प्राणैः कृत्वा रक्षन् यत्रकुत्रापि यातीति पूर्वेणान्वयः । तर्हि तत्र क्षुत्पिपासादिप्राणकृत्यं कथं न दृश्यत इत्याशंक्याह। किंभूतैः प्राणैः श्वासमात्रावशेषैः श्वासमात्रमवशिष्टं येषां ते । न हि प्रयोजकव्यतिरेकेण प्राणाः कर्म कुर्वंति । अथ तद्रक्षणे हेतुमाह । तत्पुनः शरीरं प्रेतकल्पाकृतिकं माभूदिति । अथास्तां तथात्वमिति चेत् तत्र बाधकमाह । सारमेयादिभक्ष्यं मा भूदिति । निर्जीवस्य गंधग्रहाणां सारमेयादीनां श्वापदादीनां भक्ष्यं माभूदिति । अथ पूर्वश्लोके स्वाप्नदेहान्निर्माय इत्युक्तं तत्र तदर्थप्रतिपादकश्रुत्यर्थं दर्शयति। स्वप्ने स्वीयप्रभावात् स्वसामर्थ्यात् हयरथान् निम्नगा नदीः पल्वलानि इषत्संचितोदकानि तथानेकानि क्रीडास्थानानि तथा सुहृदबलापुत्रमित्रानुकारांश्च सृजति । अनुकारशब्देन प्रागुक्तसंस्कारोत्पन्नानित्यर्थः ॥ ७९ ॥

मातंगेति। तथा मातंगव्याघ्रदस्युद्विषदुरगकपींश्च सृजति । तथा कुत्राप्यहं ब्राह्मणः सन् म्लेछत्वं प्राप्तवानिति स्वीयसुहृल्लोकाच्छंकित आस्ते । स्वप्ने शूद्रत्वमापन्न इत्यादि वासिष्ठोक्तेः । तथा कुत्रचिद् व्याघ्रादिभीत्या प्रचलति पलायनं करोति । पलायनसमर्थोऽपि व्याघ्रादिना ग्रस्यमानः सन् क्रंदते रोदितीति । उक्तार्थनिरूपकाः क्रमेण श्रुतयः । स यत्रायं स्वपिति इत्यस्य सर्वावतो मात्रामादाय स्वयं निहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा स्वपितीत्यत्रायं पुरुषः स्वयंज्योतिर्भवति न तत्र रथा न रथयोग्या पंथानो भवंति अथ रथान् रथयोग्यान् पथः सृजते न तत्रानंदा मुदः प्रमुदो भवंति अथानंदान् मुदः प्रमुदः सृजते न तत्र वेशांताः स्रवंतीः पुष्करिणीः सृजते स हि कर्ता तथा प्राणेन रक्षन् शरीरं कुलायात् बहिः कुलायादपरतश्चरित्वा तथा स्वप्नांत उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि । उतैव स्त्रीभिः सह मोदमानो जक्षदुतैवापि भयानि पश्यन्नित्यादि । भाष्यं । स जीवः यत्र यदा स्वपिति निद्रां करोति तदास्य सर्वावतः सर्वं अवति रक्षति इति सर्वावान्, तस्य सर्वावतः परमात्मनो मात्रामेकदेशमादाय गृहीत्वा स्वयं निहत्य स्वत एव सुषुप्त्यवस्थां त्यक्त्वा तथा मायिकं वासनामयं स्वप्नदेहं स्वयं निर्माय स्वेन स्वया भासा स्वसामर्थ्येन स्वेन ज्योतिषा स्वप्रकाशेन स्वपिति । अत्रायं पुरुषः

यो यो दृग्गोचरोर्थो भवति स स तदा तद्गतात्मस्वरूपा-
विज्ञानोत्पद्यमानः स्फुरति न तु तथा शुक्तिकाज्ञानहेतुः
रौप्याभासो मृषैव स्फुरति च किरणाज्ञानतोंभो भुजंगो
रज्ज्वज्ञानान्निमेषं सुखभयकृदतो दृष्टिसृष्टं किलेदं ॥ ८१ ॥

स्वयंज्योतिर्भवति। तत्र तस्मिन् स्वप्नसमये न रथाः संति न रथयोग्या अश्वादयः न पंथानो रथमार्गाः संति। परंतु असौ रथान् रथमार्गान् पथः सृजति तथा न तत्रानंदाः सुखविशेषा मुदः क्षुद्रानंदाः प्रमुदः पुत्रादिलाभहर्षाश्च परंतु अयमानंदा-दीन् सृजति तथा न तत्र वेशांताः पल्वलानि न स्रवंत्यो नद्यः संति न पुष्करिण्यः सरांसि न तडागानि संति परंत्वेष वेशांतादि सर्वं सृजते कः सृजते स हि कर्ता अंतरात्मा अथ दैनंदिनं स्वप्नदशायां प्राणेन पंचवृत्तिना कौ लीयते तत्कुलायं शयनभूमौ सन्निविष्टं शरीरं रक्षन् सन् अन्यथा मृतभ्रांतिः स्यात् स्वयं अमृतः अमरणधर्मा कुलायाद्बहिश्चरित्वा शरीरांतर्गतोपि आकाशवद्बाह्योपि वसन् तत्र कामं यथाकामं भिन्नपदं वा यत्र यत्र कामो विषयेषूत्पद्यते तं तं कामं संस्काररूपेण ईयते गच्छति अथ स्वप्नांत इति। ततः स्वप्नांते स्वप्नावसरे उच्चावचं देहमीयमानः प्राप्यमानः उच्चं देवादि अवचं तिर्यगादि यथासंस्कारसामग्र्यनुरूपं देहं गम्यमानः देवः प्रकाशात्मा बहूनि रूपाणि असंख्यानि वासनारूपाणि निवर्तयति तदेवाह। उतैव यथा वासनं स्त्रीभिः सह मोदमानः उतैव जक्षदिव हसन्निव उतैवापि भयानि व्याघ्राद्युत्पन्नानि पश्यति ॥ ८० ॥

अथ जाग्रदवस्थायां दृष्टिसृष्टपक्षं निरूपयति। जाग्रदवस्थायां यो योर्थः पदार्थः नृप-शुपक्षितिर्यगादिरूपो दृग्गोचरो दृष्टिविषयो भवति स पदार्थः। तदा तद्दर्शनसमये तद्गतात्मस्वरूपाविज्ञानोत्पन्न एव स्फुरति तच्छब्देन पूर्वोक्तः पदार्थः तद्गतं यस्मि-न्नंतर्यामित्वेन स्थितं यदात्मस्वरूपं तस्याविज्ञानमज्ञानं तस्मादुत्पद्यमान एव स्फुरति दृग्गोचरीभूतपदार्थोत्पत्तावधिकरणज्ञानमेव कारणमित्यर्थः। एतदेव दृष्टांतेन द्रढयति। यथा रौप्याभासः शुक्तिकाज्ञानहेतुर्दृष्टः शुक्तिकायाः अज्ञानमेव हेतुः कारणं यस्य शुक्त्यज्ञानेनोत्पादितो रजताभासः इदं रजतमित्याकारेण स्फुरति। तद्वदात्माज्ञानेन पदार्थाकारः स्फुरति। यतः सुषुप्तौ आत्माकारांतःकरणवृत्तौ सत्यां पदार्थमात्रं न स्फुरति चपरं किरणाज्ञानतो मरीच्यज्ञानान्मृगजलोत्पत्तिः तथा रज्ज्वज्ञानाद्भुजंगोत्पत्तिः एवं प्राति-भासिकोपि पदार्थः निमिषं निमेषसमयं यावत् सुखभयकृद्भवति। दरिद्रस्य पिपासार्दितस्य च रौप्यमरीच्यंबुदर्शनादाश्वासनेन सुखं भवति। तथैव भुजंगदर्शनाद्भयं भवति। तथा च प्रातिभासिकस्यापि पदार्थस्य ईषत्कार्यक्षमत्वं दृष्टमस्ति। तद्वत्प्रकृतेपि क्षणिक-सुखदुःखोत्पत्तेः शक्तत्वमस्तीत्यर्थः। अतः इदं पदार्थजातं किलेति निर्द्धारणे दृष्टिसृष्टं दर्शनकाल एव सृष्टं परंतु दृढसंस्कारानुबंधेन ज्ञायते। यथोल्मुके भ्राम्यमाणे परि-

मायाख्यासाश्रयेणप्रविततनखिलं यन्मया तेन मत्स्था-
न्येतान्येतेषु नाहं यदपि हि रजतं भाति शुक्तौ न रौप्ये
शुक्त्यंशस्तेन भूतान्यपि मयि निवसंतीति विश्वाग्निनेता
प्राहास्माद् दृश्यजातं सकलमपि मृषैवेंद्रजालोपमेयं ॥ ८२ ॥

अथ कर्ममीमांसाप्रकरणं.

हेतुः कर्मैव लोके सुखतदितरयोरेवमज्ञो विदित्वा
मित्रं वा शत्रुरित्थं व्यवहरति मृषा याज्ञवल्क्यार्तभागौ
यत् कर्मैवोचतुः प्राग् जनकनृपगृहे चक्रतुस्तत्प्रशंसां
वंशोत्तंसो यदूनामिति वदति न कोप्यत्र तिष्ठत्यकर्मा ॥ ८३ ॥
वृक्षच्छेदे कुठारः प्रभवति यदपि प्राणिनोद्यस्तथापि
प्रायोन्नं तृप्तिहेतुस्तदपि निगदितः कारणं भोक्तृयत्नः

ग्निरूपं तेजो गोचरीभवति नोल्मुकं भवतीत्यर्थः ॥ ८१ ॥

अथोक्तार्थे भगवद्वाक्यं संवादयन्नाह । यद्यस्मात् कारणात् मायारूपो योयमध्यासः आरोपः तस्याश्रयीभूतेन मया अखिलं विश्वजातं नामरूपात्मकं प्रविततं विस्तारितं तेन कारणेन एतानि भूतानि मत्स्थानि मदाश्रयवर्तीनीति प्रतीयते परंत्वेतेषु भूतेषु अहं नास्मि असंगोहं न वर्ते । ननु कारणं हि स्वकार्यमभिव्याप्य तिष्ठतीति प्रसिद्धिरस्ति कथमुक्तं तेषु नाहमित्याशंक्य दृष्टांतेनोत्तरयति यदपीति । यद्यपि शुक्तौ रजतं भाति परंतु रौप्ये शुक्त्यंशो न दृश्यते अथ यदि दृश्येत तर्हि भ्रम एव न स्यात् तेन कारणेन मयि भूतान्यारोपितानि परंत्वेतेषु नाहमित्यर्थः इति विश्वाग्निनेता जगद्गुरुः श्रीपादेंद्र आह । तस्मात् कारणात् सकलमपि दृश्यजातं मृषैव किंभूतं इंद्रजालोपमेयं इंद्रजालवदुपमीयते तत् तदुक्तं भगवता । मया ततमिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्थानि सर्व भूतानि न चाहं तेष्ववस्थितः ॥ ८२ ॥

अथ कर्ममीमांसाप्रकरणं व्याख्यायते । तत्र सर्वप्राणिनां सदसत्फलहेतुः कर्मैवास्तीति निरूपयति । लोके जीवलोके सुखतदितरयोः कारणं कर्मैव नान्यत् एवमुक्तप्रमेयमविदित्वा अज्ञो ज्ञानहीनो जंतुर्मित्रं शत्रुर्वा इत्थं मृषैवव्यवहरति मित्रं सुखहेतुः शत्रुर्दुःखहेतुरित्यमभिनिविष्टःसन् व्यवहरतीत्यर्थः यद्यस्मात् कारणात् प्राक् पूर्वं याज्ञवल्क्यार्तभागौ जनकगृहे यज्ञमंडपे कर्मैवा ? चतुः तया तच्छब्देन कर्म तस्यैव प्रशंसां चक्रतुः न केवलं तावेव प्रशंसतुः यदूनां वंशोत्तंसः श्रीकृष्णोपि वदति स्मराति इति किं अस्मिँल्लोके कोप्यकर्मा नतिष्ठतीति तदुक्तं गीतासु । न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् । कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैरिति ॥ ८३ ॥

अथ पूर्वग्रंथे यद्यपि कर्मणः प्रशंसा कृता तथापि केवलस्य कर्मणो न फलदा-

प्राचीनं कर्म तद्वद्विषमसमफलप्राप्तिहेतुस्तथापि
स्वातंत्र्यं नश्वरेस्मिन् न हि खलु घटते प्रेरकोस्यांतरात्मा ॥८४॥
स्मृत्या लोकेषु वर्णाश्रमविहितमदो नित्यकाम्यादि कर्म
सर्वं ब्रह्मार्पणं स्यादिति निगमगिरः संगिरंतेतिरम्यं
यन्नासानेत्रजिव्हाकरचरणशिरःश्रोत्रसंतर्पणेन
तुष्येदंग्येव साक्षात् तरुरिव सकलो मूलसंतर्पणेन ॥ ८५ ॥

नसामर्थ्यं कुतः अचेतनत्वात् किंत्वीश्वरप्रेरितस्येति सदृष्टांतमाह यदपि यद्यपि वृक्षछेदे कुठारः प्रभवति समर्थो भवति तथापि स प्राणिनोद्यः प्राणोस्यास्तीति प्राणी जीवत्पुरुषस्तेन नोद्यः प्रेर्यमाण एव भवति न स्वातंत्र्येणेत्यर्थः। अथ पुनर्दृष्टांतमाह प्राय इति अन्नं प्रायो निश्चयेन तृप्तिहेतुर्भवत्येव तथापि भोक्तृयत्नः पचनभोजनाक्रियारूपः कारणं यस्य निगदितः। अथ यदर्थं दृष्टांतद्वयमुक्तं तदाह। प्राचीनमिति। तद्वदुक्तदृष्टांतवत् प्राचीनं कर्म प्राग्जन्मकृतं कर्म यद्यपि समविषमफलहेतुर्भवति तथापि अस्मिन्नश्वरे कर्मणि फलदाने स्वातंत्र्यं न हि घटते किंतु तत्प्रेरकोंतरात्मा भवति। अयमर्थः। क्रियमाणं सदसत्कर्म तदेव नश्यति तद्धर्माधर्मरूपेणात्मनि तिष्ठति तत्तदात्मना प्रेरितं सत् भोगानुकूलं भवति फलभोगस्तु कर्मसाक्षिणेश्वरेण प्रेरितस्याविद्यया देहाभिमानिनो जीवस्यैव संभवतीति। पुण्यः पुण्येन कर्मणा भवतीति पापः पापेनेति हि श्रुतेः। तदुक्तं भगवता। कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते। पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते इति ॥ ८४ ॥

क्षुद्रदेवताराधनमपि ब्रह्मार्पणमेव भवतीत्याह। लोकेषु मनुष्यलोकेषु स्मृत्या वर्णाश्रमक्रमेण यान्नित्यकाम्यादि कर्म विहितं तत् एवं निषिद्धव्यतिरेकेण पंचविधं ब्रह्मार्पणमेव स्यादिति निगमगिरः अतितारतम्यं युक्तियुक्तं संगिरंते। यद्यपि कर्तारः फलाभिसंधानादन्यदेवतोद्देशेन कर्म कुर्वंति तथापि ब्रह्मार्पणमेव। कर्तारस्तु तत्तद्वासनाभिर्लिप्यंते। तत्र षड्विधानि कर्माण्यभिहितानि नित्यानि अकरणे प्रत्यवायसाधनानि संध्यावंदनादीनि। काम्यानि इष्टसाधनानि ज्योतिष्टोमादीनि नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि प्रायश्चित्तानि पापक्षयसाधनानि प्रतिषिद्धानि हिंसादीनि तत्र नित्यादीनां बुद्धिशुद्धिः परमं प्रयोजनं। उपासनानां तु तदैकाग्र्यं। विविदिषंति यज्ञेनेत्यादिश्रुतेः। तपसा कल्मषं हंति इत्यादिस्मृतेश्च। नित्यनैमित्तिकयोरुपासनानां चावांतरफलं पितृलोकसत्यलोकप्राप्तिः कर्मणा पितृलोको विद्यया देवलोक इत्यादिश्रुतेः। अन्यदेवतोद्देशेन यत् कर्म कृतं तद्ब्रह्मार्पणमित्यत्र युक्तिमाह यदिति। नासानेत्रजिव्हाकरचरणशिरःश्रोत्राणां अवयवानां संतर्पणेन यथा साक्षात् अंगी आत्मा यथा मूलसंतर्पणेन सकलो वृक्षः संतर्पितो भवति एवमन्यदेवतोद्देशेन कृतेपि कर्मण्यवयवीभूतसकलदेवतात्मकः परमेश्वर एव तुष्यतीत्यर्थः ॥ ८५ ॥

य: प्रेत्यात्मानभिज्ञः श्रुतिविदपि तथा कर्मकृत् कर्मणोऽस्य
नाश: स्यादल्पभोगात् पुनरवतरणे दुःखभोगो महीयान्
आत्माभिज्ञस्य लिप्सोरपि भवति महान् शाश्वत: सिद्धिभोग-
स्त्वात्मा तस्मादुपास्य: खलु तदधिगमे सर्वसौख्यान्यलिप्सोः ॥८६॥
सूर्याद्यैरर्थभानं न हि भवति पुनः केवलैर्नात्र चित्रं
सूर्यात् सूर्यप्रतीतिर्न भवति सहसा नापि चंद्रस्य चंद्रात्

अथेश्वरानभिज्ञेन यत् कर्म कृतं तद्व्यवस्थामाह । य: श्रुतिविदपि वेदज्ञोपि तथा-कर्मकृत तत्प्रतिपादितकर्मकृत् पुरुष आत्मानाभिज्ञः आत्मबहिर्मुख: सन् प्रैति म्रियते अस्य पुरुषस्य कर्मण: नाश: स्यात् कस्मादल्पभोगात् देवलोकादिभोगात् । ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंतीत्यादि भगवद्वचनात् । तथास्य पुरुषस्य पुनरवतरणे महीयान् दु:खभोगो भवति । अथात्माभिज्ञः सन् य: फलेच्छुर्भवेति तस्य कागतिरित्याशंक्याह लिप्सोरिति । आत्माभिज्ञस्य शाश्वतासिद्धिभोगो भवति । महान् स्वर्लोकादप्यधिक: तथा शाश्वत: बहुकालभोग्य: एवंविधोऽणिमाद्यष्टसिद्धिभोगो भवति । तथा अलिप्सो: सिद्ध्यनपेक्षस्य आत्माभिज्ञस्य पुरुषस्य तदभिगमे आत्मप्राप्तौ सर्वसौख्यानि भवंति परमानंदप्राप्तिर्भवतीत्यर्थ: । अत्र श्रुति: । अथ यो ह वास्माल्लोकात् स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाननूक्तोन्यद्वा कर्माकृतं भवति यदु ह वा अप्यनेवंविन्महत् पुण्यं कर्म करोति । तदस्यांतत: क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवात्मनो यद्यत् कामयते तत् तत् सृजत इति । भाष्यं । अथ य: पुरुष: अस्मात् मृत्युलोकात् स्वं लोकमात्माभिधं लोकमात्मानमदृष्ट्वा साक्षादकृत्वा प्रैति म्रियते स एनमात्मानमविदित: अजानन् कर्मफलं भोक्तुं न समर्थो भवति भोगावसाने कर्मनाशो भवति इत्यर्थ: । अथ कुत आत्मानं न पश्यतीत्याह । यथा वेदो नाननूक्त: अर्थमनुलक्षीकृत्योक्त: पठित: अनूक्त: न अनूक्त: अननूक्त: वेदतात्पर्यमजानत: आत्मदर्शनं कुत इत्यर्थ: । तथान्यद्वेदार्थाद्विपरीतं यदु यत् कर्म तदकृतमेव निरर्थकमेवेत्यर्थ: तथा अनेवंवित् न एवंवित् अनेवंवित् स्वस्वरूपानभिज्ञपुरुषो यन्महत् पुण्यं अश्वमेधादिकं कर्म करोति तदस्यांतत: भोगावसानात् क्षीयते नाशमाप्नोति अथ चित्तशुद्धिद्वारा आत्मप्रकाशकं यत्कर्म तन्न नश्यतीत्यर्थ: । तदुक्तं भगवता । अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां । तदेवाह । तत् तस्मात् कारणात् आत्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते ह इति निश्चयेन तस्य कर्म न क्षीयते ननु विषयसुखलंपटस्य कथमात्मालोकापेक्षेत्यत आह । अस्मादिति । अस्मादात्मन: सकाशात् यद्यत् कामयते कामनाविषयं करोति तत् तत् सृजते संपादयति । आत्मयोगादणिमादिसिद्धयो लभ्यंते । किं पुनरन्यदित्यर्थ: ॥ ८६ ॥

अग्नेरग्नेश्च किंतु स्फुरति रविमुखं चक्षुषश्चित्प्रयुक्ता-
दात्मज्योतिस्तत्तोयं पुरुष इह महो देवतानां च चित्रं ॥ ८७ ॥
प्राणेनांभांसि भूयः पिबति पुनरसावन्नमश्नाति चात्र
तत्पाकं जाठरोऽग्निस्तदुपहितबलो द्राक् शनैर्वा करोति
व्यानः सर्वांगनाडीष्वथ नयति रसं प्राणसंतर्पणार्थं
निःसारं पूतिगंधं त्यजति बहिरयं देहतोऽपानसंज्ञः ॥ ८८ ॥

सोळा पोट अर्थालंकार वरील १०० अर्थालंकारांतून वजा केले तर बाकी ८४ मुख्य अर्थालंकार रहातात. मम्मटाचे काव्यप्रकाशांत ६१ अर्थालंकार आहेत ते येणेंप्रमाणें:—

अ.

१ अतद्गुण.
२ अतिशयोक्ति.
३ अधिक.
४ अनन्वय.
५ अपन्हुति.
६ अनुमान.
७ असंगति.
८ अन्योन्य.
९ अप्रस्तुतप्रशंसा.
१० अर्थांतरन्यास.

१०

आ.

१ आक्षेप.

१

ए.

१ एकावली.

१

उ.

१ उत्तर.
२ उदात्त.
३ [illegible]मा.
४ [illegible]योपमा.
५ उ[illegible]क्षा.

५

क.

१ काव्यलिंग.

१

त.

१ तद्गुण.
२ तुल्ययोगिता.

२

द.

१ दीपक.
२ दृष्टांत.

२

न.

१ निदर्शना.

१

प.

१ परिकर.
२ परिवृत्ति.
३ परिसंख्या.
४ पर्याय.
५ पर्यायोक्ति.
६ प्रतिवस्तूपमा.
७ प्रतीप.
८ प्रत्यनीक.

८

भ.

१ भाविक.
२ भ्रांतिमान्.

२

म.

१ मीलित.

१

य.

१ यथासंख्य.

१

र.

१ रूपक.

१

व.

१ विनोक्ति.
२ विभावना.
३ विरोध.
४ विशेषोक्ति.
५ विशेष.
६ विषम.
७ व्यतिरेक.
८ व्याघात.
९ व्याजस्तुति.
१० व्याजोक्ति.

१०

श.

१ श्लेष.


१

स.

१ सम.
२ समासोक्ति.
३ समाधि.
४ समुच्चय.
५ सहोक्ति.
६ सामान्य.

७ सार.	११ संसृष्टि.	इ.
८ सूक्ष्म.	१२ स्मृति.	१ हेतुमाला.
९ संकर.	१३ स्वभावोक्ति.	१
१० संदेह.	१३	एकूण ६१ हेतु.

या ६१ पैकीं उत्तर, विशेषोक्ति, सूक्ष्म, संसृष्टि, अर्थालंकारांपैकी ५६ ... त्र
शिवराजभूषणांत नाहींत. म्हणून मम्मटाचे ६१ यांतून वजा केले म्हणजे
यांत आहेत असें होतें. हे ५६ वरील ८४ अलंकारांहून यांत अ...
बाकी २८ रहातात. इतके मम्मटाचे ग्रंथांतील अ...विकच्छवि, व सामान्य
आहेत. परंतु कामधेनुचित्र, गुंफ, प्रश्नोत्तरमाला, भा... पण काव्यप्रकाशां
या पांचांखेरीज बाकीच्या २३ अलंकारांचा अंतर्भाव आ...त आहे. सारांश
गितलेल्या ६१ अर्थालंकारांतच होतो असें मम्मटाचे म...त व त्याच्या
कामधेनु चित्रादि पांच अलंकार मात्र मम्मटाचे ग्रंथांत नाहं हे पांच ...कि
वर सांगितलेले उत्तर, विशेषोक्ति, सूक्ष्म, संसृष्टि, व हेतुमाला ही सं... विशेष
षणांत नाहींत. सारांश दोन्ही ग्रंथांतील मुख्य अर्थालंकारांचे ...
आहे असें होतें. काव्यप्रकाशांत आढळणाऱ्या ६ शब्दालंकार ...त सां-
सल्याकरितां पुढील पृष्ठावर दिले आहे. ...गील


शब्दालंकार.
अनुप्रास
पुनरुक्तवदाभास
वक्रोक्ति
यमक
श्लेष
छेक
वृत्ती
लाट
शब्द
शब्दार्थ
श्लेष
काकु
वर्ण
पद
लिंग
भाषा
प्रकृति
प्रत्यय
विभक्ति
वचन
पदभंग
अभंग
पदांचा
पदाचा
एकसमास
भिन्नसमास
नागरिका
परुषा
कोमला
अनुलोम
विलोम
गोमुत्रिका
खड्ग
नरपद
मुसल
धनुष्य
शक्ति
शूल
हल
बुदबळांचा
शर
चक्र
रथपद
तुरंगपद
गजपद
अर्धभ्रम
मुरज
सर्वतोभद्र
पद्म
पाठ
पट
पाठ
पाठ
पाठ

॥ कंपनीप्रतापमंडनम् ॥

कल्याणं कलयंतु हेमकशिपोर्वक्षो विपाट्याद्य वः
प्राप्ता कीर्तिरदायि यैः सुरतसद्दीक्षागुरुभ्यो मुदा ॥
ते च श्रीनरसिंहतीक्ष्णनखरा गोपीकुचेभ्यो वरा
योग्या नो गुरुदक्षिणेति विनतैस्तेभ्यो नमः कुर्महे ॥ १ ॥

अपि च ।

बिंबोष्ठि स्वजनदुराधिबाधिकामो-
दात्री त्वां शशधरजिन्मुखी भवस्ताम् ॥
यामीषत्स्मितवदनां चुचुंब कैशो
मन्मंदः प्रणमति ते प्रसादकामः ॥ २ ॥

नाद्यंते सूत्रधारः—समंतादालोक्य । सहर्षम् । अहो रमणीयता खलु वासंतप्रभातस्य। यत्र हि ।

प्रसूनभरनम्रसच्छविवराम्रानेर्यन्महा-
मरंदमधुताम्रसन्नयनके सुमंजुध्वनौ ॥
सुकूजति मिलिंदसत्पिकगणे दिनेशोज्जिनी
नियोजयति सत्करान् श्लथयितुं सुनीवीभरम् ॥ ३ ॥

किंच ।

आदिष्टो जगदेकवीरगुरुणा धीरेण गच्छेति रे
त्रैलोक्या विजयाय मन्मथमहाराज्ञा समीरो वनम् ॥
तं संश्राव्य वसंतवासरुचिरं प्रासोद्य दत्ताभयो-
नेनारामसुपुष्पदर्शनमहस्तिर्यक्समासर्पति ॥ ४ ॥

पुनः पुरतो निपुणतरं निर्वर्ण्य । अहो खलु निखिलनिगमागमसार्थप्रसविष्णोरत एव समरभुग्जिष्णुजन्योद्धरवर्धिष्णोर्ग्रीष्मोष्मकरातिभीष्मभीष्मपाणिनिर्घृणोन्मुक्तमार्गणगण - घोरसंघातसहिष्णोश्चिरंतनश्रीचिन्हभ्राजिष्णोराखंडलव्रतप्रत्यूहप्रहितात्सरःकामकलाका - लानलानल्पोग्रशिखाग्रासिष्णोरपि नैजकृष्णगलत्वसाधर्म्यप्रयोज्यसाफल्यो भ्रमोद्दीप्तको- पानलोद्गिरणभ्रमभयंकरारुणाविविधराधामाधवसुरतसमारंभोत्सवबहुविधधातुरसरंजितव - संतमल्पानिलप्रमत्तपरपुष्टषट्पदमदोत्कटसन्नद्धसामंतभागस्मरराजधानीद्योतद्रुंजालत -

---

१ मनोव्यथा । २ लक्ष्मी । ३ कामयिता । ४ शब्द कर्त्ता असतां । ५ कोकिळ । ६ सूर्य । ७ बाण । ८ समुदाय । ९ अग्नि । १० भ्रमर ।

निकुंजसमापतद्व्रतिकलापुंजकीररयशारसराविद्धराधाचंक्रमणचरणार्णोजसंरणन्मंजीरमं-जुसिंजितकर्णनक्षणसमापतद्विलक्षणसुतीक्ष्णधारमारनाराचगणविदीर्णस्य निजांतःकरणस्य तदात्ववार्ताभिव्यक्त्याभिव्यज्यमानापयशापेसारणार्थमिव सरभसतदुपसर्पत्सर्पफूत्कारकृन्नंदनंदनामंदवेगालिंगिततदपांगगोचरगोचरात्मकस्य श्रीनरसिंहस्य वसंतोत्सवविलोकनोत्सुकसाधुसुंदर्यादिमहाजनसमाजस्ततज्जनसंगिततत्ताद्विभ्रमावलोत्सुकतत्तद्धृदयंगमभुजंगसमाजश्च समलंकरोतीदमुद्यानम् । अतः कुशलेषुणा नानवहितस्वांतेन भवितव्यम् । अतएव खलु संगिरंते ।

आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ॥
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥ १ ॥

परं च ।

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ॥
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥ २ ॥

इत्यभियुक्ताः । अतः स्वीयसकलसत्कलासमाकलनाय सामाजिकप्राड्विवाकानुपास्महे । इति कतिचित्पदानि गत्वा । सविनयमंजलिबंधम् । भो भोः समधिगतसकलकलाकलापाः मधुरतरसदःसल्लापाः सारस्वतसत्तल्पीभूतस्वस्वांतसंगृहीतरसिकावतंसकलानल्पाः कोप्येष भरतकुलनंदनो विचारदक्षनामा केनचित्सद्रसालंकारविधुरनीरसप्रबंधमभिनयतोद्वेजितसभ्यमहाजनमानसारविंदोल्लसनपटुतरमभिनवकलकल्पितं रूपकमभिनेतुमार्यमिश्रान्विज्ञापयति ।

गुणमणिगणपूर्णास्तूर्णसंमोदशीलाः
परगुणपरमाणून्साधु संजृंभयंतः ॥
सुगुणमिलितदोषत्यागसद्धंसदीक्षा-
धृतखलजनशिक्षाश्चित्यतामेतदीषत् ॥ ५ ॥

अपि च ।

सद्विद्यारतयः सदा सुमतयो दूरीकृतापत्तयो
नूनं सत्कृतयः सदःसुपतयो विद्रावितारातयः ॥
सत्संपत्ततयः परावगतयो भूमंडलख्यातयो
भो भोः सन्नतयो लसंतु भवतां सत्पादयुग्मे मुहुः ॥ ६ ॥

आकाशे कर्णं दत्वा । किं ब्रूथ प्रहितेयमस्माभिः पत्रिकेति । सशिरःकंपम् । प्रविश्य नटः पत्रिकां प्रयच्छति । सूत्रधारः गृहीत्वा वाचयति ।

कंजास्यदृग्या पिकगीरिदानीमचीक्लृपत्प्रश्वसनप्रतापान् ॥

---

१ शब्द । २ बाण । ३ विलास । ४ मनोहर । ५ बाग । ६ विपत्ति । ७ परस्परांशीं भाषण । ८ शिरोभूषण । ९ पळविणें । १० शत्रु ।

प्रतीपभूपान्परितः प्रकामं सेयं सुगंडद्युतिरद्य नोव्यात् ॥ ७ ॥

नटः सहर्षम् । भाव कंपिन्युत्कर्षोत्कर्षप्रतिपादकमधुरसंदर्भगर्भितरूपकाभिनयायाज्ञापयंति पारिषदा[1] इति तर्कयामि ।

सूत्रधारः—ससाध्वसम् । ध्यानं नाटयन् । आः सांगसमिवाद्यात्मानं मन्ये । यतः मधुरसंदर्भगर्भितमीदृशमभिनवकलकल्पितं रूपकमभिनेतुमादिशंति, सभ्याः । तदेतदतीवदुर्घटम् ।

अभिनवकलकल्पिते यदि स्याद्रसिकमनोहरतातु काव्य एव ॥
सरसिजनिवनीविकासकत्वं ननु खद्योतगरुद्रुचौ न किं स्यात् ॥ ८ ॥

स्मृतिमभिनीय समंदस्मितं सश्लाघं च । मारिष असाधारण्येषा सभ्यचातुर्यसरणिः । यदेतस्मिन्नेव पद्ये षष्ठवर्णैः क्रमतो विन्यस्तानि रूपकस्य कंपिनीप्रतापमंडननामाक्षराणि ।

नटः—भाव क एतस्य कवयिता ।

सूत्र०—स्मृतिमभिनीय । मारिष विबोधीमिति नांदीपद्यएव रूपकप्रणेतुरस्य बिंदुमाधवनामाक्षराणि सप्तमाक्षरैः क्रमतो विन्यस्तानि विबुधसभ्यसंमेलनजनितहर्षार्णवनिमग्नेन मया विस्मृतान्यपि दैवादनुस्मारितानि । यः किल ।

साधु महाशयसंरक्ष[2] जलजातासक्तपवल्लवं सरसं ॥
कुमुदासादकरूपकमब्जलतावच्चकार कविर्हृद्यम् ॥ ९ ॥

नटः—भाव कोसौ बिंदुमाधवः । यस्यैतादृशी कृतिः ।

सूत्र०—

यत्कीर्त्या किल भीमयाष्टककुभः[5] प्रापुः परंत्वर्जुनत्वंज्ञानां न कुलानि यद्विमुखतां तद्दानशौंडस्य यः ॥
नीत्वा सत्करपल्लवे नववयो गोपालराजः सुधीर्धूः संकीर्त्य सुकीर्तिपूर्णदिगिदं तातः स देवोभवत् ॥ १० ॥

तस्य सद्वेदांतपयःपारावारीणस्य पुण्यपुरसंगतविद्वज्जननयनेंदिंदिरमंदिरमुखारविंदस्य सुंदरगिरः परोकारधुरंधरस्यान्वर्थनरसिंहनामधेयस्य नंदनमेनमाकलय ।

नटः—किमसौ नरसिंहसूरिसुतः ।

सूत्र०—अथ किम् ।

नटः—तर्हि विदित एवायमस्माकम् । यं किल सुतक्ष्णधारातिकरालाकारस्वकरकरवालेवमोद्भवद्यशःपटाक्रांतत्रिभुवनत्वसुबलिमस्तकन्यस्तचरणत्वान्वार्थितानुसृतस्वपटवर्धनोपनामत्रिविक्रमविक्रमस्य स्वचिरजीवित्वप्रख्यापनप्रत्यक्षभार्गव इवाराधित-

---

१ विरुद्ध । २ संरक्षण करो । ३ सापराध । ४ प्रियकर । ५ दिशः । ६ कार्यभार । ७ समुद्र ।

पिनाकिनः पिनाकीवोपसंहृतविप्रतापस्य प्रताप इव प्रज्वलत्प्रतापयुक्तस्य युक्त इव सर्वदा बहुजन्यभानस्यान इव सकलकर्मयुंजानस्य युंजान इव बहुजन्यचिंतासहायस्याय इव शुभसांदृष्टिकानुसरणशालिनः शालय इव कुवलयामोदिनः[1] परशुरामभावुकनाम्नो नंदस्य नंदनमिव सुकृतिहृदयानंदस्य स्वसत्पाणितलपरिनटत्पुंखोति[2]निशितकृपाण[3]निर्घृण[4]संछेदोच्चलच्छोणितच्छटाच्छन्नमार्गारिपुवर्गस्वर्गमार्गणेनाधुनिकेभ्यः स्वरामायणकथायाथार्थ्यप्रत्यापनायावतीर्णो दाशरथिरिवातिमंद्रस्य प्रतापानुसृतमृगेंद्रस्य सुगणमणिसांद्रस्य रामचंद्रस्य तनयो बहुनयः शौर्यौदार्यगांभीर्यचातुर्याद्यनेकप्रत्नरत्नसहचरसद्विनयभरविजितसत्फलभरनम्राम्रारामभावः स्वर्थ्यविमुखीकरणधृतदीक्षो मृगाक्षः सुमहितानुज्ञापालनान्वर्थितस्वनामा गोपालनामा बहुविलासी महाकुशलः स्वहृदयंगममाकलयांचकार नेपथ्ये कलकलः ।

सूत्र०—मारिष स्वप्रतापाकर्णनक्षणविशीर्णहृत्प्रतीपभूपालप्रतीकातिकंपिन्याः सकलसुजनचक्रवालानुकंपिन्या महाराज्ञ्याः सकलधरित्रीतलसंवसत्सुजनमनस्तापापनोदोर्ध्वप्रसारितनिजयशःपटकुटीसंधारणार्थं द्वैविध्यं प्रापितं चंडांशुरिवातिप्रचंडं स्वप्रतापमिव स्वर्णदंडं दधानौ परार्घ्यवेषाभरणौ मणिकंकणहीरकंकणनामानौ बंदिनौ[6] महाजनान्प्रति महाराज्ञीसमागमोत्सवनिवेदनायेतएवाभिवर्तेते । अतो नैतदग्रतः स्थितिरावयोः समंजसेति निष्क्रांतौ ।

। इति प्रस्तावना ।

ततः प्रविशति यथोक्तरूपौ मणिकंकणो हीरकंकणश्च ।

मणिकंकणः—भो भोः सुगुणमणिभाजना महाजनाः स्वस्वांतारविंदमंदिरेंदिंदिरान् निजविरहजनितदीर्घाधिमतो भवतः सांत्वयिषुः गृहीतमातृभावा महाराज्ञी स्वागमोदंतमहोत्सवोपायनं भवद्भ्यः संप्रेषयामास । अतस्तदादाय समाहितस्वांतैर्यथापूर्वमनुवर्तितव्यम् ।

हीरकंकणः—सखे मणिकंकण । संप्रत्यतिकठोरहृत्कपाटजनताटकोंकणकर्नाटकनयसदाचारकणगणभर्जनभ्राष्ट्रविविधानल्पाशिल्पकल्पनाजालस्पर्धनीयत्वाष्ट्रबहुविधराष्ट्रयुङ्महाराष्ट्रादिबहुविधविषयविविधवैषयिककलिकलापप्रबलदुर्बलविवादविमर्शनपूर्वकतत्तद्विवेचनपटुतरदर्शनः कोसौ कुशलाग्रगण्योभ्यषेचि महाराज्ञ्या ।

मणि०—सखे सौमनस्यलालितविनयभरोप्यसौमनस्यलालितविनयभरः सुगुणराजीव राजीवराजीतोपि तन्नाराजितः बहुस्वाधिराज्यपोषकोप्यस्वाधिराज्यपोषकः सदानंदपरोप्यसदानंदपरः प्रमदकसदयोप्यप्रमादकसदयः सरसकलानिधिरप्यदोषाकरः

१ आनंद देणारा । २ पिसारे । ३ तरवार । ४ निर्दय । ५ शोधनेन । ६ स्तुतिपाठक । ७ वृत्तांत । ८ देश ।

पद्मिनीवल्लभोपि कुवलयानंददः स्वाश्रितनर्मदोप्यजलधीरुरुसारसंग्रहपरः मिहिरोब्धि बहुदूरदर्शी हरिदश्वोमेहर्बांबहदरगौरनरमहीश्वरः कथमद्यापि ते श्रोत्रसरणिं नावगाहते । यस्य खलु दीनदौर्विध्योद्धारणक्रमस्यापि बहुविक्रमस्य विक्रमइव बहुदानक्रमस्य दानक्रमइव साधितपूर्वसंकल्पस्य कल्प इव बहुजन्यविध्वंसस्य ध्वंसइव साद्यनंतस्य अनंत इवांगीकृतवसुधरापरभारस्यापरभारश्चवातुलस्य विमलयशःसैरस्वान्परबलिसवगतोपि भुजंगराजमधुरमंदाक्षावलोकनेपरभोगिकामिनीवदनविधून् ग्लपयति सुरभयति चेति विचित्रमेतत् । सोयं स्वशिरःसमारोपितराजकार्यभारो महाराश्येत्यवेहि ।

हीर०—सखे । चिरपरिशीलितानल्पनीतिष्वतिविनीतेषु सुकृतिष्वनेकेषु सत्स्वपि किमर्थमेनमेवातिमृदुलस्वांतमीदृशे रौद्रे कर्मणि युयोज हरिणाक्षी । अथवाऽशोकवनिकान्यायेनेति मे महान्संदेहः ।

मणि०—सखे श्रूयताम् ।

मिथ्यावादपरप्रकामवचनासद्वृंदसद्वृंदयोः
संप्राप्ते कलहेक्षणं सुविमृशन्क्षीरार्णसेः संगमे ॥
निश्चित्याशु सुहंसवत्खलकथास्तास्ताग्विनेतुं क्षमो
मेहर्बांबहुदुरसुगौर्नरमहीपालात्परः को भवेत् ॥ ११ ॥

न केवलमसज्जनशिक्षणैकदीक्षोसावपि तु तन्मिषेण सुजनमनस्तोषणातिदक्षो जलजाक्षः । यथा खल्वंबरांगणसरणिमनुसरंस्तरणिः ।

मंदेहसंदोहतमांसि हत्वा संजीवयन्सर्वजनानुदेति ॥
मंदेहनाशश्च तमोविनाशः किं तस्य कार्यं तु परोपकारात् ॥ १२ ॥

यः किल । बहुगुणप्रियो बहुरणप्रियो बहुभरणप्रियो बह्वाभरणप्रियो बहुमाभरणप्रियो बहुसमाभरणप्रियो बह्वसमाभरणप्रियः भवानंददो विभवानंददोऽविभवानंददः अगदमनो नगदमनः पन्नगदमनो विपन्नगदमनश्चेति परं विस्मयमामनंति विचक्षणाः । अतोक्षिपक्ष्मणोरिव करकाययोरिव देहात्मनोरिवातिसौहृदसाम्राज्यमापन्नोऽविचार्य हितं कुर्वाणोऽहितनिर्वाणश्चैत्येनमेव राजकार्यधुरंधरमत्र संयुयोजेत्यवधारय ।

हीर०—वयस्यासौ सामयिककोपांकुरप्रकंपितकदर्यस्तदोषतः सुजनसमाजेपीदृशः किमिति शंके ।

मणि०—नहि नहि किंतु । किंच ।

नानारुरुशशलालाकाकापापामिमामिममामा ॥
हाहाहूहूभूभूतांतांतानौमितकंकं ॥ १३ ॥
यथा सरसकारिका कनककंदुकं कंचुकं
कलंककटकस्फुटं नयननंदनंकंटकम् ॥

---

१ सूर्य । २ सागर । ३ लक्ष्मी । ४ चंद्र ।

शचीशइव वा नवा करकमाघमाकाशिका
जराजजलजेत्यमून्यपि विलोमतुल्यान्यहो ॥ १४ ॥

तथायमपि कार्यवशाविकृतविपरीतचित्तवृत्तिरपि साहजिकनैजाभिन्नहनिसर्गं कदाचिदपि न मुंचाति स्वस्वांतसंभृतातिगांभीर्यः ।

हीर०—वयस्यैतन्निसर्गनिर्देशापदेशेन किमपि निजांतरंगहितमेव समीहितं महात्मजनपरंपराप्राप्तं मे समावेदितं निजांतरंगमित्रेण त्वयेत्यवैमि ।

मणि०—सहासम्। साधु सखे साधु सम्यगाकलितं भवतेदं मदीरितम्। भवतु। अतः स्वात्मानमर्थये ।

जगौ परस्तं नरहत्नसारं हेमांबरं बालहरं दयारम् ॥
दयाशर्चीशादरयाभ्रदीनाननाजनानारस्तत्रमैरहोहो ॥ १४ ॥

इति यत्प्रेमपरमरसायनेन किल ।

निलीनो यत्तेजःप्रसरमधुनाकर्ण्य तैरसा
सुदीनो यत्पीनोप्यसकृदकृतांगारमयशः ॥
महामीनो भानोरिव रिपुजनोनंभसि परं
सुमानो वार्डीनो जयति जनतावद्याभिदसौ ॥ १५ ॥

किं बहुना ।

सप्ताश्वयुग्रयवियच्चरचारुतेजोविध्वंसितांधतमसं किल पद्मिनीनम् ॥
जेतुं जगद्धितजनैजमहत्प्रतापं यं वै वदंति सुजनाः किमु वारडीनम् ॥१६॥

परोपि यद्वाग्धोरणीलसदनुरागसुधासरण्या ।

वाणीक्षोणी स्वस्मिन्लीना यं यत्स्वयं च तत्स्फीतः ॥
बिन्दुभिरन्वर्थाख्यो गोलिस्फीतो निगद्यते तस्मात् ॥ १७ ॥

यं किलात्मप्रतिभाप्रकर्षनिर्बद्धान्यायकपाटमनुक्षणसदाचारविचारोपचयावमहापचिर्चीषाहर्निशाटमिहाधुनिकतटाभेदपरिभाषया गोलिस्फीटमेव व्यवहरंति व्यवहारविदः। एवमन्येपि प्रोह्लसंति विहितनिजावद्योपमर्दयत्सौहार्देन महाराज्ञीपाणिपल्लवतल्लजसंलालितभूवलयभूषा वज्रांकुराः शतशः ।

ततः प्रविशति पुरः समुल्लसच्चतुरंगवाहिनीकोल्लसत्पद्मरागपुष्परागहीरगोमेदकवैडूर्यगारुत्मतेंद्रनीलमुक्तामणिगर्भितसौवर्णशिरस्त्राणाभरणातिविमलचैलसंमंडितस्वहृदयंगमविस्रंभरससद्भांडमहाजनारूढसुंदरविविधसौवर्णालंकारालंकृतगतिजितकुरंगसुरंगतुरंगसमजपरिवेष्टिता बहुप्रकाशोडुगणविराजमानोडुराजलेखेव विलसती चासकृन्मधुरतरनिजकृपाकटाक्षपरंपरापीयूषवर्षैः स्वानुरागसुधाधारासंबद्धसाधुमहाजनहृद्भूसमुद्भिन्नानंदकंदांकुरोत्थविविधसत्कामशाखोपशाखाभेदविवर्धमानस्युप्रमोदतरून्वंध्यप्रसून-

१ इंद्र । २ भंद । ३ वेगेन । ४ मित्रत्व । ५ पुष्कळ । ६ नक्षत्रसमूह ।

भरगुरुस्तन्वाना गुरुनरसन्मौक्तिकसरस्तबकपरीतपृष्ठास्तरणस्तंबेरमतुरंगमबृंहितहेषाभिर्मिश्रिता गोपांगनपौरकल्कलसहचरसमागमनसमारंभमुक्तमौनगंभीरध्वानोत्तुंगपटहभेरीडिंडिमादिविचित्रवाद्यविजृंभितमहारवमुखरिताष्टहरिदंतरालं यथा तथा सार्वभौमपदवीमधिरूढा सौवर्णस्यंदनारूढा विवेकांजनी महाराज्ञी । तथा तादृङ्महानिर्घोषाकर्णनक्षणसन्नद्धमहाराज्ञीनयननासादेहरदनवदनमुखसुस्मितापहृतस्वस्वकांतिसंधाचना - र्द्धसंमुखसमागमद्योतत्सुरभिभूसुरभिकेतकीगंधफलीचंपककुंदकोकनदबकुलमालती - सेवंतिकातिमुक्तादिप्रसूनसुगुंफितमालाजालसंभृतसत्स्वरस्वतीकुचकचगंडदशनासादितस्वस्वच्छन्यासादनायेव तया समागतमधुरतररसालनारिकेलपनसकदलीमातुलिंगजंबीरमन्मथगोस्तनीजंबूनारिंगदाडिमादिसत्फलसार्धसंपूरितसौवर्णरसचित्रितक्रमुक - नागवल्लीदललवंगेलाजायकतत्प्रसूनकाश्मीरजखदिरमौलिकाचूर्णादिविविधतांबूलसाध - नसुरभितैलजलपटवासकमृगमदादिसंभृततत्तदुपपात्रसंयुतबहुविधानर्घ्यमणिगणाभर - णपरिपूर्णसौवर्णभाजनबिभ्रत्पंचजनपरिवारितनिजोपवस्त्रामंडितमणिबंधद्वंद्वपरार्ध्यवेषा - भरणनानाजनपदेशमहाजनसंमुखसमागमादरातिशयदृष्टाशया महाराज्ञी रथादवतरंती सपदि स्वस्वपत्रावतरत्स्वहृद्यमहाजनपरिवेष्टिता सती परितो गैरिकाद्यनेकधातुरसविरचितविविधचित्रचित्रितेडूकं विधिपत्रपत्रावदातप्रच्छदांबरातिपरिणाहनवनवातिमृदुलतूलशय्यास्तरणमूर्ध्वतोल्लसद्वितानदेशे पंक्तिशः संग्रथितहरितलोहितपिंगटधवलस्फटिकभाजननिवासद्विगुणितानेकविधप्रकाशदीपावलीविराजमानं सदः संप्रविशंती तत्र तत्र पंक्तिशः संस्थापितमहारजतरजतरसचित्रितविष्टरावलीमंडितहरिविष्टरमारोहति । तदनुयायिमहाजनाश्च महाराज्ञ्यै मणिकंकणहीरकंकणतत्तत्कृतोच्चारणसमावेदितस्वागमं यथा तथा यथोचितं तत्तद्विष्टैरान्परिष्कुर्वंति । तत्तद्विविधजनपदेशा अपि महाराज्ञ्यग्रसंस्थापितोपायनैनेकविधतत्तत्फलपुष्परत्नभाजनाः संतो यथाविधि प्रणताः सबहुमानं तदादिष्टस्वस्वोचितप्रदीपान्भूषयंति । तदनुयायिनश्च सुरभिस्नेहनीरनानाविधप्रसूनमालातांबूलादिकं महाराज्ञ्यै निवेदयंति तत्तन्महाजनेभ्यश्च । महाराज्ञी तत्तन्नृपान्प्रति कुशलोदंतं तत्तज्जानपदनैककथाश्च यथोचितं परिपृच्छति । तत्तन्नृपाश्च सानंदविनयं तदनुगुणमेव प्रत्युत्तरं दास्यंति । मणिकंकणहीरकंकणौ तु सकलसपत्नसामंतसीमंतिनीसीमंतघातिन्याः महाराज्ञ्याः प्रतापप्रशस्तिकाः समाघोषयतः ।

मणि०—सखे हीरकंकणैतन्महाराज्ञीविजयकथानुरंजितस्वांताः परमनुवर्णयंति महाराज्ञीमेतत्कंपिनीं च निजोत्कर्षप्रकर्षव्यंजकप्रत्येकवर्णघटिताभिधेया बहुलब्धवर्णाः । यथा खलु ।

---

१ समूह । २ गाल । ३ महाळुंग । ४ बुका । ५ कस्तूरी । ६ पात्र । ७ आसन । ८ देश । ९ स्पष्ट करणारे ।

त्वत्कीर्तिक्षीरपूर्णे क्षितिबलिसदनादित्यसद्मन्यमोघं
मंथानं चित्रवार्तासुगुणगणवृतं कंपिनी त्वत्प्रतापम् ॥
कृत्वा मथ्नासहान्यैरलमलमसावाप हैय्यंगवीनं
मन्ये यत्र प्रवृत्तो भगण भप इति प्राकृतानां प्रवादः ॥ १८ ॥

परं च ।

बहुधान्यं कंपयंती महाराज्ञीसमीरणैः ॥
पिनष्टि नीरसं कृत्वा कंपिनीति किमद्भुतम् ॥ १९ ॥

हीर०—वयस्य मणिकंकण । काणादपाणिनीयाद्यनेकशास्त्रेषु सत्स्वपि सद्यः स्वांतसंतोषहेतुत्वेन साहित्यशास्त्रमेव वरिष्ठमिति तर्कयामि । यतोहं पूर्वं पूर्णपुरे गुरुचरणचरणनिषेवणसमाकलितांतर्लापबाहिर्लापादिसकलतत्तत्कलाकलापकलानिधिप्राज्ञजनवदनसाहजिकविनिःसृतकतिचित्तच्चमत्कारभरसंश्रुतिक्षणसमासादितातिस्वांतसौहित्यः । अतएव खलु संगिरंते ।

व्यासतु सतु गौतुमतु व्यालेंद्रतु यो न वेत्ति साहित्यम् ॥
तं प्रति संप्रति कंपं शिरो मदीयं पुरश्च न तिरश्च ॥ १ ॥

इत्यभिज्ञाः । भवतु यत्र किल । स्वीययशःप्रसरार्जुनितभुवनत्वान्वर्थितनिजनामगौरनरादितत्तन्महाजनत्वविनिर्जितजैवातृकागणिततारकागणविराजितयामिनीकमहाराज्ञीसमादिष्टस्तदिंगितज्ञो बहुज्ञोऽसौ क्याप्तन्क्यांडीसाहेबनामा धीमान्काणादपाणिनीयाद्यनेकशास्त्रशालायुग्विश्रामवाङ्निवेशनियंतृत्वेन स्ववृत्तिवाग्विश्रामधामत्वमेव व्यनक्तीव प्रतिभाति ।

यः किल ।

सरस्वतीसंग्रहतो विभाति स्वराजधान्यामविरोधमेव ॥
वाणीश्रियोः सूचयतीव सूरीन् संतोष्य सद्वस्त्रवसुप्रदानैः ॥ २० ॥

किं च ।

अंगीकृत्य वदान्यतां च वदतां सन्निष्कविश्राणन-
व्याजाद्वीजततिं हि नैजयशसां वृद्धीच्छया यच्छता ॥
गंभीराशयसूरिसुस्थलगणे सानंदसद्वाग्युजा
दृष्टांतत्वमगाम्यलंकृतिविशेषस्याधुनैतेन हि ॥ २१ ॥

मणि०—सखे साधु साधु तत्साहित्यकलाकलापमवगंतुमुत्कंठते मे मानसमतोनुवर्णनीयश्चेदनुवर्ण्यतामीषत् ।

हीर०—सानंदस्मितम् । अये श्रूयताम् । कथयामि ते सहृदयाय तच्चमत्कारलेशान् । यथा किल ।

---

१ वायु । २ उत्सव । ३ द्रव्य । ४ दानशौंडत्व ।

तिले चार्वीहितांगे किं सारं संबोधनं हरेः ॥
स्नाहाः स्मृत्वा हरिं किं स्यात्तिकं चर्मेन शुध्यति ॥ २२ ॥
नाकं जानाति परं साकं नेच्छत्परं सुतरुणीति ॥
लोकः कंकणवंतं वदतीत्यस्योत्तरं प्रश्नः ॥ २३ ॥

परं च ।

रतौ नवोढा कथमाह कं सास्वनिन्छती का चपला रतानि ॥
चैलाददानं च किमाह सस्मितं वदस्व शब्देन किमाह नारम् ॥२४ ॥

एतदुत्तरं तु । नरपतिमिति । तत्प्रभेदाश्च । न । रतिं । पतिं । नतिं । नारं-प्रति तु । न । रपतिं । नरपतिं । इति त्रीण्युत्तराणि । अन्यच्च ।

ना॰ र्णेलसद्गात्रमात्राः के ब्रूहि सत्तमाः ॥
पापिनो त्युत्तरं यस्य प्रश्नस्यास्य तदुत्तरम् ॥ २५ ॥

केकिन इति प्रश्नः । किंच ।

संतापं नो जनयति सूरः को ब्रूहि सत्तम ॥
साधुरस्त्युत्तरं यस्यात्रानुयोगः स चोत्तरम् २६ ॥

कोमल इत्यनुयोगः । शृणु सखे कथयामि ते परं चमत्कारम् ।

नानेवारींदुवन्हीकगजनगनयुक्फेप्रवारिंह्युमार्चे
भूवन्हिखाभिवप्रेलविधुगुणकमेखाग्निजीनोज्ज्वलायि ॥
अब्जाग्निः सोमवन्हिर्दहति जगदगेष्टोद्य सपटांबरः खा-
ग्निर्भूवन्हिस्त्वगाटंबरखगुणतवांबरकुवन्हिर्दिशंबार् ॥ २७ ॥

मणि०—सखे । परमास्माकीनजनसंकेतितद्वादशमासनामानि तत्तद्ःसंख्याश्च छायया संकेततश्च निरूप्यापि वारसुंदरीचित्तइव बहुरसिकवेद्योस्मिन् पद्ये केवलमुमा-कांतोनुप्रार्थ्यते सरसतयेति कोयं विस्मयः ।

हीर०—सखे साधु साधु । त्वयाद्य सुंदरीपदेन सम्यगनुबोधितोस्मीदमेकमवश्यं रहस्यं तुभ्यमावेदनीयं मनसि मे चिरमवस्थितं सपदि प्रसंगतस्तन्निरूपये श्रूयताम् ।

मणि०—किं तत् ।

हीर०—मत्तातो मम तातेति मम तातेतिमुत्तता ॥
तनुते तनुते प्रेमा तनुतां तातेतिस्ततः ॥ २८ ॥

अतः किमेवमुपेक्षसे त्वमीदृशं जनम् ।

मणि०—सवैलक्ष्यस्मितम् । सखे प्राज्ञमहाराड्यभ्यर्णचमत्कारावलोकनकुतूहलवि-स्मृतोपि सोनुस्मारितस्त्वयातोत्यल्पकाल एव तत्समुचितमाचरामि ।

हीर०—अन्यश्च श्रूयताम् ।

१ कौतुकम् ।

तातं तंतु ततंततततातांततताैतुततततत ॥
तेततततोतातितोतुंतेततततततोतितेतूत ॥ २९ ॥

मणि०—सस्मितं सखे किमर्थमियच्चापल्यं यथोचितमेवाचरामः ।

हीर०—वयस्य सर्वसमयसारमेतत्ते समर्थये ।

समाकर्णय ।

वारिजातं परंवारिजातं परंवानरो वानरो वानवा वानवा ॥
वासवो वासवोल्लालितो लालितो येनसो एनसोरंनुतोरंन्हुतः ॥ ३० ॥

मणि०—सहर्षस्मितं तर्जनीमुदंचयन् । साधु सखे साधु सम्यङ्निरूपितं त्वयैतत्तत्त-मिति हीरकंकणं श्लाघयन्विविधधातुरसचित्रितवलयाकृतिविरचितद्वात्रिंशत्कोष्टकस्य-तत्समसंख्याकवर्णश्रेणीविराजमानां पत्रिकां तत्करेर्पयन् । वयस्य हीरकंकण पूर्वपूर्ववर्णा-वसानशीलोत्तरोत्तरादिमैर्द्वात्रिंशत्पद्यपर्यवसायिभिरेवं वैपरीत्येप्यंत्योपांत्यवर्णादिमपूर्वपूर्व-वर्णावसायिभिरेकीकृत्य चतुःषष्ठीपद्यबोधकैर्गुरुवर्णैर्मनोहरा कंकणबंधाख्यास्मद्गुरूणां कृतिरेषा गुरुप्रसादलब्धा विलोक्यताम् ।

हीरकं०—करे पत्रिकामादाय वाचयति ।

मेमांकंतोकंदेहीदेत्वानत्वातेहंतेमामे ॥
त्वं पाहीमंहीपाहीशांकेलाबालामाराधारा ॥ ३१ ॥

ध्यानं नाटयन् ।

राधारामालाबालाकेशांहीपाहीमंहीपात्वं ॥
मेमांतेहंतेत्वानत्वादेहीदेकंतोकंमामे ॥ ३२ ॥

हीर०—सानंदं । अये मणिकंकण क्रमव्युत्क्रमाभ्यां पठणेपि नियमतो विद्यु-न्मालावृत्तसमानार्थप्रतिपादकपद्यपर्यवसानैर्वलयाकृतिविरचितद्वात्रिंशत्कोष्टकप्रत्येकसंवस-द्गुरुवर्णैः कंकणबंधद्योतकैर्निरुपाधिकसोपाधिकहर्षामर्षयोरपि राजकार्यप्रातिकूलवृ-त्तिभिः प्रत्येकं विद्युदावद्योतार्द्रैर्मिथः सजातीयसर्तकैर्निरस्तवितर्कैर्भूवलयनानाजनपदसं-स्थानैः कंपिनीहृदयंगमगौरनरमहीश्वरादिमहार्जनैर्यतः सिंधुनिबंधवसुंधराचक्रवालमा-क्रांतं तदेषा तदापन्नमहामात्यभावा महाराज्ञी निरातंकमानसेति नः सूचयतीव भाती-दमद्य मे पद्यम् ।

मणि०—अयि कुशाग्रबुद्धे । सम्यगाकलितं भवता मे प्रियवयस्येन । यः किल निगूढतरमप्येनमर्थमसंशयं स्फुटीचकार एवमतेन्न संदेह इति परं वदति । अथ सर्वे महाजनास्तत्पत्रिकां दिदृक्षंति ।

हीर०—यथोचितममात्यकरेर्पयाति । ततश्च क्रमेण सर्वे सानंदपुलकोद्भेदं कंक-णबंधमवलोकयंति । तत्र क्रमे तु ।

---

१ मित्र । २ कोप । ३ पृथ्वीमंडल । ४ रोमांच ।

मेमांकंतोकंदेहीदेत्वानत्वातेहंतेमांमे ॥
त्वंपाहीमंहीपाहीशांकेलाबालामाराधारा ॥ १ ॥
मांकंतोकंदेहीदेत्वानत्वातेहंतेमांमेत्वं ॥
पाहीमंहीपाहीशांकेलाबालामाराराधारामे ॥ २ ॥
कंतोकंदेहीदेत्वानत्वातेहंतेमांमेत्वंपा ॥
हीमंहीपाहीशांकेलाबालामाराधारामेमां ॥ ३ ॥

एवमेव क्रमेणैकैकादिमवर्णत्यागपूर्वकमंतेच तत्तद्वर्णसंग्रहपूर्वकं द्वात्रिंशच्छ्लोकाः स्वयमूह्याः ॥

व्युत्क्रमे तु ।

राधारामालाबालाकेशांहीपाहीमंहीपात्वं ॥
मेमांतेहंतेत्वानत्वादेहीदेकंतोकंमांमेराधा ॥ ३ ॥

एवं क्रमेण वर्णसंग्रहो पूर्ववद्द्वात्रिंशच्छ्लोकाश्च स्वयमूह्याः ।

माणि०—अये प्रियवयस्य हीरकंकण किं कथयाम्यस्या महाराज्ञ्याः शक्तिमनीदृशीम् । यस्याः सपत्नरत्नगर्भेशा यत्नविजयकथाः कृत्स्नशः[1] स्मृतिमात्रेणाद्यापि समुदंचयंति मे पुलकान् । या किलातिकुशलयंत्रसाद्यातियत्ननिवारितानल्पदुष्कृतिबहुविधसौवर्णाद्याभरणालंकृतातितुंदिलशुंडालसैंधवक्रमेलककरभादिबहुविधसमुदयप्रातिभटहत्कपाटपाटनातिपटुबहुप्रकटविकटभटपटलसंकीर्णा क्वचिदन्योन्यदक्षिणादक्षिणातिरागविजितारुणतरुणपल्लवकरद्वंद्वसंगृहीता दक्षिणकरार्धोरकनिर्बंधचातुरीप्रभुभर्चूचुक[2]कुचयुग्मपार्ष्णिकच्छदेशोच्छ्रासितहरितातिसूक्ष्मक्षौमनीवीभरांतिमपट्टांचलभरोपांत्यभागसत्तुलाकोटिमंजीरिका[3]दिविविधचरणाभरणमंडितान्योन्यसमुखरणचरणद्वंद्वसुविहितचक्रचंक्रमणाशिक्षणक्षणसंधृतस्मारकशाप्रस्फुरत्स्वलंकारसामंतसंभ्रमद्वेणीभरतादृग्विलासविविधमाणिमुक्ताहारगणलुंठनांगणदरव्यक्तकठिणकुचभरनितामलमृणाल[4]सुभूषणबाहुवल्लरीमणिबंधद्वंद्वरणद्विविधकांचनकंकणगणात्याभिनवसूक्ष्मक्षौमतंतुजालप्रसृत्वच्छविसक्थियबृहन्नितंबाबिंबादिविलोकनोत्सुकोल्लसत्पट्टांचलोष्णीषतनुतरविविधोत्तरीयसद्रत्नहाटककटककंठकर्णाभरणांगुलीयकाभिनवप्रसूनमालातांबूलादिविविधपरिष्कारपौरविलासिजनविराजमाना क्वचिच्च नवविद्वज्जनोट्टंकितप्रबंधपरिष्कारपूर्वपक्षपरिहारप्रसंगाहमहमिकासंप्रवृत्ततत्तन्नव्यविवादविमर्शनतत्परतत्तत्कथासमंजसत्वासमंजसत्वस्वशीर्षोदरानादरदरकंपननिर्धूननपूरणातिप्रवीणभूरिमहामहमहासूरिसंमतविषयवाङ्मुखातिनिपुणतत्तन्नव्यमधुरतरवाग्विलासश्रुतिक्षणप्रमोदमानमानसमहाजनैर्महामणिगर्भमौक्तिकसरमहापट्टांचलोष्णीषमहाचैलसुगंधिविविधतृणशून्यमालासुरभिजलतैलतांबूलबहुदक्षिणादिसत्कृततच्छरणानिच्छवृंदारकवृंदाविशेषविद्वद्वृंदविराजमानां स-

1 समग्र । २ कुचाग्र । ३ तोरड्या । ४ कमलतंतु ।

दसत्सौगुण्यवगुण्यौगण्यार्थिगणांतःकरणाक्षुण्णक्षुण्णद्रविणगणयथोचितवितरणैकस - न्निसर्गपेश्वपदसंस्थितश्रीमन्महाराजचरणराजितां पुण्यराजधानीमपि स्वस्वामिनीमिव चकार । यत्र किल ।

पूर्वं सवैमाधवराजनामा रसां जुगोपातिरसः प्रजासु ॥
यशः पराभूतनिशाधिनाथं शशंस यं सेशमलं महाजनः ॥ ३३ ॥

यं किल सुगुणगणमालिनं किरणमालिनमिवामनंति विद्वन्महाजनरिपुजनसमाजाः ।

हीर०—अये प्रियमित्र मणिकंकण किं तर्हि हरिदंतरालविस्तारितनिजयशः-प्रसरः सवैमाधवराजनामा गुणगंभीर एव । किमेतद्वसुंधराधीश्वरत्वं दैवयोगेनेत्यर्धोक्तौ।

मणि०—कराभ्यां कर्णौ पिधाय । शिवशिवायमश्राव्यएव प्राणाति तद्यशःसुधाकरे खल्वयमश्लीलवादः ॥

हीर०—तर्हि कथम् ।

मणि०—किंतु नानाजनपदसमागतविविधविद्वज्जनविद्यावैशद्यप्रतिपत्तिपूर्वतत्त-त्सत्कारतत्परोप्यर्थिचित्तागोचरद्रविणगणवितरणशीलो ह्यनल्पविलासिनीजनविविधविला-सविलोकनातिलोलेक्षणः कालबलपराभूतभागधेयोयं श्रीमान्बाजिराजनामा रघुनाथ-तनूज इत्यर्धोक्तौ ।

हीर०—परस्ताद्रम्यत एव । अये सुगुणराजीविराजीविराजितश्रीमच्छिवाजी-महाराजदयामृतालवालकुलतिलकेन स्वकुलकलानिधिकलंकायमानसौदृशं कथमकारि रौद्रं कर्मेति निकामं विस्मितं मे हृदयम् ।

मणि०—सखे कर्मसाक्षिसाक्षिपइषादीपालोकासादनशीलस्य दशामापन्नोस्याः स्वप्रतापमार्तंडखंडितारातितिमिरमंडलाया महाराज्ञ्याः सभ्याय सकलप्रजापालनागण्य-पुण्यपरंपरैवात्र निदानमिति कथं न जानाति भवान् ।

हीर०—अये प्रियवयस्य तद्वेस्या महाराज्ञ्यास्तद्राजधान्याक्रमक्रमं सोपस्करं श्रो-तुमुत्सुकति मे मानसमतोयं मज्जनस्तछ्रोतु यद्यर्हति तर्हि निरूप्यताम् ।

मणि०—वयस्य मच्चित्तांतरंगस्य भवतोप्यनिवेदनीयं किं नामातः समाकर्णय । कथयामि ते यथाश्रुतं तत्सर्वं समासतः । तथाहि ।

स्वर्गं सवैमाधवराजनाम्नि तदासनं प्रापदयं कथंचन ॥
तस्यो महैश्वर्यविराजमानश्चकार धर्मान्विपुलानपूर्वान् ॥ ३४ ॥

अथ तदानीं कस्मिंश्चिद्वीराधिनाये सिंधूपाव्हयदौलत्तराण्णाम्नि दौराज्ञोस्य राजा-सनप्राप्तिप्रत्यूहप्रतीकारिणं स्वं प्रति पूर्वप्रतिश्रुतवितरणशक्ति तदात्वप्रतारितामवेत्य पूर्णपुरस्थतत्तन्महाजनेभ्यो बलादेव तदादाय तत्र किंचित्स्वसैन्यमेतदवनाय संविधाय

---

१ पृथ्वी । २ अनुरक्तः । ३ सूर्य । ४ पृथ्वी । ५ कमल ।

स्वराज्यरक्षणार्थं स्वदेशं गतवति तत्रांतरे बहुसैन्यभाक्कश्चिदपरस्तत्सोपाह्वयः किल यशस्विराट् नाम महावीरः पूर्णपुरमागत्यैतदुभयसैन्यमप्यात्मपराभूतमेव चकार। ततस्ततोसाववतितूर्णगतो राजा वासवीयपुरमागत्यात्मनो त्वात्मराज्यप्रापणे महाराज्ञीमहाजनेन केनचिदाचरितं निजांतिकमेव सुसहस्त्रसादिरूपं समयबंधमुररीकुर्वंस्तेन प्रापितराज्यः परं निरांतकमेवाविवसत्।

हीर०—नृपस्य तथात्वे महाराज्ञीजनस्य तेन संग्रामसाधनं किमासीत्।

मणि०—शृणु वचनं मे समग्रम्। तत्र समयबंधे निजशक्तिं विकलामवेत्य राजासौ महाराज्ञीप्रतेनाप्रतारणार्थमीषत्सैन्यसंग्रहोपक्रमं चक्रे। ततश्च राज्ञीजनस्तदेतन्निश्चित्य प्रजापालनवृत्तिं चात्यव्यवस्थितामवगम्य तेन सह समयबंधांतरमकरोत्। तत्र चातीव विकलामात्मशक्तिमाकलय्यासौ तदसहमानः किंचिदकार्यमकरोत्।

हीर०—किं तदकार्यमकार्यमुना।

मणि०—कर्णे। एवमेतत्। ततश्चैतदेवैतज्जन्यजनकमासीत्। तत्रैतद्भावसंभावनापूर्वकनिजजनप्रेषितपत्रिकावगतैतदखिलार्थप्रजाध्युन्मूलनबद्धपरिकरमहाराज्ञीमहाजनप्रेरितचमूपाः स्वसंदर्शनमात्ररिपुजनमनोभयंकरस्वरूपाः संरचितव्यूहाः संतः पूर्णपुराभ्यर्णमाश्रयामासुः।

हीर०—ततस्ततः।

मणि०—सखे ततः स राजा।

बहुघनसेनानीजनमंत्रपरायत्तमानसो मानी।
मत्वा मृधं परैर्वैरमनुमेने मानिजन्यजनान्॥ ३५॥

ततश्च तदादिष्टतच्चमूपतयः सन्नद्धस्तंबेरमतुरंगमचक्रगपद्गात्मकचतुरंगचमूश्रेष्ठाः संतो महाराज्ञीनासीरसंमुखाः समभवन्। ततश्चान्योन्यं संप्रवृत्ते प्रधने।

कंपिनीघनधनंजयपंत्रध्वानसंश्रुतिगलद्गुरुधैर्यः॥
स्वाज्ञयोपगतसच्चमूपतीन्मामवध्वामिति भूर्यभीवदत्॥ ३६॥

किं च।

प्रकामं दुःकर्णेजपजनसुरत्याहतधियो
नरश्रेष्ठत्यक्तः खलजनसुसक्तो मम करः॥
रणप्रौढाः कार्यं कथमहह चेतः परमहो
रणोत्कर्षज्ञाः प्राप तदुरुभटैः संख्यसमयः॥ ३७॥

इत्येतदाकर्ण्य सुषिरकरीर इव नीरस्थैर्यकामाः स्वधीरतद्धैर्यच्छवः प्रोचुः।

मारद्युतनयैर्ग्लानिं मनसः शतशः सहस्रशो वापि॥
भित्त्वारियोधपटलं दष्टतृणं ते प्रदर्शये मा भैः॥ ३८॥

---

१ नाम। २ सेना। ३ सेनाधिपति। ४ सेना। ५ गज।

अपि च ।

आ राघवैर्नितांतं लाघवमयि संचिताग्र्यधैर्यभरः ॥
उररीकुरु कृतजन्यः साम्राज्यं वासुरेंद्रराज्यं वा ॥ ३९ ॥

अथवा किं बहुना ।

टणत्पटहनिस्वनं विशति घोरमायोधनं
नमत्ययि गुरूंस्त्वयि प्रणययोधने कः परः ॥
लसंति रणमंडले प्रखरसादिनः प्रोज्वला
रयाः प्रकटुपत्तयो मदकलाः प्रभो त्वत्पुरः ॥ ४० ॥

ततश्च तदारोपितैर्षद्धैर्यधरो राजा नैजयानानयनाय निदेशकारिणः संदिदे-
श । इतश्च प्राह ।

द्वंद्वे गोस्वामिन इव दुर्मददुर्धरसुधैर्यसारान्भो ॥
वदतेति योधयध्वमस्मद्योधान्मिलित्य सुभटैस्तैः ॥ ४१ ॥

तत्र तदानीं कश्चित् ।

सूर्ध्वग्रीववरोर्ध्वकर्णगगनप्रोत्क्षिप्तपादो महा-
नूर्ध्वं लोकमधोयवा चिरतरं संविश्य संजीवितुम् ॥
प्रोष्यावः प्रतिदातुमस्मि सुमुखः संयाप्यतां कुत्र वो
नर्मेत्यत्र विकल्प्य पृच्छति हयः पद्भ्यां परान्मे वरः ॥ ४२ ॥

राजा तत्रांतरे निजनिदेशकरानीतयानमीक्षमाणो यथोचितवेषाभरणः पुनः पुनः संवंदितदेवभूदेवचरणः सन्समारूढयानो रणांगणसरणिमनुससार । तत्र चारादेवा-न्योन्यं स्वपरसंप्रवृत्तं तुमुलमीक्षयामास । अथ तदानीं कश्चिन्महावीरस्तन्महाराजाभ्यर्ण-बहुकर्णेजपं तद्वद्वनुक्रोशभाजनं कंचन महाजनं प्रत्यतिरोषकषायितेक्षणः सन्नये मुनिवृत्तिविख्यातपूर्वभूसुपर्ववेषविडंबितवीरभाव शृणु ।

आकारतौल्यलभ्यं न भवति गुणगौरवं परेषां नुः ॥
गुरुवर्तुलकनकाभमाम्रसमं त्विद्र्वारुणि स्यात्किम् ॥ ४३ ॥

अतः सैप्ततंतुपशुपंक्तिरिव नेयं कंपिनी त्वदायत्तातः समाहितस्वांतोस्मादपसर नो चेत्प्रतिपर्वसंछिन्नाशेषसंहननो त्वत्रैव शेषे शरीरशेष इति । अथ सोपि ।

इति तद्वाग्वज्राहतिकलुषितनयनस्तमाह सोत्तरे ॥
पश्येदमिति भणन्वल्हसिना विद्वान्विवेश परसेनाम् ॥ ४४ ॥

तदानीम् ।

टणत्कारो घोरः समभवदरीणां कलकलः
पैदातीनां यूथं विघटयति विप्रे बहुतरः ॥

---

१ युद्ध । २ वाद्य । ३ समर । ४ सूचक । ५ दया । ६ मद्य । ७ यज्ञ । ८ पायदळ ।

रसास्वप्नं राज्ञीभटपटलगः कश्चन पटु-
निरुंधन्दीर्घां संगमयदयि निद्रां क्षणवशात् ॥ ४५ ॥

ततश्च राजा ।

श्रुत्वा साधनविरहान्निजवीरान् परपराभवान्भूयः ॥
अर्यभियंत्रगुरुतरनादगलद्धैर्यहृद्रणाद्विमुखः ॥ ४६ ॥
प्रजवत्वरमाणगतिं वीक्ष्यैवं तत्र केचिन्महाजनाः ॥
प्रोचुर्मैवं विधेयमिति भूयः ॥
राजन्विवेचयामो ह्यत्रैव विवेकमद्य धैर्यधराः ॥ ४७ ॥

इति तद्विविधवचांसि परमाधिव्याध्युपहतप्रतप्तस्वस्वांतजीवातूनप्यन्यथा मन्वानं मन्वानास्तत्र केचन शरण्यशरणैतन्महाराज्ञ्यभ्यर्णमेवाश्रयामासुः । ततश्च तं राजानं तातभूतमालोक्य महाराज्ञीमहाजनः काश्चित्तत्पृष्ठतः किंचिन्निजध्वजिनीं नातिदूर एव प्रायोजयत् । इतश्च कश्चिन्महावीरः निजनाथं रघुनाथतनूजं सेनेशमीदृशामाकलय्यात्मनेत्थं नाचरणीयम् । किमेतेनेदृशजुगुप्सितजीवितेनेति निश्चित्य ससैन्यमात्मानमरिसैन्यसंमुखं चकार । तथा प्रत्यर्थिसेनेशं प्रति निदेशविशेषं च प्राहिणोत् । तस्मिंश्चाभ्युपगतस्वसंदेशे श्वोभूते स्वस्वांतसंभृतात्यमर्षाग्निप्रस्फुलिंगो[4] द्विरणेनेवात्यरुणाक्षः शत्रुसंघसंघातकालीननिजदशनभियेव प्रकोपप्रकंपमानाधरः महामर्षफूत्कारकृन्मुक्तकंचुकाहिवद्विराजमानसंत्यक्तकंचुकप्रचंडदोर्दंडः द्रष्टृजनदृष्टिप्रकंपयितृमुष्टिधृततृष्टिः परिपंथिनः शपंतमिव शफाभ्यां भुवं संघातयंतं गंधर्वराजमाधिरूढः स्वांगलग्नतदालोचितवेषाभरणः ससेनः समरांगणं प्रति प्रतस्थे । ततश्चाहितस्वांतप्रकामकंपनस्वरूपकंपिनीध्वजिनीनिरीक्षणक्षणांतःकरणसंभृतसाध्वसाः सैनिकास्तदनुगा अपि परपराङ्मुखाः संतो निजकांताररतिरणांगण एव विक्रमं विशेदीचक्रुः । अथ कतिचित्सादिशेषोप्यनाकुलः स संगरसागरं समाविशत् ।

ततः स वीरः प्रतिवीरकंटान्बहूंश्च भिदन्मुहुराहतांस्तान् ॥
अहो भटा ब्रूत भटाग्रगण्यो वः क्वास्ति शास्तः खरकंपिनीयः ॥ ४८ ॥

हीर०—सोद्वेगम् । ततस्ततः ।

मणि०—सखे तादृक् कृपाणपाणितन्निरीक्षणक्षणप्रक्षीणात्मप्रहारद्वापरतत्परतारणातिविचक्षणैतन्महाजनोद्वीक्षणसूचितेंगितद्वराज्ञीजनास्त्रप्रापितातिवैकल्ये तस्मिन्नंदनानंदमनुवंदत्याकर्णितैतदुदंतः ससामंतः समीरण इवातीव त्वरमाणोपि महाराज्ञ्यायत्त एव सुरसरित्तीरगः कतिपयकालेनानिर्वचनीयां गतिमवजगाह इति तु कर्णाकर्णिकया समाकर्ण्यते । इतश्चाद्यापि ।

---

१ जवळ । २ निंदित । ३ कोप । ४ ठिणगी । ५ स्पष्ट केलें । ६ समरांगण । ७ तलवार ।

पूर्णे पुरि राज्ञीप्रियघनजनसंस्थापितो जयस्तंभः ॥
स्वाकृत्या भूवलयं राज्यायत्तं वदन्निवोज्ज्वलति ॥ ४९ ॥

किंच ।

सुगंधिसुसरोजसंकुलसरःकुलैकाकल-
तमोनिकरकालसद्भ्रमरिणीन्वरं सारभुक् ॥
महीवलयसत्सरोद्भवपुरेंद्रमित्रप्रिय-
प्रवृत्तिसुमरंदभाग् जयति मंजुराज्ञी सखे ॥ ५० ॥

किं बहुना श्रूयतां तत्त्वमिदम् ।

नाद्यापि प्रचकास्ति संमुखमहो यस्याश्चलच्चक्षुषो
यत्कोपि प्रतिवाहिनीमदगजश्रेणीसृणिर्नातुरः ॥
वर्योस्मिञ्जगतीतले तदधुना मन्ये यदन्योस्ति नै-
वाद्धा यद्यपि सोस्त्यहो जगति किं यत्संमुखो नापरः ॥ ५१ ॥

अतएवैतदाशास्महे ।

नानालंकृतिरागिणी सुकरुणा पद्मानना मीनह-
ग्या वै भूवलयं बिभर्ति सुशये श्रीमज्जनैर्वंदिता ॥
रम्यां सद्गुणसिंधुसज्जनमणिश्रेणीं सुबिभ्रन्मुदा
वीरा पद्मभोगाः प्रपालयतु वा माता सतस्तत्करः ॥ ५२ ॥

अये प्रियवयस्यैवं विविधसाधुजनानुपालनायासेन किमात्मनः फलमेतस्याः । परंतु ।

ग्रीष्मे ह्युष्णकराभितप्तधरणीसंवाससंतप्तस-
त्प्राणान्प्राणिगणान्निरीक्ष्य हि जगत्प्राणोपि धाराधरान् ॥
आकृष्यातिजवोसकृत्सदमृतं संवर्षयञ्जीवय-
त्यद्येतिघृणिनोऽनिमित्तसुहृदः संतीति संतो विदुः ॥ ५३ ॥

सभासदः । साधुसाध्विति समाकलितमहाराज्ञीप्रतापप्रकर्षाः संतस्तां प्रशंसंति परं मणिकंकणहीरकंकणीच श्लाघ्यंतस्ताभ्यां महार्घ्यवस्त्राभरणादिकं पूर्णपात्रं प्रयच्छंति ।

श्रीमत्कामशराघातभिन्नस्वांताश्लिषद्धरिम् ॥
प्रोदंचितकुचं पातु तन्वीवीकर्षकश्च माम् ॥ ५४ ॥

ततः प्रविशति स्मरसुंदरो मदनमंजुलीलश्च ।

स्मरसुंदरः—वयस्य मदनमंजुलील बहुतरचतुरंगसेनानुरुद्धः सौधप्रवेशपथोतः सोमशेखरसंदर्शनमिषेण स्वस्वचंद्रशालावातायनोपकंठाष्टापदसालभंजिकोल्लसदनल्पविलासिनीजनविविधविलासावलोकनेनात्मनो विनोदयावः ।

---

१ पंक्ति । २ स्वाधीन । ३ राजसदन ।

मदनमंजुलीलः—तथेति तत्सनाथः परिक्रम्य यथोक्तं वेशवाटीमनुप्रविशति । अग्रतो गत्वा विलोक्य स्मरसुंदरः । सखे कासौ स्वावयवविभूषितविविधवेषाभरणा वामेतरकरसरोजसंलालितार्णःपूर्णसौवर्णभाजना क्व गच्छति चेदानीमतः । इयं खलु ।

वसाना कौशेयं[1] कनककपिशं नूपुररण-
त्पदाग्राविद्धश्रीघनविपुलनीव्यंचलभरा ॥
विनिघ्नंती भूयस्तरुणहरिणाक्षीक्षणशरैः

किंबहुना ।

शिवव्यामोहार्थो कपटयुवतिं स्मारयति नः ॥ ५५ ॥

मदन०—वयस्यासौ सुगुणरत्नाकरनंदनस्य वाक्सुधाकरस्य कलत्रं सुमनोरंजिनीनामदेवसंदर्शनमिषेण निकामं कमनमनःकर्षणपरायणा सती स्मरगुरुमंदिरं प्रति प्रस्थिता । एह्यनया सह क्षणमात्रमत्र संल्लपाव इति तस्याः समीपमुपसृत्य ।

मदन०—अहो युक्तमेवेदं यौवनमदप्रकर्षप्रापितपारवश्यानां चंदिरास्यानां । यतोसौ सुमनोरंजिनी ।

स्वसंमुखमपि प्रियं जनमिमं न दृग्गोचरी-
करोति खलु दूरतः परिहृतं मिथो भाषणम् ॥
घनस्तननितंबसज्जघनभारवाहालसाऽ
भियात्यधरसुप्रभारुणितनस्यभूषामणिः[2] ॥ ५६ ॥

सुमनो०—ससंभ्रममुन्नम्रानना कथं मे प्रियमित्रमित्यर्द्धोक्तौ स्मरसुंदरमालोक्य नम्रानना सलज्जास्मितं तिष्ठति ।

मदन०—कटाक्षेण स्मरसुंदरमभिमृशन्सुंदरिमदविशेषोयं जनोस्मादतो न किंचिदपि शक्यम् ।

सुमनो०—समंदस्मितम् । अयि रसिकावतंस विशेषमदजनमीक्षतो लोकस्य मनसि न कथं पदमादधातु भयांकुरः ।

मदन०—सुदति मत्तो विशेषशून्यमिमं जनं जानाहीति गदतो[3] मम वचने कथमर्थांतरस्फूर्तिस्ते कुलांगनायाः ।

सुमनो०—सस्मितमलमलं क्व प्रस्थितौ भवंताविदानीं तथ्यं कथ्यताम् ।

स्मरसुं०—अयि मत्तकाशिनि हरिहरहिरण्यगर्भसंदर्शनार्थमात्रेयायतनं प्रति ।

मदन०—अयि सुनयने । तदर्थगमनाभ्यामस्यावाभ्यामत्रैवापरोक्षीकृतः सोस्मत्प्राक्तनतपःप्रभावेनेति जाने ।

स्मरसुंदर०—सुंदरि तथ्यमाह मे मित्रम् । श्रूयताम् ।

सुश्रीवत्सपयोधराभिनवसच्छायार्थपीतांबरा

---

१ रेशमी वस्त्र । २ भूषण । ३ बोलणारा ।

यत्पाणी लसतः सुदर्शनलसत्सच्छंखकौ भामिनि ॥
साल्वं मन्मथभूर्भुजंगशयना श्यामा बलिध्वंसिनी

सुमनो०–सस्मितसांगितेक्षणं स्मरसुंदरमीक्षते ।

स्मरसुंदर०–परंतु ।

त्वांतु स्वांतमभीप्सते विधुमुखि द्रष्टुं रमालिंगिताम् ॥ ५६ ॥
सुमनो०–अयि स्मरसुंदर यदि मयि ते नारा-
यणमतिस्तर्हि न कथं मयि तद्दशावताराः ॥

मदन०–सुदति सत्यमाह मे मित्रम् । श्रूयताम् ।

नेत्रे मत्स्यवरे सुकच्छपवरं वक्षः सुघोणिन्यये
प्रल्हादारिविनाशिनी तव कुचौ खर्वौ मनो भार्गवम् ॥
त्वं रामा कुचचूचुकान्यतितरां कृष्णा विबुद्धा रतौ
कल्की चोष्ठ इतीयमब्धितनया सर्वांगलभ्याभवत् ॥ ५७ ॥

स्मरसुंदर०–परं च श्रूयताम् ।

त्वं गंगावनभूषणांकितकचा सच्चंद्रमौलिर्गले
सद्रुद्राक्षामलमालिका तव पुनः सन्नागभूषास्फुटा ॥
श्रीकंठासि तथा महारजतभूभावासिनी सुंदरा-
सूक्ष्मसंकोचयुतालिका (परंतु) त्वदमृतावाप्तिं विना नो मुदः ॥ ५८ ॥

अन्यच्च ।

सुभ्रु त्वं चतुरागमादरयुता नागृहशाखासु वा-
ग्दाराहुंकृतिहेतिहंसगमना हेमोदरी लोकपा ॥
बिंबोष्ठी चतुराननोक्तिकलना चातुर्यभाग्भासि तु

सुमनो०—किं तव मयीदृशास्ते विस्रंभस्तर्हि प्रीयतां मत्तोवरः ।

स्मरसुं०—स्वांतं मे सुरताभिरम्यवदनां त्वां द्रष्टुमुत्कंठते ॥ ५९ ॥

सुमनो०—चैलप्रांतपटांचलेन कपोलतलपिधानपूर्वकसावहित्यास्मितमयि रसिकावतंस तर्हि मदपरोक्षैकपूर्णकामस्य तव निखिलपुरुषार्थप्रयोजकपरब्रह्मोपासननिदानसमाकलिताशेषसमयसारगुरुचरणनिषेवणासादनायासः केवलमकिंचित्कर एवेति मम तु प्रतिभाति । इत्युभौ कटाक्षैः परामृशति ।

मदन०—अयि सुनयने । कोत्र संदेहस्त्वत्तोन्यः को वाभिमतो महितो गुरुर्मे वयस्यस्य । यतः ।

व्याकरणपूर्णदृगये बहुरातिसत्तर्कविच्च वेदांतम् ॥
सदलंकाररसा त्वं मीमांससि सद्भुजंगशयनसुखम् ॥ ६० ॥

---

१ चंद्र । २ सुंदर दंत आहेत जीचे । ३ रक्त । ४ स्तीरव । ५ विश्वास ।

अतस्त्वयैव निजचरणकोकनदनिषेवणेन कृतार्थतां नेयोयं चिरविषयलोलुपो मे वयस्य इति परं त्वामभ्यर्थये समाकलितशिरोंजलिबंधः ॥

सुमनो०—सस्मितम् । स्मरसुंदरं प्रति । अयि सरसत्वदय कदा भवेत्ते पुनःसंदर्शनम् ।

स्मरसुं०—भवती यदा समादिशति ।

सुमनो०—समंदस्मितं बिंबाधरं गर्भकसरं च परामृशति ।

मदन०—सखे ते सखीयं किमप्यनुक्त्वैतावतैव विरमति जोषं किमेतत् ।

स्मरसुं०—वयस्य त्रिसंध्यमधुरबिंबाधरगर्भकसरसंस्पर्शेन त्रिसंध्यसमयमुपशल्यविशल्यफुल्लतृणशूल्यकुंजं च सांकेतिकं कालं स्थलं च सूचयतीयमतिचतुरेत्याकलय ।

स्मरसुं०—सानंदस्मितम् । सुदति सुमनोरंजिनि तत्त्वतस्त्वत्संदिष्टसंकेतमनुसरिष्यामि संप्रति गच्छाव इति कतिचित्पदानि गत्वा वामतोवलोक्य सहर्षम् ।

मदन०—वयस्य कासौ सुस्तनी सपद्येतत्प्रतिवेशिनी निवेशनिर्गतातीव त्वरमाणा तदुपकंठमहासौधमधिरोहति । या किलासुलभतुलाकोटिस्वर्णसरोजो[1]पकंठसंरणत्कलै[2]रवकलहंसकनिस्वै[3]नश्रुतिक्षणसमापतद्विलासिनयनेंदिंदिरसुंदरसंपाताभिरम्यपदकंजा स्वांगसंवीतातिविमलचैलतत्तंतुजालोल्लसद्रुचिरुचिरतत्तत्सुंदरोर्वाद्यवयवतच्चित्रचामी[4]करसूत्रसूत्रितांचलातिधवलपयःपूरतदंतरस्वर्णधरणीतलशातकुंभरंभास्तंभसद्रत्नराजीविराजितसत्कुला अनुक्षणोत्क्षिप्तमीनसन्मणिगणकांचीमध्यविराजमाना ईषत्क्वणं[5]द्विविधमुक्ताहारगणवेष्टितांबरसंवीतसद्वत्सजातस्वयंभुनीलकंठशंकरसन्निहिता सद्वाहुमृणालपाणिकोकनदसच्छंखकोर्मिकौ सुग्रीवसुंदरहनुमन्मुखानुरक्तविरागिजनकभूप्रीतिसंनिहिता मंजुलविलोचनपाठीनोल्लसद्रक्तरंगभ्रूनीलालकधम्मिल्लशैवालसंघसंभूषितैषा योषा सरसीव सरसीकरोति मे चेतः । भवत्वत्रैव बकुलमूलोपहितदेहौ क्षणमेकं स्थित्वैतत्सम्यगाकलयाव इत्युभौ तथा स्थित्वा । निपुणतरं निर्वर्ण्य ।

स्मरसुंदरः—जनांतिकम् । अये दीयतामितो दृष्टिः सोयमुपसर्पति निजजनसंकेतसमाहूतसातंकसरभसतन्निवेशनिःसरणः स्वस्वांतमंजुमंजूषासमुल्लसत्सुवर्णसरससालै[7]भंजिकासमवहितस्वांतोनुसृतनरेंद्रमार्गोपि विविधशंकाकलंकितचेतसासकृत्पुरः पश्चाच्च विलोकयमंतिकस्थमपि निजसहचरजनमनाकलयन्सपदि समासादितात्ममनोरथसारः प्रमोदमानमानसः स्मरलीलाशेखरः । प्रकाशम् । अये कोयं चोर इव परदारोपभोगपरः परिचरतीतस्ततो निर्बध्यतामेषः ।

मदन०—कोयं कोयमिति सर[9]भसमुपसृत्य कथं मे प्रियमित्रमित्युभौ सहासं तं समालिंगतः ।

---

१ समीप भाग । २ मधुर । ३ शब्द । ४ सुवर्ण । ५ शब्द करणारें । ६ आंगठी । ७ पुतळी । ८ आनंदित । ९ सवेगम् ।

स्मरली०–सानंदहासम् । दृढतरमुभावपि परिरंभ्य अहो कुतोपि निलीय निगूढतरमपि मे प्रवृत्तमखिलमाकलय्याप्यकांड एवेत्थं विसृत्वरशब्दौ कथं नु भवंतौ विशिष्यते चोराज्जारशिखामणी मे वयस्यौ ।

मदन०-सहासम् । सखे युक्तमेवेदं गुप्तचरितानामतो भवतु नाम केयं सद्यस्त्वद्भुक्तमुक्ता मिथ्योदरी तथ्यं कथ्यताम् ।

स्मरली०–समंदस्मितम् । सखे अस्ति खलु हिरण्यवर्धनो नाम महाधनिकस्तस्येयं नंदिनी । गुणगंभीरनंदनस्याखर्वेक्षणस्य कलत्रं मदनवैजयंती नाम ।

स्मरसुं०–सखे कथमासितैषा दोषाकरमुखी पतिवत्नी भवता ।

स्मरली०—वयस्यौ श्रूयतां कथयामि । पुराहमनवद्यातिवैशद्यगंधर्वविद्यासमासादनाय रत्नरंजितं नाम नगरमास्थितो ह्यात्मगुरुचरणचरणारविंदामंदसपर्यापर्यासादितात्ममनोरथस्तत्र तत्र सभा स्वात्मविद्यानुभवातिसादरावहितस्वांतरसिकावतंसमहाजनकृतमहार्हणपूर्णपात्रः पुरप्रसिद्धः समभवम् । ततश्चास्यास्तातो हिरण्यवर्धनोनतिचिरनिजसमराधनया निजजनकामनाप्रपूरणातिप्रवीणायाः कामारिकामिन्या भवान्या महोत्सवे स्वकुलपरंपरासंप्राप्ते संप्रवृत्त सभां प्रति सादरं पुरसंगततत्तद्विद्वज्जनमहाजनशैलूषवर्यान्वारसुंदर्यश्च यथोचितं समाव्हयत् । तत्राहमपि तदत्यादराहूतः समागतः । ततश्च तदाहूतमहामनीषिशैलूषवारांगना तत्तद्वाग्गानविलासाकलनासंमिलितरसिकजनसंकीर्णे सदसि स्वस्वकलाप्रख्यापनप्रवृत्तेषु तेषु तेषु तत्रांतरे चैतस्याः सोदरो मनोनंदनो बव्हर्थनाभिर्मामात्मगुणप्रकाशने संमुखीचकार ।

स्मर०—ततस्ततः ।

स्वर०—सखे किं कथयामि । तदानीं मत्संमुखादासीनोत्सवविलोकनोत्सुकबहुमंडनसुंदरीमंडले ।

यथा निशि निशाधिपो नभसि भाति भश्रेणिषु
यथा कमलमुज्ज्वलं सरसि सत्सु संवर्तिके ।
तथैव चललोचना दरहसन्मुखीयं बभौ
अथ तदानीमात्मसंमुखं मामालोक्य प्रतारितजनालोकं यथातथा समंदस्मितम् ॥
कटाक्षविशिखाद्हनन्मम मनः सुलक्ष्यं सखे ॥ ६१ ॥

अथाहमवगततत्तच्चित्ततत्वस्तद्वदनेंदुनिरीक्षणद्विगुणितप्रमोदभरो निःशेषं निजतत्तत्कलाकलापमनुक्षणमासेचनकैतन्मुखनिरीक्षणं यथा तथा सर्वश्राव्यमकरवम् । ततश्च यथोचितं तत्सत्कृतेषु तत्तत्सर्वजनेषु तन्मंदिरानिर्गच्छत्स्वपि मद्विद्याबहुरसोस्यास्तातो मय्यनल्पप्रीत्या मां सत्कृत्यात्मनोस्मत्साहचर्यमतीवाचकांक्षे । अथाहमपि तद्गुरुतरबव्हर्थनानिरसनाक्षमो ह्यात्मगुणवयोरूपसल्लापगौरवेण क्रमेणारतनंधयस्थविरतद्गृहजनप्रे-

---

१ आलिंग्य । २ बहुमान । ३ नाटकी लोक । ४ आनंदभर । ५ वृद्ध ।

मपूर्णपात्रः सबहुमानं तदुपकंठएव बहून्यहान्यवसम् । अथैकदा निःशलाकेमामालोक्यासौ सलज्जं शिरस्युपनीतसिचयांचला ।

दरस्मितमुखी सखे नतशिरोधरानर्घ्यस-
द्विशेषकविभूषिता हरितनूत्नकौशेयका ॥
समुन्नतकठोरसत्कुचयुगा रणत्पादयु-
ग्जघान हि पुनः पुनश्चपलदृक्परं दृक्शरैः ॥ ६२ ॥

तदानीमहमात्मगतम् ।

अये सुमुखि सत्कुचे विकचबंधुजीवाधरे
दरस्मितसमाहृतामलसुचित्तवित्ते तव ॥
न नेत्यपि निवारितोलिकुचसत्कुचौ पीडय से-
विकृष्य वसनं वरं त्वदधरं पिबेयं कदा ॥ ६३ ॥

ततः प्रकाशम् । तां श्यामां प्रत्यहमेवमवोचम् ।

मदन०—किमिति ।

स्मरली०—

पादौ पाणिसुनाभिसत्कुचसुदोर्ग्रीवाक्षिवक्त्राणि ते
यत्तन्मां व्यथयंत्यमूनि विषसंभूतानि युक्तं त्विदम् ॥

परंतु ।

बाले बालमरालमंजुलगमे मंजुस्मिताभाषिणि
सत्पीयूषनिधिः कुतो व्यथयति त्वद्बंधुजीवाधरः ॥ ६४ ॥

इतीदमाकर्ण्य सा समंदस्मितम् । अयि रसिकावतंस स्थाने खलु मच्चित्तापश्यतोहरे त्वयीदृशी बंधुजीवानुरक्तस्यापि मदधरस्य प्रवृत्तिरित्युक्त्वा नातिदूरे कुड्यतिरोहितगुरुजनमाशंकमाना मत्तकाशिनी पुनः संल्लापसंमुखं मां मौनमुद्रया मौनिनं तन्वाना गर्भागारमाविशत् । अथ कतिपयैर्दिवसैरेकदा मनोनंदनेन तज्जघन्यजेन सह मयि विविक्ताट्टवातायनोपकंठासीने तत्रांतरे सेयं सुस्तनी स्वहस्तन्यस्तसंछन्नैकगोस्तनी सस्मितमावयोः समीपमुपसृत्य मुष्टिं प्रकाश्यावां प्रत्यहो किमस्ति मत्करे तथ्यं कथ्यतामित्यवादीत् ।

मदन०—सस्मितम् । साधुसाध्विति स्मरलीलाशेखरस्य पृष्ठमास्फालयन् । भवतु सखे ततः ।

स्मर०—ततस्तां प्रति तत्सोदर एवेत्यं बभाण ।

स्मरसुं०—किमिति ।

स्मरली०—यत्समीहितं तदहम् । अयि मदनवैजयंति ।

---

१ कोरांटकीचें फूल । २ परस्परांशीं भाषण । ३ द्राक्ष ।

त्वद्धस्तसंस्थितं वस्तु वास्तवं निर्दिशेद्धि यः ॥
तस्मै किं दीयते नूनं पारितोषिकमुच्यताम् ॥ ६५ ॥

अथ दयिता ।

मत्पाणिसंस्थवस्तुनिर्देष्टुर्यत्समीहितं तदहं । दास्ये माद्यापरैरिह ।
(किंबहुनेति निजकुचविलसच्चारुचामीकरहारमभिनिर्दिश्य)
मालामपीह कंठगामेताम् ॥ ६६ ॥

स्मरली०—सखे । अथाहं समाकलिततत्तत्स्वांतसारोपि तन्निर्देष्टुं मनोनंदनानुमतः पूर्वं सत्सल्लापावसरदरविवृततत्करविवरसंदृष्टमृदुतरमृद्वीकः सुदति त्वन्मधुराधरसुधाधरितनिजमाधुरीकत्वतस्त्वत्करतलमुपाजगाम त्वामुपासितुं मृद्वीकेति मन्य इत्यवोचम् । ततश्चासौ समंदस्मितम् । कथमनेन कितवेनाहं वंचितास्मीति वदंती तां मृद्वीकामीषद्वेगेन मदुरःस्थले चिक्षेप तच्छेरणान्निर्जगाम च । अथ कतिपयैर्दिवसैरियं विधुमुखी विविक्तचंद्रशालासीनस्य मम समीपमुपसृत्य । समंदस्मितम् । अयि सरसहृदय स्मरलीलाशेखर । समीहसे सुंदर मत्प्रतिश्रुतं किं ब्रूहि मत्तः। इत्यवोचत् ।

अथाहं सुस्तनि मह्यं पारितोषिकदाने यदि ते निश्चयस्तर्हि
सरसीरुहाक्षि ।
परीक्षितुं कर्कशतां समीहे मत्संशयघ्नं त्वदुरोजयुग्मम् ॥ ६७ ॥

अथ दयिता । सस्मितम् ।
परांगनां कामकलानुभूत्यै त्वं कामयोने न कथं कलंकी ॥

अथाहं ।
न वेत्सि किं कामकलः कलंकी कलानिधिर्जात इति प्रवृत्तिम् ॥ ६८ ॥

ततः प्रियतमा ।
रूपाजीवाः शतशः संतीह तथापि मामेव ॥

किं कामयसे । अथाहं सस्मितम् ।
सुंदरि मोचयितुं त्वां वचःपाशात् ॥ ६९ ॥

पुनः सानंदस्मितम् । कांता ।
मत्पूरितं चेद्विषमं समीहितं तवेदमन्यश्रुतिगोचरं स्यात् ॥
ततो न किं स्यात्सविषं । अथाहमानंदाब्धिमग्नः सस्मितम् ।
सुमुखि नाहं प्राकृतोस्मि । यद्यत्र ते संदेहस्तर्हि । सुगात्रि
स्पृशामि ते लोमलताभुजंगीम् ॥ ७० ॥

इत्युदीर्य मयि तल्लोमलताभिमुख्यसंप्रसारितवामेतरकरसरोजे सति सैषेषत्स्वां-

---

१ संतोषानें दान देणें । २ धरापासून ।

गानि पश्चादपहृत्य सस्मितं नैवमित्यवोचत् । अथाहं तत्सल्लापकल्लोलिनीमाधुरी विधुरितविवेकः ।

महेशाक्ष्णा दग्धश्चरति हि रतीशो विगतभी-
र्गतः पैशाच्यं यस्तरुणतरुणीखेर्दनपरः ॥
तदाविष्टः पीड्य स्तनकमलकोशावपि बमा-
नतांग्या बिंबोष्ठं । इत्यंतं स्मरावः ।

मदन०—ततस्ततः ।

स्मरलीं०—रतिपतिरलं वेत्ति परतः ॥ ७१ ॥

अथ सा सुंदरी सप्रणयरसकोपांकुरमये किमेतत्तवासमंजसचेष्टितम् । येन किलाद्याप्यनाकलितस्वस्तिवाचनगर्भाधानसंस्कारसमारंभसंभारास्यहमद्यैव निकाममासं त्वयैव विकलीकृतेत्यवदत् । अथाहं फाणितप्रचुरसंकीर्णमिव कटुरोहिणीचूर्णमवगणयन्नेव तं तादृशं कोपांकुरमयि शातोदरि श्रूयताम् ।

वामावामसुपत्रयुक्कलशसद्वक्षोजयुग्मं मुदा
धृत्वाऽवामसु वामपाणियुगलेनोर्वीस्थजानुद्वयः ॥
आरब्धस्मरविभ्रमोतिरभसाद् दृष्ट्वाश्रुधाराद्वयं
कांते ते कुचतोऽस्मरं नवरतौ सत्स्वस्तिवाचोविधिम् ॥ ७२ ॥

शेषमशेषं तु त्वयानुभूतमेवातो मामिमं मा कोपपात्रतमीरिति सचुबुकचूचुकाभिमर्शपूर्वकं परिचुंब्य कपोलमूलमनुनयति मयि सा सलज्जस्मितं गृहजनागमनशंकाकलंकितेन मत्प्रणयरसपंकिलेन च स्वांतेन तत्र क्षणमात्रमवस्थाय ततोनुपदमसकृत्परिवर्त्य मां सुप्रणयमंथरमवलोकयंती कथमपि ततो निर्जगाम । तदाद्यद्यावधितया सारंगाक्ष्या[3] सहानुरूपावसर एव बहुविकस्वरस्मरसंगरसमारंभो वसेहं निःशंकः ।

स्मरसुं०—सानंदहासम् । साधु साध्विति स्मरलीलाशेखरस्य पृष्ठमास्फालयन्[4] । अये सदयाहमद्येत्यमेतदाकलये तत्त्वतः ।

मदन०—कथम् ।

स्मरसुं०—

अनुरूपयोजनाच्युतचित्तचमत्कृतिमरं विरिंचिमयम् ॥
मत्वा गलितपराधोव्रयसं कंतुर्यथोचितं चक्रे ॥ ७३ ॥

मदन०—तर्जनीमुदंचयन्सखे साधु सम्यङ् निरूपितं भवतेदमेव नात्र वितर्कः ।

स्मरलीं०—शृणु तावत्सवयसावात्मसंदर्शनेन निजजनेनोनिबर्हणकामपूरणातिप्र[5]...स्यानवरतानिजोत्संगविराजद्विविधाविखंडितत्वरितचंडिकाचंडद्युतेश्चंद्रचूडस्य च-

---

१ मदन । २ पीडा करण्याविषयीं तत्पर. ३ कृष्णसार मृगाप्रमाणें डोळे आहेत जीचे । ४ थोपटणें । ५ शंकर ।

रणकोकनदनिरीक्षणेनात्मैनस्तिमिराणि परिहरिष्यामस्तदनुकंपांकुरमासादयिष्यामश्चेति कतिचित्पदानि गत्वा ।

स्मरली०—वामतोवलोक्य सप्रमोदम् । अहो कथमुदित एव शीतकरः ।

युवमिथुनसुशंकरः प्रकामं विरहिजनस्य परं भयंकरश्च ॥

सुरेगुरुतरुणीमनोज्ञजारश्चतुरचकोरदयाकरश्चकास्ति ॥ ७४ ॥

स्मरसुं०—सखे निजकराक्रांताब्जिनीपुंखो मृगांको मम त्वियं प्रतिभाति ।

स्वयं दैवादस्तं गतवति निजामस्त्वशादयं

कुमित्रौ ज्ञात्वेत्थं द्विजपतिरसावात्रितनयः ॥

क्रुधा ताम्रस्तं तां सपदि च निरोद्धुं समुदितः

स चैतन्मत्वादावुदपतदहो सागरजले ॥ ७५ ॥

मदन०—वयस्य वयं पुनरुदयरागोनुक्रमप्रकाममंजुगौरः कुरंगतुरंगो मम तु पुनरन्यथैव प्रतिभाति ।

क्षीराब्ध्युद्भवसुंदरीयदुपयोर्नव्ये विवाहोत्सवे

धात्रा कौतुकिना ह्युदंचितत्तरो ज्योतिःशरावो मुदा ॥

क्षिप्तः पश्चिमसागरे क्रमवशेनोत्क्षिप्यतेहो पुन-

स्तं सर्वेपि विधुं वदंति विदुषां मोहः सतां दुर्जयः ॥ ७६ ॥

इत्थं जगदानंदकंदलसत्कलानिधिमनुवर्ण्य सर्वेपि निजजनशंकरशंकरायतनं प्रविश्य सानंदं मन्मथारिपदारविंदद्वंद्वमालोक्य साष्टांगं प्रणमंति ।

स्मरली०—अंजलिं बद्ध्वा ।

यः क्षीरार्णवमंथनोद्भवमहौरौद्रं प्रजोपद्रवं

त्वं पीत्वा बहुकालकूटमपि नो खिन्नः प्रजापोषकः ॥

स्वस्वामिन्वरनागभूषणविभो तारेशचूडामणे

स्वोत्संगाभरणक्षणद्युतिसदृक् चंडीश मां पालय ॥ ७७ ॥

स्मरसुं०—सांजलिबंधम् ।

यः सद्भूतिविभूपितार्जुनतनुर्यस्यास्ति मौलौ विधु-

र्यन्मौलेः पतिता चकास्ति तटिनी चांके भवानी यतः ॥

नागा यत्र शिरोमणिद्युतिचराः खेलंति भक्तेकृपा-

शीनो भासि ततो हिमाचल इवाव त्वं हि शंभो स नः ॥ ७८ ॥

मदन०—अवहितांजलिः ।

यं गंगा विशति स्फुटं शशधरो यत्रास्ति यादांसि वै

नानानागमणिस्तु यस्य तनुजो यद्वाचि पीयूषकम् ॥

---

१ दया । २ बृहस्पति । ३ चंद्र । ४ भयंकर । ५ महादेव । ६ जलजंतु ।

रामा यत्र चकास्ति पांडुरतनुः सत्कालकूटः स्वयं
त्वं सत्कल्पतरुः सुकामधुगवान्यक्षीरसिंधो स न: ॥ ७९॥

ततश्चैवं निजजनवचनाकर्णनक्षणसुघृणार्द्रहृदयो मृत्युंजयोभिव्यज्यत। वत्स किं ते भूयः प्रियं करवाणि ।

मदन०—

यमरं साक्षात्कर्तुं मुनयो भूयस्त पश्यंति ॥
स त्वं नः पुरतोद्य प्रियमस्ति चकाससे किमितः ॥ ८० ॥

तथापीदमस्तु भरतवाक्यम् ।

दंपत्योत्र परस्परं प्रविलत्प्रेमानुबंधा लसं-
त्वंजेश्चाद्य समाप्नुवंतु सुजनान्संपत्तयो माऽसतः ॥
राजानः सुजनानवंतु जननीवात्मप्रजा सुप्रजाः
संतः संतु परोपकारनिरताः सच्छास्त्रविचारताः ॥ ८१ ॥

शंकरः—सानुग्रहस्मितम् । तथास्त्विति निष्क्रांताः सर्वे । श्रीर्वर्धतु ।

काले वर्षंतु मेघा विलसतु धरणी सर्वसत्सस्यपूर्णा
लीनाः संत्वीतयः श्रीहरिचरणसरोजादराः संतु संतः ॥
लोकाश्चाराधितार्यद्विजविबुधवरप्राप्तसर्वेहिताश्च
स्वोत्संगासीनलक्ष्मीस्मितजितनृहरेः सानुरागैः कटाक्षैः ॥ ८२ ॥
स्वाज्ञायंत्रितभुवनत्रयविधिभवपविधरेडितांघ्रियब्जः
नैजानंदं वितरन्श्रीशः सर्वोत्तमो जयति ॥ ८३ ॥
गुणगंधर्वेऋषींदुमितशकविद्वेषकृन्नभःपूर्वे ॥
कविरव्यह्ने प्रकामं परिपाकमवाप मत्कृतिर्ह्येषा ॥ ८४ ॥
श्रीपद्मनाभनंदनहरिरामलसन्नृसिंहजोत्येयम् ॥
भूयोजसा कृतिः श्रीहरिचरणसरोजयोर्लसतु ॥ ८५ ॥
समशेषशब्दवाच्यो नैजाव्हः सीधुसाधुसप्तार्चिः ॥
प्रीतो मादिदं कृत्या गुरुहृत्पद्मालयः स नः पातु ॥ ८६ ॥
नृत्यत्कंदुकबंधुसुंदरकुचद्वंद्वातिलुंठल्लस-
त्सौवर्णाभरणस्वनानुगुणसन्मंजीरकांचीरवम् ॥
वाणी यस्य हृदि प्रकाममनिनदत्सद्वल्लकी नृत्यति
स्यात्तस्य प्रमुदे रसज्ञसुमतं ह्येतत्परं रूपकम् ॥ ८७॥

अथवा ।

लोके समाकलितसर्वकलाकलापप्राज्ञान्न नंदयति किं मम वाग्विलासः ॥

---

१ शीघ्र । २ रक्षण करोत । ३ फळें आणि पुष्पें ।

यन्नीरसोपि जगतीदमिति प्रसिद्धं डिंभस्य[1] दुर्विलसितानि मुदे गुरूणाम् ॥८८॥

इति श्रीमद्विद्वन्मुकुटमंडनश्रीमन्नृसिंहनंदनाबिंदुमाधवविरचितं कंपिनीप्रतापमंडनं नाम रूपकं पर्याप्तम् । श्रीकृष्णार्पितमस्तु ।

---

१ बालकस्य ।

श्रीकृष्णभक्तिचंद्रिकानाटकम्.

कोपि स गोपकुमारः स्फुरति समाजे व्रजस्त्रीणां ॥
नवजलधर इव मध्ये तडितां परितः स्फुरंतीनां ॥ १ ॥

अपि च ।

प्रत्येकं तनुरोमसुश्रितजगज्जालाय गोष्ठेशितु-
र्बालाय प्रविनाशितातिविपुलव्यालाय वृंदावने ॥
गोपालाय महीभरक्षितिभृतां कालाय पद्मस्फुर-
न्मालाय स्फुटपीतदावदहनज्वालाय नित्यं नमः ॥ २ ॥

नांद्यंते सूत्रधारः—

पुरतः पंडितमंडलीमाखंडलसभामिव विलोकनचटुलसहस्रनयनावलीमवलोक्य । स्वगतं । इह जगति सारासारविचारचातुरीपरिचयधुरीणचित्तवृत्तीनां तृणतुलनादूरीकृतललनादिविषयविषयैकप्रवृत्तीनां निरभिलषितसमधिगतचतुर्मुखप्रमुखसुरगणानंदनिर्वृतीनां यदुपतिपदारविंदपरिचिंतनजनितानंदनिवर्तितमुक्तिविषयविषयाभिलाषानिवृतीनां महापुरुषाणां संगतिमात्रं समधिगम्य सुखं भगवद्भजनमेव कर्तव्यत्वेन सततं निरूपयताऽनेन कविना अनंतदेवाह्वयेन त्यक्तलोकसंकोचमेवमुक्तोस्मि ।

यदुक्तं ।

सखे पश्यामि बहुशः सखेदं त्वामहर्निशं ॥
संसारे तेन कंसारेराराधनमुदाह्वर ॥ ३ ॥

इति । तदहमस्यामेव सभायामस्यैव कवेरिममेव निबंधमधुनैवाभिनीय प्रतिपादयामि ।

तावन्नटः प्रविश्य साटोपं । अये ।

सभायामुपविष्टायां किं मौनमवलंब्यते ॥
उत्तमासनसंप्राप्तौ न युक्तं वक्रसीवनं ॥ ४ ॥

सूत्रधारः—त्वामेव प्रतीक्षमाणस्य कथमधिक्षेपः क्रियते ।

नटः—सविनयम् । एवं तर्ह्यारभ्यतां । परंतु किमारभ्यतां ।

सूत्रधारः—शृणु ।

एतस्मिन्समये कलिः किल बली कामादिभिः संवृतो
वेदांतश्रवणादि सर्वमकरोन्निर्वीर्यमुर्वीतले ॥

---

१ गोपीनां मध्ये । २ गुरें राखणारा नंद । ३ कालिया नामक सर्प । ४ स्त्रीपुत्रादि विषय । ५ खेदेन सहितं यथा तथा । ६ तोंड शिवणें ।

तेन व्यासपराशरप्रभृतिभिर्दीने दयासिंधुभिः
श्रेयःसाधनमभ्यधायि[1] बहुधा श्रीकृष्णभक्तिः परा ॥ ५ ॥

तमिमं श्रुतिस्मृतिपुराणार्थमवबुध्य श्रीकृष्णभक्तिचंद्रिकाभिधानं निबंधं स एव कविर्निर्मितवान् । तमिममस्यां सभायामभिनीय प्रदर्शयावः ।

नटः—

निबंधाभिधानं तु सुंदरं कृष्णभक्तिचंद्रिकेति ।

सूत्रधारः—

प्रायेणोत्तमवस्तूनां नामान्यर्थानुसारतः ।
सुवर्णमिति[2] सीतांशुरिति[3] कांतेति[4] च स्फुटं ॥ ६ ॥

अपि च ।

नाम स्फुटं स्फुरति कामदुघेव[5] सद्यः कृष्णेति लोकमुखनिर्गतमेव दैवात् ॥
श्रीमत्तदेतमुपसर्जनतामुपैति ग्रंथे किमस्य सुभगत्वमुदीरणीयम् ॥ ७ ॥

किं चेदं नामान्वर्थमिति स्पष्टमेव ज्ञायते ।

तथाहि ।

सद्यः श्रमं सकलमेव शमं नयंती चित्तस्य निर्वृतिमतीव च निर्वहंती ॥
श्रीकृष्णभक्तिरिह भूरि विवर्धमाना स्पष्टं परिस्फुरति चंद्रिकया समाना ॥ ८ ॥

नटः—

शीलने सर्वविद्यानां धनानामपि चार्जने ॥
सर्वलोकप्रतिष्ठायां यतंते बहवो जनाः ॥ ९ ॥

तदेतदाश्चर्यं । यदयं कविः स्वहृदयं पुनः पुनः श्रीकृष्णभक्तिप्रवणं[6] कुरुते ।

सूत्रधारः—उचितमेव कुरुते । यतः ।

अनेन खलु जंतुना सकलशास्त्रमभ्यस्यतां
धनं विपुलमाप्यतां सकलसभ्यता लभ्यतां ॥
न तावदयमश्नुते हृदयसौख्यमात्यंतिकं
न यावदवलंबते यदुपतेः पदांभोरुहं ॥ १० ॥

प्रत्युत विद्यादित्रयस्य ।

अर्जने बहवः क्लेशा आर्जितस्य च रक्षणे ।
सर्वलोकप्रतिष्ठायां यतंते बहवो जनाः ॥ ११ ॥

नटः—एवं तर्हि श्रीकृष्णभक्तिः सर्वेभ्यः किमिति न रोचते जनेभ्यः ।

---

१ कथितं । २ शोभनः वर्णो यस्य तत् । ३ सीताः अंशवो यस्य सः । ४ कं सुखं तस्य अंतः परिसमाप्तिर्यस्मिन् । ५ कामधेनुरिव । ६ नम्रं ।

सूत्रधारः—विचित्राः खलु वासनाः । पश्य ।

सर्वलोकपरितोषकारिणि स्वर्धुनीविमलवारिणि स्थिते ॥

पूतिगंधवति पल्वलोदके सूकरः सुखमतीव मन्यते ॥ १२ ॥

रोचते चैषा तिरस्कृतभवदुःखपरंपरेभ्यः पुरुषधुरंधरेभ्यः ।

तथाहि ।

नित्यं स्वधर्मविषये विहिताभिमुख्याश्चित्ते तृणीकृतगृहादिसमस्तसौख्याः ॥

श्रीकृष्णनाथपदपंकजबद्धसख्याः श्रूयंत एव बहवो बलिभीष्ममुख्याः ॥१३॥

एवं सति केषांचिदत्रानादरस्तावता न काचित्क्षतिः ।

यतः ।

गोविंदसेवनमिदं यदि नाद्रियंते दुष्टा निकृष्टमतयो विषयैकनिष्ठाः ॥

किं तावता ज्वरवतामरुचेर्न जातु दुग्धस्य शुद्धमधुरस्य विदूषणं स्यात् ॥१४॥

नटः—अये कोयं कृष्णभक्तेरुत्कर्षः । यद्वैदिकेभ्योपि कर्मभ्योऽमुष्यामेनादरः क्रियते ।

सूत्रधारः—सिद्ध एवोत्कर्षः सकलवैदिककर्मफलभूतत्वात् ।

संसारिणां सुखनिधावपि गोपनाथे भक्तिः प्रभूतसुकृताचरितेन साध्या ॥

संजायते ज्वरवतां रुचिरुत्तमान्ने नानारसायनकषायनिषेवणेन ॥ १५ ॥

अन्योप्युत्कर्षः श्रीकृष्णभक्तेः ।

अतीव खेदः खलु कर्मकाले को वेद भावीनि सुखानि कानि ॥

कंसारिसंसेवनकाल एव संसारखेदः प्रशमं प्रयाति ॥ १६ ॥

अपि च ।

यज्ञे पश्य विशस्यमानपशुभिः स्पष्टैव बीभत्सता

ग्लानिर्देहगता व्रतेन महता हानिर्धनस्यापि च ॥

श्रीकृष्णस्य निषेवणं तु विविधक्लेशप्रणाशं नृणां

सद्यः संतनुते मनश्च मनुते संतोषमंतोज्झितं ॥ १७ ॥

नटः—अये सेवने परोपसर्जनतया कालपरिकलनेन च प्रत्यक्षतः क्लेशः परिदृश्यते ।

दूरापास्तः संतोषः । श्रीकृष्णसेवनेन कथं वैपरीत्यमुच्यते ।

सूत्रधारः—अन्येषां सेवनेन क्लेशपरंपरैव ।

येषां परिक्लेशमयः पतिः स्यात्तेषां कुतः क्लेशपरिक्षयः स्यात् ॥

कुतश्च शुष्कं तरुमाश्रितानां विहंगमानामिव सौख्यलाभः ॥ १८ ॥

श्रीकृष्णस्तु पादनखमारभ्य यावच्छिखाग्रं परमानंदरूप एव ।

---

१ दुर्गंधवति । २ अल्पजलाशयोदके । ३ वराहः (डुक्कर) ४ नाशः । ५ काढा इति प्राकृतभाषायां । ६ अन्यजन्मीं होणारीं । ७ हन्यमान । ८ अमर्याद । ९ आर्जवानें । १० परिहरणेन । ११ पक्षिणाम् ।

गोविंद एष मुरसिंधुरिति श्रुतीनां संशीलनादवगतं शतशो महद्भिः ॥
किं चास्य चिंतनकृतां तनुरंचितैर्वै रोम्णां चयैर्भवतिहर्षजलैश्च नेत्रे ॥१९॥
ततश्च तमनुसरतां भक्तजनानां कुतः क्लेशसंभावना ।
नटः-अये तेषामपि द्वेषिजनेभ्यः क्लेशसंभावनास्त्येव ।
सूत्रधारः—नहि नहि । यतः ।
क्षुद्रा अपि प्रभुजना निजसेवकानां नान्याहितं परिभवं सहसा सहंते ॥
लोकत्रयाधिपतिरेष दयासमेतः किंवा सहेत परपीडनमात्मभक्ते ॥ २० ॥
अपि च ।
ब्रम्हांडकोटिघटनापटुरेष कृष्णः कृत्स्नं प्रसाधयति कांक्षितमाशु येषां ॥
लोकत्रयेपि न स कश्चन भाति धृष्टो[४] यो वक्रदृष्टिमपि तेषु रुषा विदध्यात्॥२१॥
नटः—निंदंति बहवस्तथापि ।
सूत्रधारः—किं तावता । पश्य ।
मंदा विदधतु निंदां निपुणो हरिपादसेवनं तनुते ॥
मंडूकेषु रटत्स्वपि मधुपः सरसिजरसं न संत्यजति ॥ २२ ॥
अपि च ।
कुर्वंति केपि यदि केशवपादभक्तनिंदां तथाप्यनपराधिन एव तेऽमी ॥
यतो बाला इव तेऽनभिज्ञाः । तथाहि ।
विश्रांतिमस्य हृदयांतरभिस्फुरंतीं किं ते कदाप्यनुभवंति हि पुण्यशून्याः ॥२३॥
नटः—न केवलं विश्रांत्यनुभवाभावः । प्रत्युत विद्वेष एव प्रादुर्भवत्यमीषां सततसुखसंभारे भगवद्भक्तिप्रचारे । तदेतदाश्चर्यं ।
सूत्रधारः—किमाश्चर्यं । पश्य ।
नेत्रोत्सवो भवति सर्वजनस्य येन सूर्योदयेन हतसंतमसोच्चयेन ॥
तेनैव दैवविहतस्य विहंगमस्य नक्तंचरस्य नयनांध्यमुदेति गाढं ॥ २४ ॥
अपि च ।
हरिभक्तौ हरिभक्ते च दुष्टानां द्वेषो भवतीति किमाश्चर्यं ।
यतः ।
पाखंडान्यवलंब्य भंडमतयः प्रौढाभिमानाच्च ये
स्वल्पज्ञा बहुदुःखिनः स्फुटतरं कालस्य भक्ष्याश्च ये ॥
द्वेषं ते दधते सुखात्मनि हरौ नाम्ना भवाब्धेस्तरौ

---

१ व्यासशुकादिभिः । २ व्याप्ता । ३ कोटिब्रम्हांड रचण्याविषयीं समर्थ । ४ धैर्यवान. ।
५ ओरडत असतां । ६ वडवागुळ इति प्राकृत भाषायां । ७ ढोंगी आहे मति ज्यांची ।

काक्षाकल्पतरौ जगत्रयगुरौ विश्वंभरौजस्यापि ॥ २५ ॥

तदास्तामेतत् । किंतु ।

विविधविषयभोगभ्रांतचित्ताः शृणुध्वं
भवदुपकृतिहेतोः प्रब्रवीम्येतदुच्चैः ॥
सकलसुखसमीहापूरकः सेवकानां
यदुपतिरयमेकः सेव्यतां किं ततोन्यैः ॥ २६ ॥

तावन्नेपथ्ये इति । आः कोयमनल्पं जल्पति ।

सूत्रधारः—अये ।

नटः । प्रस्थानांतरं दृश्यते । तदलमावाभ्यां यदुपतिगुणकथनाप्रियाभ्यामितोऽपसर्तव्यमिति [निष्क्रांतौ

(इति प्रस्तावना)

ततः प्रविश्य सशिष्यो भेददर्शी शैवः ।

मौलौ यस्य विधोः कला गलतटे नव्यांबुदस्य द्युतिः
स्कंधे नागपतेर्धृतिः कटितटे स्फीतौ तनुर्भोगिनः ॥
वामांकेपि च यस्य पर्वतपतेः कन्या समुज्जृंभते
पुण्यैः पूर्वचितैस्तदीयचरणे प्रायो मदीया मतिः ॥ २७ ॥

शिष्यः—अये साधु साधु । भगवतो हि मौलिप्रभृतिषु विधुप्रभृतीनां संबंधिन्यः कलाप्रभृतयः स्त्रियोवस्थिताः तच्चरणे तु न कस्यचित्काचित् । अतस्तत्र स्वकीयमतेरवस्थानं प्रायः पाठेन प्रार्थ्यते तदुचितं । विषयावरुद्धमतेर्विरुद्धमेतच्चरणेऽवस्थानं तथापि भगवतो नास्त्यशक्यम् ।

पश्य ।

तोयं जटायां ज्वलनो ललाटे मौलौ सुधांशुर्गरलं च कंठे ॥
विरोधिनामप्यविरोधहेतुः स एष एवासुरधूमकेतुः ॥ २८ ॥

शिष्यः—(परिहासेन) स एक एवासुरदर्पहेतुरिति वक्तव्यम् । तथाहि ।

रावणः प्रकृतिहीन एव यत्स्वीयसेवनमकारयत्सुरान् ॥
तत्र हेतुरयमेक एव तु श्रीमहेशितुरमुष्य सेवनं ॥ २९ ॥

किंच ।

यस्यैव पादकमलद्वयसेवनेन लंकेश्वरस्त्रिभुवनेश्वरतामवाप ॥
तस्यैव चारुवसतिस्थलमुद्धृतः सन्नुन्मूल्य पत्युरपि कल्मषमेव चक्रे ॥ ३० ॥

---

१ विश्वाला पोषण करणारें आहे तेज ज्याचें । २ सुखाविषयीं इच्छा । ३ सजल मेघाची । ४ मोठी । ५ कैलासं ।

शैवः—तदेतदाशुतोषणस्वभावकृतं भगवतः। तथाहि।

न प्रसीदति हृषीकसंयमैः[1] श्रीपतिर्न तपसां च राशिभिः॥
शंकरस्तु परितुष्यति क्षणाद्बिल्वपत्रसकृदर्पणादपि॥ ३१॥

शिष्यः—कियत्तारतम्यमनयोः[2]।

शैवः—नैतावदेव केवलं। अपिच।

नाधास्य द्युनदीं यदीह गिरिशः स्वर्गात्पतंतीमिमां
नास्यास्यत्सकलाप्यसौ वसुमतीत्येतत्कियद्वर्ण्यते॥
कूर्मक्रोडफणीश्वरप्रभृतयो लक्ष्मीपतेर्मूर्तयो-
प्येता दुर्धरगांगवेगविवशाः कुत्राप्ययास्यंस्तदा॥ ३२॥

तस्मादयमेको जगद्विधारको विज्ञाप्यते।

शिष्यः—द्युनदी किमिति भूनदीत्वमालंबितवती।

शैवः—पूर्वेषामपरेषां पावनहेतोः कृपैकपाथोधिः॥
त्रिदिवादवतारितवानाराध्यैतां[3] भगीरथो राजा॥ ३३॥

शिष्यः—अहो महन्माहात्म्यं गंगायाः।

शैवः—अत एवोक्तमनेन कविना ग्रंथांतरे।

गंगे त्वज्जलमज्जनं विदधतामंगे भुजंगावलि-
ग्रीवायां गरलं विभाति हुतभुग्ज्वाला ललाटस्थले॥
एतावत्परमस्ति मोदजनकं यन्मौलिभागे स्फुर-
च्चांद्रं ज्योतिरुदंचति प्रविलसत्पीयूषधारास्पदम्॥ ३४॥

तदलमनया प्रसक्त्यानुप्रसक्त्या[4]। प्रकृतमेव शिवकेशवयोस्तारतम्यं निरूप्यते।

शंभौ नृत्यति सर्पराजसहितः कूर्मो भृशं खिद्यति
क्रोडस्ताम्यति मत्तदिग्गजकुलं तत्कालमुत्क्राम्यति॥
भूमेर्भ्रंशविशंकितश्च परितः पद्मोद्भवो भ्राम्यति
श्रीकांतो धरणीविधारणकृते जन्मांतरं वांछति॥ ३५॥

शिष्यः—अये तथापि त्रिजगत्पालनी कला श्रीकांतस्यैव।

शैवः—श्रूयताम्।

कारुण्यैकदृशा स एष जगतामीशो भृशं वीक्ष्यते
यावत्तावदियं त्रिलोकरचना कृत्स्ना समुन्मीलति॥
स्वातंत्र्यस्य परोऽवधिर्यदि हरो लीलावशात्केवलं
वक्रामेव दृशं सकृद्वितनुयात्कः शक्नुयाद्रक्षितुं॥ ३६॥

यदि श्रीकांतस्यैकांतिकी[5] पालनशक्तिः स्यात्तर्हि त्रिगत्संहर्तरि गिरिजाभर्तरि किमिति

१ इंद्रियनिग्रहैः। २ न्यूनाधिक्यं। ३ भागीरथीम्। ४ एकावर एक बोलणें। ५ एकटीच।

न प्रदर्शयेत्।

शिष्यः—कंटकोद्धरणं तु श्रीकांतकर्तृकमुपलभ्यते।

शैवः—जनोयमिह जिव्हया विपुलदीर्घया केवलं

कपोलपरिकल्पितं किमपि जल्पतु स्वेच्छया॥

त्रिलोकपरिपीडनं त्रिपुरहेतुकं हंति य-

स्त्रिलोचनममुं विना त्रिषु किमस्ति कालेष्वसौ॥ ३७॥

तस्मात्।

यत्र कुत्र च न वस्तुनि स्थिता यापि कापि ननु शक्तिरुच्चकैः॥

व्यापिनः खलु पिनाकिनस्तु सा सन्निधानवशतो विजृंभते॥ ३८॥

तावत्प्रविश्य भेददर्शी वैष्णवः। (सक्रोधम्)

धिक् त्वां धिक् तव जिव्हां धिक् तव युक्तिं धिगेव शिवभक्तिम्॥

आनंदवल्लिकंदं मंद मुकुंदं विनिंदसि प्रसभं॥ ३९॥

शिष्यः—अये गालयन्नेवायाति दुर्जनोयम्। तदितोपसर्तव्यम्।

शैवः—(सक्रोधम्) किं ब्रूषे। दुर्जनमेनमनिर्जित्यैवापसर्पणवार्ता। तत्किं मूर्ख मामभि-
जानासि।

पश्य।

नासौ विद्या प्रभवति प्रभवति न यया पराभवोन्यस्य॥

भवति च न निपुणता सा न यया परधनमुपानयति॥ ४०॥

तस्मात्।

अध्येतव्याखिला विद्या निर्जेतव्याश्च वादिनः॥

आनेतव्या प्रतिष्ठा च संचेतव्याश्च संपदः॥ ४१॥

तदेनमिदानीमेव जेष्यामि पश्येत्यग्रत उपसृत्य वैष्णवं प्रति।

रे मूढ जल्पसि मुधा न बुधाश्रितोसि केनापि धूर्तगुरुणा बत वंचितोसि॥

श्रीशंकरस्य जगतामभयंकरस्य यत्किंकरत्वमनवाप्य वृथागतोसि॥ ४१॥

वैष्णवः—सोपहासम्। आस्तामस्मज्जन्मवृथाकथनवार्तेयम्।, तव तु सर्वं सार्थकमेव
दृश्यते। तथाहि।

सौभाग्यं तव दृश्यते स्फुटतरं भस्मावलिप्ता तनु-

र्भारो भूरि जटाकृतः पृथुतमा रुद्राक्षमालाः शतं॥

मृत्योरूर्ध्वमपि श्मशानवसतौ शूली कपाली च सन्

भूतप्रेतपिशाचसंगतिवशात्सौख्यं बहु प्राप्स्यसि॥ ४२॥

शैवः—किमनेनोपहासेन त्वदीयेन सुदुर्मते॥

---

१ दुष्टानां नाशः। २ स्वकल्पनया रचितं।

सर्वथा शिव एवैकः सर्वलोकसमाश्रयः ॥ ४४ ॥

पश्य ।

सुरासुरविनिर्मितादुदधिमंथनादुद्गतं
चराचरनिपीडनक्षममवेक्ष्य हालाहलम् ॥
स एष करुणानिधिः करतले गृहीत्वा पपौ
भवन्मधुरिपौ पुनः किमपि नेदृशं दृश्यते ॥ ४५ ॥

वैष्णवः—नह्ययं स्थाणोरपराधः यदेनमंधो न पश्यति ।

यतः ।

यदा जगदुपद्रवो विपुल एव संजायते
तदा मधुरिपुं विना जगति कः खलु त्रायते ॥

किंतु ।

मंदरमहागिरिणा समुद्रमंथने परिश्रांतेषु सुरासुरेषु ।
महापुरुष एव चेदमृतमंथनव्यापृतः
स तत्पुरुष इत्यतो गरलतो जगत् त्रातवान् ॥ ४६ ॥

प्रसिद्धं ह्येतद्यज्ञे । महर्त्विजि कर्मांतरव्यापृते तत्कर्तव्यं तत्पुरुषः करोति ।

शैवः—सक्रोधम् ।

मुखमस्तीति प्रलपसि यत्किंचन मूढ नास्ति ते शास्ता ॥
गिरिशे त्रिजगदधीशे बत तत्पुरुषेति नाम यत्कुरुषे ॥ ४७ ॥

वैष्णवः—सोपहासं । अहो महान्शैवोसि ।

यतः । तत्पुरुषाय विद्महे इत्याद्यागमसिद्धं नामास्य न जानासि ।

शैवः । मूढ कर्मधारयोयं न तत्पुरुषः ।

वैष्णवः । अहो स्वकर्मधारयाभिनिविष्टोसि । यतस्तत्पुरुषेप्यतत्पुरुषं ब्रूषे । तदास्तां स पूरुषः ।

किंतु संति पुरुषाः सहस्रशः स्वस्वशक्तिपरिणाहविश्रुताः ॥
एष एव पुरुषोत्तमाभिधां भूषयन्जगति भाति केशवः ॥ ४८ ॥

तथाहि ।

सरसिजनिलयासदृशी त्रिजगति युवतिर्न दृश्यते कापि ॥
यस्या निसर्गवश्या निखिलमनुष्यामरश्रेष्ठाः ॥ ४९ ॥
सैषा प्रादुर्भूतामृतमंथने वरमन्वेषयंती ।

---

१ आश्रयभूः । २ स्थावर जंगमात्मक जगाचा नाश करण्याविषयीं समर्थ । ३ तस्य पुरुषः तत्पुरुषः । ४ विशालता । ५ लक्ष्मीसदृशी ।

फल्गुत्वं मनुजेषु भाति दितिजेष्वात्यंतिकी क्रूरता
लुब्धत्वं विबुधेषु योगिषु महानस्त्यैंद्रियो निग्रहः ॥
सृष्टिव्यापृतिरेव धातरि महेशाने श्मशाने स्थिति-
स्तेनैतेषु मनो बबंध न रमा सर्वोत्तमाकांक्षिणी ॥ ५० ॥

ततश्च ।

पुंडरीकनयनं तु सुंदरी संनिरीक्ष्य विनिवृत्तदूषणं ॥
सौख्यसागरमनादरेप्यमुं नैव मुंचति कथंचिदप्यसौ ॥ ५१ ॥
तस्मादेष एव पुरुषोत्तमः प्रकाशते ।
तदेवं विवदमानयोरुभयोरभेददर्शी प्रविश्य महा-
वैष्णवः । उच्चैः साधारण्येन ।
एकस्त्रिजगदधीशो लौकिकवैदिकपरीक्षकाभीष्टः ॥
भेदं वक्तुममुष्मिन्नहह विवृद्धिः कुबुद्धीनाम् ॥ ५२ ॥

प्रत्येकं शैवं प्रति ।

अये कथय शंकरो विमलपीतवर्णांबरो
नवांबुधरसुंदरो भवितुमीश्वरो वा न वा ॥
नचेन्न जगदीश्वरो भवति चेत्कथं न स्वयं
स एव कमलापतिस्तवतु केवला दुर्मतिः ॥ ५३ ॥

वैष्णवं प्रति ।

सरोजनिलयाधरो रुचिरनागचर्मांबरो
बिसप्रसवसुंदरो भवितुमीश्वरो वा न वा ॥
न चेन्न जगदीश्वरो भवति चेत्कथं न स्वयं
स एव गिरिजापतिस्तव तु मोहजा दुर्मतिः ॥ ५४ ॥

शैववैष्णवौ—मिथः कथमावयोर्मस्तकमारोहति ।
तदधुनायमावाभ्यां भेदवादित्वेनैकीभूय पराभूयताम् । महावैष्णवं प्रति ।
यदरे विरुद्धधर्माक्रांतयोरप्युमारमणरमाकांतयोरभेदमावेदयसि ।
तद्वाचां पाटवेन वाचाटशिरोमणित्वेव तत्रभवतो मूलम् । पश्य ।
यः कर्पूरसवर्णः स कथं नवघनसमानवर्णः स्यात् ॥
यस्य च मूर्ध्नि द्युनदी कथमिव तस्यैव सा पदांभोजे ॥ ५५ ॥
तदेतयोर्विस्पष्ट एव भेदः ।

महावैष्णवः—अहो पंडितंमन्यौ युवां यल्लीलाविग्रहावेव परमात्मानौ जानीथ । नत्वेवम् ।

---

१ नीचत्वं । २ सृष्टिरूपो व्यापारः । ३ सदाशिवः । ४ लक्ष्मीपतिः ५ सुंदर गजचर्म धारण करणारा । ६ कमलतंतुप्रमाणें सुंदर ।

किंतु ।

एकोयं निखिलेश्वरः कलयते शक्तीः स सर्वा अपि
स्वीयानामनुरोधतश्च तनुते नानाविधानास्तनूः ॥
तस्मादेष यथा दधाति हि तनुं नीलोत्पलश्यामला-
मेवं नीलगलां मनोज्ञधवलां भेदे मुधैवाग्रहः ॥ ५६ ॥

शैववैष्णवौ—सुदृढोक्तयुक्त्यनुसंधानभिन्नचित्तौ मिथः शिथिलीकृतभेदाभिनिवेशौ ।

(स्वस्वगतं) अहो सम्यगेव ब्रूते ।
न शिवः केशवो वापि दृशा केनापि दृश्यते ॥
शास्त्रोक्तयुक्तिभिश्चैष भेदवैशेसवर्जितः ॥ ५७ ॥

(प्रकाशम्) कथं तर्हि पुराणानां भिन्नमतित्वम् ।

उक्तः शिवपुराणेषु केशवात्परमः शिवः ॥
वैष्णवेषु पुराणेषु शिवादपि च केशवः ॥ ५८ ॥

महावैष्णवः—

सा सा मूर्तिरनेकशक्तिनिधिना दीने दयांभोधिना
भक्तानुग्रहहेतवे भगवता संधायते संततं ॥
पौराणी तु सरस्वती यदनयोरन्योन्यतः श्रेष्ठता-
माचख्यौ तदिदं द्वयोरपि गुणानंत्यान्न हेलंतरात् ॥ ५९ ॥

नह्यन्यथा परस्परस्य परस्परत उत्कर्षः संभवति । न च परमाप्तः श्रीबादरायणोपि परस्परविरुद्धं वक्तुं प्रवर्तेत । तेनोभयोर्हरिहरमूर्त्योर्गुणानंत्यमेव विवक्षितम् ।

शैववैष्णवौ—कथं तर्हि मिथस्तयोरुपास्योपासकभावः ।

महावैष्णवः—अतएव गुणानंत्यम् । व्यवस्थितस्तूपास्योपासकभावः । पश्य

यः खलु यस्योपास्यः स एव तस्यैव सेवको नैव ॥
एवं यो यदुपासक एष निषेव्यो न तस्यैव ॥ ६० ॥

प्रकृते तु ।

शिवकेशवयोरेव त्रिजगति महदद्भुतं भाति ॥
यदिमौ सर्वाधिपती अन्योन्यस्य तु निषेवणप्रकृती ॥ ६१ ॥

अतएवोक्तमनेन कविना ग्रंथांतरे ।

केचिद्वैष्णवदर्शनैकनिपुणा विष्णुं वरेण्यं[५] सुरे-
ष्वन्ये शैवपुराणभिन्नमतयो भर्गं परं मेनिरे ॥
अस्माकं तु न निर्णयो यदनिशं शंभोः पदांभोरुहं

---

१ न्यूनाधिक्यम् । २ यथार्थवक्ता । ३ व्यासः । ४ परस्परं ५ श्रेष्ठम् ।

विष्णुर्ध्यायति धारयत्यथ परो मूर्ध्नास्य पादोदकं ॥ ६२ ॥

शैववैष्णवौ—कथं तर्हि भवता गोविंदपादारविंदभजन एवादरः क्रियते ।

महावैष्णवः—

सत्यं यद्गिरिशः समस्तजगतामाद्यो महापूरुषो
ये चान्ये नरसिंहवामनमुखास्ते चापि लोकोत्तराः ॥
अस्माकं तु मनोज्ञकंजनयनैस्त्रैलोक्यसंमोहन-
श्रीगोविंदपदारविंदयुगले लावण्यलग्नं मनः ॥ ६३ ॥

अनुरागेण ।

कृतबहुविधपुण्याः सर्वथा पापशून्या-
स्तमनुसरत धन्याः शैलकन्याधिनाथम् ॥
यदुकुलतिलकेन स्वीयपादे निबद्धा
वयमिह कथमद्धा कुर्महेऽन्यस्य सेवाम् ॥ ६४ ॥

शैवः—शिथिलीकृतभेदाभिनिवेशः स्वीयानुरागेण ।

द्वयोरपि सुरेशयोः पदपयोरुहाराधने
विशुष्यति भवांबुधिः स्फुरति बोधमोदांबुधिः ॥
परंतु हरसेवकं समपहाय कस्योच्चकै-
र्विराजति सुनिर्मला शिरसि सौधेरश्मेः कला ॥ ६५ ॥

वैष्णवोपि—शिथिलीकृतभेदाभिनिवेशः स्वानुरागेण ।

हरमथवा हरिमेव श्रयतां संसृतिपथच्युतिस्तुल्या ॥
एतावांस्तु विशेषो दुष्परिहरः । यत् ।
शिरसि निषीदति सुरसरिदेकेषां पदसरोरुहेऽन्येषां ॥ ६६ ॥

महावैष्णवः—

नारायणं भजति निंदति नीलकंठं यो वा शिवं भजति निंदति केशवं च ॥
शास्त्रोक्तितस्तु शिवकेशवयोरभेदात्स्वामिद्रुहाविति न सद्गतिमाप्नुयाताम् ॥ ६७ ॥
कस्यामपि चैकस्यां मूर्तावनुरागमुत्कटं कृत्वा ॥
एकं खलु जगदीशं सादरमनिशं निषेवध्वं ॥ ६८ ॥

शैववैष्णवौ—

दुरिष्टमिव पुष्कलात्समवरुद्धकेंद्रग्रहा-
दहोभवदनुग्रहान्मम दुराग्रहो विच्युतः ॥

अतः कारणात् ।

उमेशकमलेशयोरिदमभेदबोधामृतं

---

१ साक्षात् । २ चंद्ररश्मेः ।

विनाशयंतु सर्वतः प्रसृतभेदहालाहलं ॥ ६९ ॥
तदेतस्मिन्नर्थे भूमंडलनिवेशिनो भेदाभिनिवे-
शिनः उपदेशनीयाः । इति निष्क्रांतौ ।

महावैष्णवोऽपि ॥

एते भिन्नमतावलंबनरतास्तेषूपदेशेन किं
ये चान्ये भुवि विस्फुरंति धनिकास्तद्वर्णनेनापि किं ॥
श्रीकृष्णास्यलिपिवर्णोत्सवजुषां पुंसां सदा संगतौ
नेष्ये कालममुष्य केवलकथापीयूषपानैरहम् ॥ ७० ॥
[इति निष्क्रांतः

ततः प्रविशतः शाब्दिकतार्किकौ ।
तत्र तावच्छाब्दिकः—
स्वस्यैव पदार्थबोधमभिनयन्नुच्चैः ।

यावन्नैव पदेषु साधनविधिः सम्यक्तया बुध्यते
तावन्नैव पदार्थवृंदविषया बुद्धिः समुत्पद्यते ॥
तद्धीनस्य कुतो नु वाक्यजनितो बोधः समुत्पद्यतां
तस्माद्व्याकरणं प्रधानमुदितं शास्त्रेषु विद्वज्जनैः ॥ ७१ ॥

अपिच ।

विना चंद्रं यथा रात्रिर्विना सूर्यं यथा वियत्[1] ॥
सकला विकला विद्या विना व्याकरणं तथा ॥ ७२ ॥
तस्मादस्मदग्रे समस्तैरपि व्याकरणमध्येतव्यं ।

तार्किकः—

सोपहासं । अहो भवादृशा पदार्थाभिज्ञाः संभाव्यंते ।
मालाकारा इव यतः सततं कुसुमोच्चयान् ॥
प्रकृतिप्रत्ययानेव सूत्रैः संग्रंथयंत्यमी ॥ ७३ ॥

किंतु ।

न तर्कविद्यया विना पदार्थबोधसाधनं ॥
पदार्थबोधवर्जिताः कथासु बालकैर्जिताः ॥ ७४ ॥

शाब्दिकः—

(सक्रोधम्) अहो तर्कविद्याध्ययनजनितपदार्थबोधस्य परिपाकः[2] ।
येन तत्त्वप्रतिपादनमपि अस्मदीयमुपहासेन सदसि कलुषीक्रियते ।

---

१ आकाशं । २ परिणामः ।

एतादृशा धूर्ताएव भवादृशाः ।
तथाहि ।

नव्यं न्यायमधीत्य संसदमुपागत्य स्मयावेशतः
शिष्टानप्यवमत्य धृष्टमतयः प्रौढासनेप्यासते ॥
शास्त्रं वक्ति यदैव कश्चन तदा तेऽन्योन्यमुद्वीक्षितै-
र्भ्रूक्षेपैर्हसितैस्तथोपहसितैरेनं तिरस्कुर्वते ॥ ७४ ॥

तार्किकः—
(सोपहासम्) सत्यम् । धूर्तस्वभावा वयं भवंतस्तु सात्विका एव । यत उचितमेव भाषंते ।

शाब्दिकः—
किमस्मदीयमनुचितभाषणमायुष्मतां विदितमभूत् ।

तार्किकः—
श्रूयताम् ।

येषां निरूपणकृते बत पाणिनीयो भूयानयं व्ययमगात्किल सूत्रसंघः ॥
ते ठकुठआदिनिचयाः पदमंडलेषु शृंगोद्गमा इव विभांति नृमस्तकेषु ॥७५॥

नहि सुनिपुणमभिनिरीक्ष्यमाणा अपि पदेषु प्रसिद्धेषूपलभ्यंते ।

शाब्दिकः—
एवमनुचितप्रतिपादनं भवतामप्युपलभ्यते । तथाहि ।

न्यायेनैव घटाख्यकार्यघटने प्रावादुकास्तार्किकाः
सामग्रीं प्रतिपादयंति बहुधा यां प्रागभावादिकाम् ॥
तामेतां प्रतिवासरं कति घटान्कुर्वन्कुलालोपि चे-
न्नो जानाति तदा निरूपणमिदं कुत्रोपयोगं व्रजेत् ॥ ७६ ॥

यो हि घटकर्त्तासौ प्रागभावस्य हेतुत्वं[1] जानाति । ये च भवंतो जानंति न ते घटकर्तारः[2] । ततश्च कुत्रोपयुज्येत तन्निरूपणम् ।

तावत्प्रविश्य मीमांसकः सह शिष्यैः ।

तयोः परस्परदूषणप्रलयनेन प्रत्येकस्योत्कर्षाभिमानमवलोक्य हसित्वा ।

तावत्प्रतापो विपिने वृकेंद्राणां विमूर्च्छति ॥
यावन्न विश्वव्याख्यातवीर्यो व्याघ्रः न प्रसर्पति ॥ ७७ ॥

शाब्दिका हि पदनिरूपणं तार्किकाश्च पदार्थनिरूपणं कुर्वंति । तस्योभयस्यापि प्रयोजनं वाक्यार्थनिरूपणम् । ततश्च फलपर्यालोचनायां मीमांसका एवोत्कृष्टाः । वा-

---

१ कारणत्वम् । २ कुलालाः ।

क्यार्थनिरूपकत्वात् । अपिच ।

स्वाराज्यादिसुखं कदाचिदपि नो धर्मं विना लभ्यते
धर्मो वेदमिहांतरेण विदुषा केनापि न ज्ञायते ॥
वेदोयं यदि शुद्धतर्करसया मीमांसया संस्कृतः
संजायेत तदैव धर्मविषया जायेत सम्यग्मतिः ॥ ७८ ॥

तस्मादपि मीमांसकः श्रेष्ठः ।

शाब्दिकः तार्किकश्च—(स्वस्वगतम्) एकमुत्पतितं व्यसनं परिहर्तुमुद्यतस्य ममापरं व्यसनमापतति तदेतद्दुरुद्धरं दृश्यते । यतः ।

यदा प्रचंडपवनो वाति मीमांसकाव्हयः ॥
उड्डीय क्वापि गच्छंति तदा वादितृणोच्चयाः ॥ ७९ ॥

अपिच । यस्य संग्रहे ।

मीमांसा नाम सद्युक्तिरत्नप्रसवशुक्तिका[1] ॥
तदीयवाग्विलासिन्याः किं न्यूनं भूषणेष्विह ॥ ८० ॥

तथापि सभायां न तूष्णीं स्थातुमुचितम् । यतः ।

युक्तमेवाप्ययुक्तं वा वक्तव्यं विदुषा समम् ॥
न हि सर्वेपि कुर्वंति सभ्या युक्तिविवेचनं ॥ ८१ ॥

(प्रकाशम्) अहो महानप्युपजीव्यविषयमनुरोधं परित्यज्य विरोधं कथमवलंबसे । पदपदार्थावधारणपूर्विका हि वाक्यार्थावगतिः । पदपदार्थावधारणं च व्याकरणतर्कविविद्याभ्यां सिध्यति ।

मीमांसकः—अहो भवंतौ भ्रांतौ । यदनादिवृद्धव्यवहाराधीनासिद्धपदपदार्थावधारणं व्याकरणतर्कविद्याधीनं मन्येते । अपिच उपजीविरोधो नाम किमेतद्दूषणं । यतः ।

उपजीवति कार्याय यमेव निपुणो जनः ॥
तेनैव सह निःशंकं कार्यसिद्ध्यै विरुध्यते ॥ ८२ ॥

अतएव प्रधानापूर्वसिद्ध्यर्थं उपजीव्या अपि व्रीहयो यावज्जीवविधिसिद्ध्यै परित्यज्यंते ।

शाब्दिकतार्किकौ—

मीमांसकाः सुनिर्णीताः कृतघ्ना एव केवलं ॥
अनुरोध्यैरपि समं विरुध्यंते कुतोन्यथा ॥ ८३ ॥

मीमांसकः—

अस्मान्समतिक्रामन् त्वमपि कृतघ्नोसि शाब्दिक प्रथमम् ॥
पंडितपंक्तिनिवेशो भवतो मूलं यतो वयं विदिताः[2] ॥ ८४ ॥

---

१ शिपली । २ ज्ञानम् ।

यदि हि नास्माभिर्व्याकरणप्रामाण्यं प्रतिष्ठापितं स्यात्तर्हि गावीगोणीत्यादिशब्द-प्रतिभंगवादिशब्दप्रतिपादकस्य कः पांडित्यमभिमन्येत । तार्किकं प्रति । तव तु पंडितेषु तत्त्वविवेचकेषु गणनैव नास्ति । परमाण्वनंतविशेषसमवायाद्यत्यंताविद्यमानार्थनिरूपणात् । पंडितपंक्तिषु बलादानीयते । देहव्यतिरिक्तात्मनिरूपणात् ।

तार्किकः—(क्रुद्धः) शाब्दिकं प्रति । अहो बहु प्रलपति प्रमत्तोऽयम् । तदेहि दृढमावाभ्यामेष यज्ञवाटस्थमेष इव मुष्टिघातैरेव शमनीयः ।

शाब्दिकः—किमर्थमेवं वाचःकूटैरेव पराभवं नेतव्यः । (मीमासकं प्रति)

न्यायाः सम्यगधीता मीमांसायास्त्वया सर्वे ॥
एकस्ते परिपक्वः केवलदृष्टावलंबनो न्यायः ॥ ८५ ॥
सदसि न धर्मं वदसि प्रलपसि किंतु प्रतिष्ठायै ॥
व्याकरणतर्कविदो धर्म्यं जानंस्तिरस्कुरुषे ॥ ८६ ॥

मीमांसकः—स्वधर्मोद्घाटनं श्रुत्वा शिष्यानवलोक्य (सक्रोधम्) यावत्किंचिद्वचनमारभते तावत्प्रविशति श्रीकृष्णभक्तः । एतादृगवस्थाने तानवलोक्य तदत्यंतासंगतं मत्वा (स्वगतम्)

क्वैषां शास्त्रश्रवणं द्वेषप्रवणं मनः क्व चामीषाम् ॥
हर हर कल्पतरूणां दारिद्र्योपद्रवो भवति ॥ ८७ ॥

अपि च । एतेषाम् ।

श्राम्यति जिव्हा वचनैर्भ्राम्यति चित्तं जयाभिलाषैश्च ॥
ताम्यति धर्मः कपटैः शाम्यति सौख्यं च मत्सरोपचयैः ॥ ८८ ॥

तदेतेषां कलहसमाधानं विधेयमित्यग्रत उपसृत्यारे पंडिताः ।

विद्यामध्ययनैरवाप्य विशदामध्याप्य शिष्यान्बहून्
पांडित्यं समुपार्जितं यदमलं तस्येदमंत्यं फलम् ॥
यद्गत्वा सदसि प्रकर्षमधिकं संसूचयन्नुच्चकै-
र्यत्किंचित्प्रलपेत्परं परिभवेत्कैरप्युपायैर्भृशम् ॥ ८९ ॥

मीमांसकप्रभृतयः—श्रीकृष्णभक्तसंनिधिसमुद्बुद्धप्राचीनपुण्यपुंजाः स्वकर्मस्वेव सलज्जाः रेरे महापुरुष सम्यगस्मद्धितं च ब्रूषे । पुनरेतादृशं विविच्योच्यताम् ।

श्रीकृष्णभक्तः—मीमांसकं पुरस्कृत्य भवतां किलायं सिद्धांतः । यत् ।

अधीत्य शास्त्राणि गुरोः सकाशादध्याप्य शिष्यानपि भूरिवारं ॥
द्वावेव साध्यौ विदुषा पुमर्थौ मूढेषु रूढिश्च घनं धनं च ॥ ९० ॥

तत्र रूढेस्तावत्स्वरूपं श्रूयताम् ।

मत्वा शीर्षा यतसे येषु जनेषु प्रतिष्ठायै ॥

१ सदृश । २ नित्यद्रव्यवृत्तयोविशेषास्त्वनंता एव । ३ वृद्धिः । ४ श्रम करून ।

तेषु गतेषु विनाशं क्वनु तव तिष्ठेत्प्रतिष्ठेयम् ॥ ९१॥

धनस्यापि स्वरूपं श्रूयताम् ।

क्लेशैरर्जितमप्येतद्धनमेव प्रयास्यति ॥

यद्वा धनं विहायायं स्वयमेव प्रयास्यति ॥ ९२ ॥

मीमांसकः—पुनरेतादृगुच्यताम् ।

श्रीकृष्णभक्तः—श्रूयताम् ।

अत्यंतादरयुक्तैर्मुनिभिर्मुक्त्यै निरूपिता विद्या ॥

उदराव्हगर्तपूर्त्यै शिव शिव विनियोजिता धूर्तैः ॥ ९३॥

मीमांसकप्रभृतयः—स्वगतम् । अहोऽस्माकमनेनैव कश्मलेन सर्वमायुर्यापितं ॥ (प्रकाशम्) पुनरपि एतादृगुच्यताम् ।

श्रीकृष्णभक्तः—

व्यापारमुन्नतरमारभते सुखाय प्राप्नोति किंतु मुहुरेष विषादराशिम् ॥

इत्थं वृथा व्रजति कृष्णपदारविंदद्वंद्वानुबंधविमुखस्य समस्तमायुः ॥ ९४ ॥

मीमांसकप्रभृतयः—(स्वगतम्) तदिदमनेनास्मन्यानसवर्त्येवोच्यते । तदयं प्रष्टव्यः । (प्रकाशम्) अये महापुरुष अस्माभिर्द्वावेव पुरुषार्थाववगतौ । संपत्तिर्लोकरूढिश्च । तयोः स्वरूपं निरूपितमेवायुष्मता । अनुभूयते चास्माभिः । किंतु भवदनुमतपुरुषार्थावगमं कांक्षामः ।

श्रीकृष्णभक्तः—श्रूयताम् । श्रीकृष्णभक्तिरेव परमः पुरुषार्थः । तथाहि ।

कविभिर्भुक्तिविमुक्ती पुरुषार्थेषु प्रकर्षतो गणिते ॥

तृणलतिके इव ते हरिभक्तेः पुरतः सतां स्फुरतः ॥ ९५ ॥

तस्माद्धरिभक्तिसाधनं श्रवणकीर्तनादिकमेव कर्तव्यमिति महांतो मन्यंते ।

मीमांसकः—अये महापुरुष । श्रीकृष्ण एव निरूप्यताम् ।

श्रीकृष्णभक्तः—श्रूयताम् ।

योयं पूर्णसुखात्मकोयमनुभांत्येते रवींद्वादयो[२]

येनेयं धरणी धृता सुरवरायास्मै बलिं तन्वते[३] ॥

यस्मादेव चराचरं समभवद्यस्यैव लीलेदृशी

यस्मिन्नेव विलीयते च सकलं तद् ब्रह्म कृष्णाभिधम् ॥ ९६ ॥

शाब्दिकतार्किकौ तावतोत्पन्नविवेकौ भगवदाराधनाय निष्क्रांतौ ।

तावत्प्रविश्य पंडितो वेदांती । कः प्रसंगो जायते तत्रभवताम् ।

मीमांसकः—श्रीकृष्णभक्तमुद्दिश्यायं किल महापुरुषः श्रीकृष्णाख्यं परं निरूपयति । तद्भक्तिंच परमपुरुषार्थं वर्णयति ।

---

१ आपल्याशौच । २ सूर्यचंद्रादयः । ३ पूजाम् ।

वेदांती—श्रीकृष्णभक्तं प्रति । कथमरे उपनिषत्परिशीलनशून्यान्प्रतारयसि ।

क्वेयं कृष्णसमाख्या क्व च तद्भक्तिः क्व वा पुमर्थोसौ ॥
कल्पितमेव समस्तं ब्रम्हणि नास्त्येव वास्तवं किंचित् ॥ ९७ ॥

मीमांसकः—

रे कल्पितमपि जल्पसि जहासि नैवाल्पमेतच्च ॥
बुद्धिं परस्य भेत्तुं केवलमेतद्धि पांडित्यं ॥ ९८ ॥

वेदांती—

आगमशिरोनिरूप्यं ब्रम्हैवाहं न संशयस्तत्र ॥
यानपि पश्यसि विषयान्मृगजलमिव तानवेहि त्वम् ॥ ९९ ॥

अतश्च ।

यत्र न धर्माधर्मौ स्वर्गो नरकश्च दूरतोपास्तौ ॥
तत्रात्मानं लभतां कुत्र च श्रीकृष्णगोचरा भक्तिः ॥ १०० ॥

मीमांसकः—अलमलम् । एतन्नास्तिकप्रलपनम् ।[1]

वेदांती—किमिति गालिप्रदानं क्रियते । यतः श्रुतिप्रामाण्यमंगीक्रियते ।

मीमांसकः—कस्यैवेतदनिष्टं परंतु तत्वबोधोत्तरमेवम् ।

वेदांती—श्रीकृष्णभक्तं प्रति । तत्वबोधात्प्रागपि वस्तुगत्या नास्ति ।

मीमांसकः—आस्तां वस्तुगतिस्त्वेषा पारिभाषिकी ।

तावदुद्विग्नः श्रीकृष्णभक्तो मीमांसकं प्रति । अये गम्यते ।

मीमांसकः—ससंभ्रमम्[2] । किमिति किमिति ।

श्रीकृष्णभक्तः—

युष्माभिः परिशील्यतां प्रतिदिनं शास्त्रार्थकोलाहल-
स्तत्रैवानिशवर्धमानशुभताध्यासानुवृत्तेर्वशात् ॥
प्रागंगीकृत एव सोयमधुना नास्माभिरादृीयते
श्रीगोपालपतेस्त्रिकालभजनानंदानुबंधादिह ॥ १०१ ॥

मीमांसकः—वेदांतिनं प्रति । तूष्णीं तिष्ठ कोलाहलो न कर्तव्यः । महाभागस्यैतस्य वचसा क्षणं विश्रांतिसुखमनुभूयताम् । श्रीकृष्णभक्तं प्रति । अये महापुरुष भजनं भक्तिरिति पर्यायौ । ततश्च ।

आदौ वेदाध्ययनं धर्मज्ञानं ततस्त्वनुष्ठानं ॥
तदनु च फललाभः स्यात्का भक्तिः स्यादितोप्यपरा ॥ १०२ ॥

यदानंदानुबंधेन सततमनुरागेणास्मत्कर्तव्यात्कोलाहलादुपरम्यते तत्रभवता ।

---

१ उपनिषत्। २ सभयम्।

श्रीकृष्णभक्तः—सत्यम् । वेदाध्ययनादि कर्मापि हरिभक्तिरेव । किंतु भगवति समर्पितं नान्यथा । तथाहि ।

आम्नायः[1] परिशील्यतामथ नयैर्[2]धर्मोपि विज्ञायता-
मग्न्याधानमुखेन यज्ञविततिर्वैधी समाधीयताम् ॥
यत्त्वेतत्सकलं रमेशविमुखैस्तुच्छे फले योज्यते
तद्रत्नावलिरुत्तमा बत शुनः पुच्छे परं बध्यते ॥ १०३ ॥

किंच ।

यज्ञाद्या खलु धर्मसंततिरियं वेदांबुधेर्निगता
भूरिक्लेशकरी समाकलयते साम्यं विषज्वालया ॥
सैव स्वर्गपदाद्युपेक्ष यदि तु श्रीकृष्णमालंबते
तर्हि प्रौढसुखोन्नतिं विदधती पद्मेव विद्योतते ॥ १०४ ॥

विदधातु धर्मविततिं न तु यदुपतिमंतरेण गतिरस्ति ॥
सत्यपि सुदृढे पोते[3] न कर्णधारं विनैति बत पारम् ॥ १०४ ॥

वेदांती—भगवद्गुणानुवादश्रवणक्षपितकल्मषतया विनयं विधाय श्रीकृष्णभक्तं प्रति ॥ श्रीमन्श्रीकृष्णोद्देशेन यज्ञाद्यनुष्ठानमुच्यते । तत्किं मुक्तिसाधनसंपदो नोद्देश्याः । ततश्च ।

साधनसंपदभावे लभेत मुक्तिः किमात्मानम् ॥
संसृतिरेव तथा सति बाधेतामुं मुहुर्मुहुः प्रसभम् ॥ १०५ ॥

श्रीकृष्णभक्तः—

आनंदसिंधुमेनं विष्वक्सेनं[4] निषेवमाणानाम् ॥
क्षणमिव भवति विमुक्तिस्तत्साधनसंपदां तु का वार्ता ॥ १०६ ॥
दास्यं विधातुमस्य स्वत एवायांति ताः सर्वाः ॥
पश्यत्यपि तु न भक्तः श्रीपतिपदसेवनासक्तः ॥ १०७ ॥

वेदांती—तत्किमनादरादेताः परावर्तंते ।

श्रीकृष्णभक्तः—नहि नहि । यतः ।

सा सा साधनसंपच्छ्रीपतिभक्तं कदापि न जहाति ॥
तस्मिन्निसंगलुब्धा लक्ष्मीरिव पुंडरीकाक्षम् ॥ १०८ ॥

अथवा नैवास्तां साधनसंपत् । नैतावतापि काचित्क्षतिः ।

वेदांती—ननु कथमेतद्युज्यते ।

श्रीकृष्णभक्तः—कथं न युज्यते । यथोक्तं महाभारते ।

या या साधनसंपत्तिः पुरुषार्थचतुष्टये ॥

---

१ वेदः । २ नीतिभिः । ३ नौका । ४ जनार्दनम् ।

तया विना तदाप्नोति नरो नारायणाश्रयः १०९ ॥

इति ॥

वेदांती—नारायणाश्रयेणैव पुरुषार्थचतुष्टयावाप्तिश्चेत्कथं साधनसंपत् । नहि यदंतरेण यज्जायते तत्तस्य साधनं न भवति ।

मीमांसकः—एवं तर्हि विकल्पो भविष्यति ।

श्रीकृष्णभक्तं प्रति । महापुरुषार्थो नारायणाश्रयेणैव लभ्यत इत्येतद्विविच्य निरूप्यताम् ।

श्रीकृष्णभक्तः—श्रूयताम् ।

यो यज्ञदानाद्यनुष्ठानाद्यश्च चांद्रायणादिकात् ॥
श्रुतिपारायणादर्थो यः स नारायणाश्रयात् ॥ ११० ॥

तथाहि ।

नाधीताः श्रुतयः श्रुतिष्वभिहितं यज्ञादि नानुष्ठितं
स्मार्तं कर्म न चापि किंचन कृतं चीर्णं[1] न कृच्छ्रादिकं ॥
तातेनावमतः परंतु शरणं गत्वैव नारायणं
सर्वोत्कृष्टपदं मुदाधिगतवानौत्तानपादिः शिशुः ॥ १११ ॥

मीमांसकः—शिशवे कथमेतद्दत्तवाञ्श्रीभगवान् ।

श्रीकृष्णभक्तः—एतादृशमेवास्य शीलम् । पश्य ।

शिशुर्भवतु वा पशुर्भगवतः समाराधनं
य एव कुरुते जनः कपटहीनमत्युत्कटम् ॥
स एव कमलापतेः सकलकांक्षितं कुर्वतः
स्वकंठमणिसन्निभो मनसि वल्लभो जायते ॥ ११२ ॥

मीमांसकः—

ब्रम्हादिभिर्दुराराध्यं समाराध्य स्वयत्नतः ॥
यो रमावल्लभस्यापि वल्लभोभूत्पशुः स कः ॥ ११३ ॥

श्रीकृष्णभक्तः—श्रूयतां । कश्चित्खलु गजेंद्रः सरसोंतर्जले क्रीडन्नधिकबलेन जलचरेण गृहीतचरणः स्वात्मानं मोक्तुमसमर्थः श्रीहरिमेव शरणं गतवान् । तद्यथा ।

मातंगाः कलभाः करेणुसहिता मामेव ये संश्रिता-
स्ते मां क्षीणबलं निरीक्ष्य सुहृदोप्युज्झित्य मां प्रस्थिताः ॥
कर्तारं जगतां समस्तविपदां हर्तारमेव श्रियो
भर्तारं तु विना न संकटसमुद्धर्तारमीक्षे परम् ॥ ११४ ॥

तस्य त्वलौकिकी शक्तिः । यथा ।

---

१ न कृतम् । २ ध्रुवः ।

मुग्नामुद्धृतवान्स एष भगवानुर्वीं पुरैकार्णवे
गुर्वीं तां गिरिभिः सहैव निदधे नौकामिवाबूपरि ॥
किं चोपर्युपरि द्विसप्तभुवनश्रेणी तदालंबना
भात्यल्पा पिहितोर्ध्वकुंभरचना शुद्धेतरिक्षेचाति ॥ ११५ ॥

इत्येवं विमृश्याक्रोशं कृतवान् ।

मीमांसकः—कथं कथम् ।

श्रीकृष्णभक्तः—श्रूयताम् ।

कारुण्यैकनिधे सुखैकजलधे कंदर्पकोटिस्फुर-
ल्लावण्योपचयावधे निजजनक्षेमावतारोपधे ॥
लक्ष्मीनायक वेदगायक सतां नित्यं सुखोन्नायक-
प्रौढारातिमदापनोदक हरे ग्राहादितस्त्राहि माम् ॥ ११६ ॥

अपिच ।

उद्धृतवानसि पृथ्वीमुद्धरासि च निजपदांबुजस्मर्तॄन् ॥
अमुतः पृथुसंकटतः श्रीधर मामुद्धर ग्लानम् ॥ ११७ ॥

मीमांसकः—एवमाक्रोशे किमाचरितं भगवता ।

श्रीकृष्णभक्तः—वैकुंठे लक्ष्म्याः पर्यंकावस्थितो भगवान् ।

इत्याक्रोशरवैः कृपापरवशास्तल्पस्थितामिंदिरां
नापृच्छद्गमनाय नापि गरुडं सस्मार नोपानहौ[1] ॥
सद्यः कर्तुमिभेंद्रपीडनकृतो ग्राहस्य वक्त्रच्छिदा-
मेकं किंतु सुदर्शनं करतले धृत्वा बहिर्निर्ययौ ॥ ११८ ॥

अपि च ।

पर्यंकस्थितया कदाचन रहः प्रीत्यापहृत्य श्रिया
यत्स्वप्रावरणीकृतं तदमुना नाप्युत्तरीयं स्मृतम् ॥
पश्चात्तत्परिचारिकोपगमितं स्कंधे निधाय स्वतः
संप्राप्तं त्वरयाधिरुह्य गरुडं सद्यः प्रतस्थे हरिः ॥ ११९ ॥

गरुडोपि तथा प्रस्थितवान् । यथा गजेंद्रकृताक्रोशेन समनंतरमेव प्राप्तो भवति भगवान् ।

मीमांसकः—

दिवि भुवि पाताले वा नेदृक्चित्रं क्वचिद्दृष्टं ॥
पवनादपि मनसोपि च चलति सवेगं विहंगो यत् ॥ १२० ॥

श्रीकृष्णभक्तः—किं चित्रम् । शृणु ।

---

1 पादुकाम् ।

मरुति मनसि या वै शक्तिरस्ति प्रयाणे[1]
जगति विदितमेषा केवलं चक्रपाणेः ॥
तमभिवहति पृष्ठे यः स ताभ्यामुभाभ्या-
मधिकगमनशक्तिस्तत्र किं चित्रमस्ति[2] ॥ १२१ ॥

अन्यथा हि वाह्यवाहकभावो न स्यात् ।

मीमांसकः—ततस्ततः ।

श्रीकृष्णभक्तः—अथ भगवान्

एकेनैव करेण तत्सरसिजं जग्राह भक्तप्रियः
सग्राहं तमथापरेण सलिलादुत्कृष्टवाञ्छुंडया ॥
चक्रेणाथ परेण वक्रमलुनान्नक्रस्य रोषान्वितः
स्पृष्ट्वान्येन ततो गजेंद्रमकरोत्स्वं पार्षदं हर्षदः ॥ १२२ ॥

अपिच ।

इंद्रनीलमणिसन्निभद्युतिः सद्य एव तु चतुर्भुजाकृतिः ॥
विस्फुरत्कनकनिर्मलांबरः शोभते स्म भगवानिवापरः ॥ १२३ ॥

मीमांसकः—अत्रभवतः श्रीभगवतः किमिति समर्थाः सेवका न संति ।

श्रीकृष्णभक्तः—असंख्याताः संति । तत्र कतिचिच्छ्रूयताम् ।

त्रिजगति विदितः फणिपतिरतीव शक्तः श्रियः पतेर्भक्तः ॥
पृथ्वीतलमिदमखिलं सर्षपतुल्या[3] बिभर्ति फणया यः ॥ १२४ ॥

तथा ।

चरणोदकमस्य हरेरनिशं गिरिशो दधाति शिरसा यः ॥
त्रिभुवनखेदनमस्मादपरास्त्रिपुरं निहंति कः खेचरं[4] ॥ १२५ ॥

तथा ।

कमलासनोप्यतिसमर्थतया विदितो रमारमणसेवनकृत् ॥
य इदं जगद्विहितवान्विविधं विसहाय एव सहसा सकलम् ॥ १२६ ॥

तथा ।

ब्रह्मांडसंज्ञबहुभांडनिबद्धभारा यद्रोमकूपविवरेषु कति स्फुरंति ॥
यस्तं वहन्वियति धावति चित्ततोपि सामर्थ्यमस्य गरुडस्य कियन्निरूप्यम् ॥१२७॥

अपरोप्यतिसमर्थः श्रीहरिभक्तः । सोयं श्रीसूर्यः । तथाहि ।

कृत्स्ना भूमिरियं जनैः परिवृता यं कर्णधारं विना
नौकेवाप्सु निमज्जति प्रतिनिशं स्फारांधकारांबुधौ ॥
यश्चागत्य कृपानिधिर्हरिरिव क्रोडावतारे स्वयं

1 गमने । २ आश्चर्यम् । ३ मोहरी ४ आकाशसंचारी

तामेतां सहसोद्धरत्यनुदिनं कस्तेन तुल्योपरः ॥ १२८ ॥
सिंहासनोपविष्टे भगवति तिष्ठति कृतांजलिर्योसौ ॥
नाकस्य पृष्ठ एकः स जयति पाकस्य[1] शासिता वज्री ॥ १२९ ॥

मीमांसकः—सत्स्वपि अतिसमर्थेषु सेवकेषु गजपतिविमोचनाय यदयं सपदि स्वयं धावनं कृतवान्श्रीभगवान् । तत्प्रायः कौतुकेन ।

श्रीकृष्णभक्तः—

शक्तेष्वपि स भक्तेषु द्विपाय[2] स्वयमाययौ ॥
तदेतद्भक्तवात्सल्यहेतुकं न तु कौतुकम् ॥ १३० ॥

न खलु कौतुकावसरः । यथातिसमर्थो भृत्यामात्यः सार्वभौमो राजा स्वतनये शिशुभिः सह क्रीडासमये महति गर्ते निपतिते तच्छ्रुत्वा स्वयमेव धावति वात्सल्यात् । एवं भक्तार्थे श्रीकृष्णः ।

मीमांसकः— भगवतो भक्तवत्सलत्वमवगत्य भक्तिमेव साधयितुकामो निष्क्रांतः ।

वेदांती—स्वगतम् ।

साधनसंपदभावादनधिकृतानां वयोस्माकम् ॥
शुष्कब्रम्हनिरूपणवार्ताभिर्व्यर्थमेवागात् ॥ १३१ ॥

अपि च ।

वचसि वसति पूर्णब्रह्मवार्ता विशुद्धा
मनसि तु विषयाणामस्ति तृष्णा विवृद्धा ॥
भवति यदि तु वृत्तौ चात्मतत्वावबोध-
स्त्रिजगति ननु कोधःपातमायातु लोभात् ॥ १३२ ॥

तस्मात् ।

धन्यास्त एव कतिनश्चय एव विष्णोः संसेवनेन सकलं कलयंति कालम् ॥
भक्तप्रियस्य करुणावरुणालयस्य[3] यच्छ्रीपतेरमृतदृष्टिपथे पतंति ॥ १३३ ॥

तदधुना मधुनाशनगुणकीर्तनमेव क्रियमाणं श्रूयमाणं वा श्रेयःसाधनेषु साधु मन्यामहे । प्रकाशं । श्रीमन् । भगवतः सेवनीयत्वनिमित्तभक्तवात्सल्यं दयालुत्वं चावगतम् । वदान्यत्वमपि[4] सेवनीयत्वे निमित्तम् । यतः ।

यस्य न स्याद्वदान्यत्वं तस्य किं स्यान्निषेव्यता ॥
मर्त्यास्तमेव सेवंते लभंते स्वहितं यतः ॥ १३४ ॥

तदपि किं भगवतो वर्तते ।

श्रीकृष्णभक्तः—अद्भुतं वर्तते । तथाहि ।

श्रीमन्माधवराजात्रिजगति नान्यो वदान्योस्ति ॥

---

१ पाको नामासुरः । २ गजाय । ३ समुद्रस्य । ४ दानशौंडत्वम् ।

यो विद्वेषिजनेषु प्राज्यं वितरति विमुक्तिसाम्राज्यम् ॥ १३५ ॥

वेदांती—केषु केषु द्वेषिजनेषु विमुक्तिप्रदो भगवान् ।

श्रीकृष्णभ०—कदाचित्किल कमलासनत्रिलोचनसहस्रनयनप्रभृतिभिः सुरपतिभिः प्रार्थितोऽवनितलगतनरपतिव्याजादितिसुतसमाजसेनाशतसहस्रकृतमहीभारापहाराय यदुकुले वसुदेवगृहे जातः पूर्णावतारो भगवान् श्रीकृष्णः वसुदेवेन गोकुलमुपानीतो यदा यशोदाशयने एव स्थितस्तदा ।

कंसस्य काप्यनुचरी भुवि पूतनाख्या नक्तंचरी क्षयकरी बत बालकानाम् ॥

द्वेषादपाययदमुष्य विषं स्तनाभ्यां तामेष निर्मलपदे निदधे मुकुंदः ॥ १३६ ॥

अपिच ।

अमुना त्रिभुवनपतिना छिद्रान्वेषी सदैव विद्वेषी ॥

गमितः किल शिशुपालस्त्रिदशनृपालस्य दुर्लभां पदवीम् ॥ १३७ ॥

एवमन्येपि बहवः । तस्मात् ।

इंद्रनीलमणिनीलिमश्रिया सुंदरोमरधुरंधरो हरिः ॥

येन केन बत हेतुना मनः संश्रितो हरति संसृतिश्रमम् ॥१३८॥

तथाहि ।

गोपगृहिण्यो मदनादंबुजसदनावदेनमेवापुः ॥

किंच भयस्यावेशात्कंसो लेभे यदूत्तंसम् ॥ १३९ ॥

वेदांती—इदमपरमद्भुतम् ।

यत्किल कामजयादिकविपुलक्लेशैरपीह दुरवापम् ॥

कामेनैव तदेव ब्रम्हाधिगतं व्रजस्थवनिताभिः ॥ १४० ॥

इदं चापरमत्यद्भुतम् ।

यस्य कस्यापि विद्वेषान्नरो निरयमृच्छति ॥

द्वेषानुबंधो गोविंदे भवबंधविमोचनः १४१ ॥

श्रीकृष्णभक्तः—नैतदद्भुतम् । वस्तुशक्तिः खल्वेषा । पश्य ।

द्वेषो दोषविशेषो भगवति विहितः स संसृतिध्वंसी ॥

गांगे पाथसि मिलितं निहंति दुरितं हि रथ्यांबु ॥ १४२ ॥

एवं कामो दोषोद्दामो भगवतीत्यादि पठनीयम् ।

किंतु ।

द्वेषादेष विशेषो भगवति विहितस्य कामस्य ॥

द्वेषः स्मृतिं विधत्ते कामस्त्वनुरागमाधत्ते ॥ १४३ ॥

---

१ बहुलं । २ ब्रह्मदेवः । ३ मिषं । ४ श्रीकृष्ण । ५ गोपिकाभिः । ६ नरकं । ७ संसारः ।

तद्यथा ।

मदनो व्रजवनितानामनुरागं नंदनंदने विदधे ॥
द्वेषः केवलमस्य स्मरणं चैद्यस्य संदधे मनसि ॥ १४४ ॥

वेदांती—कस्तर्हि भक्तानां विशेषः ।

श्रीकृष्णभक्तः—अयं विशेषः ।

सततं स्मरंति यदुपतिमनुरज्यंतेऽन्यतो विरज्यंते ॥
पश्यंति विषयवर्गं परमपवर्गं च तुल्यदृष्ट्याऽमी ॥ १४५ ॥

तथाहि भक्तानाम् ।

बुद्धिर्या भगवत एव पादपद्मे पद्मेव श्रयति रतिं प्रवर्धमानाम् ॥
तत्सौख्यं हृदि परमं समुद्वहंती जानंती कथमिह सा ततोन्यमिच्छेत् ॥ १४६॥

अपिच ।

पाणिभ्यामतिपुष्कलेन विधिना तत्पूजनं तन्वते
वाण्या तद्गुणवर्णनं विदधते श्रोत्रेण चाकर्णनम् ॥
स्थित्वा वा पुरतः करेण चमरं धृत्वाय संवीजनै-
र्धन्याः प्रीतिपुरस्सरं परिचरंत्येनं त्रिलोकीश्वरम् ॥ १४७ ॥

ततश्च ।

तस्मात्तदीयेन जनैकबंधोरानंदसिंधोरिह सेवनेन ॥
कालं नयंते गणयंति किं ते स्वांते स्वके स्वर्गमुतापवर्गम् ॥ १४८ ॥

किंच ।

यच्चरणौ परिचरतो भुक्तिर्मुक्तिश्च पादुके भूत्वा ॥
तत्परिचर्यैवातः ख्यातः पुरुषार्थनिष्कर्षः ॥ १४९ ॥

तत्सिद्धो भक्तानां विशेषः ।

वेदांती—भृशमनुतप्तः सन् । अये महापुरुष ।

प्राचीनपुण्यनिचयैर्विलसति परिपाक एष विद्यायाः ॥
यत्फलमतीव मधुरा भगवत्यनुरागवृत्तिरुल्लसति ॥ १५० ॥

तदहं परिशीलितसकलशास्त्रार्थतत्त्वोपि प्राकृतपुण्यनिवहविरहवशेन विषयाभिनिविष्टतयातिनिकृष्टमतिर्गोपालएव केवलमस्मि । एवं सति ।

इह खलु लघवः प्रभावः सहसा कृपयंति तो गुणिष्वपि चेत् ॥
लोकत्रयपतिरेष तु कृपयतु कथमीदृशे दीने ॥ १५१ ॥

श्रीकृष्णभक्तः—हीनत्वं महत्त्वं वा नैष विचारयति ।

---

१ चैद्यनामासुरः । २ मोक्षं । ३ सेवां कुर्वंति । ४ अंतःकरणे । ५ गुरें राखणारा

तथाहि ।

ब्रह्मेंद्रादिसमस्तदैवतकृतोपास्ति ग्रहीतुं क्षणो
नास्त्येतस्य निषेवितपदांभोजद्वयस्य श्रिया ।
सोऽयं गोकुलवासिलोकवशगो यष्टिं गृहीत्वा करे
स्कंधे कंबलवाहकः कलयते गोपालनं कानने ॥ १५२ ॥

अपि च ।

यद्दर्शनाय दधति द्वास्थानुनयं चतुर्मुखप्रमुखाः
मदनविमोहनमेनं व्रजवासिजना यथेष्टमीक्षंते ॥ १५३ ॥

किंच ।

सरसिजनिलयाविलासचर्याविधिषु सदा हृदि यस्य निस्पृहत्वम् ॥
त्रिभुवनगुरुरेष गोपिकाभिः सह परिहासकथाः स्वयं तनोति ॥ १५४ ॥

तस्मात् ।

कृपयति केवलमेष स्वीयजनेषु स्वभावतो भगवान् ॥
उदितः शीतमयूखः कुमुदवनानि प्रमोदयत्येव ॥ १५५ ॥

वेदांती—एतदेव विवृत्योच्यताम् । यतो हीनजनेषु कृपालुत्वं भगवतो निशम्य मनसि भगवत्सेवनोत्साहः प्रादुर्भवति ।

श्रीकृष्णभक्तः—श्रूयताम् ।

नैषा योगिषु नामरेष्वपि न च ब्रह्मादिकेष्वप्यसौ
या गोपेषु कृपा भृशं भगवता संदर्शिता यत्कृते ॥

अपि सुकुमारेण नंदकुमारेण सता ।

दावाग्निर्वदनांबुजेन गिलितः पादांबुजेनामुना
दुष्टाहिर्दलितः क्षणेन कलितः पाण्यंबुजेनाचलः ॥ १५६ ॥

वेदांती—दाहकत्वाद्दावाग्निगिलनं दुष्टत्वादहिदलनं चोपपद्यते । अचलाकलने हेतुरुच्यताम् ।

श्रीकृष्णभक्तः—कदाचित्किल पुरुषधुरंधरेणामुना पुरंदरमखे भग्ने ।

संक्षोभादमरावतीनृपतिना वृष्टिः किलाकालिकी
प्रारब्धा महती शिलाजलमयी खिन्ना व्रजस्था जनाः ॥
तत्क्लेशोप्यसहिष्णुरेष शिशुतानाट्यानुरोधं हरि-
र्विस्मृत्यैव गिरिं दधार कृपणत्राणोत्सुकः पाणिना ॥ १५७ ॥

वेदांती—अये महापुरुष । संसारार्णवकर्णधारा नृसिंहादयोवताराः संति । तत्कथं श्रीकृष्णएवादरः क्रियते ।

---

१ द्वारपालानां प्रार्थना । २ लक्ष्मी । ३ चंद्रः । ४ नाखाडी इति प्राकृते ।

श्रीकृष्णभक्तः—सत्यं संति । किंतु तेषां नरसिंहादीनां स्वभक्तप्रल्हादादिसंरक्षणार्थमेव क्रोधाद्यवलंबनं दृश्यते । एतस्य तु विपरीतैव रीतिः । तथाहि । गोकुलवासिनां ।

भक्तानां समुपद्रवं प्रविदधे शक्रो यदा वर्षणै-
र्न क्रोधं विदधे छलं च न दधे मोहं च नैवाददे ॥
गोपालोतिकृपालुरेव सहजस्थित्या झटित्यादृतः
शैलस्योद्धरणान्निजैकशरणान्लोकान्परित्रातवान् ॥१५८॥

अपि चावतारांतरेषु न तावंत्यद्भुतानि चरित्राणि । यान्येतस्मिन् । तथाहि ।

त्रिभुवनगिलनसमर्था दिविषदनर्थाय या सदा यतते ॥
बकभगिनीयमनेन स्तनपानेन प्रणाशमागमिता ॥ १५९ ॥

तथा ।

अतिदृढमतिगुरुशकटं दधिदुग्धघटं कदाचिदेतेन ॥
अतिमृदुपदाभिघातान्नाशितमुत्तानशायिना शिशुना ॥ १६० ॥

अन्यदपि । दधिदुग्धस्तेयापराधेप्यतिस्निग्धया यशोदया स शिक्षार्थं वत्ससंबंधिन्यैव रज्ज्वा उलूखले निबद्धः । कदाचिद्यमलार्जुनयोरंतरेण गतस्तिर्यग्गते उलूखले ।

रज्ज्वा वत्सस्य बंधिन्या तिर्यग्गतमुलूखलम् ॥
कर्षितं पातितौ सद्यः पादपौ यमलार्जुनौ ॥ १६१ ॥

वेदांती—अन्यदुच्यतां भगवच्चरित्रम् ।

श्रीकृष्णभक्तः—

बालकेन सतानेन व्रजोपद्रवकारकः ॥
गले धृत्वा तृणावर्तः क्षणादेव प्रणाशितः ॥ १६२ ॥
यमुनाजलसंमिलिते कालियहालाहले गिलिते ॥
वत्सानपि च वयस्यान्कृपयावेक्ष्यैव रक्षितवान् ॥ १६३ ॥

किंच ।

अधिरुह्य कौतुकवशादुपरि फणानांच नृत्यमाचरता ॥
अमुना दमितो भुजगो यमुनामजहात्स्वजीवनाकांक्षी ॥ १६४ ॥

एवमनंतान्यद्भुतानि कियंति वक्तव्यानि ।

वेदांती—तथापि किंचिदुच्यताम् । नह्यमृतं परित्यज्यते ।

श्रीकृष्णभक्तः—

वेणुं वादयते यदा यदुपतिर्वृंदावने तत्क्षणे
तत्रायाति समस्तगोकुलवधूवृंदं किमत्राद्भुतं ॥

१ धारणम् । २ गाडा । ३ उताणा निजणारा । ४ समूहः ।

गीर्वाणाश्चतुराननप्रभृतयोप्याकर्ण्य वेणुध्वनिं
धावंत्याशु परस्परस्य पुरतः कृष्णावलोकोत्सुकाः ॥ १६५ ॥

अपिच ।

न नरसुरासुरनिकरेष्ववतारेष्वपि न तादृशो ददृशे ॥
रंजयति कंजनयनो[1] मुरलीरवलीलयैव यो विश्वम् ॥ १६६ ॥

अन्यच्च ।

व्रजनिखिलयुवत्यः कृष्णमेवाभ्यधाव-
न्नथ कतिचिदमूषां कृष्णसान्निध्यमापुः ॥

तदायमग्रतो गतः ।

तदनधिगमखेदं दूरगानामवेत्य
प्रतियुवतिदयालुः संदधे सन्निधानम् ॥ १६७ ॥

एवं षोडशसहस्रस्त्रीजनेष्वपि विश्वात्मकता चास्मिन्नेवावतारे प्रकटिता । तथा बाल्येपि तावत् ।

दत्वा स्तनं पुरत एव धृतस्य तस्य
लावण्यमद्भुतमुदीक्ष्य सुविस्मितायै ॥

मात्रे—

जृंभा[2]मिषेण भुवनानि चतुर्दशापि
प्रादर्शयत्स्फुटमसौ वदनारविंदे ॥ १६८ ॥

अन्यदपि मृद्[3]भक्षणाभियोगे ।

न दधि ते न पयो न घृतं बते-
त्यहह खादसि तेन मृदं सदा ॥

इति स्वसंपदं व्यंज[4]यंत्यां स्वात्मनि च हीनत्वं समारोपयंत्यां तस्यां कियती तव संपदित्यंतः कुपित इव ।

स्ववदने भुवनत्रयसंपदां
स्फुटमदर्शयदात्मनि पूर्णताम् ॥ १६९ ॥

वेदांती—तत्किमयं पूर्णावतारः ।

श्रीकृष्णभ०—अथ किम् । अतएव ।

निजपदसरोजसेवनसंततरासिकाय पार्थाय ॥
युद्धोपक्रम[5]समये दर्शितवानेष विश्वरूपं स्वम् ॥ १७० ॥

एवमान्यत्रापि बहुधा ।

तस्मादस्माकमेकोयं सदा गोकुलनायकः ॥

---

१ कमलनयनः । २ जांभई । ३ मृत्तिका । ४ प्रकटयंत्याम् । ५ प्रारंभः ।

सेव्यो भवति भाग्येन भूरिणा भगवानिह ॥ १७१ ॥

वेदांती—भवंतो भाग्यवंत एव यतो भगवंतं सेवंत एव किंतु का गतिर्भगवति भक्तिशून्यानाम् ।

श्रीकृष्णभक्तः—विस्पष्टैव गतिः ।

अद्य श्वो वा मरिष्यंति विचरिष्यंति रौरवे ॥
हरिं यदि स्मरिष्यंति तरिष्यंति भवार्णवम् ॥ १७२ ॥

वेदांती—आस्तामेतत् । महापुरुष ।

वैराग्यं गगनप्रसूनमिव न प्रादुर्भवत्येव चे-
त्स्वांते शांतिसुखं कथं नु विषयैकांतप्रियस्योदयेत् ॥
किं त्वस्मिन्निखिलेंद्रियाभिरमणप्रोद्दामतत्तद्गुण-
श्लाघ्ये संप्रति मे मनो भगवति श्रीवल्लभे धावति ॥ १७३ ॥

अपिच ।

अध्यात्मप्रतिपादनं प्रतिदिनं शिष्येषु संपादितं
तत्तु क्ष्मातलवर्तिवाग्मिविहितस्वर्वार्तिवार्तोपमम् ॥
युष्मत्संगमतस्तदेतदधुना ज्ञातं कथंचिद्रमा-
नाथं संश्रयतः स्फुरंति परितः पुंसः सुखस्यार्णवाः ॥ १७४ ॥

तदहमधुना भगवदाराधनानुरक्त एव कालं परिकलयिष्यामि ।

श्रीकृष्णभक्तः—एवं तर्हि गच्छावः श्रीमथुरायामाराधयावः श्रीभगवंतमिति निष्क्रांतौ ।

कल्पलतेव फलानां ज्योत्स्नेव च भक्तचित्तकुमुदानाम् ॥
खनिरिव मुक्तिमणीनां हरिभक्तिरियं समुल्लसति ॥ १७५ ॥

श्रीकृष्णं समुपैति कोपि विपुलक्लेशैस्तपस्यादिभिः
सद्यः सौख्यघनेन कश्चन पुनः संसेवनेनैति तम् ॥
पद्मामध्वनि कोपि याति निरुपानद्धामतीवातपे
कश्चिन्ममत्तमतंगजोपरिगतश्छत्रेण चालंकृतः ॥ १७६ ॥

क्लेशान्विनाशयति केशवएव पुंसां
संतोषमेव च स संततमातनोति ॥
शीलं त्विदं भगवतः सहजं विबुध्य
जाता वयं जगति सांप्रतमस्य भृत्याः ॥ १७७ ॥

इति श्रीमदापदेवसूनुना अनंतदेवेन कृतं श्रीकृष्णभक्तिचंद्रिकाभिधानं नाटकं समाप्तम् । श्रीकृष्णार्पणमस्तु ॥

---

१ वेदांतः । २ पंडितः । ३ चंद्रिकेव ।

अनु[1]भूति-लेशः

वन्दे श्रीसच्चिदानन्दं शेष-शायिनमीश्वरम् ।
यत्प्रसादेन पश्यामि यद्रूपं सचराचरम्[2] ॥ १ ॥
ध्यात्वा तं गुरुमात्मानं उपदेश-क्रमं यथा ।
जिज्ञासु-जन-बोधाय प्रवक्ष्यामि समासतः[3] ॥ २ ॥
मुमुक्षु[4]स्तत्व-जिज्ञासुः श्रीगुरुं शरणं व्रजेत् ।
कथं तदादौ वक्ष्यामि गुरुर्हि ब्रह्मणो गुरुः ॥ ३ ॥
अतीते[5]-कल्पे तत्वज्ञाः पुनरावृत्ति[6]-वर्जिताः ।
कल्पेऽस्मिन् ये समुत्पन्ना अज्ञास्ते सर्व एव हि ॥ ४ ॥
अप[7]रोक्षात्मबोधस्तु न स्याद्गुरु-मुखं विना ।
नाज्ञस्य गुरुरज्ञः स्यात् सुप्तः सुप्त-प्रबोधकः ॥ ५ ॥
ततो नित्य-प्रबोधो यो नित्य-मुक्तो जगत्पतिः ।
तेन प्रबोधितो ब्रह्मा यो ब्रह्माणमिति श्रुतेः ॥ ६ ॥
प्रबोधितास्तेन पुत्रा मानसास्तत्क्रमाद्भुवि ।
ज्ञानमागतमित्यस्माद्गुरुर्हि ब्रह्मणो गुरुः ॥ ७ ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ ८ ॥
अतो गुरुं×प्रपद्यन्ते जगत्कारणमित्ययम् ।
जगदात्मतया शिष्यं* कृपया यस्तु पश्यति ॥ ९ ॥
जिज्ञासुरत्र यो ज्ञाता ज्ञेय आत्मा स्वयं हि सः ।
ततस्तस्मै तदात्मत्वं तत्प्रीत्यैवच दर्शयेत् ॥ १० ॥
यस्याविज्ञातस्य विद्या सुप्तस्यैव हि जागरः ।
तथा देहात्मता यस्य तस्यैव हि चिदात्मता ॥ ११ ॥
अतः प्रतीति[8]रज्ञस्य देहोऽहमिति तां गुरुः ।
निषेधयति तस्यैव प्रतीतिः स्यात्तथा स्फुटम् ॥ १२ ॥
ननु त्वं कोऽसि तद्ब्रूहि स्वप्रतीत्या च शास्त्रतः ।
प्रतीत्या देह एवाहं शास्त्र-दृष्ट्या तदन्यथा ॥ १३ ॥

---

१ अनुभूतिः = अनुभवः साक्षात्कारो वा. २ सचराचरम् = सस्थावरजङ्गमम्. ३ समासतः = संक्षेपतः ४ मुमुक्षुः = मोक्षेच्छुः ५ अतीत-कल्पे = गत-कल्पे. ६ पुनरावृत्ति = पुनर्जन्म. ७ अपरोक्षात्मबोधः = साक्षादात्मज्ञानं. ८ प्रतीतिः = अनुभवः

× "प्रपद्येत" इति पाठांतरम्. * "शिष्यः" इति पाठांतरम्.

शास्त्र-दृष्ट्या तयोरन्य इति चेद्ब्रूहि कीदृशः ।
तन्न जानासि चेद्ब्रूहि प्रतीतिस्तव कीदृशी ॥ १४ ॥
देहोऽहमिति जानासि प्रतीत्या श्रवणेन[9] वा ।
प्रतीत्या यदि जानासि तदेव ब्रूहि को भवान् ॥ १५ ॥
देहोऽहमिति जानामि स्वप्रतीत्या जगद्गुरो ।
जानामि देहादन्योहमिति शास्त्र-विमर्शनात्[10] ॥ १६ ॥
नन्वेवमेव स्वप्नेऽपि स्वाप्न-देहात्मता तव ।
अयमेव स देहो वा सोऽन्यो वा स्वप्न-निर्मितः ॥ १७ ॥
अयमेव स देहश्चेत्सुप्तोऽयं स तु धावति ।
तस्मादन्यः स्वाप्नदेहस्तं चात्मत्वेन मन्यसे ॥ १८ ॥
जागरे हि त्वदीयोऽयं स स्वप्ने तत्र को भवान् ।
स्वप्ने नास्य प्रतीतिस्ते न स्वाप्नस्य हि जागरे ॥ १९ ॥
देहात्मता प्रतीतिस्ते तस्मान्मिथ्येत्यवेहि भो ।
न यथा स्वाप्नदेहस्त्वं जागृद्देहोऽपि नो भवान् ॥ २० ॥
स्वप्ने नास्य प्रतीतिस्ते प्रतीतिरपि ते मृषा[11] ।
शास्त्र-दृष्ट्यास्यन्यथा चेत्कीदृशोऽसि वदस्व भो ॥ २१ ॥
देहादन्योऽहमित्येव प्रतीतिरसि चेद्भवान् ।
एवं प्रतीतिरूपो वा प्रत्ययाद[12]न्यथासि वा ॥ २२ ॥
देहादन्योऽहमित्येव प्रतीतिरसि चेद्भवान् ।
सुषुप्ति[13]-काले न त्वेवं प्रतीतिस्तव विद्यते[14] ॥ २३ ॥
त्वं तत्रासि य उत्थाय स्मरसि स्वसुखं हितम्* ।
अथ चेत्प्रत्ययादन्यः कीदृशोऽसि वदस्व भो ॥ २४ ॥
तन्न जानासि चेद्व्यर्थं श्रवणं दर्शनं विना ।
ज्ञानस्य साधनं शास्त्रं न ज्ञानं स्वयमेव तत् ॥ २५ ॥
अथ किं बहुनोक्तेन भवन्तं वेत्थ नो भवान् ।
अविद्यावरणं[15] नूनं एतदेवावधारय ॥ २६ ॥
वेदान्त-पारगोऽपि त्वमात्म-विद्या-प्रदं विना ।
वेदान्त-वक्तुर्वाक्याच्च नाज्ञानं तव नश्यति ॥ २७ ॥

---

९ श्रवणेन=शास्त्रावलोकनेन. १० विमर्शनं=विचारः ११ मृषा=मिथ्या, १२ प्रत्ययः=प्रतीतिः १३ सुषुप्तिः=गाढानिद्रा. १४ विद्यते=अस्ति. १५ अविद्यावरणं=अज्ञानाच्छादनं. * "हियत्" इति पाठांतरम्.

तद्विज्ञानार्थं सद्गुरुमेवावगच्छेदिति श्रुतेः ।
गुरुमात्म-प्रदं गच्छेद्वेदान्तमधिगम्य[16] च ॥ २८ ॥
शास्त्राध्ययन-मात्रेण तत्त्व-ज्ञानं भवेद्यदि ।
वेदार्थ-ज्ञानतो ज्ञानं जातमित्येव सिध्यति ॥ २९ ॥
निगमैरपरोक्षं[17] चेत्त एवोपदिशन्त्यहो ।
गुरुमेवाभिगच्छेत्स इत्याहुस्ते पुनः पुनः ॥ ३० ॥
तस्माद्गुरुं विना न स्यादपरोक्षात्म-दर्शनम् ।
आचार्यवानेव[18] वेद ततः श्रुत्याभिधीयते ॥ ३१ ॥
अधीत-वेदान्तमपि तत्त्वज्ञं शरणं यदा ।
गच्छेत्तदा तत्कृपया तत्त्वानुभवमश्नुते[19] ॥ ३२ ॥
अथ देहादन्य आत्मेत्येवं ज्ञातं त्वया स्फुटम् ।
तथाप्यात्मा कथमिति न ज्ञातं तदविद्यया ॥ ३३ ॥
विजिज्ञासस्व जिज्ञासो कोऽस्मीति स्वधिया पुनः ।
देहो देहेन * जानाति तर्हि वेत्तासि को भवान् ॥ ३४ ॥
स्वामिन् देहात्मविदेही न देहो देहवित् क्वचित् ।
आत्मानमविदित्वापि मया ज्ञातमिति स्फुटम् ॥ ३५ ॥
मृत-देहो यथापूर्वोऽप्यहं देह इति क्वचित् ।
न वेद तस्मादन्योऽसौ देहविद्देहवांस्ततः ॥ ३६ ॥
किन्तु नास्ति शवे[20] प्राणः स नूनं देहविद्भवेत् ।
तस्मिन् गते गतो भाति देहवान् यस्तु देहवित् ॥ ३७ ॥
ततो देहात्मवित्प्राण इति मे जायते मतिः ।
इति श्रुत्वाह भगवानाचार्यः सर्व-शास्त्रवित् ॥ ३८ ॥
ननु प्राणे गते देहे देहविन्नैव दृश्यते ।
तत आत्मा स एवेति ज्ञात्वा वै वारुणिर्भृगुः[21] ॥ ३९ ॥
प्राणो ब्रह्मेति स भृगुर्विदित्वा पितरं पुनः ।
गत्वा हि ब्रूहि भगवन् ब्रह्मेति तदसम्भवात् ॥ ४० ॥
यतः प्राणो जडो वेत्ता न देहस्य भवेदिति ।
स्वप्नात्सुषुप्तितो बुध्वा पितरं प्रष्टुमागमत् ॥ ४१ ॥
स्वप्न-द्रष्टा यदा देही स्वप्नदेहं प्रपश्यति ।

---

१६ अधिगम्य = ज्ञात्वा. १७ नि-गमाः = शास्त्राणिवेदावा. १८ आचार्यः = गुरुः
१९ अश्नुते = अनुभवति. २० शवे-कुणपे = मृत शरीरे. २१ वारुणिः = वरुण-पुत्रः
* "देहं न" इति पाठांतरम्.

तदा देह–स्थितः प्राणो न देहं वेत्त्यतो जडः ॥ ४२ ॥
जागरे स यथा यस्मिन् स्थूल-देहे प्रवर्तते ।
स्वप्न-कालेऽपि स तथा तस्मिन्नेव न वेद[22] तम् ॥ ४३ ॥
न प्राणो निद्रितः क्वापि यथापूर्वो हि वर्तते ।
चेद्देहवित् स तत्सुप्तं शरीरं नैव वेत्ति किम् ॥ ४४ ॥
तथा सुषुप्त्यवस्थायां यथापूर्वः स्थितोऽपि सः ।
प्राणो देहं न जानाति तमोलीनो न यः क्वचित् ॥ ४५ ॥
किं बहूक्तेन स प्राणः प्रबोधे[23]ऽपि मनो यतः ।
गत्वा जानाति दूरस्थं तत्र तत्र न याति सः ॥ ४६ ॥
अथ तस्मिन् गते देहे देहविन्नैव दृश्यते ।
ततः स एव तद्वेत्तीत्येवं भाति स च भ्रमः ॥ ४७ ॥
ततस्त्वं नासि भोः प्राणो देहो न त्वं ततोऽन्यथा ।
अथ* तद्देहविद् बुध्या मन एवं भ्रमो भवेत् ॥ ४८ ॥
सर्प–भ्रमे गते रज्ज्वां हारारोपो भवेद्यथा ।
हारापवादेऽपि भवेद्दण्डारोपस्तथात्र च ॥ ४९ ॥
देहात्मत्व–निषेधेन भाति प्राणात्मता तथा ।
प्राणात्मत्व–निषेधेन भात्यहो मन आत्मता ॥ ५० ॥
मनःकृतःस्वाप्न–देहस्तस्य तस्मिंस्तदात्मता ।
जागरेऽपि स्मृतिस्तत्र मनो यत्र प्रवर्तते ॥ ५१ ॥
मनो यदङ्गं स्पृशति तदेवाङ्गं प्रतीयते ।
गते त्वन्यत्र मनसि न प्रतीतिस्तनोरपि ॥ ५२ ॥
मन एव ततः स्वात्मा देहविन्न तु दृश्यते ।
किन्तु तच्च न तत्रास्ति सुषुप्तिर्यत्र वै मतेः ॥ ५३ ॥
नास्त्यात्मापि सुषुप्तौ चेत्सुखं कस्य तदा वद ।
ततोऽवशिष्टः सुषुप्तौ स एवात्मा न ततोऽन्यथा ॥ ५४ ॥
यो मृग्यो[24] गुरु–वाक्येन सुषुप्तौ योऽवशिष्यते ।
न मनस्तत्र तत्तस्मादन्यस्त्वं मन आत्मनः ॥ ५५ ॥
किन्तु तेनैव मनसा दृश्यते यस्तदन्यथा ।
“ हृदा मनीषा मनसाभिक्लृप्त ” इति च श्रुतेः ॥ ५६ ॥

---

२२ वेद=जज्ञौ. २३ प्रबोधः=जागरः २४ मृग्यः=गवेषणीयः
* “ देहात्मविद् ” इति पाठांतरम्.

न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाभिक्लृप्त इतिश्रुतेश्चार्थ इति स्म सिद्धः ॥ ५७ ॥
हृदाभिक्लृप्त इत्येवमन्वयः कीदृशेन चेत् ।
मनीषा मनसेत्येव व्याख्येयात्र श्रुतिर्बुधैः ॥ ५८ ॥
मनीषां प्रथमां केचित्तृतीयार्थे वदन्ति हि ।
सिद्धे यथास्थितेऽर्थेऽपि कल्पना सा निरर्थका ॥ ५९ ॥
मनो मनीषया युक्तं मनीषा मन उच्यते ।
मनीषा मनसा तेन साक्षात्कारश्चिदात्मनः ॥ ६० ॥
वेदान्त-श्रवणाद्बुद्धिरद्वैत-श्रद्धयान्विता ।
सा निश्चयात्मिका बुद्धिस्तया युक्तं मनो हि तत् ॥ ६१ ॥
अद्वैत-निश्चय-युतं मनः सत्वमिति स्फुटम् ।
तेनापरोक्षमित्यर्थः श्रुत्यर्थ इह वर्णितः ॥ ६२ ॥
सत्त्व-वृत्त्या परोक्षत्वं मन इत्युदिता हि सा ।
क्वचित्सा बुद्धिरित्युक्ता गीतासूपनिषत्सु च ॥ ६३ ॥
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्म-दर्शिभिः ।
इति श्रुत्यात्मबोधाय बुद्धिरत्रापि निश्चिता ॥ ६४ ॥
हृदा मनीषा मनसेत्येवं च श्रूयते क्वचित् ।
ज्ञाताज्ञेयं चिदात्मत्वं सत्त्ववृत्त्याधिगच्छति ॥ ६५ ॥
सा वृत्तिर्बुद्धि-शब्देन मनःशब्देन च क्वचित् ।
वर्णिता तां तयात्मानं ज्ञात्वा कुर्वन्ति तन्मयीम् ॥ ६६ ॥
चिन्मयाभासबलवत्तां* वृत्तिं तन्मयीं तदा ।
कुर्वन्ति योगिनो धन्याः सिद्धाः स्युः साधकाश्च ते ॥ ६७ ॥
मनसो वृत्ति-शून्यस्य ब्रह्माकारतया स्थितिः ।
इत्युक्तं योगशास्त्रेऽपि गीतासूपनिषत्सु च ॥ ६८ ॥
इत्थं सति कलौ केचिच्चिदात्मज्ञानमानिनः ।
मुक्तिमाहुर्विनाभ्यासमश्नुते सकृदात्मनि ॥ ६९ ॥
तमाहुरात्मैवात्मानं जानाति स मनीषया ।
आत्मैव जानात्यात्मानं न वेद मनसापि सः ॥ ७० ॥
रहस्युपदिशत्येवमन्योन्यं प्रवदन्ति च ।
ब्रह्मैव ब्रह्मतां स्वस्य स्वयं वेदेति वादिनः ॥ ७१ ॥

---

२५ अग्र्यया = श्रेष्ठया । * "भ्यासबलवत्तां" इति पाठान्तरम्.

यद्यात्मानं ब्रह्म वेद निर्गुणत्वेन केवलम् ।
निर्गुणत्वेन किं तर्हि विस्मृत्य ब्रह्मता-स्थितिम् ॥ ७२ ॥
ब्रह्मैव तर्ह्यविद्यापि विद्यापि ब्रह्म निर्गुणम् ।
यद्यविद्या भवेद्ब्रह्म विद्यापि ब्रह्म तद्भवेत् ॥ ७३ ॥
माया-वृत्तिर्यदविद्या विद्या ब्रह्म कथं भवेत् ।
न निर्गुणं यदविद्याऽविद्या ब्रह्म कथं भवेत् ॥ ७४ ॥
ब्रह्मात्मानं न वेदेति सिद्धे वक्तुं ततःपरम् ।
स्वब्रह्मत्वं स्वयं ब्रह्म जानातीत्युचितं भवेत् ॥ ७५ ॥
अविद्या ब्रह्मणोऽन्या चेन्मायातीतमधर्मकम् ।
वेत्थ त्वं सर्वदात्मानमविद्या च ततोऽन्यथा ॥ ७६ ॥
स्वब्रह्मत्वेनैव यदि स्वब्रह्मत्वं हि वेद तत् ।
स्वब्रह्मत्वेनैव तर्हि स्वब्रह्मत्वं न वेद तत् ॥ ७७ ॥
ब्रह्मैव तदविद्या स्यात्तर्हि निर्धर्म निर्गुणम् ।
ब्रह्मैव ब्रह्मविद्या स्यात्तर्हि निर्धर्म निर्गुणम् ॥ ७८ ॥
अविद्यावृत्तिरन्या चेन्निर्गुणाद्वृत्तिवर्जितात् ।
स्वविद्यावृत्तिरप्यन्या निर्गुणादिति सिध्यति ॥ ७९ ॥
विद्याविद्ये मम तनू विध्द्ध्युद्धव शरीरिणाम् ।
मोक्ष-बन्ध-करी आद्ये मायया मे विनिर्मिते ॥ ८० ॥
श्रीमद्भागवते स्पष्टमेवं निर्णीतमेव तत् ।
विद्यापि मायावृत्तिः स्यादविद्यापि तथाविधा ॥ ८१ ॥
विद्याया श्चाप्यविद्याया जडत्वात्तत्प्रकाशकम् ।
ब्रह्मैव वेत्तीति निर्णीतं ततस्तद् दृश्यते धिया ॥ ८२ ॥
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मयेति श्रुतिःक्वचित् ।
हृदा मनीषा मनसेत्येवं च श्रूयते क्वचित् ॥ ८३ ॥
इत्यादिषु प्रमाणेषु तेषां श्रद्धा न जायते ।
आहुर्बुद्ध्या दृश्यते चेद्बुध्देर्विषयतां गते ॥ ८४ ॥
विषयत्व-भिया तेषां न श्रद्धा निगमादिषु ।
तथा श्रद्धा-मते तेषां सत्यं ब्रह्मविकारतः ॥ ८५ ॥
आत्मानं निर्गुणत्वेन न वेदेति स्वरूपता ।
न मृता निर्गुणत्वेन वेदात्मानं यथा बृहत् ॥ ८६ ॥

---

२६ विद्धि = जानीहि ।

गत्वा विद्या-स्वरूपत्वं ब्रह्मणो निर्गुणस्य हि ।
सिद्ध-विद्यास्वरूपत्वं दुग्धत्वस्य दधित्ववत् ॥ ८७ ॥
तण्डुलस्यौदनत्वं हि पाकादि-क्रियया भवेत् ।
अज्ञस्य निर्गुणस्यैव सुज्ञत्वमुपदेशतः ॥ ८८ ॥
एतावता विकारित्वं निर्विकारस्य सिध्यति ।
विरोधाच्च प्रमाणानां तन्मतं स्यादसंमतम् ॥ ८९ ॥
एवं ब्रह्म विकारित्वं प्रमाणानां विरोधताम् ।
न पश्यन्तो वदन्तीति सिद्धमेवं पुनः पुनः ॥ ९० ॥
अथ बुद्धेर्विषयतां मन्यमानाः श्रुतिष्वपि ।
अश्रद्दधानास्तत्तेषां बुद्धेः स्थूलत्वमेव हि ॥ ९१ ॥
यद्यदिन्द्रियगम्यं स्यात्तस्य तस्यैव केवलम् ।
विषयत्वं हि विषयाः शब्दाद्याः[27] पञ्च संज्ञिताः ॥ ९२ ॥
बुद्धेश्चिच्छक्तिरूपत्वाच्चित्स्वरूपात्सचेतना ।
विषयानिन्द्रियैर्वेत्ति वेत्ति निर्विषयं स्वयम् ॥ ९३ ॥
अतीन्द्रियं निर्विषयं सैव पश्यति तन्मयी ।
तत्प्रकाशेनेन्द्रियैः सा जानाति विषयानपि ॥ ९४ ॥
अगम्यमिन्द्रियैर्ब्रह्म बुद्धिग्राह्यमतीन्द्रियम् ।
स्पष्टमेवं भगवता निर्णीतं स्वमुखेन हि ॥ ९५ ॥
"सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्" ।
स्पष्टमेवं भगवता निर्णीतं स्वमुखेन च ॥ ९६ ॥
विषया इन्द्रिय-ग्राह्याः सन्त्येवं यदतीन्द्रियम् ।
तस्य निर्विषयत्वं वै बुद्धि-ग्राह्यतयापि* च ॥ ९७ ॥
अतस्तद्बुद्धिग्राह्यं च तदतीन्द्रियमित्यपि ।
उक्तं भगवता बुद्धि-ग्राह्यं चातीन्द्रियं च तत् ॥ ९८ ॥
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्म-दर्शिभिः ।
इति श्रुत्या यदुदितं साधितं हरिणापि[28] तत् ॥ ९९ ॥
विषयत्वं च यद्बुद्धेर्बुद्धि-ग्राह्यतयात्मनः ।
भाति तन्मति-मान्द्येन यतो बुद्धिः स्वयं जडा ॥ १०० ॥
यद्बुद्धि-वेद्यं वक्तव्यं तद्बुद्धि-ग्राह्यमुच्यते ।
तयात्मात्मप्रकाशेन वेत्ति सा या स्वयं जडा ॥ १०१ ॥

---

२७ शब्दाद्याः=शब्द-स्पर्श-रस-रूपगन्धाः २८ हरिणा=भगवता कृष्णेन ।
* "ग्राह्यं तथापि" इति पाठान्तरम्.

तथा सत्यात्मनैवात्मा ग्राह्य इत्येव सिध्यति ।
किन्तु धर्म-विहीनत्वाद् वृत्ति-योगेन निर्गुणम् ॥ १०२ ॥
प्रतीतं स्याद्यथा वन्हिर्दह्यं काष्ठादिकं दहन् ।
दह्यकाष्ठादिकमपि यथाग्निः स्वप्रकाशकः ॥ १०३ ॥
प्रकाशको दाहकश्च स्पष्टो भवति न स्वयम् ।
लोह-पाषाण-वस्त्रादिष्वग्निः स्पष्टो यथा भवेत् ॥ १०४ ॥
बुध्द्या तथात्मानुभवो भवेदात्मन एव हि ।
* * * * * ॥ १०५ ॥
बुध्दैव स न वेदात्मा स्वात्म-तत्त्वं यथा तथा
बुध्दैव वेत्ति स्वात्मत्वमुभयं तत्प्रकाशितम् ॥ १०६ ॥
जानामि नात्मानमहमेवं च स्वप्रकाशतः ।
अविद्ययात्मविस्मृत्या तज्जडात्मकतां गतम् ॥ १०७ ॥
प्रकृतं न मनः स्वात्मा तथापि मनसैव सः ।
अपरोक्षो भवेत्तच्च सत्त्ववृत्तिरिति स्फुटम् ॥ १०८ ॥
दृश्यते त्वग्र्यया बुध्द्या श्रुत्या क्वचिदुदीर्यते ।
मनसेति क्वचित् सा च सत्त्ववृत्तिर्मतिः स्मृता ॥ १०९ ॥
अथ सत्त्वस्य चत्वारो भेदास्ते ममतास्पदाः ।
तथापि यत्र मामत्वं* न भात्यात्मा ततोऽन्यथा ॥ ११० ॥
तेषु भेदेषु यत्रात्मा व्यतिरिक्तोऽपि तन्मयः ।
तत्र भाति स वाच्यांशो लक्ष्यांशस्तु ततोऽन्यथा ॥ १११ ॥
"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वानिति" श्रुत्या विलोकय ॥ ११२ ॥
चतुर्षु सत्त्वभेदेषु भेद आत्मैव भाति यः ।
तद्वाच्यांशे परित्यक्ते वाचामवसरः कुतः ॥ ११३ ॥
मनो भेदाश्चत्वारः प्राप्नुवन्ति न तत्सुखम् ।
निवर्तन्ते यतो वाचश्चतस्रः खलु तैः सह ॥ ११४ ॥
"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" ।
इति श्रुत्यानया रीत्या पश्यात्मानं समाहितः ॥ ११५ ॥
शाखा-शशाङ्क-न्यायेन[२९] गुरु-वाक्येन सन्मते ।

---

२९ शाखा-शशांक-न्याय :—शुक्ल-द्वितीयायां यदि कश्चन सायंकाले चंद्र-कलां द्रष्टुमक्षमस्तर्हि अन्ये अमुकीं वृक्ष-शाखां पश्य तदनन्तरं तस्याः समीपं चंद्रं द्रक्ष्यसीति वदन्ति । तथा प्रपंच-वृक्षं निषिध्य सच्चिदानंदो द्रष्टव्य इति । * "मा मत्वं" इति पाठान्तरम्.

पश्चात्र सच्चिदानन्दं प्रपञ्च-तरु-षेधतः[30] ॥ ११६ ॥
जड-प्रपंच-द्रुम-सूक्ष्म-शाखा भेदैश्चतुर्भिः सहसा मनस्ते ।
भेदेषु ते स्वात्मतया प्रतीतिर्य वेद भेदं स च तस्य शाखा ॥ ११७ ॥
वाच्यांश-शाखामथ तां विहाय लक्ष्यांश-चन्द्रं स्वसुखं प्रपश्य ।
तद्ब्रह्म यद्वेदविदो वदन्ति न यत्र वाचोनुभवैकवेद्यम् ॥ ११८ ॥
न तत्र सूर्यो न च चन्द्र-तारा न विद्युतो भान्ति[31] कुतोऽयमग्निः ।
तमेव भान्तमनुभान्ति सर्वे तस्यैव भासा सकलं विभाति ॥ ११९ ॥
अशब्दमस्पर्शमरूपमव्ययं[32] तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः[33] परं ध्रुवं विज्ञाय तन्मृत्यु-मुखात्पृथक् भव ॥ १२० ॥
अशब्दमस्पर्शमिति श्रुतेस्त्वं ब्रह्मात्मतां पश्य विहाय वाच्यम् ।
ब्रह्माहमस्मीति तया प्रतीत्या श्रुत्यानुभूत्या भव भोः कृतार्थः ॥१२१॥

मामहं नैवजानामीत्यविद्यावरणं तत्र ।
व्यतिरेकाख्यया नष्टं विद्ययाऽऽचार्यदत्तया ॥ १२२ ॥
इति ज्ञातमपि ब्रह्म न ज्ञात-प्रायमेव तत् ।
यस्माद्ब्रह्माद्वितीयत्वं नाद्याप्यधिगतं त्वया ॥ १२३ ॥
आनात्मत्व-निषेधेन त्यक्ता या जडता त्वया* ।
द्वैत-रूपेण सा यावत्तावन्माऽद्वैतविद् भवान् ॥१२४॥
जडैक्याय जडादन्यद्ब्रह्म जानन्ति तद्विदः ।
जड-ब्रह्मैक्य-बोधाय स बोधोऽद्वय-संज्ञितः ॥१२५॥
केचिद्वदन्ति मिथ्यात्वाज्जडं नास्तीति तावता ।
अस्त्वद्वितीयं ब्रह्मैवेत्यैक्य-ज्ञानेन किं तयोः ॥१२६॥
न सिद्धान्त-विरुद्धोऽयं पक्षः सिद्धान्त एव सः ।
किन्त्वसत्येऽपि सत्यस्य साक्षात्कारो भवेद्यदि ॥१२७॥
असत्ये कुण्डले सत्यं कनकं यस्तु पश्यति ।
तस्यैव कुण्डलं मिथ्या तदैवैक्यं तयोः सदा ॥१२८॥
केचिदेवमविज्ञाय नश्वरत्वान्[34]मृषा जडम् ।
इत्याहुः शब्द-पाण्डित्यं तेषामत्र वृथा भवेत् ॥१२९॥
नष्टेऽपि कुण्डले नैव† कनकत्वं न नश्यति ।
नष्टे तरङ्गे‡ न जलं नित्यानित्यैक्यमीदृशम् ॥१३०॥

---

३० षेधतः = निषेधनः । ३१ भान्ति = प्रकाशन्ते । ३२ अव्ययः = अविनाशः ।
३३ महत् = प्रधाननामकं तत्त्वं वेदान्ते प्रसिद्धं । ३४ नश्वरत्वं = विनाशित्वं ।
* "तया" इति पाठान्तरम्. † "कनकं खलु नश्यति" इति पाठान्तरम्. ‡ तरंगः = वीचि-कल्लोलः ।

अलं बहु-विवादेन जडे व्याप्येऽपि यद् बृहत् ।
व्यापकं तत्तु विज्ञेयं तैः साक्षात्कारमानिभिः ॥१३१॥
व्यापकं ब्रह्म यो व्याप्ये न पश्यति न तत्त्ववित् ।
पश्यन्ति व्यापकं व्याप्ये तेषामैक्यं तयोः स्फुटम् ॥१३२॥
यावज्जड-तरङ्गेषु न चिदम्बुधि[३५]-दर्शनम् ।
साक्षात्कारो न स प्रोक्तो ब्रह्मणःसर्व-रूपिणः ॥१३३॥
नष्ट-प्राये सम्प्रदाये कालेनाल्पेन भू-तले ।
सच्चिदानन्दनाम्ना श्रीगुरुणा यः प्रकाशितः ॥१३४॥
वेदान्त-शास्त्र-वक्तारो यतयो अखिलं जगत् ।
ब्रह्मत्वेन न जानन्ति ज्ञात्वापि प्रत्यगात्मताम् ॥ १३५ ॥
आचार्यत्वाय बहवः सेविता भूतले मया ।
आत्मोपदेश-समये गुरुत्वेन न मानिताः ॥ १३६ ॥
अहं प्रत्यय एवात्मा शुद्ध इत्युपदेशतः ।
नश्वरत्वाज्जडं मिथ्येत्यद्वैते तैर्निरूपितम् ॥ १३७ ॥
यतो वाचो निवर्तन्ते तद्ब्रह्म जड-बोधतः ।
उपदिश्य जडे कुम्भे तन्मृद्दर्शयिता गुरुः ॥ १३८ ॥
एवं छान्दोग्य-वचनै र्जिज्ञासा तु यदोत्थिता ।
तदा ते सेविताः ख्याता ये तत्त्वज्ञा इति क्षितौ ॥ १३९ ॥
न निःशङ्कं ब्रह्म तेषु येऽहंस्फूर्त्यात्ममानिनः ।
न जड-ब्रह्मणोरैक्यं वाचा मिथ्येति वादिनः ॥ १४० ॥
एवं संस्कृत-शास्त्रज्ञा प्राकृत-ग्रन्थ-वित्तमाः ।
बहवः सेवितास्तत्त्वमद्वैतं ते वदन्त्विति ॥ १४१ ॥
संस्कृत-ग्रन्थ-कर्तारो भाष्य[३६]-कारादयो भुवि ।
यदुक्तवन्तस्तच्चापि ज्ञानं कुत्रापि न श्रुतम् ॥ १४२ ॥
प्राकृत-ग्रन्थ-कर्तारो[३७] ये तु वर्ष-शतात्पुरा ।
त्यक्त-देहास्तैर्यथोक्तं न तथा ज्ञानिनोऽधुना ॥ १४३ ॥
ततो ज्ञाने निराशोऽहं जातो नास्तीह* भू-तले ।
विनिश्चित-तनु-त्यागः सितासित[३८]-समागमे ॥ १४४ ॥
यत्र त्यक्त्वा तनुं धीरा अमृतत्व[३९]मुपागताः ।

---

३५ चिदंबुधि := चैतन्य-सागरः । ३६ भाष्यकारः := शंकराचार्यः । ३७ प्राकृत-ग्रंथ-कर्तारः = मुकुंदराजादयः । ३८ सितासित-समागमः := गंगायमुनासंगमः । ३९ अमृतत्वं := मोक्षं. * "नास्तीति" तिपाठान्तरम्.

जन्मन्यनन्तरे ज्ञानं लब्ध्वा गुरुमुखात् क्वचित् ॥ १४५ ॥
नान्यः पंथाऽइति श्रुत्या ज्ञानादेवेति निर्णयात् ।
तनुं त्यक्त्वा प्रयागेऽपि ज्ञानान्मुक्तिर्भवान्तरे[40] ॥ १४६ ॥
एवं स्वबुध्द्या कृत-निश्चयोऽहं यदा तदास्मिन्* मलयाद्रिदेशे ।
श्रीशेष-शायी यति-वर्य ईशो भूत्वा यथा श्रीगुरुराविरासीत् ॥ १४७ ॥
अशब्दमस्पर्शमरूपमव्ययं निषेध-मात्रं तमसः परं यत् ।
तद्दर्शितं ब्रह्म न यत्र वाचः क्वाहं य आत्मेत्यबुधेषु गीतः ॥ १४८ ॥
एवं विदित-तत्त्वोऽपि नाहमानन्द-निर्भरः ।
निषेधितेऽप्यनात्मत्वे द्वैते सति कुतः सुखम् ॥ १४९ ॥
तध्द्वृत्तं मम ज्ञात्वा भगवान् यति-रूपभृक्
अह वत्स प्रवक्ष्यामि तदद्वैतमतः परम् ॥ १५० ॥
अनात्मनोऽन्य आत्मेति द्वैत-वाद-रता अपि ।
वदन्ति पुरुषार्थोऽत्र क्वचिज्जड-विवेचने[41] ॥ १५१ ॥
यावज्जड-तरङ्गेषु[42] चित्सिन्धुर्नावलोकितैः[43] ।
अद्वैतानुभवानन्दस्तावद्दूराच्च दूरतः ॥ १५२ ॥
तावन्निरस्ता नाविद्या यातु विक्षेप-संज्ञिता ।
तदप्यावरणाख्या[44] सा नष्ट-प्रायात्मबोधतः ॥ १५३ ॥
जानामि नाहमात्मानमित्यावरण-रूपिणी ।
नष्ट-प्रायात्म-बोधेन न नष्टा सा च तावता ॥ १५४ ॥
नाहं जड-चिदात्माहमिति तत्त्वं यदीक्षितम् ।
तदात्मत्वेन सर्वत्र नाद्याप्यधिगतं[45] त्वया ॥ १५५ ॥
एकस्मिन्नेव देहेऽस्मिन् यथात्माधिगतस्त्वया ।
सर्वत्रात्मतया नैवं† प्रतीतिस्तव जायते ॥ १५६ ॥
सत्योऽनन्तश्चिदात्मायमपरिच्छिन्न[46] एव यः ।
यथा देहे जगत्येवं ज्ञात्वा सुखमवाप्स्यसि ॥ १५७ ॥
एवं ज्ञास्यसि चेत् सा च व्यतिरेकाभिधा स्मृता ।
विद्या तया निजाविद्या नश्यत्यावरणात्मिका ॥ १५८ ॥
तथापि यस्मिन् जगति जडे सर्वत्र सर्वगः ।

---

४० भवान्तरे = अन्यस्मिन् जन्मनि. ४१ चिज्जड-विवेचनं = चैतन्य-जडयोर्विचारः ४२ तरंग = वीचिः ४३ "नाविलोकितः" इति पाठांतरम्. ४४ आवरणं = आच्छादनं. ४५ अधिगतं = ज्ञातं. ४६ परिच्छिन्नः = समर्यादः

* "तदासीन्" इति पाठान्तरम्. † "नैव" इति पाठांतरम्.

आत्मा परोक्षः[४७] स्यात् सर्वं तद् यावद्भाति वै पृथक् ॥ १५९ ॥
तावन्निरस्ता नाविद्या या तु विक्षेप-संज्ञिता ।
यद्यप्यावरणाख्या सा नष्ट-प्रायात्म-बोधतः ॥ १६० ॥
बुद्धिर्जानाति नात्मानं तयावरण-रूपया ।
अविद्यया समुत्पन्ना विद्या विक्षेप-रूपिणी ॥ १६१ ॥
रज्ज्वज्ञानेन सर्पः स्याद्रज्ज्वज्ञानं ततः पुरा ।
निश्चयः सर्प-सत्यत्वे तदात्मा न ततोऽन्यथा ॥ १६२ ॥
तथापि रज्ज्वबोधेन दुःखं न श्रूयते क्वचित् ।
यथा तदुत्थितान्मिथ्या सर्पात्संजायते भयम् ॥ १६३ ॥
एवमावरणाज्ञानं न तथा दुःख-दायकम् ।
यथा तु जड-सत्यत्वं[४८] चिज्जडैक्यमजानताम् ॥ १६४ ॥
आद्यमावरणं पश्चाद्विक्षेपाख्यं ततो भवेत् ।
यद्यप्याद्यादबोधात्स प्रबलो यस्तदुद्भवः ॥ १६५ ॥
रज्ज्वज्ञान-समुत्पन्नो भुजङ्गो दुःखदस्तदा ।
अयसोप्यायसः[४९] खड्गो ह्रदो[५०] नद्युद्गमाद्यथा ॥ १६६ ॥
तस्मादात्मतया ब्रह्म-ज्ञानेऽपि च जडं जगत् ।
ब्रह्मेति यावन्न ज्ञातं तावदज्ञानमेव तत् ॥ १६७ ॥
"ते ब्रह्म तद्विदुः कृत्स्न" मित्याह भगवान् स्वयम् ।
ज्ञात्वापि ब्रह्म तत्सर्वं ज्ञातव्यं ब्रह्म-वित्तदा ॥ १६८ ॥
मृत्योः स मृत्युमाप्नोतीत्येवं श्रुत्या यदुच्यते ।
स आत्म-योग आत्मानं ज्ञात्वापि जडमीक्षते ॥ १६९ ॥
मृत्योरज्ञ-जनो मृत्युमाप्नोत्येव स्वभावतः
स मृत्युमाप्नोत्येवेति किं चित्रं वदति श्रुतिः ॥ १७० ॥
स्वतोऽधिगत एवार्थो गौणः श्रुत्युदितस्ततः ।
मुख्यो नाधिगतोऽर्थोऽयं संसिद्धो यस्त्वबाधितः ॥ १७१ ॥
जडाजड-विवेकज्ञो जड-ब्रह्मैक्यवित्न चेत् ।
न तस्य मुक्तिर्नानात्वं यो यथापूर्वमीक्षते ॥ १७२ ॥
विक्षेप-नाम्न्यविद्येयं यथा नानात्व-दर्शनम् ।
गतमस्यागतं तावदविद्या-वरणं नृणाम् ॥ १७३ ॥
तस्माच्चिज्जडयोरैक्यं यावन्नाधिगतं गुरोः ।

---

४७ परोक्षः = अदृश्यः ४८ सत्यत्वं.अस्तित्वं. ४९ अयः = लोहं. ५० ह्रदः = डोह इति महाराष्ट्रभाषायां.

तावत्कुतः सुखं दुःखं न निवृत्तमबोधजम् ॥ १७४ ॥
अतो यतो निवर्तन्ते वाचस्तदधिगम्य च ।
अकृतार्थमिवात्मानं मन्यसे त्वं तथैव हि ॥ १७५ ॥
"आनन्दो ब्रह्मणो विद्वान् न बिभेति कुतश्चन" ।
इत्युक्तं तदहङ्कार-निषेधान्निर्भयात्मता ॥ १७६ ॥
अहं-स्फूर्त्या भयं सर्वमभयं तन्निरासतः ।
निःशब्द-दर्शने श्रुत्वा न बिभेति तदोदितम् ॥ १७७ ॥
तथापि भय-सद्भावो[53] द्विविधस्तादृशस्य च ।
मृतोऽपि सद्यो बुद्धिस्थो विक्षेपोऽस्ति यथा पुरा ॥ १७८ ॥
अविद्याया द्वितीयं यद्रूपं विक्षेप-संज्ञितम् ।
यावन्नष्टं तदा तावन्मुक्तिस्तु न भविष्यति ॥ १७९ ॥
"न हि कल्याण-कृत् कश्चिद्दुर्गतिं तात गच्छति" ।
इत्याह भगवांस्तेषु गण्यास्ते शुभ-कारिषु ॥ १८० ॥
धीरः प्रारब्ध-शेषेण देहो जीवति चक्षुषा ।
नानात्वं दृश्यते तस्य मृत्युः श्रुत्याभिधीयते ॥ १८१ ॥
किन्त्वात्मानं यदा पश्यत्यहङ्कार-निषेधतः ।
स आत्मा निर्भयस्तस्मान्न बिभेति कुतोऽपि च ॥ १८२ ॥
निर्भयात्मत्व-बोधेन न बिभेति कुतश्चन ।
इत्युक्तमपि च श्रुत्या भयं यावज्जडास्तिता ॥ १८३ ॥
इत्युक्त्वा गुरु-रूपेण यति-वेषेण माधवः ।
कृपयादिष्टवान् देवस्तत्त्वं परम-हंसगम् ॥ १८४ ॥
जडाजडोदक-क्षीरं[54]-विवेक-ज्ञान-वित्तमाः ।
हंसा एव तदैकज्ञा हंसास्ते परमा मताः ॥ १८५ ॥
अतो ब्रह्म-जडैक्यं यत्तत्त्वं परम-हंसगम् ।
साक्षात्परम-हंसेन रूपेणोक्तं यदीदृशम् ॥१८६ ॥

यत्सर्वं खल्विदं ब्रह्मेत्युच्यते *निगमागमैः ।
तत्सत्यासत्ययोरैक्यं न चेदैक्यं तयोः कथम् ॥१८७॥
सर्वं च ब्रह्म च तयोर्द्वयोरैक्यं तदा भवेत् ।
यदा सर्व-समत्वं स्यात् सत्यं ब्रह्म यदा भवेत् ॥१८८ ॥

---

५१ अकृतार्थः = अधन्यः ५२ निरासः = नाशो भंगो वा. ५३ सद्भावः = अस्तित्वं
५४ क्षीरं = दुग्धं. * निगमागमाः = वेद शास्त्राणि.

अतो मृत्[५५]कनकादीनां दृष्टान्तैर्ब्रह्म-सत्यता ।
वाचारम्भणतान्येषां † घटादीनां निरूपिता ॥ १८९ ॥
घटस्य मृदुपा[५६]दानं कनकं कुण्डलस्य च ।
आत्मा जगदुपादानं स्वप्रकाशोह्यनावृतः ॥१९० ॥
"यस्य* भासा सर्वमिदं विभातीति" श्रुतिर्जगौ ।
घटो मृदा भाति तथा जगद्भाति तथात्मना ॥ १९१ ॥
सत्यं यद्यत्स्वप्रकाशमसत्यं तत्प्रकाशितम् ।
मृत्प्रकाश्ये घटे मृद्वच्चित्प्रकाश्येऽपि तद्धि सत् ॥ १९२ ॥
मृत्तिकेत्येव सत्यं चेद्यच्छ्रुत्या च निगद्यते ।
घटस्य मृत्प्रकाशस्य वाचारम्भणतापि च ॥ १९३ ॥
अनपेक्ष्य घटं भाति मृत्तिका तां विना घटः ।
न भाति नास्त्यतः सत्यं यत्तदेवास्ति नेतरत्॥ १९४ ॥
प्रकाश्यते मृदा कुम्भो मृदेवास्ति घटो न हि ।
कुण्डलं कनकेनैव तदेवास्ति न कुण्डलम् ॥ १९५ ॥
प्रकाश्यतेऽम्भसा वीचिर[५७]म्भ एवास्ति नास्ति सा ।
फणी[५८] गुणे[५९]नैव भाति गुण एवास्ति नो फणी ॥१९६ ॥
शुक्त्या[६०] प्रकाश्यते रौप्यं शुक्तिरेवास्ति नास्ति तत् ।
ताम्र-पात्रं च ताम्रेण ताम्रमेवास्ति नास्ति तत् ॥ १९७ ॥
प्रकाश्यतेऽश्मना[६१] लिङ्ग[६२]मश्मैवास्त्यथ नास्ति तत् ।
यो नास्ति स च भात्येव दारुणा[६३] दारु-वारणः[६४] ॥ १९८ ॥
स्थाणु-प्रकाशात्पुरुषो भाति स्थाणु-प्रकाशितः ।
अयःप्रकाशितः खड्गो भात्यसत्योऽपि सत्यवत् ॥१९९ ॥
द्रव्याणि[६५] यावन्ति लोके तैस्तैस्तेषामनेकशः ।
प्रकाश्यं स्वप्रकाश्यन्ते वाचारम्भण-रूपिणः ॥ २००॥
उपादानं स्वप्रकाशं कार्यं[६६] तेन प्रकाशितम् ।
काल-त्रयेऽस्त्युपादानं कार्यं नाद्यन्तयोरसत् ॥ २०१ ॥

---

५५ मृत् = मृत्तिका. † "तेषां" पाठांतरम् ५६ उपादनं = "Material cause" इति यदांग्लभाषया कथ्यते तत्. * "तस्य" पाठांतरम्. ५७ वीचिः = तरंगः ५८ फणी = सर्पः ५९ गुणः = रज्जुः ६० शुक्तिः = मौक्तक-पुटम्. ६१ अश्मा = पाषाणः ६२ लिंगं = शिवलिंगं. ६३ दारु = काष्टं. ६४ वारणः = करी. ६५ द्रव्याणि = उपादानरूपाणी मृत्कनकादीनि. ६६ कार्यं = "Effect" इति यदांग्लभाषया कथ्यते तत्.

मध्ये भात्यपि तेनैव तदेवास्ति न तत् पृथक् ।
काल-त्रये विद्यमानं स्वप्रकाशं तदेव सत् ॥ २०२ ॥
वल्मीकस्थः[६७] स्वप्रकाशः स्वयं दृग्गोचरोरगः[६८] ।
रज्ज्वाश्रयात्प्रतीतो यस्तत्प्रकाश्योरगस्त्वसत् ॥ २०३ ॥
"सदेव सौम्येदमग्र आसीदेकमिति" श्रुतिः ।
"नासदासीन्नो सदासीत्तदानीमिति" च श्रुतिः ॥ २०४ ॥
सृष्ट्यादौ प्रलयस्यान्ते ब्रह्मैवेत्याहुरागमः ।
मध्यएव जगद्भाति तदा तेनैव न स्वतः ॥ २०५ ॥
यस्य भासा सर्वमिदं विभाति सचराचरम् ।
मृदा कुम्भो यथा भाति यदुत्पत्तिलयौ मृदि ॥ २०६ ॥
जगद्ब्रह्म यदुत्पन्नं लीयमानं च तत्र यत् ।
मध्येऽपि तस्य भासैव भाति कुम्भो यदा मृदा ॥ २०७ ॥
मृत्तिकेत्येव सत्यं चेत्येतच्छ्रुत्या निगद्यते ।
ततो जगदसत्यत्वात्सत्यं ज्ञानमिति श्रुतिः ॥ २०८ ॥
सत्यं ज्ञानमनन्तं यत्तद्ब्रह्मेति त्रिभिः पदैः ।
ज्ञेयमात्मतया प्राज्ञैः सत्यं जगदसत्तथा ॥ २०९ ॥
जगज्जडतया ज्ञानमनन्तं जगदन्ततः ।
तत्र मध्य-पदात् सत्यं तेनैवानन्तमुच्यते ॥ २१० ॥
सत्यं मध्य-पदादेव स्वप्रकाशतयैव सत् ।
कुतस्तत्सत्यमिति चेद् ज्ञानान्मध्य-पदाद्धि सत् ॥ २११ ॥
स्वप्रकाशतया सत्यमतो ज्ञानमितीर्यते* ।
काल-त्रये विद्यमानमनन्तं कालतस्तथा ॥ २१२ ॥
नासीज्जगत् किमप्यग्रे न भविष्यत्यतः परम् ।
इति यत्सत्तया स्फूर्तिस्तदनन्तं च कालतः ॥ २१३ ॥
देशतोऽपि मनोवृत्त्या कल्पयित्वाखिलं जगत् ।
नैव किञ्चित्तत इति यत् स्फूर्त्या वेत्ति तत्र तत् ॥२१४॥
अतो मध्य-पदात्सत्यं तेनैवानन्तमुच्यते ।
कुतस्तत्सत्यमिति चेद् ज्ञानान्मध्य-पदाद्धि सत् ॥२१५॥
स्वप्रकाशतया सत्यमतो ज्ञानमितीर्यते ।
तत एव द्वयोर्मध्ये ज्ञानलक्षणयोरिह ॥ २१६ ॥

---

६७ वल्मीकं = बिलं. ६८ उरगः = सर्पः * ईर्यते = उच्यते.

सत्यत्वं चित्स्वरूपत्वादानन्त्यं तत एव च ।
ततो द्वयोर्मध्य-गतं संस्पृष्टं च पदद्वयम् ॥ २१७ ॥
श्लिष्यत्युभय-पार्श्वस्थं यथा गोपी-द्वयं हरिः ।
कृष्ण-द्वयं वा मध्यस्था गोप-स्त्री रास-मण्डले ॥ २१८ ॥
मध्यस्थो नायक-मणिः पार्श्वस्थं वा मणि-द्वयम् ।
स्पृशत्येवं ज्ञान-पदं पद-द्वयमिहाद्वयम् ॥ २१९ ॥
त्रिभिःपदैश्चिज्जडयोरैक्यं श्रुत्या निगद्यते ।
तत्रादौ व्यापकतया द्रष्टव्यं सचराचरे ॥ २२० ॥
ज्ञात्वा जडापवादेन चिदात्मानमशेषतः ।
* * * * * ॥ २२१ ॥
एकस्मिन्नेव देहेऽस्मिन् ज्ञाता ज्ञानात्मता यथा ।
तथा तदा हि सर्वेषु ज्ञेया देहेष्वनात्मता ॥ २२२ ॥
तदा ज्ञातं चिदात्मत्वं नोचेच्चित्प्रतिबिम्बकम् ।
ज्ञानं तथोपदेष्टारो बहवः सन्ति भू-तले ॥ २२३ ॥
चिदंशे तु गते देहाद्देहं यद् व्याप्य तिष्ठति ।
तदात्मत्वं विजानीयादयमंशः स्वकर्मभुक् ॥ २२४ ॥
तं तु केचिदहंस्फूर्तिमात्मत्वेन वदन्ति हि ।
भवन्ति ते शिष्य-कण्ठे गुर्वश्मानो भवाम्बुधौ ॥ २२५ ॥
शुद्धं वा यच्चिदात्मत्वं ब्रह्मेत्युपदिशन्त्यहो ।
तदेव दुःखमश्नाति चिदाभासो य ईरितः ॥ २२६ ॥
"ममैवांशो जीव-लोके जीवभूतः सनातनः" ।
इत्याद्युक्तं भगवता प्रतिबिम्बांश एव सः ॥ २२७ ॥
संसारे दुःख-भोक्ता च स बद्धो मुच्यतेऽपि सः ।
स्वबिम्बात्मत्व-बोधेन बिम्बात्मा सर्वगः स्मृतः ॥ २२८ ॥
यच्चिदात्मतया ज्ञातं ब्रह्मैकस्मिन् कलेवरे[७४] ।
तत्कथं दुःखमश्नाति दृश्यतेऽन्योन्यदुःखभुक् ॥ २२९ ॥
सर्वगं ब्रह्म यो वेत्ति भोक्तारं वेत्ति तं पुनः ।
सर्वगं बुद्धिमाश्रित्य तं भोक्तारं च पश्यति ॥ २३० ॥
यथाह भगवान् कृष्णो "भुञ्जानं वा गुणान्वितम् ।

---

६९ श्लिष्यति = आलिंगति. ७० नायकः = श्रेष्ठः ७१ भवांबुधिः = संसारसागरः ७२ अश्नाति = अनुभवति. ७३ सनातनः = शाश्वतः ७४ कलेवरं = शरीरं.

विमूढा नानुपश्यन्ति पश्यन्ति ज्ञान-चक्षुषः" ॥ २३१ ॥
भोक्तृत्वं मनसः प्राहुः प्राकृत-ग्रन्थ-वादिनः[७५] ।
वेद-वाणि-विदोप्याहुः केचित्सर्वेऽपि ते जडाः ॥ २३२ ॥
"अधिष्ठाय मनश्चायं विषयानुपसेवते" ।
यथा श्रोत्राणीन्द्रियाणि मनोऽप्याह तथा हरिः ॥ २३३ ॥
"ममैवांश" इति प्रोक्तश्चिदंशः सुख-दुःख-भुक्[७६] ।
तथैव श्रुतयःप्राहुश्चिदंशस्यैव भोक्तृता ॥ २३४ ॥
आत्मानं रथिनं विद्धि शरीरं रथमेव च ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव[७७] च ॥ २३५ ॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
आत्मेन्द्रिय-मनो-युक्तो भोक्तेत्याहुर्मनीषिणः ॥ २३६ ॥
इति श्रुतिर्मनो बुद्धिः सर्वेन्द्रिय-गणैः[७८] पृथक् ।
रथी स्वात्मा स भोक्तेति प्राहुरेवं मनीषिणः[७९] २३७ ॥
जडस्य नैव भोक्तृत्वं न भोगः सर्वगस्य च ।
चिदंशस्यैव भोक्तृत्वमेवमाहुर्मनीषिणः ॥ २३८ ॥
एवमेवाह भगवान् प्रकृतेः[८०] पुरुषः[८१] परः ।
लक्षणं यत्र पार्थाय स्वयमेव पृथक् पृथक् ॥ २३९ ॥
"कार्य-कारण-कर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुख-दुखानां भोक्तृत्वे हेतुरुच्यते ॥ २४० ॥
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारणं गुण-सङ्गोऽस्य सदसद्योनि-जन्मसु" ॥२४१ ॥
एवं प्रकृति-भागस्य भोक्तृत्वं नैव विद्यते ।
पुरुषस्यैव भोक्तृत्वं भोग्याःप्रकृतिजा गुणाः ॥ २४२ ॥
"पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्" ।
एतावता तु गुण-भुक् प्रोक्तो गुण-विलक्षणैः[८२] ॥ २४३ ॥
पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान् गुणान् ।
मन-इन्द्रिय-बुद्धिस्थो भोक्तेत्युक्तं हि तावता ॥ २४४ ॥
अतः प्रकृति-भागस्य मनआदेर्न भोक्तृता ।
निर्गुणः पुरुषो भोक्ता हित्वा प्रकृतिजान् गुणान् ॥ २४५ ॥

---

७५ मुकुन्दराजादयः ७६ भुक् = भोक्ता. ७७ प्रग्रहं = रज्जुं ७८ गणः = समूहः. ७९ मनीषिणः = ज्ञानिनो योगिनोवा. ८० प्रकृतिः = स्वभावः ८१ पुरुषः = आत्मा ८२ गुण-विलक्षणः = गुण-भिन्नः

एवं सर्वेषु शास्त्रेषु निषिद्धा जड-भोक्तृता ।
किं बहूक्तेन भोक्तृत्वं यस्य तस्यैव मुक्तता ॥ २४६ ॥
जडस्य भोगो यदि चेन्मोक्षस्तस्यैव केवलम् ।
यो रोग-दुःखमश्नाति तस्यैवारोग्यमुच्यते ॥ २४७ ॥
मृषा मनोभोग-वार्ता भोगो न ब्रह्मणोऽपि च ।
भोक्ता चिदंश इत्युक्तो सत्त्वाम्बु-ज्ञान-भास्करः ॥ २४८ ॥
केचिद्दुःखस्य मिथ्यात्वान्न स्वीकुर्वन्ति भोक्तृतां ।
अश्नाति स्वप्नजं मिथ्या मुक्तिर्दुःखं विना कुतः ॥ २४९ ॥
भोगस्तु यावदज्ञानमित्याहुर्नेति कोऽब्रवीत् ।
तावदेव हि भोक्ता यः स चिदंश इति स्मृतः ॥ २५० ॥
स्वदेहान्तं विदित्वान्यमन्यत्रमधिगम्यताम् ।
ब्रह्म ज्ञातामिति प्राहुः सर्वं यत् सर्वगं बृहत् ॥२५१॥
सत्यं ज्ञानमनन्तं * तद्ब्रह्म सत्यमसत्तथा ।
जड-सज्जगतो व्याप्तं येन तत्सचराचरम् ॥२५२॥
तद् व्यापकत्वमाचार्यैर्द्विज्ञायादौ ततोऽखिलम् ।
तदेवेति भवेद् बोधः श्रीगुरोरुपदेशतः ॥२५३॥
तदा तज्ज्ञानमित्याहुः स गुरुः शिष्य एव सः ।
तथाह भगवान् कृष्णो गीतायां तत्र तत्र च ॥२५४॥
"येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ।
तज्ज्ञानमुपदेक्ष्यन्तीत्येवं" पूर्वेण चान्वयः ॥२५५॥
अन्वय-व्यतिरेकाभ्यां यत्स्यात् सर्वत्र सर्वगम् ।
तज्जिज्ञास्यमिति प्रोक्तं श्रीमद्भागवते स्फुटम् ॥२५६॥
एतावदेव जिज्ञास्यं तत्त्व-जिज्ञासुनात्मनः ।
अन्वय-व्यतिरेकाभ्यां यत्स्यात् सर्वत्र सर्वदा ॥२५७॥
प्रतीतिः स्वतनावात्मा सर्वत्रात्मतया तथा ।
न ह्यात्मानुभवो यावत्तावज्ज्ञानं न तद्भवेत् ॥२५८॥
एवं सत्यपि यो देहे चैतन्यानुभवो भवेत् ।
सर्वत्रानुभवाभावात्सोंऽशोऽनुभव ईरितः ॥२५९॥
"ममैवांशो जीव-लोके जीव-भूतः सनातनः"

---

* "तद्वाक्य ब्रह्म सत्यता." पा. ८३ अन्वयव्यतिरेकौ=संबधासंबंधौ. ८४ जिज्ञास्यं= जिज्ञासायोग्यं (ज्ञातु-मिच्छा जिज्ञासा) ८५ प्रतीतः=अनुभूतः

इत्युक्तो यो भगवता तस्यानुभव एव सः ॥ २६० ॥
स भोक्ता देह-मध्यस्थो न देहाद्बहिरण्वपि ।
तथा देहे चिदात्मज्ञा न विदुर्ब्रह्म सर्वगम् ॥ २६१ ॥
न ब्रह्मज्ञा चिदंशज्ञा ब्रह्मज्ञा ब्रह्म सर्वगम् ।
जानन्ति सर्व-मिथ्यात्वात्सर्वं ते सर्वगं विदुः ॥ २६२ ॥
आदौ विलक्षणतया जडाज्जगति वै जडे ।
जानन्ति तस्य मिथ्यात्वात्तदेवेत्यथो विदुः ॥ २६३ ॥
सर्वस्मिन् ब्रह्म सर्वस्माद्विलक्षणतया विदुः ।
स बोधो व्यतिरेकाख्यः स आवरण-भङ्गकृत् ॥ २६४ ॥
स आत्म-तत्त्व-बोधः स्यादात्मानन्तो हि सर्वगः ।
सत्य-ज्ञानानन्ततया ज्ञातेनावरणं ततः ॥ २६५ ॥
विनष्टावरणा विद्या यदा जड-विलक्षणः ।
साक्षादधिगतः स्वात्मा किन्तु सर्व-गतो यदि ॥ २६६ ॥
सर्व व्याप्यावशिष्टो यो सोऽनन्तो वेद-वर्णितः ।
सत्य-ज्ञानानन्ततया ज्ञेयं ब्रह्मेत्यतः श्रुतिः ॥ २६७ ॥
सत्यं तु स्वप्रकाशत्वात् त्रिषु कालेषु सत्तया ।
ज्ञानं जडादन्यतयानन्तं व्याप्यावशेषतः ॥ २६८ ॥
आत्मा स्वदेहाधिगतः सर्वत्राधिगतो न चेत् ।
स आत्मा प्रतिबिम्बांशो यथा ह्ययमिति श्रुतिः ॥ २६९ ॥
यथा ह्ययं ज्योतिरात्मा विवस्वानापोभिन्ना बहुधैकोऽनुगच्छेत् ।
उपाधिना क्रियते बोधरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥ २७० ॥
यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः ।
दृश्यते सन्नपि द्रष्टुरात्मनो नात्मनो गुणः ॥ २७१ ॥
इति भागवतेप्युक्तः प्रोक्तो भगवतापि सः ।
"ममैवांशो जीव-लोके जीवभूत" इति स्फुटम् ॥ २७२ ॥
सच्चिन्मात्रो हि देहस्थो न देहाद्बहिरण्वपि ।
ज्ञाते तस्मिन् कथं ज्ञातमनन्तं सर्वगं बृहत् ॥ २७३ ॥
यावदात्मतया ब्रह्म न ज्ञातं यत्तु सर्वगम् ।
तावदावरणं नष्टमित्याहुस्तत्कथं भवेत् ॥ २७४ ॥
अलं किं बहुनोक्तेन सर्वत्राधिगतो यदा ।

---

८६ विलक्षणता = भिन्नता. ८७ सत्ता = अस्तित्वं.

आत्मा तदैवावरणं जानीयाद्भ्रामित्यथ ॥ २७५ ॥
ज्ञाते सर्वगते नश्येदविद्यावरणं तथा ।
तत्सर्वं सर्वगं चेति ज्ञानं विक्षेप-नाशनम् ॥ २७६ ॥
विषयाणामिन्द्रियाणां ब्रह्मत्वं विदितं यदा ।
अविद्या सा तदा नष्टा विक्षेपाख्येति या पुरा ॥ २७७ ॥
नश्यत्यभ्यासयोगेन सापि संस्कार-रूपिणी ।
सोऽभ्यासो द्विविधः प्रोक्तो ब्रह्म-विद्या यथा द्विधा ॥ २७८ ॥
शरीरात्मत्व-संस्कारश्चिदात्म-ध्यान-योगतः ।
शनैर्नश्यति संस्कारः* स्वचिदात्मतया दृढः ॥ २७९ ॥
सोऽनन्तत्वेन विज्ञातो यथाऽऽचार्योपदेशतः ।
तथा सर्वगतो ध्येयो जडादन्योऽन्तवर्जितः ॥ २८० ॥
नाप्नोत्यर्क-प्रकाशान्तं दृष्टिर्दूरगतापि वा ।
चित्प्रकाशे मतिर्यावद् धावत्यग्रे ततोऽपि सः ॥ २८१ ॥
ततो तमप्राप्य चिदात्म-+नाश-प्रकाशिता तेन तदेकरूपः ।
आश्लिष्य बोधात्ममयीं प्रतीतिं स्यात्सुस्थिरा तावदहो समाधिः ॥ २८२ ॥
न यत्र विश्वं यदिदं प्रबोधे न कल्पितः स्वप्नकृतः प्रपञ्चः ।
नात्मा प्रतीतिः स्फुरणात्मिका या सुप्तिस्तुर्यां विमलेति सोक्ता ॥ २८३ ॥
अतस्तु विक्षेपलयौ न यत्र स निर्विकल्पः कथितः समाधिः ।
विक्षेप-रूपा जड-कल्पना वै सुप्तिर्लयस्तेन‡ सदा समाधिः ॥ २८४ ॥
तस्मादभावोहि तयोर्यथा स्यादभ्यास-वैराग्य-बलो यतेत ।
अभ्यास-शीलो यदि चेद्विरक्तो विक्षिप्त-चित्तो न भवेत्स कस्मात् ॥ २८५ ॥
तथापि संस्कार-बलेन चेतो विक्षिप्यमाणं यदि चेत्समाश्रौ ।
यश्चित्तयं चिन्मयतां जहाति तत्राप्युपादानतया तदीक्षेत् ॥ २८६ ॥
चित्रं हि यच्चित्र-पटे विभाति तत्तन्तु-मात्रं जगदात्मनीच्छम् ।
विक्षिप्त-चित्तं विषयेषु येषु ध्यायेच्चिदात्मैव हि तेषु तेषु ॥ २८७ ॥
प्रत्याहारेषु सर्वेषु प्रत्याहारो§ य उत्तमः ।
उपादान-स्मृतौ चित्तं चिदात्मन्येव तिष्ठति ॥ २८८ ॥
यदि चित्तं निराकारे निरुद्धं न स्थिरं भवेत् ।
अनन्वयन चिदाकारं जगत्पश्येत्समाहितः ॥२८९॥

---

* "स्याच्चिदात्मतया" इति पाठांतरम् + "चिदात्मनीशे प्रकाशितां" इति पाठांतरम्
८८ तुरीया=चतुर्थी (अवस्था—अवस्था-त्रयं = जागृति-सुषुप्ति-स्वप्नाः) ‡ "स्तेन" पाठांतरम्. ८९ प्रत्याहारेषु=प्रत्याहारः विषयेभ्यः इंद्रियनिवृत्तिः § 'रोऽयमु' पाठांतरम्

निर्विकल्प-समाधिं वा प्राप्तोऽपि स विकल्पकम् ।
योगमभ्यस्य सर्वत्र पश्येद्ब्रह्मैव केवलम् ॥ २९० ॥
तरङ्गाः सलिलाकारास्तन्त्वाकाराः पटा यथा ।
मृदाकारा घटा यद्वच्चिदाकाराश्चराचराः ॥ २९१ ॥
किन्तु त्यक्त्वा चिदात्मत्व-स्फूर्तिं यदि जडं जगत् ।
ध्यायेद् वृथा श्रमस्तस्य सिद्धिश्च स्फुरण-स्मृतौ ॥ २९२ ॥
ब्रह्मादि-स्तम्भ-पर्यन्तं पूर्णमावरणैः सह ।
ब्रह्माण्डमेकं हि यथा तथा सङ्ख्यातिकोटयः ॥ २९३ ॥

यथा समुद्रोम्बु-तरङ्ग-मालाः स्फुरन्ति तोयेन जलैक-मात्राः ।
तथाण्ड-रूपाखिल-जीव-कोशान् ध्यायेच्चिदब्धौ स्वचिदेक-मात्रान् ॥ २९४ ॥
चिदात्म-हेम-स्फुरणाः स्फुरन्ति सर्वेऽप्यलङ्कारतयाऽण्डकोशाः ।
ततस्तु ते स्वात्म-हिरण्य-मात्रा इति प्रतीतिः स्थिरता समाधिः ॥ २९५ ॥
यथाखिलत्वं खलु देशतोऽस्य चिदात्मनो ब्रह्मण एवमेव ।
सर्वत्वमीक्षेदथ कालतोऽपि स्फुरन्ति येनैव लवा निमेषाः ॥ २९६ ॥
द्रष्टा च यो वाद्य-घटिकाख्य-यन्त्रं क्षिप्तं जले मग्नमपि स्म वेद ।
येनात्मनान्तर्बहिरीक्षितेन तेनैव तावन्तमपि स्वकालम् ॥ २९७ ॥
यन्त्राद्युपादानतया यथात्मा यन्त्रादिकैरैक्यतया विभाति ।
* * * * ॥ २९८ ॥

कालोऽयं द्विपरार्धान्ततत्स्फूर्तिः स्वेन तेन चेत् ।
स्वप्रकाशात्स सत्यः स्याच्चित्स्फूर्त्या चेत्तदेव सः ॥ २९९ ॥
किरीट-कटकादीनां स्फूर्तिः स्यात्कनकादतः ।
हेम-प्रकाशकार्याणामसत्त्वात्स्वर्णमेव तत् ॥ ३०० ॥
किरीट-कटकादीनां स्वतः स्फूर्तिर्भवेद्यदि ।
सत्यत्वं वक्तुमुचितं तेषां च स्वप्रकाशतः ॥ ३०१ ॥
सत्यं सद्भाति तन्नास्ति सदेवास ततः स्मृतम् ।
अलङ्कार-हिरण्यैक्यमेवं कालात्मनोऽपि च ॥ ३०२ ॥
त्रुट्यादि-कालावयवा न स्फुरन्ति स्वयं यतः ।

---

९० सलिलं=जलं. ९१ अंबु=जलं. ९२ हेम=सुवर्ण. ९३ हिरण्यं=हेम. ९४ किरीट:=मकुट: ९५ कटकं=कंकणं. ९६ त्रुट्यादिकालावयवा भास्कराचार्यैः सिद्धांत-शिरोमणावेवं वर्णिता:—

योऽक्ष्णोर्निमेषस्य खराम (३०) भागः सतत्परस्तच्छतभाग उक्ता ।

(पुढें चालू)

असत्यास्ते ब्रह्मणैव स्फुरन्ति बृहदेव ते ॥ १०३ ॥
एवं स्वयं ब्रह्मविदेव सर्वे ब्रह्मात्मना तेऽवयवा भवाद्याः ।
कालस्य कालः स्वयमेव योगी देशो न कालः पृथगात्मनोऽस्य ॥ १०४ ॥
तस्मात्समाश्लिष्य जगत्प्रकाशं काल-प्रकाशं निज-चित्प्रकाशम् ।
देशाश्च कालाः खलु तत्प्रकाश्या ध्यायेत्तदैव ह्यखिलात्म-भावात् ॥ १०५ ॥
स्थूलेन्द्रियाणां व्यवहारमात्रं सन्त्यज्य विश्वं मनसानुचिन्त्य ।
ध्यायेच्चिदैक्येन चिदात्म-दृष्ट्या प्रोक्तो मुनीन्द्रैः स विकल्प-योगः ॥ १०६ ॥
जगच्चिदैक्यं व्यवहार-काले पश्यन् व्रजन् वा विलपन् विजिघ्रन् ।
प्रतीति-गम्यं यदि चेदखण्डः समाधिरेषः कथितो मुनीन्द्रैः ॥ १०७ ॥

स वै जीवन्मुक्तः स खलु परिपक्वात्मनिगमो ।
यदा चित्तन्तुत्वं जड-पट-गतं पश्यति सदा ॥
जनेषु व्यापारेष्वपि च चिदुपादानमिदम् [?]
जगद्योगी भोगेष्वनुभवति सर्वात्मकतया ॥ १०८ ॥

विषया स्वचिदाब्धि-बुद्बुदाः सुखसिन्धूर्मि-समूह इन्द्रियाणि ।
इति पश्यति संयमी यमीशो यमइच्छं खलु राजयोगिनां तु ॥ १०९ ॥
चित्तन्तु-दृष्ट्या जगदम्बरत्वं पश्यत्ययं दृङ्नियमोऽथ शब्दाः ।
भवन्ति नश्यन्ति च बुदबुदास्ते चित्सिन्धुजा वाङ्नियमोऽयमुक्तः ॥ ११० ॥
चिदम्बु-पानार्थ-तृषा त्वरावान् जडैस्तरङ्गैः सहितं चिदम्भः ।
पश्यत्यथाप्यूर्मि-कुल-प्रतीतिर्न वै जड-त्याग इति स्वतः स्यात् ॥ १११ ॥
चिद्दर्शनाय त्वरिताभिलाषो विश्वं स ईक्षत्यपि तज्जडत्वम् ।
पश्यन्नपश्यत्यखिलात्म-योगी त्यागी न च त्यागमपि स्म वेद ॥ ११२ ॥
अशब्दमात्मानमशेष-शब्देष्वनुस्मरन् वक्त्यपि नित्य-मौनी ।
जातेषु नष्टेषु च बुद्बुदेषु जातो न नष्टोऽपि च चित्समुद्रः ॥ ११३ ॥
जगन्नादावन्ते वदति निगमो ब्रह्मणि ततो
न मध्येऽपि स्वर्णे कटक-मुकुटाद्या अपि यथा ।

(मागील पृष्ठावरून चालू.)

त्रुटिर्निमेषैर्धृतिभि (१८) श्च काष्ठा तांत्त्रिशता (३०) सद्गणकैः कलोक्ता ॥ १ ॥
त्रिंशत्कलाश्चैव घटिका क्षणः स्या— न्नाडी-द्वयन्तः खगुणै (३०) र्दिनं च ।
गुर्वक्षरैः खेन्दु (१०) मितैरसुस्तैः षड्भिः पलं तैर्घटिका खषड्भिः (६०) ॥ २ ॥
सपाद् घटीषष्टिरहः खरामै (३०) र्मासो दिनैस्तार्द्विकु (१२) भिश्च वर्षम् ।

९७ व्रजन् = गच्छन्. ९८ आत्मनिगम : = आत्मज्ञानं. ९९ बुद्बुदः = "बुडबुडा" इतिमहाराष्ट्रभाषायाम्. १०० ऊर्मिः = तरंगः १ अंबरत्वं = वस्त्रत्वं.

सदा पश्यन्नेवं निखिल-जन-वृन्देऽपि विजने ।
वसन्नास्ते योगी न हि विजने-वासो गिरि-गुहा ॥ ३१४ ॥
जडे कानने वा जडाद्रौ गुहायां स्थितो वा जनं त्वीक्षते हृद्गुहायाम् ।
जनस्थोऽप्ययं निर्जने राज-योगी जनं निर्जनं ब्रह्म-भावेन पश्यन् ॥ ३१५ ॥

समाः सर्वे देहा न हि * जगदुपादानमसमम् ।
सदा पश्यन्नेवं भवति समकायो हि विजने ॥
अतर्क्यं यत्साम्यं समतनुरथ स्थाणु-सदृशो ।
जनं त्यक्त्वाटव्यां वसति समकायो न खलु सः ॥ ३१६ ॥

असिद्धं जगद् दृश्यते यत्र सिद्धं सतां नित्य सिद्धासनं तत् प्रसिद्धम् ।
भ्रमत्येव देहः स्वकर्मानुरूपं तथाप्यासने सर्वदा राज-योगी ॥ ३१७ ॥
वृत्तिर्बहिर्निःसरतीह लोके तां प्रत्यगात्मन्यखिलात्मनीशे ।
सच्चिन्मये शीघ्रतया करोति स पूरकोक्तः खलु राज-योगी ॥ ३१८ ॥
यावत्स्थिरा वृत्तिरशेष-शेषे तावद्भवेत् कुम्भक आत्मनीशे ।
जगत्युपादानतयेक्षितुं तां योगी शनैर्मुच्यतिरेचकोऽयम् ॥ ३१९ ॥

स्वयं ध्याता ध्येयो भवतिच तदन्येन मनसा ।
स्मृतिश्चेत्तद्ध्यानं सततमितरध्दानमथ किम् ॥
क्वचित्तद्विस्मृत्या स्मरति जडतां तत्र च तदि- ।
त्यहं प्रत्याहारो भवति खलु योगि-क्षिति-पतिः ॥ ३२० ॥

कटकादिषु हेम-धारणा मनसि च जगति स्वधारणा ।
यदि चेदनिशं भवेत्स्थिरा स हि योगि-क्षितिपालकोदितः ॥ ३२१ ॥
चराचरोर्मिष्वनिशं चिदब्धिं पश्यत्यखण्डः स समाधिरुक्तः ।
कालात्मना वञ्चित-कालमृत्युश्चित्पार्थिवं पश्यति चित्पृथिव्याम् ॥ ३२२ ॥

मृषा बालान् बाला रचयति यथा सा सुतवती ।
जडान्यङ्गान्येवं रचयति यमादीन्यपि जनः ॥
स चाख्यातो योगी ह्यपि पतति वै मृत्यु-वदने ।
श्रुतिर्मृत्योर्मृत्युं वदति यदि नानात्वदृगिह ॥ ३२३ ॥

जड-यमः सजडान् विषयान् यदि जड-हृषीक-मुखैर्न हि सेवते ।
रचयति स्म जडान् नियमादिकान् कथमसावमरो जड-दृग्भवेत् ॥ ३२४ ॥

जड-प्राणायामो जड-विजन-वासो जड-तनुम् ।

---

* "जगदुपादानसमता" पाठांतरम्. २ विजनं = एकांतः ३ पूरककुंभकरेचकाः = योग-शास्त्र-प्रसिद्धा वायुनिरोध-प्रकाराः ४प्रत्याहारः = इंद्रियनिवृत्ति : ५योगिक्षितिपति = योगिराजो राजयोगीवा. ६ बाला = कन्या. ७ यमः = वायुनिरोधः ८ हृषीकं = इंद्रियं.

समां कृत्वा स्थाणूपम उपविशत्यासनजडः ॥
जड प्रत्याहारो भवति जड-नानात्व-दृगिति ।
श्रुति-प्रोक्तं मृत्युं व्रजति स च योगी कथमहो ॥ १२५ ॥

योगाङ्ग-मात्रं तु चिदात्म-मात्रं नानात्व-मात्रापि खपुष्प-मात्रम् ।
मृत्योश्च मृत्युः स हि राज-योगी जीवन्विमुक्तो गुरु-देव-भक्तः ॥१२६॥
श्रीसच्चिदानन्द-गुरुर्मुकुन्दो यः प्रादुरासीन्मलयाद्रि-देशे ।
तस्यानुकम्पा-लव-केश-बुध्याऽनुभूतिलेशोऽयमिह प्रसिद्धः ॥ १२७ ॥
त्रिविक्रमत्वं खलु वामनस्य विश्वात्मनो कृष्ण-कृपावलोकात् ।
तस्यानुभूत्यम्बु-निधेस्तरङ्गोऽनुभूतिलेशोऽयमाविरासीत् ॥ १२८ ॥

इति श्रीमद्वामन-पण्डित-विरचितोऽनुभूति-लेशः समाप्तः

समाप्त.

---

९ प्रादुरासीत् = प्रकटीभूतः १० अनुकंपा = कृपा.

श्री

अथ प्रभुवंशकाव्यम्.

गोपालकृष्णकृपया प्रभुवंशलीलासद्वर्णने मतिरभूदिति संप्रणम्य ॥
शिष्टान्करोमि रचनामथ तद्विलोके चंद्रोदयेऽम्बुधिरिवर्ध्यतु सत्प्रहर्षः॥ १ ॥

बल्लालोऽरमतेषुपातविषये श्रीवर्धने भार्गव– ॥
क्षेत्रे सूनुरथास्य पुण्यनगरे श्रीबाजिरायप्रभुः ॥
बल्लालः पुनरास तस्य तनयः श्रीमान्वदान्यः क्षम–॥
स्तस्यासीत्किल वंशसंततिकरः पुत्रस्तु नारायणः ॥ २ ॥

सेनापूर्णः सशक्तिः शिवसचिवयुतो राजकर्मप्रवीणो ॥
धन्यः सत्यप्रतिज्ञो बहुलकुशलवाग्धर्मशौर्यप्रतापी ॥
शत्रोः स्तुत्यः सभायां रविसमसुमहा राजसिंहासनाढ्यः ॥
पृथ्वीपाणिग्रहीता नृपतिरतिमतिश्चास नारायणः सः ॥ ३ ॥

कालं कियंतं स विहृत्य भूमौ गतो यवीयानपिदेवलोकम् ॥
निधाय गर्भं किल धर्मपत्न्यां तेजो निधायार्क इवास्तमग्नौ ॥ ४ ॥

नृपांगनाथ गर्भिणी ह्यमोघवीर्यधारिणी ॥
तमोरिबिंबधारिणी दिगिंद्रपालितेव सा ॥
महोग्रदुष्टशासना सुशोभना वरश्रिया ॥
विशेषसौख्यदायकं पुरंदरं समाश्रिता ॥ ५ ॥

श्रीमद्गणेशमानम्य बालानां बोधसिद्धये । अनन्तः कुरुते व्याख्यां प्रभुवंशस्य बोधिनीम् ॥१॥ व्याख्यायन्ते पदान्यत्र विषमाण्येव नेतरत् । श्लोकाः सर्वेऽपि नैवात्र व्याख्याता विस्तृतेर्भयात् ॥२॥ गोपालेति । शिष्टान्संप्रणम्य रचनां करोमीति संबंधः । तद्विलोके तदवलोकने सति । सतां पण्डितानां प्रहर्षः ऋध्यतु वर्धताम् । कस्मिन्कइव । चन्द्रोदये अंबुधिरिव ॥१॥ बल्लालेति । इषुपात इति कोंकणसंज्ञा । श्रीवर्धने ग्रामे । भार्गवक्षेत्रे परशुरामक्षेत्रे । अथ अस्य बल्लालस्य सूनुः पुत्रः श्रीबाजिरायप्रभुः पुण्यनगरे अरमतेति संबधः । तस्य बाजिरायप्रभोः पुनः बल्लालः बल्लालनामकः वदान्यः दाता श्रीमान् क्षमश्च तनयः पुत्रः आस बभूव । तस्य बल्लालस्य नारायणनामा पुत्रः वंशसंततिकरः वंशविस्तारकरः आसीत्किल ॥२॥ सेनेति रविणा सूर्येण समं तुल्यं सुष्ठु महस्तेजो यस्य स रविसमसुमहाः ॥३॥ कालमिति । अतिशयेन युवेति यवीयान् तरुणतरः अल्पवयस्कोऽपीतिभावः ॥४॥ नृपेति । तमोरिबिम्बधारिणी सूर्यबिम्बधारिणी । इन्द्रपालिता दिगिव पूर्वदिगिव । महत् उग्रंच दुष्टेषु शासनं यस्याः सा महोग्रदुष्टशासना । वरया श्रेष्ठया श्रिया गर्भजनितशोभया सुशोभना ॥५॥

दिवंगते राजनि मंत्रिवर्यः॥ श्रीशं ययाचे विभुमित्थमार्यः ॥
त्वं देहि राज्यं ह्यवितुं सुभूपम् ॥ राजा मुनेर्यागमिवाशु रामम् ॥ ६ ॥
नतः श्रीहरे तेऽस्मि पादारविंदम् ॥ गदाद्यायुध प्रोल्लसद्रत्नमौले ॥
प्रसन्नात्मना संकटे पाहि विष्णो ॥ कुरु त्वं कृपां मां शरण्य प्रपन्नम् ॥७॥
वत्स त्वया यद्वृतमीप्सितं तच्छ्रुत्वा प्रसन्नोऽस्मि तवातिभक्त्या ॥
भवामि राज्याकलने सहायः स्वप्ने जगादेति हरिस्त्वमात्यम् ॥ ८ ॥
मंत्र्याद्याः पौरसंघाः सकलजनचयाः पण्डिताश्चाश्रिता ये ॥
येऽस्मद्राज्येऽभ्यगच्छन्श्रममथ सहने नापि शक्ता अनाथाः ॥
ते सर्वे रक्षणीया अभयमपि सदा देयमेभ्यः पुरेऽस्मि- ॥
न्नानंदः संविधेयो ऽ तनुत मतिमती दोहदं गर्भिणीत्थम् ॥ ९ ॥
स्वस्ति श्रीनृपशालिवाहनशकाद्यातेऽगनंदागम- ॥
क्ष्मामानाब्दमिते त्वनेहसि जये वर्षे वसन्तेऽधिके ॥
राधे श्वेतदले शुभे मुनितिथौ सोमेऽदितौ चोदिता- ॥
दर्कादष्टिघटीष्विताsु समभूद्गंगोदरान्माधवः ॥ १० ॥
पूर्वस्या इव मातुरंकउदयग्राव्णीव तेजोनिधिः ॥
सद्यः प्रादुरभूत्पुरंदरगिरौ पूषेव सन्माधवः ॥
सर्वेषामनवद्यवेदगदितानेकक्रियावर्तकः ॥
पंकस्येव रिपोर्विशोषणकरो मित्राब्जविद्योतकः ॥ ११ ॥
मेघा नीरमपूरयन् क्षितिरभूद्व्रीहिप्रपूर्णा द्रुमा ॥
भूरिस्वादुफलाः खलाश्चविमलाचारा अभुवंस्तदा ॥
नद्यः स्वच्छजलाः प्रभूतपयसो गावः सुखाः संवनु- ॥
र्वाता दिङ्निकराः प्रसेदुरधिपो जातो यदा माधवः ॥ १२ ॥

दिवमिति । आर्यः मंत्रिवर्यः राजनि नारायणे दिवंगतेसति श्रीशं विष्णुं प्रति विभुं आत्मनोरक्षितारं प्रभुं इत्थं ययाचे इति संबंधः । राजा दशरथः मुनेर्विश्वामित्रस्य यागं अवितुं रक्षितुं राममिवेतिच संबंधः ॥६॥ नतइति । हे शरण्य शरणागतवत्सल त्वं प्रपन्नं शरणागतं मांप्रति कृपां कुरु॥७॥ वत्सेति । हे वत्स त्वया यत् ईप्सितं आप्तुमिष्टं । वृतं प्रार्थितम् ॥८॥ मंत्र्याद्याइति । मतिमती बुद्धिमती । गर्भिणी इत्थं दोहदं स्वमनोरथं अतनुत लोकेषु विस्तारयामास ॥९॥ स्वस्तीति । अंगानि षट् नंदा नव आगमाः षट् क्ष्मापृथ्वी एका अंकानां वामतोगतिरिति अंगनंदागमक्ष्मा-मानाब्दमिते १६९६ एतत्परिमिते अनेहसि काले याते सति । जये जयनाम्नि वर्षे । वसंते ऋतौ । अधिके राधे वैशाखे मासे । श्वेतदले शुक्लपक्षे । शुभे मुनि-तिथौ सप्तम्यां। सोमेवारे । आदितौ पुनर्वसुनक्षत्रे । उदितात् अर्कात् । अष्टिघटीषु षोडश घटीषु इतासु सतीषु । गंगोदरात् माधवः समभूत् ॥१०॥ पूर्वस्या इति । उदयग्राव्णि उदयाचले ॥११॥ मेघा इति । व्रीहिप्रपूर्णा व्रीहिरित्युपलक्षणं सकलधान्यसंपन्नेतिभावः । भूरीणि प्रभूतानि स्वादूनि मधुराणिच फलानि येषां ते ॥१२॥

जाते माधवभूपतौ समपतद्यद्यन्महत्संकटम् ॥
तच्चद्वै शरदभ्रवत्स्वयमगान्नाशं विभोस्तेजसा ॥
या रासापहृता हरेर्विरहिता गोपीव भीता पुरा ॥
सा पश्चात्कुरगान्मुदं हरियुता गोपीव तद्वीक्षणात् ॥ १३ ॥

अभ्यज्य तैलरसतःसलिलैःकवोष्णैः॥संस्नाप्य चेलनिहितः प्रसुवाथ बालः॥
न्यग्रोधपर्ण-शायितो वदने करेण॥पादं दधत्किल मुकुंद इवाबभौ सः॥१४॥

अत्रेर्दारानुरागाद्धरिहरविधयः प्राग्यथा बालभावात् ॥
प्रेंखायामुद्विजन्हुः श्रुतिनुतविभवाः सेव्यमाना मुनींद्रैः ॥
स्थित्यंतोत्पत्तिदक्षा जगदखिलविधीनादधानास्तथैव ॥
श्रीमानेकोपि भूपस्त्रय इव विजहाराश्रितः पोतभावम् ॥ १५ ॥

जनश्रेष्ठः कष्टे सकलसमुदायेन विचर ॥
न्नमात्योनिश्चिक्ये श्रमपरिहृतावीश उदितः ॥
स भव्यः स्तोतव्यश्चरणनतिपुण्येन च विभोः ॥
सुदूरे घोरं नः सपदि भवितेत्थं स सुमतिः ॥ १६ ॥

नानारातिभिरुन्मदैःक्षितिमिमां संपीडितां चासकृत् ॥
खिद्यंतीमिव वीक्ष्य मंत्रिनिकरा आश्वासयन्तोऽभ्यगुः ॥
प्रेंखामप्यधिशायिनं विभुममी ब्रह्मादिदेवा यथा ॥
दैतेयार्दितभूमिसांत्वविधये क्षीराब्धिसंशायिनम् ॥ १७ ॥

जातेति । पुराकिल रासोत्सवे गोप्यः श्रीकृष्णेन रममाणावयं धन्याः यदस्मासु लंपटोहरीरमत इत्यहंकृता अभूवंस्तदा सर्वज्ञो हरिस्तद्वीदित्वैकामादायान्तार्हितस्तया चान्यत्रारमत । ततः साप्यहंकारमकुरुत । सर्वा विहायातिसुंदर्या मया साकमसौ रमत इति । ततस्तामप्येकस्मिन्कानने जहौ । ततोतिदुःखिता भीता सा अनाथेव त्यक्ताभिमाना रुरोद । तामतिभीतां निर्विण्णां हरिरन्वगृहीत्ततः सायथापुनः प्रमुदिता तथा पृथ्वी माधवावतरणात्प्रागनाथा भीता-चैतदुदयेच पुनरतिप्रमुदितेति उत्तरार्द्धतात्पर्यमुपमोपमेयभावेनावधेयम् ॥१३॥ अभ्यज्येति । प्रसुवा मात्रा । कवोष्णैः मंदोष्णैः । चेले वस्त्रे । निहितः स्थापितः । न्यग्रोधोवटः तस्यपर्णे शायितः शयानः ॥१४॥ अत्रेरिति । अत्रेर्दारानुरागात् अनसूयानुरागात् । पोतभावं शिशुत्वम् ॥ १५ ॥ जनश्रेष्ठइति । जनश्रेष्ठः सुमतिः सुबुद्धिः स अमात्यः कष्टे संकटे उपस्थिते सति सकलसमुदायेन इतरमंत्रिसमूहेन सह विचरन् विचारं कुर्वन् सन् इत्थं निश्चिक्ये निश्चयं कृतवान् । इत्थं कथं । ईशः प्रभुः नः श्रमपरिहृतौ श्रमपरिहारे उदितः उत्पन्नः अतः भव्यः स प्रभुः स्तोतव्यः तस्य विभोः चरणनतिपुण्येन नः घोरं संकटं सपदि सुदूरे भविता भविष्यति ॥ १६ ॥ नानेति । अभ्यगुः अभिजग्मुः प्रेंखामधिशायिनं पालनायां शयानमपि ॥ १७ ॥

चक्रोद्भवानेकमहोल्बणेषु ॥ घोरेतिकष्टेषु जनाश्चभीताः ॥
त्राता त्वदन्योस्ति न सकटेषु ॥ क्षिप्रं दयस्वेत्यनुवन्विभुं तम् ॥ १८ ॥

विधुः सुधांशुरोषधीर्यथाभिवर्धयत्यसौ ॥
सुधास्रवैःकरैःस्वकैर्नभोंतरंसमाश्रितः ॥
तथा स मंचकेऽचितः स्वधर्मरक्षकः प्रभुः ॥
विनीतमंत्रिभिर्नुतःप्रजाअरक्षदीक्षणैः ॥ १९ ॥

शयनमंगलैःस्नानमंगलैः ॥ स्मितलसन्मुखं कामसुंदरम् ॥
तिलकशोभितं चारुकुण्डलं ॥ विभुमवीवृधंश्चोपमातरः ॥ २० ॥

दुर्वृत्तासुरभारनाशनवशाद्धर्मंचतुष्पादमा–॥
कुर्वीयेव निरूढमित्थमसकलोकेषु संसूचयन् ॥
जानुभ्यां करवारिजद्वितयतो भूमौ मुहूरिंगणम् ॥
चक्रे वेदपदाकृतिर्वसुमतीमाश्वासयन्माधवः ॥ २१ ॥

अग्नौ विप्रवरैर्हुते त्विह यथा देवाः शचीशादय–॥
स्तृप्ता विप्रगणे कृतौ सुरुचिरैरन्नैश्च संतर्पिते ॥
द्रौपद्यर्पितशाकलेशमुदिते विष्णौ मुनीनां गणः ॥
संतुष्टं जगदन्नमश्नाति तथा श्रीमाधवे भूपतौ ॥ २२ ॥

गुण्यां वाणीमुच्चरमाणोऽमृतकल्पां । व्यक्ताव्यक्तामक्षरराजिं कलयंतीम् ॥
धावन्गच्छन्वत्सकपुच्छाननुनृत्यन् । बालक्रीडामल्पवयस्को बहु मेने ॥ २३ ॥

चक्रेति चक्रोद्भवानेकमहोल्बणेषु । स्वचक्रपरचक्र–संभवानेकसंकटेषु तथा घोराणि यानि ईतिकष्टानि अतिवृष्ट्यनावृष्ट्यादिसंकटानि तेषु दयस्व कृपां कुरु । अनुवन् तुष्टुवुः ॥ १८ ॥ विधुरिति । सुधांशुः अमृतमयाकिरणः विधुश्चंद्रः सुधास्रवैःअमृतस्रावीभिः करैः किरणैः। मंचके पर्यंके अंचितःसुंदरः ॥१९॥ शयनेति । स्मितेन लसत् शोभमानं मुखं यस्य तं। तिलकेन कज्जलतिलकेन शोभितं। अवीवृधन् वृद्धिं प्रापयामासुः ॥२०॥ दुर्वृत्तेति । चत्वारः पादा यस्येति चतुष्पात् तं आकुर्वीयेव कुर्यामिव वेदपदाकृतिश्चतुष्पदाकृतिः वसुमतीं पृथ्वीं आश्वासयन् सन् भूमौ जानुभ्यां करवारिजद्वितयतः हस्तकमलद्वयेन मुहुः रिंगणं चक्रे। रिंगणे चतुष्पदाकारानुकरणेन चतुष्पादं धर्मं स्थापयिष्यामीति मुहुर्हस्तस्पर्शेन भीतां भूमिं प्रत्याश्वासितमिति सूचितम् ॥२१॥ अग्नाविति । अन्येनान्ने जग्धे अन्येषां तृप्तौ दृष्टांतद्वयं । श्रीमाधवे भूपतौ अन्नं अश्नाति भक्षयति सति जगत् तथा संतुष्टमिति योजना ॥२२॥ गुण्यामिति । प्रशस्तागुणा यस्याः तां ॥२३॥

कालं तस्योपनीतावुचितमतिमतिर्वीक्ष्य मंत्री स कस्मिन् ॥
स्थाने कार्योपनीतिः सकलबुधजनानित्यपृच्छद्वरिष्ठान् ॥
सर्वेषां संमतोभून्नृपपुरनिकटे पर्वतीयोग्यदेशो ॥
राज्ञा साकं ससेनास्तमगुरथ विभोश्चक्रुरत्रोपनीतिम् ॥ २४ ॥

विप्रराजपथनामवृक्षयोः ॥ प्रश्रयाक्रमफलद्वयेन सः ॥
लोकमाकुलमिवावितुंविभु- ॥ र्माधवोव्रतनिबंधमाकरोत् ॥ २५ ॥

शिष्टैरिष्टैश्चोपनीतस्य कच्याम् ॥ बद्धां मौंजीं मेखलां तस्य दृष्ट्वा ॥
मेने मंत्री तुष्टचेता विधातु ॥ साहाय्यं वै स्वं कटिस्तेन बद्धा ॥२६॥

पालाशं दण्डमेणाजिनमतिरुचिरां मेखलां मुंजनद्धां ॥
कौपीनं ब्रह्मसूत्रं त्रिवृदथ दधते भिक्षमाणाय चेशः ॥
गोत्रासत्पालनोत्थामविरतसरणिं कीर्तिभिक्षां वरेण्यां ॥
प्रादाद्भूमिं त्रिपादां बलिरिव बटवे वामनायोत्तमाय ॥ २७ ॥

विभुपूर्वजराजधानिकायामुचितास्य स्थितिरात्ममंदिरे वै ॥
इति मंत्रिविचारतोधितष्ठावुदयाद्रिं सवितेव स स्वगेहम् ॥ २८ ॥

वप्रस्त्वग्गुरुगोपुरं मुखदरी वीराः सटा नाटिका ॥
रथ्या यस्य रवस्तु तूर्यनिनदः पुच्छः पताकोच्छ्रयः ॥
श्रीरोजा नखराः खराख्रनिकरास्तस्मिन् सुपीठायिते ॥
राजा राजति पुण्यपत्तनहरौ श्रीमाधवः सुंदरः ॥ २९ ॥

पाणिग्रहेचितनृपस्य वधूं स मंत्री ॥ यत्तोपनामतनयां किल निश्चिकाय ॥
राज्ञां निमंत्रणविधौ युयुजे स चारान् ॥सर्वातिसत्कृतिविधौ व्यदधात्प्रतिज्ञाम्॥३०॥

कालमिति तस्य माधवस्य उपनीतौ उपनयने उपचितं कालं वीक्ष्य नृपपुरनिकटे पुण्यपत्तनसमीपे पर्वतीसंज्ञकः प्रदेशः उपनयनयोग्यदेश इति सर्वेषांसंमतोऽभूत् तं पर्वतीप्रदेशं अगुः । अत्र पर्वत्यां उपनयनं चक्रुः ॥२४॥ विप्रेति । ब्राह्मक्षात्रनामकौ द्वौ वृक्षौ तयोर्विनय पराक्रमरूपं फलद्वयं तेन आकुलं लोकं अवितुं रक्षतुमिव व्रतनिबंधं नियमधारणां अकरोत् ॥२५॥ शिष्टैरिति । स्वं स्वकीयं साहाय्यं साहायकं विधातुं कर्तुं तेन विभुना कटिः बद्धा परिकरो बद्ध इति मेने । उपनीतं प्रभुं दृष्ट्वा आश्वस्तो मंत्री महत्सरमात्मन आश्रयं मेने इति भावः ॥२६॥ पालाशमिति । एणाजिनं कृष्णाजिनं । त्रिवृत् त्रिगुणं । ब्रह्मसूत्रं यज्ञोपवीतं गोत्रा पृथ्वी तस्याः सत्पालनं नीतियुक्तं रक्षणं तदुत्पन्नां अविरतसरणिं अविच्छिन्नां ॥२७॥ अथास्य राजधानीमेव सिंहासनत्वेन वर्णयति । वप्रइति । वप्रःप्राकारः गोपुरंःपुरद्वारं श्रीःसंपत् ओजस्त इतं तेजःनखरा नखाः खरा दुःस्पर्शाःअस्त्रनिकराःसुपीठेइवाचरिते सुपीठायिते । पुण्यपत्तनमेव हरिः सिंहस्तस्मिन् ॥२९॥ सर्वातिसत्कृतिविधौ सर्वेषां अत्यंतसत्कारकरणे विषये प्रतिज्ञां व्यदधात् चकार । कस्यापि सत्कारे न्यूनं न पतत्विति प्रत्यज्ञासीदिति भावः ॥३०॥

भूमीरम्या मण्डपशोभाविधियुक्ता ॥ स्तंभा उच्चाश्चित्रकचित्रा किल भित्तिः ॥
प्राकारस्था दीपकमाला रुचिराभा ॥ धारावेश्म श्लाघ्यसुपुष्पोत्कटभासं ॥३१॥

स्वच्छारथ्यासाध्वथसंमार्जनिकाभिर्मृष्टाःसिक्ताश्चंदननीरैरनुवेलम् ॥
नानारंगैःशिक्षितशिल्प्याहितवल्योदीपा विष्वग्व्यापृतशोभाश्चविरेजुः ॥३२॥

ढक्काश्चोरुरवा घनानि सुषिरैः शृंगाणि वाद्यात्रिका ॥
न्यानद्धानि च यामतूर्यनिकरा नेदुस्ततो मण्डपे ॥
पौरा आत्मगृहाणि चापि समलंचक्रुर्मुदाऽनंदिता ॥
योग्यत्वेन च तत्र तत्र चतुराः कार्येषु संयोजिताः ॥ ३३ ॥

सुवासिनीप्रचारतो बभूव धान्यकण्डनम् ॥
सतैलमाषपेषणं सहैव गीतमंगलैः ॥
स्त्रियःपरस्परं ददुर्महोत्सवेन कुंकुमम् ॥
हरिद्रया युतं मिथोऽचलानपूरयन्फलैः ॥ ३४ ॥

निमंत्रिता य आगता नृपेंद्रमित्रपंडिता ॥
हरार्चनोत्सुका द्विजा गुणोत्कटा नियोजितैः॥
यथाधिकारमादरान्निवेशनाय मंदिरम् ॥
प्रदाय सिद्ध ईप्सितः पदार्थ इत्यभाणि तान् ॥ ३५ ॥

लग्नादाविष्टहर्म्ये प्रतिदिनमशनायेष्टसंबंधिभिस्ते ॥
प्रीत्याऽऽहूताश्च शिष्टैर्नृपतिवरयुता मंत्रिणो भुक्तयेऽगुः ॥
काले कालेऽल्पमन्नं बुभुजिर इह ते तोषणार्थाय तेषाम् ॥
वस्त्रालंकारतस्तैरपि नृपसहिताःसत्कृता भूरि पौरैः ॥ ३६ ॥

दिव्याक्षतैः पूरितहेमपात्रं ॥ पाणौ दधद्भिः सुहृदोघयुक्तैः ॥
गृहे गृहे पौरनिमंत्रणाय ॥ यातं पुरोधोभिरथादरेण ॥ ३७ ॥

भूमिरिति । चित्रकैः आलेख्यैः चित्रविचित्रा भित्तिः । श्लाघ्यैः स्तुत्यैः सुपुष्पैः शोभार्थं मध्ये निक्षिप्तैः उत्कटोऽतिशयितो भासो दिप्तिः।तथाविध धारावेश्म भाषायां कारंजेतिप्रसिद्धं॥३१॥ स्वच्छा इति । नानाविधैः रंगैर्नीलपीतादिभिः ।शिक्षितैः शिल्पिभिः कुशलैः आहिताः कृताः वल्यः रंगवल्यः विष्वक् समंततः ॥३१॥ ढक्का इति । ढक्का यशःपटहः घनानि कांस्यतालादीनि । सुषिरैर्वंशवाद्यैः । आनद्धानि मुरजादीनि । चतुराः कुशलास्तत्र तत्र तेषु तेषु कार्येषु योग्यत्वने यथाधिकारं संयोजिताः ॥ ३३, ३४, ३५॥ लग्नादाविति । भुक्त्यै भोजनार्थं अगुः जग्मुः । तैः पौरैरपि नृपसहिता स्तेमंत्रिणः भूरि प्रभूतं यथा तथा सत्कृताः ॥३६॥ पुरोधोभिः उपाध्यायैः ॥३७॥

गृहे गृहे भू विवाहवेलामाख्याय सत्कृत्य निमंत्रितास्ते ॥
निमंत्रितैरंशुकदानमानै ॥ निमंत्रिका आदरतोऽर्चितास्ते ॥ ३८ ॥

वीथिं वीथिमथो पृथक् पृथगमी स्त्रीपुंससंघाः पुरे ॥
पौराणां विनिमंत्रणाय चतुरा हस्त्यश्वपन्यास्त्रिभिः ॥
साकं चापि नियोजितास्तु विविधैर्वाद्यैर्ध्वनाद्भिः पृथक् ॥
भूषाभिर्विविधैः परार्ध्यवसनैश्चंचद्भिराशोभिताः ॥ ३९ ॥

सीमांतपूजनमहोत्सव उक्तरीत्या ॥ भूषांबरादिभिरभूद्वरपूजनं तत् ॥
वाङ्निश्चयोऽपि सुधियामभवत्समक्षमुच्चार्य गोत्रकुलनाम परस्परस्य ॥४०॥

हरिद्राफलग्रंथिपूजावसाने ॥ सुहृद्भ्यो विभज्याददुस्तत्फलाद्यम् ॥
वरिष्ठास्तथेष्टा गरिष्ठादरेण ॥ मुहुस्तोषिता मंत्रिणा तत्सभायाम् ॥४१॥

हरिद्रा वधूमंगलाभ्यंगशिष्टा ॥ वरोद्वर्तनायागता स्नेहयुक्ता ॥
स्त्रियोऽभ्यंजयामासुरेनं स तासां ॥ रराजांतरे कृष्णवद्रासमध्ये ॥४२॥

विघ्नेशपूजनपुरःसरमर्थयुक्तम् ॥ पुण्याहवाचनमभूद्विदुषां समक्षम् ॥
संशोभितं कलशदैवतपूर्णपात्रैर्गौर्यादिकं च निहितं गृहदेवताग्रे ॥४३॥

शिष्टाचारेऽभिजाते स्वभवनविहिते सर्व लोकैस्ततःस— ॥
द्वस्त्रै रत्नैः सुवर्णाभरणवितरणै राजपूजा व्यधायि ॥
कार्तिक्यां कृत्तिकाभे भवति तु गुहसंदर्शने यद्वदेवम् ॥
संघट्टोऽभूज्जनानां प्रतिदिनमथ तद्वीक्षते स्मास्पृशत्सः ॥ ४४ ॥

सूर्यः सर्वानुरागादभवदथ यथा मित्रसंज्ञस्तथाऽसौ ॥
लग्ने सर्वानुरागादभवदपि विभुर्मित्रकल्पोऽधिराजः ॥
मित्राणीत्राप्यमित्रा जग्दषुरथ विभोर्वीक्ष्य लग्नोत्सवं तम् ॥
शिष्टाचारः समानो वसनवितरणे स्वीकृतौ चादरोऽस्य ॥ ४५ ॥

निमंत्रिकाउपाध्यायप्रभृतयः ॥ ३८ ॥ वीथिमिति । चंचद्भिः स्वर्णतंतुमयांचलत्वात्स्फुरद्भिः । परार्ध्यवसनैः श्रेष्ठवस्त्रैः ॥३९,४०॥ हरिद्रेति । हरिद्राचफलानि पूगीफलादिच तग्द्रंथीनां पूजावसाने गरिष्ठो महानादरस्तेन साचासौसभाचतस्यां ॥ ४१, ४२, ४३ ॥ शिष्टेति स्वभवने विहिते गृहसंबंधिनिशिष्टाचारे नव्यवस्त्राद्यर्पणरूपे कृत्तिकाभे कृत्तिकानक्षत्रे गुहसंदर्शने स्वामिदर्शने संघट्टः संमर्दःयद्वद्यथाएवंतया तद्वस्त्रादिकं सः प्रभुः वीक्षतेस्म केषांचित् अस्पृशदितिसंबंधः ॥४४॥ सूर्य इति तथासौ विभुः मित्रकल्पः सूर्यसदृशः सर्वानुरागात् सर्वेषामनुरंजनात् अधिको राजा रंजयितेत्यधिराजः वसनवितरणे वस्त्रार्पणे विषये शिष्टाचारः सत्कारः समानः अमित्राणामपि मित्रतुल्यः आसीत् तत्स्वीकृतौ तेषां वस्त्रादीनां स्वीकृतौ स्वीकारे विषये अस्यापि विभोः संबंधी आदरः समानः अमित्रेष्वपि मित्रेष्विवैवासीदिति ॥४५॥

वरप्रस्थानीये विविधजनसंबाधतुमुले ॥
व्यरोचिष्ट श्रीमान् रुचिरगजयानासनगतः ॥
यतां देवौघानामनुपमरुचां चारुनिकरे ॥
सुरेशानो नाके गजवरसमारूढ इव सः ॥ ४६ ॥
पत्तीनां गजवाजिनां च पुरतः संभूषितानां मुहु- ॥
र्नेदुर्झर्झरकाः पृथक्पृथगथो ढक्कास्तु पृष्ठेऽनदन् ॥
शस्त्रोद्भासितचारुवेषतुरगाद्यारूढवीरावले- ॥
रग्रे नेदुरनेकवाद्यनिकरा नादप्रपूर्णांबराः ॥ ४७ ॥
मुक्तास्रङ्नवरत्नहारविलसद्ग्रीवः स्फुरच्चामर- ॥
श्चंचद्रागवरांशुकव्यजनतःसंवीजितश्छत्रवान् ॥
आदर्शस्तुतिरीक्षमाणजनदृक्संतोषकारो वर- ॥
श्चंचद्धेमशिरस्त्रनद्धविलसच्चूडामणिर्माधव- ॥ ४८ ॥
उच्चैर्बंदिनुतप्रताप उभयप्रांतस्थजांबूनदो- ॥
द्राजद्वेत्रकपाणिवेदितनमस्कुर्वज्जनौघो मुहुः ॥
मार्गेऽग्रेसरचारुमानुषगणांसोद्वाह्यसद्वाहने ॥
नृत्यद्वारनितंबिनीनिकरदृग्राजा रराजाधिभूः ॥ ४९ ॥

वरप्रस्थानीय इति।नाके स्वर्गे यतां गच्छतां अनुपमरुचां असाधारणतेजसां देवौघानां देवसमूहानां चारुनिकरे रमणीयवृंदे । गजवरं ऐरावतं समारूढः सुरेशानः इन्द्रइव । विविधजनसंबाधतुमुले नानामनुष्यसंमर्दसंकुले वरप्रस्थानीये रुचिरगजयानासनगतः श्रीमान् सः माधवः व्यरोचिष्ट शोभतेस्म॥४६॥पत्तीनामिति। संभूषितानां अलंकृतानां। पत्तीनां पादचारिणां। तथा।गजवाजिनां हस्त्यश्वानां । पुरतः झर्झरकामुहुर्नेदुः । तथा ढक्काः यशःपटहस्तु पृष्ठे पृथक् पृथक् । अनदन् नन्दन्ति स्म । नादेन ध्वनिना । प्रपूर्णं अम्बरमाकाशं येषां तथाविधाः । अनेक वाद्य-निकरा वाद्यसमूहाः । शस्त्रैः आयुधैः । उद्भासिताः शोभमानाः । चारुवेषाः सुंदरनेपथ्याश्च । ये तुरगादिषु आरूढा वीरास्तेषां अवलेः पंक्तेः । समूहस्येति यावत् । अग्रेपुरः । नेदुः नंदन्तिस्म ॥४७॥ मुक्तेति । मुक्तास्रग्भिः नवरत्नहारैश्च । विलसन्तीग्रीवा कंधरा । यस्यसः स्फुरच्चामरं-यस्यसः चलदुभयप्रांतस्थ व्यजन इत्यर्थः चंचत् स्फुरद्रूपं रागेण वरे ये अंशुके ते एव व्यजने ततः संवीजितः। आदर्शवत् निर्मलास्तुतिर्यस्य सः आदर्शस्तुतिः । चंचद्धेममये शिरस्त्रे नद्धो-बद्धः विलसन् स्फुरद्रूपः चूडामणिः शिरोरत्नं यस्य । तथा भूतः माधवनरः आसीत् ॥४८॥ उच्चैरिति । उच्चैरुच्चस्वरेण । बंदिभिः स्तुतिपाठकैः । नुतः वर्णितः । प्रतापो यस्य । उभय प्रांतस्थैः उभयभागचारिभिः। जांबूनदो द्राजद्वेत्रकपाणिभिः सुवर्णयष्टिधारिभिः ।भाषायांचोपदार इति प्रसिद्धैः वेदिताः अयममुकशर्मा प्रणमतीतिनिवेदिताः नमस्कुर्वन्तः प्रणमंतः । जनौघा जनसमूहाः । यस्य स तथाविधः मुहुर्वारंवारं ।अग्रेसरं । स्ववाहनस्याग्रतोगच्छन् । चारु सुंदरंच यत् मानुषगणांसैरुद्वाह्यं मनुष्यसमूहैः स्कंधैः उह्यमानं सत् वाहनं भाषायां तखतरावेति प्रसि-द्धं तत्र नृत्यंत्यो या वारानितंबिन्यो वेश्याः । तासां निकरे समूहे । दृक् दृष्टिर्यस्य । अधिभूः प्रभुः । राजा माधवः । मार्गे रराज ॥४९॥

स्त्रियः पादभूषाझणत्कारनादै- र्लसत्संकणत्कंकणानां च वृंदैः ॥
हरंत्यो मनो हेमकांताः कटाक्षैः सुवर्णाऽलंकारैरावृतालंकृतांग्यः॥५०॥

ययुः पृष्ठतस्ता वरस्यैव रामा ॥ दिवो ह्यागता देवता वाभिरामाः ॥
कृताशेषपश्यन्नृचक्षुर्विरामाः ॥ शरीरप्रभाधोभवत्कामरामाः ॥ ५१ ॥

संबंधिभूपसुहृदिष्टवरिष्ठशिष्टसंघान्पृथक् पृथगपूर्वसुनादवाद्यैः ॥
सत्कारयन्पथि मुहुः सचिवोऽभ्यगच्छदानंदपूरितमनोगतकामयुक्तः॥५२॥

वृंदावने मुररिपौ सुषिरं समीरैरापूरयत्यभिययुर्व्रजवासिदाराः ॥
लुब्धा मधावथ यथा सरघास्तथास्ता॥यंति स्म पौरललना जगृधुर्विलोके॥५३॥

पौरा नरा वरविलोकनसक्तचित्ताःस्त्रीपुत्रबांधवसुहृत्परिवारयुक्ताः ॥
आलोकितुं तमधितष्ठुरथ प्रयांतम् ॥ वातायनाभिनवतोरणचंद्रशालाः ॥५४॥

श्रीमद्विलोकनवशादथ सुंदरीणाम् ॥ व्यक्तान्यचेष्टितविधा विविधास्तदानीं ॥
भावा बभूवुरिति पौरनितंबिनीनाम् ॥तस्यावलोकनरतांतरवृत्तिकानाम् ॥५५॥

कस्याश्चिदात्मतनयं स्तनपं विहाय ॥ तं वीक्षितुं लघुगवाक्षमधिष्ठितायाः ॥
संप्रस्नुतस्तनगलत्पयसः पृषंति ॥ मुक्ता गलंति किमु दामन इत्यमंस्त ॥५६॥

पोतस्य शासनवशान्निजनासिकाग्रे ॥ रोषाद्धृतां रुचिरतर्जनिमेकनार्याः ॥
वीक्ष्येक्षितुं लघुगवाक्षमधिष्ठिताया मेने धृना किमितिपक्वदलस्य वीटी ॥५७॥

लसन्ति शोभमानानि । सम्यक् कणन्ति ध्वनन्तिच । यानि कंकणानि । तेषां वृंदैश्च ॥५०॥ कृतः अशेषाणां पश्यतां नृणां चक्षुर्विरामः आत्मन्येवदृगवसानंयाभिस्ताः । पश्यतां दृष्टयो यास्वेव मज्जंत नेतरत्र प्रसरन्तीतिभावः । कामरामा रतिः । शरीरप्रभया अधोभवन्ती कामरामा यासां तथाविधाः ॥ ५१ ॥ संबंधीति ॥ ५२ ॥ वृंदावन इति । सुषिरं वंशवाद्यं । व्रजवासिदाराः गोप्यः । मधौ क्षौद्रे । क्षौद्रवाचकस्यापिमधुशब्दस्य अर्धर्चादिगणे पाठात्पक्षे पुंस्त्वं । सरघाः मधमक्षिकाः । विलोके अवलोकने विषये । यान्ति स्म ययुः । जगृधुर्लुब्धाबभूवुः । लुब्धा याने अवलोकनामक्तौ च क्रमात् दृष्टांतद्वयं ॥ ५३ ॥ प्रयान्तं तं आलोकितुं । वातायनानि गवाक्षाः । अभिनवानि सुंदराणि तोरणानि बहिर्द्वाराणि । चंद्रशालाः शिरोगृहाणि । अधितष्ठुः ॥५४॥ श्रीमदिति ॥५५॥ कस्याश्चिदिति । लघु शीघ्रं । पृषंतिबिंदून् । दामनः मुक्तास्रजः ॥५६॥ पोतस्येति । पोतस्य अर्भकस्य । ईक्षितुं गवाक्षं लघु शीघ्रमधिष्ठितायाः एकनार्याः रुचिरतर्जनिं वीक्ष्य । पक्वदलस्य पक्वनागवल्लीपर्णस्य । वीटी धृना किं इति जनैर्मेने ॥ ५७ ॥

प्रेंखां तनूजसहितां किल चालयंत्या ॥ जालांगदारुगततद्गुणयुक्करायाः ॥
स्रस्तं गुणं बहिरवेक्ष्य पुरो दिदृक्षोर्मेने जनैरिति किमेति फणी स लेढुम्॥५८॥

काचिद्रुदंतमनुनेतुमनास्तनूजमंके निधाय वदने स्तनमस्य यावत् ॥
दत्ते ऽथ तावदवलोकितुमागता सा॥जाले स्थिता स्तनमवेशयदस्य कर्णे॥५९॥

वातायनेषु ललना वरवीक्षणाय ॥ स्वं स्वं शिरो विदधतेऽथ पुरःपुरस्ताः ॥
संघट्टनेऽतिशयिते तु परस्परं ताः ॥ संलोडयंति च मुहुर्मुहुरेकतानाः ॥६०॥

जालानि पौरललना लपनाभिजालैरापूरितानि नृपवीक्षणजातहर्षैः ॥
उद्यत्सहस्रकरदीधितिजालफुल्लै रेजुः सरांसि जलजैरिव पूरितानि ॥ ६१ ॥

यावद्वधूगृहनिवेशनमित्थमासन् ॥ पौरांगनाविविधसंभ्रमकौतुकानि ॥
श्रीमाधवोऽपि सकलैः सह तां विशालामध्यास्त संसदमुदारतरां सुचित्राम्॥६२॥

यथाधिकारमादराद्वधूजनैः सुबुद्धिभि- ॥
र्निवेशिता विपश्चिदाप्तमंत्रिसैनिकादयः ॥
रराज राजराजवद्विराजमानवैभवः ॥
सभांतरे स माधवः श्रियेव वासवस्तदा ॥ ६३ ॥

समुत्थितस्ततो विवाहदेशआसने स्थितः ॥
समर्चितो यथाविधि श्वशुर्यकेण दित्सता ॥
स्वसारमार्चितां तदा वधूवरांतरे पटम् ॥
विधाय दैवविद्गणैरभाणि मंगलाष्टकम् ॥ ६४ ॥

अतिसमयमुलग्नं सावधानं वदद्भि र्विधिनियमितकालेऽतः पटोऽप्युद्विसृष्टः ॥
वरमुखमवलोक्य व्रीडिता बोधितेष्टैर्वरचरणसरोजं मस्तकेनास्पृशत्सा ॥ ६५ ॥

प्रेंखामिति । तनूजसहितां प्रेंखां पालनां चालयंत्याः रज्जूमादायांदोलयंत्याः । जालांगभूते ये दारुणी उभयभागी ये काष्ठे । तद्गतौ तद्गुणयुक्करौ पालनारज्जुयुक्तहस्तौ । यस्यास्तथाविधायाः । पुरोऽग्रे । दिदृक्षोर्द्रष्टुमिच्छोः । कस्याश्चित्संबोधनं । बहिः गवाक्षाद्बहिर्भागे । स्रस्तं पतितं । गुणं पालनांदोलनरज्जुं अवेक्ष्य । जनैः गच्छाद्भिर्लोकैः । इति मेने तर्कितं । इति किं । स गवाक्षाधः समीपगतः फणी भुजंगः । लेढुं पुरः पश्यन्तीमसावधानां नायिकां दंशं कर्तुं एति गच्छति किं । दरावलद्गुणे कृतसर्पबुद्धिभिरध्वागतलोकैः । स सर्प एवनूनमेतां दंशकर्तुं गच्छतीति शंकितमितिभावः ॥ ५८ ॥ काचिदिति । अनुनेतुं सान्त्वयितुं मनो यस्याः सा ॥५९॥ वातायनेष्विति एकताना एकाग्राः ॥६०॥ जालानीति । पौरललनालपनाभिजालैः नागरिकस्त्रीमुखसमूहैः । उद्यन् यः सहस्रकरः सूर्यः । तस्य दीधितिजालानि किरणसमूहास्तैः। फुल्लैः विकासितैः ॥६१॥ यावदिति । उदारतरां महत्तरां । संसदं सभां । अध्यास्त आधिष्ठितवान् ॥६२॥ राजराजवत्कुबेरवत् ॥६३॥ स्वसारं भगिनीं । दित्सता दातुमिच्छता । श्वशुर्यकेण श्वशुरापत्येन शालकेन । श्वशुरस्याभावात् यथाविधि समर्चितः पूजितः । अभाणि उक्तम् ॥६४॥ अतीति । इष्टैः बोधिता प्रणामं कुर्वित्याज्ञप्ता ॥६५॥

प्रणतशिरसि वध्वा वर्षतश्चाक्षतांस्ते ॥
रुचिरकरसरोजे चामराकारशोभे ॥
प्रभवत उदभातां वाद्यसंघा विनेदु— ॥
र्व्यभवदथ समग्रो लोक आनंदपूर्णः ॥ ६६ ॥

अथो वासरे वासरे चेष्टितानि ॥ विलासैरसालोक्षणादीनि रीत्या ॥
अभूवन् जनाः प्रेक्षकास्तत्र तत्र ॥ द्विरेफाः सरोजेष्विवातीव रक्ताः ॥ ६७ ॥

अन्योन्यवक्त्रगतनागलतासुवीटी ॥ संत्रोटने स ललनाकुचवक्त्रनेत्रे ॥
वीटी जहन् मुखगता ललनासु रेमे ॥ गोपीषु देव इव रासगतो मुकुंदः ॥ ६८ ॥

संस्कारिभोजननिषेधवतां स गेहे ॥ संप्रेषयन्विविधमुत्तममाममन्नम् ॥
स्नानं च देवयजनं समये मदीये ॥ कृत्वा मयैत सह मण्डपमित्यशात्तान् ॥ ६९ ॥

तैलं सुगंधि विविधोत्तमहेमपात्रेष्वाधाय मर्दिततनूनतिदिव्यभासः ॥
स्नातान्दुकूललसितान् ऋषिभिःसमानांस्तानासयन्नधिकृतांस्ततपीठपंक्तौ ॥ ७० ॥

सद्धूपवर्तिकुशलाहितरंगवल्ली दीपावलीलसितचंदनासिक्तदेशे ॥
रंभादलस्थरजतामलभाजनेषु ॥ कांताः पदार्थपरिवेषणमाशु चक्रुः ॥ ७१ ॥

सत्केसराहितललाटसुराजिमध्ये ॥ कस्तूरिकातिलकमंगविलेपनं ते ॥
सच्चंदनादिविहितं दधतः सभूषाः ॥ षड्भी रसैर्युतमभुंजत दिव्यमन्नम् ॥ ७२ ॥

शाकश्रेणीर्लड्डुकजातीः परमान्नम् ॥ क्षीरं सर्पिः केसरभक्तादिकमन्नम् ॥
सूपापूपान् व्यंजनराजीरुपदंशान् श्रीखंडं तेऽभुंजत मण्डं मधुरुच्यम् ॥ ७३ ॥

प्रणतेति । वध्वाः प्रणते नम्रे । शिरसि अक्षतान् वर्षतः प्रभवतः प्रभोः ते रुचिरकरसरोजे चामराकारशोभाययोस्ते स्तयाविधे । उदभातां शुशुभाते । अत्र वाद्यसंघाः विनेदुः । समग्रः लोकः आनंदपूर्णश्च अभवत् ॥ ६६ ॥ अथोइति चेष्टितानि व्यापाराः । विलासैः मध्ये मध्ये गीतविनोदादिभिः सह । रीत्या परिपाट्या । अभूवन् तत्रतत्र चेष्टिते अतीवरक्ता प्रीतियुक्ताः । वासरे वासरे दिवसे दिवसे । रसालोक्षणादीनि विवाहप्रसिद्धान्याम्रसेचनादीनि । आदिपदेन अनुक्ताः सर्वेऽप्यन्योन्यो परिकेसररंगप्रक्षेपादयो विवाहप्रक्रियाप्रसिद्धा व्यापारा संगृह्यन्ते ॥ ६७ ॥ जहत् त्यजन् ॥ ६८ ॥ संस्कारीति । समंत्री संस्कारिभोजन निषेधवतां गेहे विविधं । उत्तमं । आमं अपक्वं । अन्नं प्रेषयन् सन् । तान् इति अशात् आज्ञापयामास । इति किं । यूयं स्नानं । देवयजनं देवपूजनंच । मदीये समये कृत्वा । मया-सह मण्डपं एत आगच्छत ॥ ६९ ॥ तैलमिति । इदानीं भोजनार्थमागच्छतां प्रकारं कथयति । अधिकृता नियुक्ताः । तान् ततपीठपंक्तौ विस्तृतपीठपरंपरायां आसयन्नुपवेशयामासुः ॥ ७० ॥ सद्धूपेति । कांताः स्त्रियः सुदराः परुषा वा ॥ ७१ ॥ सत्केसरेति । सत्केसरेण उत्तम केसरेण आहिताः कृताः याः ललाटसंबंधिन्यः सुभ्रूराजयो रेखास्तासां मध्ये कस्तूरिका तिलकं दधतः । अभुंजत भुक्तवन्तः ॥ ७२ ॥ मंडंदाध मस्तु ॥ ७३ ॥

स्वादुः स्वच्छं पाटलपुष्पैः कृतगंधम्॥ कर्पूरेणोद्वासितमेलासुरपुष्पैः॥
कस्तूर्याचोशीरसुगंधैःकृतवासम् ॥ भिन्नं भिन्नं नीरमदभ्रं पपुरेते ॥७४॥

बध्वा कटिं प्रांजलयो विनीताः ॥ पंक्तौ पृथक्त्वेन मुहुर्मुहुस्तान्॥
समाहिता यूयमथाभिभुंग्ध्वम् ॥ संप्रार्थयामासुरिति प्रयुक्ता ॥ ७५ ॥

अन्योन्यस्य मुखे करेण ददतौ ग्रासानुपांतोल्लस– ॥
च्चंचत्कांचनभाजनप्रतिफलन्मूर्ती इवानेककौ ॥
द्वावेतौ तु वधूवरौ विबभतुः सौवर्णके जक्षतौ ॥
तत्रालज्जत चैक्षत प्रददती ग्रासान्कटाक्षैर्वधूः ॥ ७६ ॥

अन्नैः पुष्कलचारुभिः सुविहितै राशीभवद्भिस्तदा ॥
विप्रास्तृप्ततरा बभूवुरथ ते नित्यं यदृच्छाशिनः ॥
आशीर्वादविधायिनो जनपदांस्तत्कीर्तयन्तोऽभ्ययु– ॥
र्दूर्वासा यदि चापतेदसमये स प्रीयमाणस्त्वियात् ॥ ७७ ॥

स्वादिति । पाटलपुष्पैः भाषायां गुलाबपुष्पैरिति प्रसिद्धैः । सुरपुष्पैः लवंगपुष्पैः । पाटलादिपुष्पजातिभिः । भिन्नंभिन्नं वासितं । नीरं उदकं । एते भोक्तारः । अदभ्रं बहुलं । भिन्नं भिन्नं च यथा तथा पपुः । भिन्नंभिन्न मिति सर्वत्रान्वेति । तथा तत्र दर्शनादिति भावः ॥७४॥ बध्वेति । प्रयुक्ता प्रार्थनाकर्मण्यधिकृताः । हे भोक्तारः यूयं समाहिताः एकाग्रमनसः सन्तः । अभिभुंग्ध्वं इति प्रार्थयामासुः ॥७५॥ अन्योन्यस्येति । अन्योन्यस्य परस्परस्य । मुखे करेण । स्वस्वहस्तेन ग्रासान्ददतौ द्वौतु द्वावपि एतौ वधूवरौ । उपांते प्रांतभागे । उल्लसन्ति शोभमानानि । यानि चंचत्कांचनभाजनानि स्फुरत्सुवर्णपात्राणि । तेषु प्रतिफलन्मूर्ती प्रतिबिंबितांगौ सन्तौ । अनेककाविव प्रतिबिंबभूयस्त्वादनेकाविव विबभतुः शुशुभाते । कथं भूतौ । सौवर्णके सुवर्णपात्रे । जक्षतौ भुंजानौ । तत्रवधूः ग्रासान् प्रददतीसती । कटाक्षैः ऐक्षत अवलोकयामास । अलज्जत लज्जतेस्मच । ददतौ जक्षतौ प्रददतीत्यत्रच “ नाभ्यस्तादितिनप्रतिषेधः” ॥७६॥ अन्नैरिति । तदा विप्राः पुष्कलैः बहुभिः । चारुभिः सुंदरैः । दर्शनीयैरिति भावः । पुनः सुष्ठुविहितैः कृतैः । पुनः राशीभवद्भिः अराशयोराशयः संपद्यन्ते तथा भवन्ति राशीभवन्तितः । राशीरूपैरित्यर्थः । अन्नैः ओदनादिभिः । तृप्ततराः अतिशयेन तृप्ताः । बभूवुः अथनित्यं यदृच्छाशिनः तेविप्राः आशीर्वादविधायिनः । तत् अन्नं कीर्तयंतःसंतश्च जनपदान्नाना-देशान् । अभ्ययुः जग्मुः । किंबहुना । दुर्वासानामकऋषिः । यदि असमये । अनवसरे आपतेदागच्छेत्तर्हि । सः प्रीयमाणः सन् इयात् गच्छेत् ॥७७॥

पद्माक्ष्यश्चंद्रवक्त्रास्तडिदमलरुचो योषितो रासखेले ॥
कुंदाभश्वेतवस्त्राः प्रसरदणुकणैः पाटला रागजन्यैः ॥
अन्योन्यस्मिंस्तु रागं ह्यभिमुखवदना दोर्भिरुद्धूलयन्त्यः ॥
फूत्कुर्वत्यः कराग्रैर्ह्रद इव विबभुः खेलशीलाः करिण्यः ॥ ७८ ॥

खेलंत्यो रागधूलिप्रसरविहरणैरुच्चयसन्मण्डपेऽस्मि-
न्नादर्शभ्राजमानच्छदिषिमुकुरकेष्वात्मबिंबान्यवेक्ष्य ॥
स्वाभिःसाकं विहर्तुं किमु सुरललना आगता व्योम्नि रागै- ॥
रित्थं ता मन्यमाना ववृषुरुपरि वै रागधूलीः समेत्य ॥ ७९ ॥

अस्तग्रावशिरोविलंबितरणित्विड्रागरक्तद्युतौ ॥
संध्यायामरुणे विहायसि यथा राकाशशांकोऽरुणः ॥
आशांतावधि रागधूलिपटले सांद्रं समुत्सर्पति ॥
भ्राजन्ते स्म तथा मुखानि शतशो रासोत्सवे योषिताम् ॥ ८० ॥

पद्माक्ष्य इति । कुंदाभश्वेतानि रागखेलात्प्राक् कुंदपुष्पवच्छुभ्राणि वस्त्राणि यासां ताः । रागा द्भाषायां गुलाल इति प्रसिद्धरंजनद्रव्याज्जन्यैः उत्पन्नैः प्रसरद्भिः अणुभिः कणैः रजोभिः करणैः पाटलाः श्वेतरक्ताः । अभिमुखवदनाः । परस्पराभिमुखवक्त्राः सत्यः । अन्योन्यस्मिन् दोर्भिर्हस्तैः । रागं गुलालसंज्ञं रंजनद्रव्यं । उद्धूलयंत्यः उत्क्षिपन्त्यः । योषितः स्त्रियः । ह्रदे जलाशये । कराग्रैः शुंडाग्रैः । फूत्कुर्वत्यः परस्परोपरि जलं सिंचत्यः । करिण्य इव । विबभुः शोभंते स्म ॥ ७८ ॥ खेलन्त्य इति । आदर्शैर्निबद्धैरितिभावः । भ्राजमानं छदिः पटलं । यस्यतस्मिन् तथा विधे । अस्मिन् उच्चमण्डपे । रागधूलिप्रसरविहरणैः खेलंत्यस्तायोषितः । मुकुरकेषु पटलनिबद्धादर्शेषु । आत्मबिंबानि अवेक्ष्य स्वाभिः आत्मभिः साकं । रागैः रंजनधूलिभिः करणैः । विहर्तुं खेलितुं । सुरललनाः देवांगनाः । व्योम्नि आकाशे । आगताः किमु इत्थं मन्यमानाः सत्यः । समेत्य सर्वामीलित्वा । उपरि रागधूलीः ववृषुः वर्षन्तिस्म । वै निश्चयेन । छादरादर्शेषु प्रतिफलितात्ममूर्तिष्वेव दिव्यांगना एव खेलितुमागता इति कृतबुद्धयः स्त्रियः । सर्वाभिः भौमांगनाभिः दिव्यांगनाभिः सहैव विहरणीयामिति बुद्ध्या उपर्येव रागमुष्टीन् क्षिपन्ति स्मेति भावः ॥७९॥ अस्तेति । अस्तग्रावा अस्ताचलः । तस्य शिरसि शिखरे । विलंबी स्रंसमानो यस्तरणिः सूर्यः । तस्य त्विषारागेण रक्ता द्युतिर्यस्यतस्मिन् । अत एव अरुणे ताम्रे । विहायसि आकाशे । संध्यायां अरुणस्ताम्रः । राकाशशांकः पौर्णमासीचंद्रः । यथा भ्राजते तथा । आशांतावधि दिगंतपर्यंतं । सांद्रं यथा तथा समुत्सर्पति प्रसरति । रागधूलिपटले रंजनक्षोदनिवहे । रासोत्सवे रासोत्सवसमये । योषितां खेलंतीनां स्त्रीणां । शतशः असंख्यातानि । मुखानि भ्राजन्ते स्म शोभन्ते स्म । यथा संध्यायामारक्तेऽभ्रे ताम्रं पूर्णचंद्रमण्डलं शोभते । तथा रागधूलिपटले रागताम्राणि शतशो वधूमुखानि शोभन्ते स्मेतिभावः ॥८०॥

अभ्यंगदेशे कृतचारुरंभास्तंभोल्लसद्वारि कदुष्णवार्भिः ॥
स्नाताः सरस्याबभुरुत्थिताभिर्वातेनपद्मिन्य इवाद्भिरार्द्राः ॥ ८१ ॥

हंसारावविराविनूपुररवव्याजत्रिलोकीजयो- ॥
त्सूच्यारावविधायितूर्यनिकरः सिष्णासयोत्कंठितः ॥
चंचद्भ्रूकुटिहस्तपादकुचदृङ्मोहाधिकारीषुको ॥
रासस्नानमनंग एव ललनारूपेण नूनं व्यधात् ॥ ८२ ॥

याते काममहीपतौ प्रियतमारूपेण रासोत्सवम् ॥
तत्साचिव्यविधित्सया ननु मधुस्तैलं विवेशोत्तमम् ॥
आसारायितकोष्णवारिविलसद्वृष्टौ लसंति स्म ताः ॥
खेलंत्यस्तु सुवर्णवर्णतनवो विद्युत्समा योषितः ॥ ८३ ॥

कृत्वा वरानयनसंभ्रममाशु मंत्री ॥ प्रस्थानवद्बंधजनादिनिमंत्रणाद्यैः ॥
आनेतुमात्मभवनं सह तं स वध्वा ॥ वध्वा गृहानभिययौ सकलैः समेतः ॥ ८४ ॥

न्यधुरथकृतपूजामैरिणीं ज्ञातिशीर्षे ॥ कनकवसनयुक्तामग्रजांके वधूं ताम् ॥
स्वभवनगमनार्थं सोऽध्यरोहत्स्ववध्वा ॥ सह महानिवहैस्तां हस्तिनीं सद्विमानाम् ॥ ८५ ॥

अभ्यंगेति । कृता चारवो ये रंभास्तंभाः कदलीदंडौस्तरुल्लसती द्वाः द्वारं यस्य तथाविधे अभ्यंगदेशे । कदुष्णवार्भिः मंदोष्णोदकैः । स्नाता योषितः । सरसिवातेन उत्थिताभिः अद्भिः आर्द्राः क्लिन्नाः पद्मिन्य इव आबभुः शोभन्ते स्म ॥ ८१ ॥ हंसेति । हंसारावस्येव हंसकूजितस्येव । विराविणां शब्दवतां । नूपुराणां पादभूषणानां । यो रवः शब्दः स एव व्याजो यस्य तथाविधो यस्त्रिलोकीजयोत्सूची त्रैलोक्यविजयसूचकः । आरावो नादस्तं विदधाति तच्छीलः तूर्यनिकरो वाद्यसमूहो यस्य । पुनः सिष्णासया रासेस्नातुमिच्छया उत्कंठितः । ननुतस्य पंचेषवः क्वगता इति चेदत आह । चंचत्स्फुरद्रूपं भ्रुकुटिहस्तपादकुच दृगेवमोहाधिकारिणः मोहकर्तारः । इषवोवाणा । यस्य तथाविधः । अनंग एव ललनारूपेण स्वस्याशरीरत्वात्स्त्रीरूपेण रासस्नानं व्यधात् कृतवान् नूनमित्युत्प्रेक्षायाम् ॥८२॥ यातइति । मधुर्वसंतः कामसाचिव्यविधित्सया कामसारथ्यचिकीर्षया । कुसुमाकरः तैलोपा × × कुसुमादिष्वपि सौगंध्याधायक इति भावः । उत्तमं तैलं विवेश ननु । अन्यथा पुष्पादिनिष्कासिततैले तादृक् सौगंध्यं नस्यादिति भावः । आसारायितकोष्णवारिविलसद्वृष्टौ आसारइव धारासंपात इव । आचारितायां मंदोष्णोदकदिव्यवृष्टौ ॥८३॥ कृत्वेति । प्रस्थानवत् वरप्रस्थानवत् । स मंत्री सकलबंधजनादिभिः समेतः युक्तः सन् । तं वरं । वध्वा सह आत्मभवनं आनेतुं । वध्वागृहान् वधूजनकगेहमित्यर्थः । अभिययौ जगाम ॥८४॥ न्यधुरिति । अथश्वश्रूश्वशुराः कृतपूजां ऐरिणीं ज्ञातिशीर्षे वरपूर्वजमस्तकेन्यधुः स्थापयामासुः । कनकवसनयुक्तां तां वधूंच अग्रजांके वरपूर्वजोत्संगेषु न्यधुः । न्यध्युरिति बहुवचनं पूज्यताभिप्रायं श्वश्रूश्वशुरा इति शेषः । स वरः । स्ववध्वासह । महनिवहैः नानोत्सवसंभारैः । स्वभवनगमनार्थं सद्विमानां तां हस्तिनीं अध्यरोहत् वध्वासह आरुरोह ॥ ८५ ॥

विष्वक्चंद्रज्योतिराद्यं विभास्वद् ॥ व्यद्योतिष्टाग्नेयमायन्जनौघाः ॥
दीपा रेजुर्वाद्यसंघाश्चनेदू रामामादायायतोऽस्य स्वगेहम् ॥ ८६ ॥

रम्यानात्मगृहान्महोत्सवभरैरागच्छतः प्रेयसी– ॥
मादायात्मवधूमतींद्रविभवस्यारोहतो हस्तिनीम् ॥
रत्नाभस्य विभोरभूदतितरामाशोभितस्यांबरै– ॥
र्लग्नैश्वर्यविलाससंपदपरा भार्येव वर्याऽध्वनि ॥ ८७ ॥

वेलायां किल दैवविद्वरतरैरुच्चारितायां गृहान् ॥
याती तौ तु वधूवरौ फलकरौ देवान्मुदा नेमतुः ॥
लक्ष्मीपूजनमुत्सवेन महता विद्वद्भिराधायि तै– ॥
र्बध्वा नाम रमेत्यकारि जगतामानंदसंदोहदम् ॥ ८८ ॥

इत्थं स भूपतिरपारमतिर्महात्मा ॥ लोकाभिरामगुणधाम महाकुलीनाम् ॥
रूपाधरीकृतसुराधिपचारुरामाम् ॥ भीमात्मजां नल इवोदवहद्रमां ताम् ॥८९॥

विद्याभ्यासमनोज्ञराजघटनाः शस्त्रास्त्रसंभेदनम् ॥
सद्विद्वत्परिपालनं नययुतं राजाधिकारक्षमम् ॥
दृप्तारातिमदाधिधामहरणं सर्वं सदभ्यासितम् ॥
श्रीमन्माधवभूभुजा ध्रुवमिदं नानाख्यसन्मंत्रिणा ॥ ९० ॥

विष्वगिति ।रामां वधूं । आदाय गृहीत्वा । स्वगेहं आयतः आगच्छतः । अस्य वरस्य । विष्वक् अभितः ।विभास्वद्देदीप्यमानं । चंद्रज्योतिराद्यं आग्नेयं भाषाप्रसिद्धं दारुद्रव्यं । व्यद्योतिष्ट प्रकाशतेस्म । जनौघाः आयन् गच्छन्तिस्म । दीपा दीपिकाः । रेजुः प्रकाशन्तेस्म । वाद्यसंघाश्चनेदुः दध्वनुः ॥८६॥ रम्यानिति । प्रेयसीं प्रियतरां आत्मवधूं । आदाय गृहीत्वा । रम्यान् रमणीयान् । आत्मगृहान् स्वगेहं । महोत्सवभरैः करणैः आगच्छतः । अतींद्रविभवस्य इन्द्रविभवं अतिक्रांतस्य । हस्तिनीं आरोहतः वध्वासह आधरोहतः । रत्नैः शिरोरत्नाद्यलंकारगतैः आभाति सरत्नाभस्तस्य अंबरैः कनकवस्त्रैः । अतितरां अत्यंतं । आशोभितस्य प्रसाधितस्य । विभोः श्रीमतो वरस्य । लग्नैश्वर्यविलाससंपत् लग्नसंबंधि यत् ऐश्वर्यं वैभवं । तस्य विलाससंपत् शोभोद्रेकः सैव । अध्वनि मार्गे अपरा अन्या वर्या वरणीया भार्येव द्वितीया स्त्रीव अभूत् ।स्ववधूमादायातिमहोत्सवेन स्वगेहमागच्छतः श्रीमतो वरस्य मार्गे या काचिदलौकिकीशोभा उत्पन्ना साद्वितीया वधूरिव सर्वैरत्यादरेण प्रेक्षणीया जातेतिभावः ॥८७॥ वेलायामिति । दैवविद्वरतरैः ज्योतिर्विच्छ्रेष्ठतमैः । उच्चारितायां अस्मिन्समये गृहप्रवेशः कर्तव्य इत्यादिष्टायां वेलायां समये ।फलकरौ नारिकेलहस्तौ । देवान् गृहदेवताः ।आधायि कृतं। आनंदस्य संदोहः समूहस्तं ददाति तत् ॥८८॥ इत्थमिति। लोकेषु अभिरामा आल्हादका । ये गुणा शालीनतादयस्तेषां धाम स्थानं । रूपेण सौंदर्येण । अधरीकृतास्तिरस्कृताः ।सुराधिपस्य इन्द्रस्य ।चारुरामा उत्तमाः स्त्रियो रंभोर्वश्यादयो यया तां । भीमात्मजामिव दमयन्तीमिव उदवहत् परिणीतवान् ॥८९॥ विद्येति । दृप्तानां गर्वितानामरातीनां शत्रूणां ।मदस्य गर्वस्य ।अधिधाम्नः अधिकतेजसश्च हरणं नानाख्यसन्मंत्रिणा कर्त्रा ।श्रीमन्माधवभूभुजा प्रयोज्यकर्त्रा। इदं सर्वं सदभ्यासितं । ध्रुवं निश्चयेन ॥९०॥

वर्षे वर्षेऽथराज्ञः सपदि सवयसो वीक्ष्य वृद्धिश्चवृद्धिम् ॥
मंत्री कृत्वा प्रणामं नृपवरमिति तं प्रार्थयामास धीमान् ॥
स्वामि त्वस्याधिलेखः प्रभवतु भवता हस्ततो राजकार्ये ॥
श्रुत्वाऽभत्त द्वितीयाविधुमिव सकलैर्वंदनीयं स लेखम् ॥ ९१ ॥

विद्यायां स निशम्य बुद्धिमधिकां तत्तद्गुणज्ञाननात् ॥
राज्यव्यापृतियोग्यमस्य च वयो मंत्री निरीक्ष्योत्तमः ॥
जिज्ञासुर्जनरंजने च विनये शक्तित्रये नैपुणम् ॥
राज्यांगीकरणे व्यजिज्ञपदमुं काशीशमव्याजतः ॥९२॥

अगृण्हात्कचो जीवनीं शुक्रदत्ताम् । यथा वार्जुनःसंपदं कृष्णदत्ताम् ॥
हतस्त्रीं मरुत्सूनुदत्तां च रामो । गृहाणेशदत्तं तथा त्वं स्वराज्यम् ॥९३॥

करयुगमेकीकृत्य प्रणतोऽहं तेऽस्मि भो विभो चरणम् ॥
वितराज्ञां काशिपुरं यातुं मे त्वं कुमारक्ष ॥९४॥

धन्योसिराजन्मम जन्म धन्यमाज्ञा विधेयेति तमर्थयित्वा ॥
नानाख्यमंत्री प्रभुपादपद्मे नियुज्य देहालिमभूत्कृतार्थः ॥९५॥

जितांतरःशत्रुजिदाहवेषु कालत्रयज्ञोऽतिवशीकृतेशः ॥
निवेद्य सर्वं विभवे स दृष्टो मुद्रां हनूमानिव रामपत्न्यै ॥९६॥

गंतासि चेत्त्वमिह भूसुरभूरिरूपम् । क्षात्रं विचित्रमतिनीतियुतं च वेत्ता ॥
वृद्धाखिलादिमविशिष्टसुसंप्रदायो । मंत्री भवेद्वद सदा मम संनिधौ कः ॥९७॥

वर्षेवर्षइति । स्वामित्वस्य अधिलेखः स्वामित्वसूचकः देयमित्यादिरूपो मुख्यलेखः आधत्त कृतवान् ॥९१॥ विद्यायामिति । तत्तद्गुणज्ञाननात् तत्तद्गुणशिक्षकमुख्यात् ।जिज्ञासुर्ज्ञातुमिच्छुः अमुंप्रभुं । व्यजिज्ञपत् । विज्ञापयामास ॥९२॥ अगृण्हादिति । ईशदत्तं । ईश्वरप्रसादलब्धं स्वपितृपैतामहं राज्यं त्वं तथा गृहाण स्वीकुरु ॥९३॥ करयुगमिति । भोविभो त्वं मे काशिपुरं यातुं गतुं । आज्ञां वितर देहि । कुं पृथ्वीं । त्वमेव आरक्ष पालय ॥ ९४ ॥ अथ मंत्री नत्वा स्तौति । धन्य इति । राजन् त्वं धन्योऽसि । त्वत्साचिव्यात् ममापि जन्म धन्यं । अथ प्रार्थयते आज्ञां काशीं गंतुमितिशेषः । विधेया कर्तव्या इति तं अर्थयित्वा प्रभोर्माधवस्य पादपद्मे चरणकमले देहमेव आलिं भ्रमरं नियुज्य कृतार्थः कृतकृत्यः अभूत् ॥ ९५ ॥ जितांतर इति । जितांतरः जितांतःकरणः । आहवेषु संग्रामेषु । मुद्रां अंगुलीयकं । रामपत्न्यै । सीतायै ॥ ९६ ॥ अथ विभुः प्रतिवक्ति । गंतासीति । हे मंत्रिन् त्वं गंतासि गमिष्यसि चेत् इह राज्ये भूसुराणां ब्राह्मणानां रूपं स्वरूपं ज्ञानमितिचावत् । तत्तद्योग्यतानुरूपसत्कारवर्धनं वा तथा विचित्रं अनेकरूपं अतिनीतियुतं च क्षात्रं राज्यरक्षणार्थं तत्तत्कालोपयुक्तं संधिविग्रहादिकं च वेत्ता ज्ञाता पुनः वृद्धाखिलादिमविशिष्टसुसंप्रदायः वृद्धाः ज्ञाताः अखिलाः आदिमाः प्राचीनाः विशिष्टाश्च ये सुसंप्रदायाः अस्मत्कुलपरंपरागतशोभनाचाराः येन । तथाविधः मंत्री सदा मम सन्निधौ को भवेत् त्वं वद ब्रूहि तमिति शेषः ॥ ९७ ॥

श्रीमन्माधव भूभुजस्तवपितुर्भ्रातुर्विभोर्ज्यायसः ॥
सान्निध्ये विहितश्रमो निपुणधीर्नानार्थसंचिंतने ॥
अस्त्रज्ञोऽतियशस्विकः स्मरजिद्धन्यो वदान्यः कृती ॥
सान्निध्ये भवतः प्रभो हरिरयं निर्वोढुमस्ति क्षमः ॥ ९८ ॥

पक्षौ द्वौ गरुडं यथा समुदितौ यातुं सहायौ वियत् ॥
चक्रे द्वे सहिते यथा रथवरं वोढुं महांतं क्षमे ॥
लोकेऽस्मिन् जयतं तथा समुदितौ द्वावप्यगाधाः कृतीः ॥
कर्तुं राज्यहिता युवामतिमती भो मंत्रिणौ संगतौ ॥ ९९ ॥

भूपः स्वमंत्रिचरितं मनसा विचिंत्य ॥
ते मे भिदा न विजयी वस सन्निधौ त्वम् ॥
उक्त्वेति वत्सलतया परमं स हृष्टः ॥
प्रल्हादमाद्रियत तं नरकेसरीव ॥ १०० ॥

आज्ञप्त आदरत इत्थमसौ नृपेण ॥
निर्बंधमादधत आत्मविभोर्निदेशम् ॥
संपालयन् सकलतीर्थवगाहनस्य ॥
प्राप्नोति सत्फलमिति प्रविचार्य तस्थौ ॥१०१॥

एवं गतश्चेदिह निर्वोढा क इति प्रभूक्तमर्थं मनसि निधाय तं निर्दिशन् मंत्री प्रतिवदति श्रीमदिति । ज्यायस : श्रेष्ठस्य । हरिपंडित : । निर्वोढुं सर्वार्थान् पारंगमयितुं क्षम : शक्त : ॥ ९८ ॥ इत्थं मंत्रिणा हरिपंडिते निर्वोढरि निर्दिष्टे नैयमेकेन धूर्निर्वोढव्या किंतुभाभ्यामपि मीलित्वा निर्वोढव्येति सोपमानं विभुराह पक्षाविति । द्वौ पक्षौ समुदितौ मीलितौ संतौ यथा गरुडं महांतमपीतिभावः । वियत् आकाशं । यातुं सहायौ भवतः । द्वे चक्रे रथांगे सहिते संती यथा महांतं रथवरं वोढुं क्षमे भवतः तथा भोमंत्रिणौ हे सचिवौ अतिमती अतिबुद्धिमंतौ समुदितौ उदयंगौ द्वावपि युवां संगतौ संतौ अस्मिन्लोके राज्यहिताः आगाधा दुष्कराः कृतीः तत्तत्कालोपयोगिनानाकृत्यानि कर्तुं जयतं उत्कर्षंप्राप्नुत । उभाभ्यामपीयं धूर्निर्वोढव्येति भावः ॥ ९९ ॥ भूप इति । स्वमंत्रिणः चरितं निष्कपटसेवाकारित्वरूपं । आद्रियत सत्कृतवान् । भिदा भेदः ॥ १०० ॥ आज्ञप्त इति । निर्बंधंआग्रहं । आदधतः कुर्वतः । आत्मविभोः स्वस्वामिनः । निदेशंआज्ञां । संपालयन् प्रतिपालयन् । सेवकः सकलतीर्थेषुवगाहनस्य स्नानस्य । वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः इत्यकारलोपः । सत्फलंप्राप्नोति इति प्रविचार्य असौ मंत्री नृपेण इत्थं पूर्वोक्तप्रकारेण आदरतः सत्कारेण आज्ञप्तः मत्सन्निधावेव स्थित्वा राज्यधुरं निर्वहेति कृताज्ञः सन् तस्थौ तस्थिवान् ॥ १०१ ॥

प्रतिभवनमतीव संभ्रमोऽभूत् ॥ जिगमिषुरास यदा स मंत्रिवर्यः ॥
पुनरधिपनियोगतः स तस्थौ ॥ विजयमुहूर्तसमस्तदोत्सवोऽभूत् ॥१०२॥

भूपेन सूक्ष्ममतिना किल राजकार्यम् ॥ कार्यं समग्रजनरंजनकारि भूरि ॥
संवीक्षणीयमथ तत्कृतमात्मनेत्थम् ॥ आनीय चेतसि तदेति तमाह मंत्री ॥१०३॥

द्विजभोजनमंतरा व्रतम् ॥ यजनं स्विष्टकृदाहुतिं विना ॥
न च सांगमिदं तथांऽतरा ॥ भवतो व्यापृतिमीशपालनम् ॥१०४॥

नित्यं यथा रविरुदेति दधाति पृथ्वीम् ॥ शेषः प्रवाति पवनो दहतीश वन्हिः ॥
मेघः प्रवर्षति जलं नियतस्तथा त्वम् ॥ संरक्षितुं भुवनमेतदथावतीर्णः ॥१०५॥

मधौ शाखिश्रेणिः श्रयणमिव चंचद्दलफल—॥
श्रियः स्वच्छीभावं सपदि शरदीवोदकमिदम् ॥
विभो भव्यं भूत्यै भजति जगतस्तन्नियतितः ॥
कलिः कार्तं कृत्यं तव जननयोगेऽप्यघटितम् ॥१०६॥

अथ मंत्रिस्थित्यनंतरकालिकं वृत्तमाचष्टे प्रतिभवनमिति । यदा स मंत्रिवर्यः जिगमिषुः गंतुमिच्छुः । आस आसीत् । तदा प्रतिभवनं अतीवसंभ्रमः व्यग्रता अभूत् । पुनः स यदा अधिपतियोगतः प्रभोराज्ञायाम् तस्थौ तदा विजयमुहूर्तसमः उत्सवोऽभूत् । विजयमुहूर्तं सीमोल्लंघनार्थं पूर्वं यथा सर्वत्रसंभ्रमो भवति पश्चात्तद्विभाय तदैव यथा सर्वे स्वस्था भवन्ति तथा तदा जातमिति भावः ॥१०२॥ राज्ञा राजकार्यं कर्तव्यं तत् स्वेन द्रष्टव्यमिति मनस्यानीय मंत्री तदा तं विभुं इति आह ॥१०३॥ अथ मंत्री सर्वं राजकार्यं श्रीमतैव कर्तव्यमित्यर्थं स्यावश्यकतां दृष्टांतद्वारा कथयंन्विभुंप्रति वदति द्विजेति । हे ईश प्रभो । भवतः व्यापृतिं अंतरा भवत्कृतव्यापारं विनेत्यर्थः । इदंपालनं राजकर्म तथा सांगं न भवति तथाकथं। यथा द्विजभोजनमन्तरा ब्राह्मणसंतर्पणंविना व्रतं सांगं न भवति इत्यादि ॥१०४॥ नित्यमिति । सूर्यादयो यथा नियमेन नित्यं स्वस्वव्यापारं कुर्वंति तथा राज्यसंरक्षणार्थं गृहीतजन्मा त्वमपि नियमेन स्वव्यापारमानिष्ठेति भावः ॥ १०५ ॥ नव तु न किंचिदसुकरमिति सूचयन् प्रोत्साहयति मधाविति । मधौ वसंते शाखिश्रेणिर्वृक्षपंक्तिः चंचतां स्फुरद्रूपाणां दलफलानाम् श्रियः समृद्धेः श्रयणमिव सेवनमिव शरदि उदकं सपदि स्वच्छीभावमिव हे विभो कलिर्युगं तव जननयोगेसति अघटितमपि भव्यं कार्तं कृतयुगसंबंधि कृत्यं जगतः भूत्यै सुखाय नियतितः नियमेन भजति । पुण्यश्लोके त्वयि अवतीर्णे कलियुगेऽपि कृतयुगधर्मा एव प्रवृत्ता इति भावः ॥ १०६ ॥

विद्याभ्यासवशादुपैति पठिता ज्ञानं यथा निर्मलम् ॥
नक्षत्राध्वपरिक्रमादयनमेत्यर्को यथा संचरन् ॥
मंत्राराधनतः प्रयात्यथ यथाराध्यप्रसादं जनो ॥
याहीश स्वकुलोचिताधिनयतो राज्ये यशस्त्वं तथा ॥१०७॥

सन्मंत्रिणेति मुहुरर्थित एष भूपः ॥ संचिंत्य चेतसि तमर्थमथ स्वबुद्ध्या ॥
सर्वोपकारिजनरंजनहेतुभूतम् ॥ वंशोचितं स कृतवानधिराजवृत्तम् ॥१०८॥

प्रातः सत्पठनं हरेरपचितिं कुर्वन्नमन्सद्गुरूम् ॥
शिष्टांश्चार्थचयं वपुः श्रमजयं विद्यां च संवर्धयन् ॥
रक्षन्पूर्वतरान्गजाश्वरथिनश्चारैः पृथक् शिक्षयन् ॥
पुष्णन् दीनजनान्कृतौ गुणवतः संयोजयन्नंदति॥ १०९ ॥

शौर्यं शत्रुजने दयां गुणिजने मूर्खेच शिक्षां दध–॥
च्छिष्टे गौरवमिंद्रियेषु दमनं पापग्रहे शांतिकम् ॥
व्यापृत्यामपवादभीतिमनृतात्सेवाविधौ दुर्मदा–॥
द्भीतो ज्ञातनृपेंद्रनीतिरवति क्षेमं च योगं विभुः ॥ ११० ॥

सत्ये धर्मसमो रणेऽर्जुनसमो धैर्ये च भीमोपमो ॥
वाक्ये जीवसमःप्रतापसविता विद्वज्जनानंदकः ॥
दाने कर्णसमो नये भृगुसमः संग्रामदीक्षागुरुः ॥
पादाक्रांतमहीपतिर्विजयते राजेंद्रचूणामणिः ॥ १११ ॥

विद्याभ्यासवशादिति । पठिता अध्येता । अयनं उदगयनं । तेजोवृद्धिकरमितिभावः । यद्यप्यत्र अयनशब्दः साधारणस्तथापि तेजोवृद्धिकरत्वेन प्रकृतोपयोगित्वादुदगयनपर एव ग्राह्यः । मंत्रैः आराधनं मंत्राराधनं तस्मात् मंत्रैरित्युपलक्षणं । जनः आराधकः । हे ईश प्रभो स्वकुलोचितो यः अधिको नयः नीतिः तस्मात् । याहि प्राप्नुहि ॥ १०७ ॥ अथचतुर्भिः प्रभो राजकार्यप्रवृत्तिपूर्वकं सर्वं व्यापारमाहसन्मंत्रिणेति ॥ १०८ ॥ प्रातरिति। अपचितिं पूजां । पूर्वतरान् पितृपितामहानुपयोगिनोऽपि भृत्यादीन् गजाश्वरथिनः । चारैराधोरणादिभिः पृथक् शिक्षयन् सद्गत्याद्यभ्यासयन् गुणवतो गुणिनः कृतौ तत्तद्योग्यतानुरूपेऽधिकारे संयोजयन् नियोजयन् ॥ १०९ ॥ शौर्यमिति । व्यापृत्यां व्यापारे । अनृतात् मिथ्याकरणात् । निमित्तात् । योपवादः ततो भीति भयं च दधत् यदि व्यापारेषु मया मिथ्याचीर्णमुक्तं वा तर्हि लोका मामपवदिष्यन्तीति चेतसि भयमानीय सम्यक् व्यवहारमाचरन्निति भावः सेवाविधौ दुर्मदादुन्मत्तभृत्यादेर्भीतः योगं अलब्धलाभं । क्षेमं लब्धपरिपालनं । अवति रक्षति ॥ ११० ॥ सत्य इति । जीवसमो बृहस्पतितुल्यः । प्रतापेन तेजोविशेषेण सवितेव सूर्य इव । नये नीतौ भृगुसमः शुक्रतुल्यः । तथाविधो राजेंद्रचूडामणिः माधवः विजयते ॥ १११ ॥

एकादशोत्तरशतोत्तमपद्यमालां येऽधीयते पिपठिषूनपि पाठयन्ति ॥
तत्संख्यपद्मकृतमाधवपूजनस्य लब्ध्वा फलं त इह यंति यशोर्थसिद्धिम्॥ ११२॥

नानाकारकरुद्रकोत्तरशतश्लोकाभिशाखाततम् ॥
विद्वन्मालिकसत्कृतं पदसुमं भूपान्ववायद्रुमम् ॥
अव्युत्पत्तिनिदाघतापविकलो योऽध्येतृपांथः श्रयेत् ॥
सोऽर्थज्ञानफलाभिनिर्वृतमना लोके प्रतिष्ठामियात् ॥ ११३ ॥

प्रभुवंशसरःश्रेष्ठे पद्यपद्मविराजिते ॥
गोविंदसारसो रेमे रमानाथप्रसादतः ॥ ११४ ॥

श्रीशंकराचार्यपदाधिरूढश्रीसच्चिदानंदगुरोर्निदेशात् ॥
गोविंदसूक्तिः प्रभुवंशनाम्ना मान्यास्तु लोके विबुधैः समस्तैः ॥११५॥

इति श्री गोविंदपण्डितविरचितं प्रभुवंशकाव्यं समाप्तम्

एकादशेति । तत्संख्यैः एकादशोत्तरसंख्यैः पद्मैः कमलैः कृतं यन्माधवपूजनं विष्णुपूजनं तस्य फलं लब्ध्वा इह लोके यशोर्थसिद्धिं च यंति प्राप्नुवंति ॥ ११२ ॥ नानाकारेति। रुद्रका एकादश । भूपस्य प्रभोः अन्ववायः वंशः प्रभुवंशाभिधोग्रंथ इत्यर्थः स एव द्रुमोवृक्षस्तं पदानि सुप्तिङन्तानि तान्येवसुमानि पुष्पाणि यस्य तम् ॥११३॥ प्रभुवंशेति । प्रभुवंशो नाम ग्रंथः स एव सरः श्रेष्ठं सरोवरं तस्मिन् ॥ ११४ ॥ श्रीशंकरेति ॥ ११५ ॥ इति प्रभुवंशव्याख्या समाप्ता ।

मोरोपंतकृतं

संस्कृतं

शिवार्या–शतकं

उप–गीतिश्छन्दः

काचित् सोमा[1] धवला कृतविष-कवला[2] पटियसी देवी ।
जटिला शश-धर-निटिला[3] कुट्टित-कुटिला नमस्या मे ॥ १ ॥
अस्तु निरञ्जनमेकं वस्तु त्रय्याः शिरोभागे ।
अरुणं तरुणी-धरणं विलसत्करुणं तु नः श्रेयः ॥ २ ॥
नैगमै-पटली[4]-रूढं मनसि निरूढं जगत्-त्रय्याः ।
हिम-गिरि-रत्न-समूढं[5] स्मराति न मूढं कुतश्चेतः ॥ ३ ॥
अयि मामनाथमल्पं करुणा-जल्पं प्रभो पाहि ।
जहि वा विरुदाकल्पं कल्पं कल्पं यमाधत्से ॥ ४ ॥
विषय-विषाशन-मत्तं विषयिषु यत्तं स्मराराते ।
स्मर मां मुहुरनिमित्तं यदि तव चित्तं कृपा-योनिः ॥ ५ ॥
किं न च्छिन्नं शम्भो यदि भवदम्भो विवृद्धोऽसौ ।
परमिह भवहरमपरं विभो न परंपरा-जाले ॥ ६ ॥
विष–पीयूष[6]-निकेतन[7] धृत-विष-केतन[8] भवाराते ।
चेतित-विष्टप-चेतन करुणा-वेतनामिदं कुरु मे ॥ ७ ॥
व्यालाकलित-जटालादिह विधु-भालां ददक्षिणे बालात् ।
न हि रे कण्ठे कालात्कलित-कपालात्परं किंचित् ॥ ८ ॥
काचित् कदनित-मदना चित्सुख-सदना तनु गौरी ।
गौरी-चुम्बित-वदना चन्दिर-रदना नमस्या मे ॥ ९ ॥
काचिच्चिदिह सदारा दाहित-दारा ममेदानीम् ।
करुणा-पारावारा जगदाकारा पुरः पश्चात् ॥ १० ॥
कपिलः काली-शाली वीटप-पाली जगज्जीवः ।
हरि-हर-मस्तक-माली मनसि कपाली सदा ध्येयः ॥ ११ ॥
ऐरावणेन्दु[9]-वर्णा शोभित-कर्णा फणीन्द्राभ्याम् ।
वामे विलसदपर्णा[10] शिवमिति वर्णा तनुर्ध्येया ॥ १२ ॥

---

१ सोमा = उमया सहिता. २ कवलः = ग्रासः ३ निटिलं = ललाटं. ४ नैगम-पटली = वेद-समूहः ५ समूढं = उद्वाहितं. ६ पीयूषं = अमृतं. ७ निकेतनं = स्थानं. ८ केतनः = ध्वजः ९ ऐरावणः = ऐरावतः १० अपर्णा = पार्वती.

न वयं वेद-विधिज्ञा न च कृत-यज्ञाः कृतज्ञा वा ।
किन्त्वाशा-पटलं पटमकपटमीशं प्रपश्यामः ॥ १३ ॥
विष्वक्[११]कर्णा-वेषा दत्ताशेषा स्वभक्तेभ्यः ।
शेषाकल्पे[१२]-विशेषा जगतः शेषा तनुः पायात् ॥ १४ ॥
शमनः श्रेणी-शमनी शम-दम-गमनीय-माहात्म्या ।
भूतिः कापि च रमणी स्वीकृत-रमणी मुदे नः स्यात् ॥ १५ ॥
निरये[१३]-त्रास-निहन्त्री बुद्धि-नियन्त्री मुमुक्षूणाम् ।
कल्पित-कला-मय-तन्त्री गिरिजा रन्त्री तनुर्ध्येया ॥ १६ ॥
बाल-कला-धर-चूला[१४] सुहृदनुकूला जगज्जननी ।
च्योतच्चर्म-दुकूला धृत-त्रिशूला तनुर्जयति ॥ १७ ॥
अलसं जडमति-चपलं कितव-धूर्तं शठं दुष्टम् ।
विषामिव विषायिणमपि माभिधेहि त्रिपुरान्तक स्वपदोः ॥ १८ ॥
भुजगान्[१५] कर्तुं भुजङ्गा[१६]ननलं निटिले विषं कण्ठे ।
नैव विवेकस्ते ऽभूद्धर्तुं पदयोः क्षमामेव ॥ १९ ॥
त्वत्तो मातुस्तातादिह नो धाता पुरारातेः ।
नापि च भवतः पातादपरः पातास्ति किं कुर्मः ॥ २० ॥
वेदावेदित-शोधाः प्रत्यग्बोधाः शृणुध्वं मे ।
अर्द्धाङ्गाहित-दारं परमोदारं महः[१७] श्रयः ॥ २१ ॥
तर्कादुर्दर्के[१८]-भाजां कर्कश-वाचां प्रपञ्चो ऽयम् ।
यच्छ्रीकण्ठे तेजसि सत्यपि सिद्धान्तमिच्छन्तः ॥ २२ ॥
सङ्ख्य सङ्ख्या-हीनं सङ्ख्यावन्तो ब्रुवन्तु सङ्ख्येयम् ।
पश्यन्त्वथवा वल्ल्यां वल्ल्यां भिल्ली-चरं कंचित् ॥ २३ ॥
तावद्धर्मो ऽधर्मस्तावत्कर्माप्यकर्मैव ।
यावत् त्रिगुण-विलासी निगम-निवासी नुतो नेशः ॥ २४ ॥
यदिदं निगम-विचारे स्मृति-संसारे ऽपि यद्यावत् ।
तदिदं निखिलाधारं सारं कैलास-कुञ्जेषु ॥ २५ ॥
विष-धर-विषय-विषादं मामविषादं धरः स्वपदोः ।
नोचेत् त्रिभुवन-रक्षण-विरुदं भवतोऽद्य भाराय ॥ २६ ॥

---

११ विष्वक् = सर्वत्र. १२ आकल्पः = भूषणं. १३ निरयः = नरकः १४ चूला = चूडा. १५ भूजगः = भुजे धृतः १६ भुजगः = सर्पः १७ महः = तेजः १८ उदर्कः = परिणामः

काचिच्चित्त-कुटीरे चित्पट-पेटी-गता मूर्तिः ।
उद्भट-तटिनी[१९]-मुकुटा घटतो रटतः स्फुटं मेऽस्ति ॥ २७ ॥
काचिच्चित्त-चमत्कृतिरुग्रा सोमासिता काली ।
स्त्रीपुंस्तनुरप्येका चिन्त्य-विवेका मुदे नस्तात् ॥ २८ ॥
न हि रे काचन चिन्ता त्रिजगच्चिन्तामणिः शम्भुः ।
अन्तः परितः पुरतः स्फुरति प्रेम्णा समाकूतः ॥ २९ ॥
मन्त्रैः किं किं तन्त्रैरपि किं वेदान्त-सिद्धान्तैः ।
यावत्तत्त्व गुरूणां गुरुरयमीशो न सर्वस्वम् ॥ ३० ॥
माऽस्तु ममागम-बोधो माऽस्तु च शोधोऽपि सर्वत्र ।
अस्तु श्रुतिषु यदेकं वस्तु स्वान्ते मृडान्येव ॥ ३१ ॥
स्मर-हर पुर-हर भव हर शिव मृड गिरिशेति जल्पतामग्रे ।
भृत्यायते सुरेज्यः[२०] कालो बालायते सद्यः ॥ ३२ ॥
नाहं बिभेमि कालान्नो भव जालादपि भ्रष्टः ।
दीनानाथ-त्रातरि पातरि शिरसि स्थिते स्थाणौ ॥ ३३ ॥
शिवदः शम्भुः शङ्कर ईश्वर एवासि सर्वेषु ।
वामेषु वामदेवो देव त्वं मत्कृते स्थाणुः ॥ ३४ ॥
सन्ततमद्रि-निवासात्कठोरनाम्नावनौ नीतः ।
अपि काकोलहरत्वात्करुणाकूपार[२१] एवासि ॥ ३५ ॥
दग्धे दिविषद्वृन्दे[२२] परितः प्लुष्टेऽपि गोविन्दे ।
ब्रह्माण्ड-मण्डपेऽस्मिन् क्षुब्धे क्ष्वेडाश[२३] एव त्वम् ॥ ३६ ॥
पयसा प्लावित सद्ये कृप्ते वैकुण्ठ आकण्ठे ।
स्मारित-विष्टप-वृत्ते धर्त्ता त्वमेव गङ्गायाः । ३७ ॥
वृन्दायामपि विष्णुं तद्वत्परमेष्ठिनं[२४] च कन्यायाम् ।
युक्त्वाथतो जिगीषुः स्मर्तव्यात्मास्मरस्त्वत्तः ॥ ३८ ॥
गर्वादखर्व-कर्ता त्वहमिति भावाद्धतो बोधः ।
त्वामपि सविधे विमनश्छिन्नः कापालभूषायै ॥ ३९ ॥
केचिद्वदन्ति गुणिनं निर्गुणमेकेऽपिविद्वांसः ।
निर्णेतुमेव धत्से त्रिगुणीं मुण्डावलीं नित्यः ॥ ४० ॥
नित्यानित्य-विवेके नित्यस्त्वत्तोऽस्ति नैवान्यः ।

---

१९ तटिनी=नदी. २० सुरेज्यः=सुरगुरुः २१ अकूपारः=सागरः २२ दिविषद्वृंदे =देवसमूहे. २३ क्ष्वेडाशः=विषभक्षकः २४ परमेष्ठी=ब्रह्मा.

त्वमेव निखिलं दग्धा धत्से भस्माङ्गरागाय[25] ॥ ४१ ॥
भस्मासुरोऽपि कश्चिद् घस्मरशक्तिः पुरा भक्तः ।
विस्मृत-शिव-चपेटै[26] : कपटी भस्मैव संजातः ॥ ४२ ॥
ख्यातस्त्वमेव देवस्ते निखिले महादेवः ।
रुद्रादन्याभावे सनास्मिविष्णुर्न वा धाता* ॥ ४३ ॥
धातुस्त्वमेव धाता पाता[27] विष्णोश्च विष्णुत्वात् ।
अपि च हरस्य हरस्त्वं नातस्त्रातः परा काष्ठा[28] ॥ ४४ ॥
काष्ठा-वासो[29] वासो यस्य त्रैलोक्य-धूलीषु ।
युक्तं निखिले दग्धे शेष-वासश्च वासाय ॥ ४५ ॥
वासो यस्य हृदब्जे भासः सर्वेषु भूतेषु ।
हासः कालो नृत्याद्दासस्तस्याहमेकस्य ॥ ४६ ॥
एकस्य द्वैनियमात् कश्चिद्वैपश्चितोस्त्वर्थः ।
जानेऽहं तु यदङ्के गिरिजा गङ्के तमेवैकम् ॥ ४७ ॥
एको रुद्रः प्रथमा सर्वो रुद्रः परा ब्रूते ।
परमृग्यजुषोक्तीनां सिद्धः सिद्धान्त एवैकः ॥ ४८ ॥
एकोऽहं तु बहु स्यामनया वाचैव सा सिद्धिः ।
तस्मात् सिद्धि-निदानं[30] रुद्रं जानन्तु भद्राय ॥ ४९ ॥
भद्राय राज मुद्रा वेदो ब्रूते शिवः शिवद : ।
नातः पुमर्थ[31]-सिद्धिः काचित्कश्चिन्न सिद्धान्तः ॥ ५० ॥
सिद्धान्तादर-दूरं दूरंत्वान्नाम पीयूषात् ।
पीयूषांशु[32]-कला-धर-धर मामनाथनाथत्वात् ॥ ५१ ॥
नाथ त्वामनुयातस्याधःपातः कथं मे स्यात् ।
स्यादथ दैव-नियोगाद्योगाभक्त्याथ मुक्त्या ॥ ५२ ॥
मुक्त्यालमस्तु भक्ति-प्रसाद-लभ्यो ममास्त्वेष्टः ।
ब्रह्माण्ड व्रजे[33]-बीजःकैलासाद्रि-द्रुमः कश्चित् ॥ ५३ ॥
कश्चिद्गिरिजा-वल्लीवातो ललितो जगत्पर्णैः ।
स्वान्तालवाल-वासी स्मृत्या फलितो भवेत्सद्यः ॥ ५४ ॥
सद्यः पाप-विनाशः सद्यस्त्रैतापिकीशान्तिः ।

---

२५ अंगरागः=उटी इति भाषायां. २६ चपेटः=चपाटी इति भाषायां २७. पाता =रक्षिता. २८ काष्ठा=दिक्. २९ काष्ठा—वासः=दिगंबरः ३० निदानं=आदिकारणं. ३१ पुमर्थः=पुरुषार्थः ३२ पीयूषांशुः=चंद्रः * हामरामायणनाम्नि माहाराष्ट्र काव्ये या सरणिरादितोंगीकृता सैव पंतैरस्मिन् काव्ये त्रिचत्वारिंशत्तमाया उपगीत्याः सकाशादंगीकृतास्तीति तज्ज्ञैःपाठकै र्ज्ञेयम् । ३३ व्रजः=समूहः

सद्यः सकल-सुखानां सिद्धिर्भविता शिव-स्मरणात् ॥ ५५ ॥
स्मरणादेव हि देवा मरणान्मुक्ताः सुखं चेरुः ।
स्मरणादेव मुनीशाः शम्भोः कारुण्य-पात्राणि ॥ ५६ ॥
पात्राणि तानि मन्ये हिम-गिरि-कन्येश पूर्णानि ।
शेषाणि खर्पराणि[३४] प्रायो विण्मूत्र[३५]-दिग्धानि ॥ ५७ ॥
दिग्धानि भान्ति येषां भसितैर्भालानि भाग्येन ।
धन्यास्त एव वन्या मान्यान्मन्यामहे नूनम् ॥ ५८ ॥
नूनं विभूति-कवचाः शिव मृड रुद्रेति दिव्यास्त्राः ।
त्रिषु लोकेषु जयन्तः सन्ततमन्तः कृपावन्तः ॥ ५९ ॥
कृपया तेन विमुक्ता जीवन्मुक्तास्त एवैते ।
येषामन्तःकरणे जगदावरणेश्वरः शम्भुः ॥ ६० ॥
शम्भुर्मुक्ति-लताया मण्डप एवास्ति निश्चितं फलवान् ।
यस्तामिच्छति कश्चित् सुततं मनसा श्रयेत्स्वस्थः ॥ ६१ ॥
स्वस्थस्तदेव भविता भविता सिद्धिस्तदा काचित् ।
सुर-नर-फणिनामवता[३६] त्रिजगत्सविता सदा ध्यातः ॥ ६२ ॥
ध्यातः शुद्ध-मनोभिः ख्यातः श्रोतार्थ-विस्तारैः ।
ज्ञातः परमगुरुभ्योऽस्यातः शम्भोरहं भृत्यः ॥ ६३ ॥
भृत्यः कृतातिकृत्यःशम्भोरेवास्ति नान्यस्य ।
कुपिते कदाऽगस्त्ये सिन्धुर्बिन्दूपमो जातः ॥ ६४ ॥
जातो दशावतारी भृगुणा शप्तोऽपि गोविन्दः ।
गोविन्दोऽपि यदीयो मधुहा मुरहाऽथ लक्ष्मीशः ॥ ६५ ॥
लक्ष्मीश्वरोऽथ चक्री खग-पतिर्जगत्त्राता ।
वरदे गौरी-रमणे विष्णुर्दैत्यान्तको जातः ॥ ६६ ॥
जातो मरत्यवश्यं मृत्योर्जायेत वा निरयी[३७] ।
प्राप्ते काय-निकाये[३८] शिवमेवालम्ब रे चेतः ॥ ६७ ॥
चेतस्तवैव भाग्याच्चक्षुश्श्रोत्रास्यमुख्यानि ।
सन्तीन्द्रियाणि यावत्तावत्सम्भावयेशानम् ॥ ६८ ॥
ईशानमेव शरणं व्रजतो मरणं तु मोक्षाय ।
नो चेन्मायावरणं क्व शिवाचरणं विना नश्येत् ॥ ६९ ॥

---

३४ खर्पराणि = खापरें इति भाषायां. ३५ विण्मूत्र–दिग्धानि = विष्ठा–मूत्राभ्यामवलिप्तानि. ३६ अवता = रक्षिता. ३७ निरयी = नरकपतितः ३८ निकायः = निवासः

नश्येत्पाप-कलापः[39] शिव शिव जप्ते क्व सन्तापः ।
स्यादथ कोऽपि दुरापः सुमेरु-चापःपुरः पश्चात् ॥ ७० ॥
पश्चात्ताप निमित्तं भ्रमश्चित्तं प्रतिक्षोभात् ।
स्मर रे शिवेति चित्तं भित्त्वा भित्तं तु विषयाणाम् ॥ ७१ ॥
विषयाणामपि चिन्ता का तव चिन्ता * * * * * * ।
शिव शिव शिवेति जप्ते शिव एव त्वं न सन्देहः ॥ ७२ ॥
सन्देहोऽपि न कश्चित्सर्वो रुद्रः श्रुतिर्ब्रूते ।
तस्माद्भावनयाऽहं बद्धो मुक्तोऽहमित्युक्तिः ॥ ७३ ॥
उक्तिस्तावद्द्विधा विद्या विद्यात्मिका भवति ।
विद्या शिव-पद-फलदाऽविद्या संसारभोगाय ॥ ७४ ॥
भोगायापि भवश्चेद् ध्यातो दद्यात्स सद्भोगान् ।
विषय-प्रेमज-भोगो भुक्तो भवतैव रोगाय ॥ ७५ ॥
रोगायौषधमेकं दृष्ट्वा नैकं वदाम्येतत् ।
एका पुण्य-तरङ्गा गङ्गा गङ्गाधरोऽप्येकः ॥ ७६ ॥
एको वस्तु-विवेको धात्राऽनेकोपनिषदुक्तः ।
शिवमिति स परिच्छेको नचेति भेकोपमो ब्रूते ॥ ७७ ॥
ब्रूते यस्तु कदाचिच्छिवेति नामाक्षर-द्वितयम् ॥
तस्य तदेव भवाहि मुक्तिर्भुक्तिश्च मुक्तिश्च ॥ ७८ ॥
मुक्तिः शम-दम-सिद्धा यस्याः सिद्धा अपि भ्रष्टाः ।
भ्रष्टा अपि शिव-भक्त्या स्रष्टारस्ते[40] तु शास्त्राणाम् ॥ ७९ ॥
शास्त्राणि सन्तु दूरं दूरं मन्त्राश्च तन्त्राणि ।
नेदीयसीहि[41] चेतसि नित्यानन्दे जगत्कन्दे ॥ ८० ॥
कन्दं छिनत्ति जनुषां[42] भिनत्ति भेद-भ्रमं सद्यः ।
यच्छति रूपमरूपं चिन्तमाचिन्तामणेः शम्भोः ॥ ८१ ॥
शम्भोर्ध्यानममन्दं ज्ञानानन्दं नयत्युच्चैः ।
अश्रममपि तन्मन्दा त्यजन्ति पापं च युञ्जन्ति ॥ ८२ ॥
युञ्जन्ति योगमपरे भोगं भुञ्जन्ति चैवान्ये ।
अस्माकमप्यभङ्गा तृप्तिर्गङ्गाधरः कश्चित् ॥ ८३ ॥
कश्चिच्चिदम्बु-माली जटिलो व्यालीन-सद्व्यालः ।

---

३९ कलापः=समूहः ४० स्रष्टारः=कर्तारः ४१ नेदीयसि=समीपस्थे. ४२ जनुषां =जन्मनां.

शूली ब्रह्म-कपाली विभूति-शाली स नः पायात् ॥ ८४ ॥
पायादपाय-हन्ता पुङ्गव-गन्ता[४३] पुरारातिः ।
मुनि-जन मानस-रन्ता मानस-सन्ताप-दावाग्निः ॥ ८५ ॥
दावाग्नेरप्यधिकः सम्भव[४४]-मरणोद्भवो व्याधिः ।
शान्तिस्तदैव भविता भविता भर्गश्च वैद्यश्चेत् ॥ ८६ ॥
चेदद्य नीलकण्ठं भव-गज-कण्ठीरवं[४५] स्मरसि ।
तर्हि त्वमेव जन्तो बहु-विधमन्तो सुखी भविता ॥ ८७ ॥
भविता तदैव सर्वं शृणु गत-गर्वं किमप्यन्तः ।
जपतः सर्वद-शर्वं दुःखमखर्वं सुखाय स्यात् ॥ ८८ ॥
स्यादिह केऽपि न पाता पातक-पातादहं जाने ।
दैवाद्गिरिजा-जानेरपरः[४६] शपथोऽस्ति तत्पदयोः ॥ ८९ ॥
पदयोरधरीभूते विधुरीभूतो[४७]ऽसि चेन्नाथ ।
कः कटु मधुरीकुरुते त्वत्तोऽप्यन्तरधुरीणस्[४८]सर्वम् ॥ ९० ॥
त्वं मे माता तातस्त्राता भ्राता गुरुर्देवः ।
त्वं मे जीवस्त्वत्तः परमं न मे किंचित् ॥ ९१ ॥
किंचित् काचित् कश्चित् त्रितयं तावद्भवत्यर्वाक् ।
शिव-लिङ्गादेकस्मात् स्फुरन्ति सर्वाणि लिङ्गानि ॥ ९२ ॥
लिङ्गानि पूर्व-देवैः देवः सर्वेषु लोकेषु ।
नत्वा हरि-हर-मुख्यैर्लब्धानीष्टानि निष्ठातः ॥ ९३ ॥
निष्ठा विमल-ज्ञानं निष्ठा भक्तिश्च वैराग्यम् ।
निष्ठैव संशयानां हन्त्री निष्ठा शिवं दत्ते ॥ ९४ ॥
दत्ते भावितमन्तर्धत्ते स्वीयेषु कल्पेषु ।
नित्यैव नित्यमीशो यस्तं मत्या श्रयेदन्तः ॥ ९५ ॥
अन्तः शुद्ध-मनोभिः सन्तः पश्यन्ति यत्तेजः ।
गौरं तदेव गौरी-लंपटमपटं प्रपश्यामः ॥ ९६ ॥
पश्यन्तस्त्वामीशं के परमीशं प्रपश्यन्ति ।
अभजन्तोऽपि भुजं तं के परमं तं न पश्यन्ति ॥ ९७ ॥
पश्यन्ति शाश्वतं ते पदमिह शम्भोः पदे लग्नाः ।
अपरे पतन्ति सद्यः परितः क्लिश्यन्ति वा भग्नाः ॥ ९८ ॥

---

४३ पुंगव—गन्ता=वृषभ—वाहनः ४४ संभवः=जन्म. ४५ कंठीरवः=सिंहः ४६ गिरिजा—जानिः=पार्वतीपतिः ४७ विधुरीभूतः=प्रतिकूलः ४८ धुरीणः=श्रेष्ठः

भग्नास्त एव लोके त एव शोके निमज्जन्ति ।
यैरधिवाणि भवानी-पतिरिह नानीयते यत्नात् ॥ ९९ ॥
मोदादत्तगोंधाधरमघ्नतो दापतुष्टे ये ।
दधाति विषयानोदानपहरन्नौदारभासस्ते ॥ १०० ॥
भासन्त एव वासा येषां वासाय दिग्वासाः ।
तेऽपि सुखोल्लासाः शैवाः शैवस्य देवताकाराः ॥ १०१ ॥

अनुष्टुप्.

इदैमार्या-पतेरार्या-शतेमार्याः पठन्ति ये ।
ते तु शैवागमेचार्या नात्र कार्या विचारणा ॥ १०२ ॥
इत्याकूते-मयूरेश-शैवेन शैव शासनात् ।
उपगीश्चैव गीतानां गाता वीशः प्रसीदतु ॥ १०३ ॥

समाप्तम्.

४९ आर्यापतिः = शिवः (भवानीपतिः) ५० आर्याः = श्रेष्ठाः ५१ शैवागमः = शैवशास्त्रं. ५२ आकूतः = अभिप्रायः

V

[illegible]

May. / Kai

कृष्णस्तवराजः

केशव के शवतुल्या न त्वयि विमुखा खला मलाकाराः।
भक्तास्तव सक्ताः स्तवनतिपूजासु प्रभो न के धन्याः ॥ १ ॥
माधव साधव एवं त्वद्यशसि रता न दुर्जना मलिनाः।
हंसा इव नो दृष्टा मौक्तिक-कवलादृता बकाः काकाः ॥ २ ॥
यत्साधुगीतया त्वं कीर्त्या निजयापि देव मुदमेषि।
तत्तां तव प्रियार्थं गातुमहं प्रेमतः प्रवृत्तोऽस्मि ॥ ३ ॥
यस्याद्दतकथ भगवन्नत्यादरतस्त्वमुपगताः शरणम्।
नत्या सकृदपि कृतया सत्यानंदप्रदो भवसि सद्यः ॥ ४ ॥
दत्वा विषमपरिमितं लब्धं त्वत्तोऽमृतं नु पूतनया।
पूतनयाद्य वृतस्त्वं कीर्त्या तत एव नित्य-नूतनया ॥ ५ ॥
यः सति साधुः स तथा न यथा सति साधुरीड्य एष सताम्।
सदसि कथयन्ति कवयः पापोद्धृतिमेव विस्मरन्ति न ताम् ॥ ६ ॥
अपि के त्वयि केशव न हि विनता विनतातनूजवाह जनाः।
कंसारे कं सारे पीते ते यशसि न च पुमर्थमिताः ॥ ७ ॥
अजगरमजगरानिधिमारिमत्युग्रं ग्रस्तसात्मशिशुवत्सम्।
अकरोरमृतनिधिं किं न करो दाता जनायते सुहृदे ॥ ८ ॥
अमुना यमुनामिव मे मतिमपदोषां यदाकदा कर्ता।
वद भो मदंभोगिमथन पृच्छामि यतस्त्वमादृतो यशसि ॥ ९ ॥
कुरु कुरुवर इव पतिते मयि शरतल्प इव देव संसारे।
करुणां करुणावरुणालय वरदगुरो मुकुंद कंसारे ॥ १० ॥
नानन्यप्यहमहितैः प्रसभं विषयैर्जनैः स धर्म इव।
क्रीडितुमल प्रवृत्तस्त्वं दीनानां स एव बंधुरसि ॥ ११ ॥
कामादिभिरहितैर्मे मतिरुग्रैः कौरवैरिव प्रसभम्।
धर्मस्य वधूरिव हा न्यायाद्विवशीकृता त्वया रक्ष्या ॥ १२ ॥
कंसाराते कीर्तिः कं सारा ते जनं न पातुमलम्।
वसुधाधाराद्य विभो न सुधाधारा क्षमाऽवितुं रुग्णम् ॥ १३ ॥

---

१ केशवः=के उदके शेतेऽसौ केशवः। २ मुद=आनन्दम्। ३ ईड्यः=पूज्यः। ४ विनता-तनूजः=गरुडः. ५ भोगी=सर्पः ६ वरुणालयः=सागरः ७ धर्मस्य वधूः=द्रौपदी.

य उपायनं प्रदातुं पृथुकप्रसृतिं त उपगतो भवता ।
अर्वतां स दीनबन्धोऽकारि सुदामा पदं मुदामाशु ॥ १४ ॥
कविना न विना व्रजति ख्यातिं बह्वपि यशः प्रभोर्जातु ।
मुदितमतः कुरु मां कविमविगीतकथा यथासुखं गातुम् ॥ १५ ॥
पीतांशुक गीतां शुककविना वाल्मीकिनेव रामस्य ।
रसिकाः पिबन्तु भवतः कीर्तिं देवाः सुधामिवाजस्रम् ॥ १६ ॥
साधु शुकेनेव पुनर्गीतानि यशांसि ते मयूरेण ।
ख्यातिं प्रयान्तु लोके भोः के बद्धादरा न नव्यरसे ॥ १७ ॥
स्तोतुमनसमकरोः किल गले स्पृष्ट्वा ध्रुवं ध्रुवं दरेतः ।
तद्वन्मामादरतः कुरु पुरुकरुणार्य निजनुतौ निपुणम् ॥ १८ ॥
नुतिकृति कृतादरस्त्वं सदासि सतां श्रुतमिति श्रुतिज्ञानाम् ।
त्वां तेन ते नमज्जनमन्दारं प्रार्थये न सम्भ्रमिम् ॥ १९ ॥
मनुते न नुतेरधिकं मतमन्यद्यदि तदिष्टमेव तव ।
वितरैं वरं मय्याश्रितहित खरांजितजगत्स्ववंशेन ॥ २० ॥
स्तुत्वाऽस्तु त्वामयमिह संसारे भो प्रभो जनो धन्यः ।
याचे यतस्त्वमिच्छां पूरयसि सुखं वदान्यमूर्धन्यः ॥ २१ ॥
येनार्थिकामपूर्तिः क्रियते खलु झटिति पारिजातेन ।
स मया कथं नु रमया पूजितमपहाय ते पदं सेव्यः ॥ २२ ॥
भवदाश्रितैः स लभ्यस्त्वं तु न जात्वपि तदाश्रितैर्भगवान् ।
भामोद्वारि स सततं न भवान् स्थित इंद्रमंदिरांतरपि ॥ २३ ॥
तं जडमविवेकिनमगमस्वाधीनं समाश्रयिष्यति कः ।
त्वां प्रभुमपास्य सर्वगमादिकविं करुणमाखिलकामकरम् ॥ २४ ॥
अन्तर्बहिरपि कठिनश्चिन्तामणिरुपल एव खल्वेषः ।
कामधुगपि पशुरशुभं भवतोऽन्यन्नाथ सर्वमस्माकम् ॥ २५ ॥
ब्रह्मादयोऽपि देवाः कृच्छ्रे त्वां देवदेवमुपयान्ति ।
सगदो जगदाधार प्राज्यामृतपाणिमिव गुरुं भिषजाम् ॥ २६ ॥
यः पुरदाहं चक्रे शक्रेण प्रार्थितः प्रभुः सपदि ।
सोऽपि वृकव्यसनात्किल विलयं गत एव रक्षितो भवता ॥ २७ ॥

९ पृथुक-प्रसृतिः=पसाभर पोहे इति महाराष्ट्रभाषायां. १० अ[illegible] ११ जातु=कदाचित्. १२ शुकः=शुकाचार्यः पक्षे पक्षिविशेषः १३ म[illegible] पक्षे बाँहः १४ दरः=शंखः १५ मंदारः=कल्पवृक्षः १६ वितर=देहि. १[illegible] वेणुः १८ वदान्य-मूर्द्धन्यः=दातृ-श्रेष्ठः १९ भामा=सत्यभामा (कृष्ण-पत्नी). [illegible] वृक्षं. २१ उपलः=प्रस्तरः (फत्तर). २२ सगदः=सरोगः २३ [illegible] २४ वृक[illegible]=भस्मासुर

भीतांस्त्रातुं दातुं वरमभिलषितं समस्तमर्थिभ्यः ।
अनलसमनलसमं खल-शलभ-लये त्वां वदन्ति सत्कवयः ॥ २८ ॥
गजमम्बु[25]जन्तुशक्राक्रान्तं चक्रायुधावता भवता ।
दत्तमनुक्त्वाप्यभयं षड्वर्[26]गग्राहपीडितेभ्यो नः ॥ २९ ॥
नारायणेत्यजामिल आक्रुश्यापत्यमप्यपत्यमातिः ।
त्वां प्राप पापनिलयैः[27] किल यः शतकल्पनिरयवासार्हः ॥ ३० ॥
त्वामहमनिशं कलये कलये यद् ध्वस्तसाध्वसोऽसि त्वम् ।
प्रणतेर्यत्नादव मा अव मामिय्यानतं दयालुमणे ॥ ३१ ॥
एकस्त्वमेव शाश्वत आस्ते सुखमब्जनाभ यदनल्पे ।
कल्पेऽखिललोकानां भो भगवन् भोगिभोगमयतल्पे[30] ॥ ३२ ॥
नाथ कथंकारं ते महिमानमगाधमिममहो ब्रूमः ।
यस्त्वस्तत्त्वविचारेऽप्याप्यास्ते प्रभुरथंचल भ्रूमः ॥ ३३ ॥
गोप्या कोप्यासस्ते पांसुलयापि[31] प्रसादमीश्वरतः ।
सद्याप्यसानतया न मया न मयाद उच्यतेप्यखिलैः ॥ ३४ ॥
बद्धोऽस्युलूखले त्वं गोप्या हंत व्रजेस दाम्ना[32] यम् ।
ज्ञातुं कवयो न वयोगतमपि यन्ति खलु सदाम्नायैम्[33] ॥ ३५ ॥
अवताऽरातिभ्यो जगदवतारा देव ये गृहीतास्ते ।
माथुरतः साधुरतः कोऽपि नतेष्विह तु सूद्धृता बहवः ॥ ३६ ॥
इह गोकुलं व्रतं ते शिशवोऽप्यसवः कुमारिकाः श्रुतयः ।
गोपा गुरवः परमेश्वर किंबहुनाऽस्य प्रियातिथयः ॥ ३७ ॥
माधुरमवतारमिमं मन्येऽखिलकामकल्पतरुमेव ।
वस्तुसकलमेकरसं कर्तुं द्रुतमस्ति जगति न रूमेव ॥ ३८ ॥
भुक्तं सह पशुपशिशुभिरुक्तं कृतमेव गोपवामदृशाम्[34] ।
मुक्तं चाश्रुवियोगे युक्तं भगवत्पदः किमात्मरते ॥ ३९ ॥
भक्तानां पुरतस्त्वां नर्तयतीत्थं स्वभक्त-वत्सलता ।
न व्यापृतो भवानिव कोऽपि कुटुम्बी क्वचित् कुटुंबे स्वे ॥ ४० ॥
पार्थसहायस्य न ते का वा रीतिः कुटुम्बिरीतिरिव ।
दूतत्वं सूतत्वं[35] भजतो व्रजतोऽनृतेन चापि पथा ॥ ४१ ॥
सक्तं सपत्नमथने भक्तं भजता किरीटिनं पार्थम् ।

---

२५ अंबु-जंतु-शक्रः=जलजंतुश्रेष्ठः नक्रः २६ षड्वर्गः=कामादि: २७ पापनिलयः=पाप-गृहं. २८ निरयः=नरकः २९ दयालुमणे=हे दयालुश्रेष्ठ. ३० तल्पः=शय्या. ३१ पांसुला=जारिणी. ३२ दाम्ना=रज्ज्वा. ३३ आम्नायः=वेदः ३४ वामदृशां=स्त्रीणां. ३५ सूतत्वं=सारथ्यं.

ऽयुक्त निजमहितत्वं सकलं स्वीकृत्य साधु सारथ्यम् ॥ ४२ ॥
सोढ्वाप्यायास मरं समरं गत्वासुसंशयं प्राप्य ।
लब्धेनैव स्वार्थः पार्थः परिरक्षितस्त्वया व्यसने[३६] ॥ ४३ ॥
भंगे श्रीकान्त नवे शान्तनवे[३७] प्रकुपिते प्रतिज्ञायाः ।
प्राप्तस्तथा न कंपं त्वं पंकजनेत्र हृदि यथा सख्युः ॥ ४४ ॥
उपनिषदां सर्वस्वं मूर्तं श्रेयः श्रियः सतां सत्त्वम् ।
वपुरापगेयसमरेऽनाहतमिषुविक्षतं न ते भिन्नम् ॥ ४५ ॥
श्रितमवतस्तव भीष्माद्रथचक्रभृतः क्षतप्रतिज्ञस्य ।
अद्यापि सत्यसंधैरप्युच्चै गीयते यशः सदसि ॥ ४६ ॥
भगवन्नूनं नूनं श्रितसमवनतोऽन्यदखिलमपि कर्म ।
परिपालयन्यदेकलमर्जुनमसि सर्वथा सतामीड्यः ॥ ४७ ॥
भवतं नक्तंदिवमपि कपिकेतुं नेतुमीप्सितां पदवीम् ।
किं किं न रक्षता कृतमुत किं किं कारितं न वान्यैस्ते ॥ ४८ ॥
धर्मो यदवददनृतं यदकाण्डेऽदर्शनं जगाम रविः ।
यदभजदिषुतल्पं कुरु-गुरुरन्यदपि तत्त्वयैव मतम् ॥ ४९ ॥
धर्मद्विषोनुसरणे न रणेऽपि धनुर्भृतां गुरोर्विजयः ।
धर्मस्य तु ध्रुवं सोऽशास्त्रस्यापीति तदुपादिष्टमिह ॥ ५० ॥
यदात्कृतं त्वयेश्वर नविनानामाशु तत्समुद्धृतये ।
धृतयेच्छया नृमूर्त्या श्रीसख्या शृण्वतां सतां धृतये ॥ ५१ ॥
यद्गोप्या राधिकयाऽराधि कयाधू-सुतेन[४१] चाप्यन्तः ।
त्वत्भवगदं पदं ते ध्यायन्ति विमुक्तिपदमपि न सन्तः ॥ ५२ ॥
राधामाधवयोरसि बाधां माधाग्नि कामजां त्वत्वा ।
सुप्तं गुप्तं सतमः पुंजे कुंजे स्मरन्ति यतयस्त्वाम् ॥ ५३ ॥
गोपिभिर्मुक्त्वापि विटैः[४२] कृत्वापि न दस्युभिः[४३] समस्तेयैर्मे[४४] ।
हत्वापि घातुकैस्त्वं जगति गुणस्तेऽद्भुतः समस्तेऽयम् ॥ ५४ ॥
यासां त्वया सुसंचितमपहृतमेकान्ततोऽपि नवनीतम् ।
ताभिरबलाभिरपि वद मनसि हृते देव किं न तव नीतम् ॥ ५५ ॥
राधा-स्तन-निहित-दृशं गलदमल-स्तन्य[४५]-बिन्दु-वदनेन्दुम् ।
त्वां ध्यायन्तः श्रीः साधुसभा साश्रुराम कुत्सापि ॥ ५६ ॥
त्वामधिकदम्भमबला-पटु-पटपाटच्चरं[४६] विलिख्य यथा ।

---

३६ व्यसने=संकटे. ३७ शांतनव.=भीष्मः. ३८ आपगेयः=भीष्मः ३९ सत्यसं-धैः=सत्यप्रतिज्ञैः ४० कपिकेतुः=अर्जुनः ४१ कयाधू-सूनुः=प्रन्हादः ४२ विटः=जारः ४३ दस्युः चोरः ४४ स्तैयं=चौर्यं. ४५ स्तन्यं=दुग्धं. ४६ पाटच्चरं=चोरं.

सद्यः प्रत्यहमात्म-व्रत-संसिद्ध्यै भजन्ति पतिमन्याः ॥ ५७ ॥
दीपमिव त्वां स्नेहादुद्भासितरूप-सम्पदं गोप्यः ।
अभजन् पतङ्गिका इव मरणभयमपास्य रुचिर-रुचि[47]-रुचयः ॥५८॥
मृत्स्नाशनै[48]रागसि विभो भीताया विश्वदर्शनान्मातुः ।
स्वास्मिन् दुर्लभ-पुत्र-स्नेहापायात्त्वमेव बहु-भीतः ॥ ५९ ॥
हा बत हन्त पिबन्तं त्वाममृत-निधिं ततं[49] निरस्य भुवि ।
याता माता बहु-मत-दुग्धा मुग्धाः खलु स्त्रियो जाड्या ॥ ६० ॥
दुग्धे मुग्धे किमधिकमम्ब त्वं बत सुवञ्चितासीति ।
ज्ञापयितुमेवमेव त्वं गो-रस- भाजनेऽकरोः कोपम् ॥ ६१ ॥
गुरुभिरपि गुरु-वरेण च भवता ये बोधिताः क्रतौ गुरवः ।
हन्त कथं तेऽप्यन्धा बन्धावहमेव यैर्वृतं कर्म ॥ ६२ ॥
धन्या मन्यामहे ता रामाः सत्कृतोऽसि याभिस्त्वम् ।
अब्ज-पतीनां लोकाः सत्यः सत्यः स्तुतिर्न महिमाऽऽसाम् ॥ ६३ ॥
श्री-कर-धृतो जडोऽपि प्राप यशो जगति पर्वतः स तैतम् ।
तद्दुर्दिनै[50]मप्यभवत् साधु-मतं पुण्य-पर्वतः सततम् ॥ ६४ ॥
करुणामृत-घन करुणामृत-वृष्ट्या ते जितैव सा वृष्टिः ।
जडजाप्यधः पतन्ती हेतुः पङ्कस्य याचकं पश्य (इय ?) ॥ ६५ ॥
गोवर्द्धन-धर तव भुज-वीक्षा-क्षण-विस्मृतात्मनां स्त्रीणाम् ।
अपि खर-शब्दा अब्दाः शंपाः[51] कम्पाय नाभवन् मनसः ॥ ६६ ॥
त्रासेन सहोत्खातः सुहृदां सममुद्धृतो गवां पुच्छैः ।
अवतारितः पुनर्गिरिरिन्द्र-मद-भरेण साकमीश्वर ते ॥ ६७ ॥
भू-गोल-भृद्भुजङ्ग[52]मनुकुर्वन् लीलया धृताहार्यः ।
उच्चैर्बभौ भुजस्ते छत्रस्य महेन्द्रनील-दण्ड इव ॥ ६८ ॥
वपुषः कान्त्या मेघास्तव करका[53]-राशयः स्मित-प्रभया ।
तडितोऽपि वाससा खलु पीता भीता भुजा ध्रुवं जाताः ॥ ६९ ॥
पर्वत-धरेण भवता वज्रधरो[54] लीलयाऽद्रि-[55]भिद्विजितः ।
आस्तां गिरिरपि हरिरपि जेतुमलं त्वं तृणेन कालमपि ॥ ७० ॥
गोत्रारि[56]र्वज्र-भृतः क्रुद्धाद्रिरिरेकलोऽप्यपक्षोऽपि ।
प्राप्तो जयं न भङ्गं सत्पुरुष-भुजाश्रितो न को विजयी ॥ ७१ ॥

---

४७ रुचिर रुचिः=सुंदर कांतिः ४८ आगः=अपराधः ४९ ततं=विस्तृतं. ५० दुर्दिनं=मेघ पटलयुक्तं दिनं. ५१ शंपा=विद्युत्. ५२ भुजंगं=शेषं. ५३ करकाः=घनोपलाः (गारा इति लोके). ५४ वज्रधरः=इंद्रः ५५ अद्रिभित्=पर्वतभेत्ता. ५६ गोत्रारिः=पर्वतशत्रुः (इंद्रः).

अखिलापराध-शमनं नमनं तव पादयोः सकृद्विहितम् ।
किं प्रागिन्द्राद्दूरीकर्तुमनमतोऽन्यदद्भुतं तीर्थम् ॥ ७२ ॥
आगस्कृत्सु नमत्सु प्राक् कुरुषे त्वं क्षमां भृशं करुणः ।
अपराधिनां न चेत् किं कवचं तव चण्ड-काल-भीति-जुषाम् ॥ ७३ ॥
त्रातो न कस्तृणादिर्जीवस्ते स्व-पद-रेणुना दरतैः[57] ।
कश्च चरः संसारान्मशकादिर्मधुर-वेणु-नाद-रतः ॥ ७४ ॥
यच्चुम्बितस्त्वयानिशमीश्वर परमादृतेन वंशै[58]स्तिम् ।
मन्ये रमाधराद्वरमिह माधुर्यं सदा नवं शस्तम् ॥ ७५ ॥
जगता सममनुभूतं माधुर्यं चुम्बता त्वया यस्य ।
स वरः श्रियोऽधरादिति वदता कविना श्रियः किमपराद्धम् ॥ ७६ ॥
कास्ताः स्त्रियो न नीता वंशेन स्थाणु-भावममुना याः ।
अन्यासां कैव कथा सुकवि-शुकः स्तम्भ[59]माह यमुनायाः ॥ ७७ ॥
एणो[60] न केवलं तव वेणोरवमोहितो भुजङ्गोऽपि ।
हिंस्रोऽपि देव बहुना किं स्रोतश्चारि-जन्तु[61]-निकरो[62]ऽपि ॥ ७८ ॥
सुसदां[63] सुमोहिता रव-मधु पाययता च वेणुना सद्यः ।
पिदधे श्रुती शयाभ्यां[64] यासां मुखमीक्ष्य मङ्क्षु[65] नासत्यैः[66] ॥ ७९ ॥
वंशो राका[67]-जानेरंशोरपि ताप-नाशको मधुरः ।
कोऽप्यद्य एष वहता गोप्यो दूरं हृता रसैर्येन ॥ ८० ॥
अगदं जगदन्तर्बहिरस्तु समुर्दैव[68] यशोऽमृतं पीत्वा ।
इति भगवत्यपराद्धं विधिना खलु वत्स-वत्सपान् हरता ॥ ८१ ॥
तदनुभवोक्तेर्ब्रूमो वयमद्भुतहन्तमेव मोहस्तम् ।
निन्ये वशमाकृष्य द्युमणि[69]मिव निजगृहं तमोहस्तम् ॥ ८२ ॥
पित्रा गवां रसास्ते तव पुत्रेण तु सपालका वत्साः ।
त्वच्चरितेन तु सकला गोपा गोप्यो वयं सुराश्च हृताः ॥ ८३ ॥
स कथं निन्द्यः कविभिः संस्थापयितुं पदे प्रशस्ते नः ।
योऽमृतसागर-फेनस्तेनमिह ततान ते यशः स्तेनः ॥ ८४ ॥
कृच्छ्राद्यदादित्याप्तं दुर्लभमतुलैस्तपोव्रतैश्चीर्णैः ।
प्राप्ता गोप्यो गावस्त्वच्छ्वत्वं श्रियो जगन्मातुः ॥ ८५ ॥
यद्गोप्यो गावस्त्वामापुरपदस्त्वमीश्वरं जगतः ।

---

५७ दरतः=भीतितः ५८ वंशः=वेणुः ५९ स्तंभः=स्थिरत्वं. ६० एणः=हरिणः ६१ स्रोतश्चारिजंतुः=जलचरः ६२ निकरः=समूहः ६३ सुसदां=देवानां. ६४ शयः=हस्तः ६५ मंक्षु=सत्वरं. ६६ नासत्यः=अश्विनीकुमारः ६७ राका-जानिः=पूर्णिमापतिः (चंद्र). ६८ समुत्=सानंदं. ६९ द्युमणिः=सूर्यः

न गतः किमिहोत्कर्षं विध्यपराधोऽपि नाकिनां नगैतैः ॥ ८६ ॥
अङ्गीकृता यदा ते गोगोपीनां जगद्गुरो सुतता ।
मूर्तिर्न केवलं तव जाता सत्कीर्तिरपि जगत्सु तैता ॥ ८७ ॥
विधि-पशु-पशुप-समदृशा गोप-करायत्त-बंध-मोक्षेण ।
वत्सायितेव भगवन् दाम्न्यर्पित कन्धरेण तृणमशितम् ॥ ८८ ॥
येषां यत्स्वतनुर्भुवा धनमपहृतमीश सत्य-पतिनापि ।
तेषां तदनूनाधिकमात्मधनं तेऽर्पितं सदीक्ष्येन ॥ ८९ ॥
सव संस्कृत-हविषोऽपि प्रापितमुच्चैः पदं त्वया यवसैम् ।
भव-सन्तरणेच्छुरहं हन्त तृणेष्वपि तदा नतेष्ववसम् ॥ ९० ॥
हा हन्त तं तमन्तर्भावयतोऽनुग्रहं व्रजे भवतः ।
मम तदपात्रस्य मनः किं तां चिन्तां ब्रवीमि यां यातम् ॥ ९१ ॥
वात्सीभूतं ब्रह्म ब्रह्म-प्रमुखैर्महात्मभिश्चिन्त्यम् ।
त्वां गो-गोपी-गोपाः पुपुषुः प्रेम्णा तनौ च रोमाञ्चम् ॥ ९२ ॥
स्वर्गाद्गुरु सत्य-पैदं सत्य-पदाद्गुरु-तरं च वैकुण्ठम् ।
वैकुण्ठादपि गुरुतममवनौ वृंदावनं वनं मन्ये ॥ ९३ ॥
याः पूर्वं न क्वचिदपि कस्मैचिदपि प्रदर्शिताः प्रभुणा ।
अत्रैव पीत-पैटै ता अटता नटता त्वया कलाः सकलाः ॥ ९४ ॥
यौ कमलावक्षस्यपि वैक्षोज-स्पर्श-भूरि-रक्त-तलौ ।
तौ तव वृन्दावन-भुवि चङ्क्रमणं चक्रतुश्चिरं चरणौ ॥ ९५ ॥
वृन्दावनेऽनुभूतं गोपैर्गोपीभिरपि च यद्गोभिः ।
तन्नन्दनेऽपि न सुरैर्नानन्दवनेऽपि पण्डितैः शैर्म ॥ ९६ ॥
चरण-सरोज-रजोभिर्देव-सरित्कोतिपयैः पुरा प्राप्तेः ।
महिमानमियन्तमिता वृन्दावन-भूः किमाङ्किता पदकैः ॥ ९७ ॥
तृण-गुल्म-व्रैतति-द्रुम-दृषैदो वृन्दावनेऽत्र धूलिरपि ।
सर्वं तीर्थाधिकमिदमीश्वर तीर्थाङ्घ्रिणा कृतं भवता ॥ ९८ ॥
भोः कतमो लोकतमोवाद्यं हर्तुं क्षमो न आदित्यात् ।
तेनाम्बि-लोक- पादादन्तरमपि लोक-बन्धुतरस्त्वत्तः ॥ ९९ ॥
कुम्भ-भुवाम्भोधिरिव स्वेन निरुपमेन तेजसा यशसा ।
शौरि-भुवा भवता द्रागप्ययमप्ययमलं भवो नीतः ॥ १०० ॥

---

७० विध्यपराधः=ब्रह्मदेवस्यापराधः ७१ नाकिनां नगतः=कल्पवृक्षतः ७२ तता=विस्तृता. ७३ स्वतनुभुवा=स्वपुत्रेण (ब्रम्हणा). ७५ यवसं=तृणं. ७५ सत्यपदं=ब्रम्हलोकः ७६ पीतपट=हे पीताम्बरधारिन्. ७७ वक्षोज =स्तनः ७८ शर्म=सुखं. ७९ [illegible]=[illegible]. ८० दृषद्=उपलाः ८१ कुम्भ-भुः=अगस्त्यः

गो-गोपि-पण्डितानां सर्वेषां सम्मत: सदा नन्द: ।
यत्तैरलब्ध-गन्धस्त्वमपि तदङ्क-गत: सदानन्द: ॥ १०१ ॥

जगति यशोदा-नन्दौ धन्यौ शिशुना त्वया जगद्गुरुणा ।
उक्तावाश्लिष्य गले यौ शतकृत्वस्त्वयाम्ब-तातेति ॥ १०२ ॥

वृद्धैरलभ्यैव नो मैत्री भवतैव गोप-शिशुनाऽऽस्ताम् ।
वृद्ध-सखा यामाप्तास्त्वत्तो मुदमाश्वपीह पिशुनास्ताम् ॥ १०३[२] ॥

यममृतमुचोवरं निज-किसलयतोऽमंस्त देव-विटपी[२] तम् ।
किं घोष[३]-योषिदधरं धन्यं ब्रूमो न देव विट[४]-पीतम् ॥ १०४ ॥

श्राग्द्रवति धी: श्रुते ते यशसि यथा नस्तथा न वेदान्ते ।
लब्धरति: स्वपिति भुवि न पल्यङ्केऽप्यन्यथा नवे दान्ते ॥ १०५ ॥

त्वां सगुणं ब्रह्म वयं निर्गुणमपि नाथ संश्रिता: कवय: ।
रुचि-वैचित्र्यादेकेऽलंकृतिमिव हेम केवल मिवान्ये ॥ १०६ ॥

कैवल्यं पदमाप्ता ये भक्ता ये च विद्विषस्तव ते ।
तेन श्रिता वयं त्वां ब्रूमो भगवन् प्रभो नमो भवते ॥ १०७ ॥

सकलं स्वत्रय: कवयस्तव यत्र वयस्यममृतकरमहस:
सुयश: काले देशे व्यवहारे तं नयन्ति तत्रैव ॥ १०८ ॥

सरसि सरोजमिव त्वयि हृदयमिदं न: सुजीवने वसतु ।
तत्र श्रीरिव भक्तिश्चात्रापि परन्तु सेव माऽत्र चला ॥ १०९ ॥

गीत्या मृग इव कुशलै: कामी प्रभुरिव सुरूपयार्पितया ।
भक्त्या भागवतैस्त्वं भगवन् बहुभिर्वशीकृतोऽस्यासु ॥ ११० ॥

हृतुस्त्वं कस्य कवे: कालाच्छूत-रत्न-सानुकम्पस्य ।
तव संश्रयेन पादौ श्रित-चिन्ता-रत्न-सानु-कम्पस्य ॥ १११ ॥

इति श्रीराम-नन्दन-मयूर-रचित: श्रीकृष्ण-स्तवराज: सम्पूर्ण:

---

८२ विटपी=वृक्ष: ८३ घोष-योषित=गोप-स्त्री. ८४ विट:=जार: ८५ दान्ते=ह-सितदंतमये. ८६ वयस्य=मित्र. ८७ महस:=तेजस: